THE BOOK WAS DRENCHED

UNIVERSAL
LIBRARY
OU_184384
UNIVERSAL
LIBRARY

आनन्दाश्रमसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ३६

कृष्णयजुर्वेदीयं

तैत्तिरीयारण्यकम् ।

श्रीमत्सायणाचार्यविरचितभाष्यसमेतम् ।

(सपरिशिष्टम्) ।

तत्र प्रथमप्रपाठकादारभ्य षष्ठप्रपाठकपर्यन्तोऽयं

प्रथमो भागः (१) ।

—०:——:०:—

एतत्पुस्तकं वे० शा० रा० रा० " बाबाशास्त्री फडके " इत्येतैः संशोधितम् ।

तच्च

बी. ए. इत्युपपदधारिभिः

विनायक गणेश आपटे

इत्येतैः

पुण्याख्यपत्तने

श्रीमन् ' महादेव चिमणाजी आपटे ' इत्यभिधेय-महाभागप्रतिष्ठापिते

आनन्दाश्रममुद्रणालये

आयसाक्षरैर्मुद्रयित्वा

प्रकाशितम् ।

द्वितीयेयमङ्कनावृत्तिः ।

शालिवाहनशकाब्दाः १८४८ ।

ख्रिस्ताब्दाः १९२६ ।

(अस्य सर्वेऽधिकारा राजशासनानुसारेण स्वायत्तीकृताः) ।

मूल्यं सार्धरूपकचतुष्कम् (४।८) ।

ॐ तत्सद्ब्रह्मणे नमः ।

कृष्णयजुर्वेदीयं

तैत्तिरीयारण्यकम् ।

श्रीमत्सायणाचार्यविरचितभाष्यसमेतम् ।

(तत्र प्रथमप्रपाठके प्रथमोऽनुवाकः ।)

हरिः ॐ ।

*भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिः । व्यशेम देवहितं यदायुः ॥
स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ।
ॐ शान्तिः शान्तिः शान्तिः ।

इति शान्तिः ।

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥ १ ॥
यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ २ ॥
तत्कटाक्षेण तद्रूपं दधद्बुक्कमहीपतिः ।
आदिशन्माधवाचार्यं वेदार्थस्य प्रकाशने ॥ ३ ॥
ये पूर्वोत्तरमीमांसे ते व्याख्यायातिसंग्रहात् ।
कृपालुः सायणाचार्यो वेदार्थं वक्तुमुद्यतः ॥ ४ ॥

* व्याख्येयातिरिक्तं शान्तिमन्त्रादिरूपं ग्रन्थजातं क. ख. पुस्तकयोर्न संगृहीतम् । एवं प्रतिप्रपाठकं द्रष्टव्यम् ।

१ ख. निःश्वसितं ।

व्याख्याता सुखबोधार्थं तैत्तिरीयकसंहिता ।
तद्ब्राह्मणं च व्याख्यातं शिष्टमारण्यकं ततः ॥ ६ ॥
अरण्याध्ययनादेतदारण्यकमितीर्यते ।
अरण्ये तदधीयीतेत्येवं वाक्यं प्रवक्ष्यते ॥ ६ ॥
काण्डमारण्यकं सर्वं व्याख्यातव्यं प्रयत्नतः ।
आरण्यकविशेषास्तु पूर्वाचार्यैरुदीरिताः ॥ ७ ॥
होतृन्प्रवर्ग्यकाण्डं च याज्ञोपनिषदो विदुः ।
आरुणीयविधिश्चैव काठके पारिकीर्तितः ॥ ८ ॥
रुद्रो नारायणश्चैव मेधो यश्चैव पित्रियः ।
एतदारण्यकं सर्वं नाव्रती श्रोतुमर्हति ॥ ९ ॥
कठेन मुनिना दृष्टं काठकं पारिकीर्त्यते ।
सावित्रो नाचिकेतश्च चातुर्होत्रस्तृतीयकः ॥ १० ॥
तुर्यो वैश्वसृजस्तद्वद्ब्रह्मिरारुणकेतुकः ।
स्वाध्यायब्राह्मणं चेति सर्वं काठकमीरितम् ॥ ११ ॥
नारण्याधीतिनियमः सावित्रादिचतुष्टये ।
अतस्तद्ब्राह्मणग्रन्थे श्रुतं व्याख्यातमप्यदः ॥ १२ ॥
वह्निरारुणकेत्वाख्यः काठके पञ्चमः श्रुतः ।
आरण्यकादावाम्नातस्तद्व्याख्याऽथ प्रतन्यते ॥ १३ ॥

अत्र बौधायने कल्पे तत्प्रकारोऽभिहितः— " एतेनाऽऽरुणकेतुको व्याख्यातो यावन्मन्त्रबीष्टकाः । लोकंपृणाँश्च स्वयमातृण्णाँश्चाऽऽप एव " इति । पूर्वत्र सावित्रादिचयनानामभिहितत्वादेतनेति तत्परामर्शः । अबूपा इष्टका अबीष्टकाः । नात्रेष्टका मृदादिना निष्पादनीयाः । किं त्वाप एवेष्टकाबुद्ध्योपधेया इत्यर्थः । उपधानेऽस्मिन्कल्प एवमभिहितः—उत्तरवेद्यावपनकाले तूष्णीं जानुदघ्नं खात्वाऽन्यत्र मृदं निवपति विदेरग्निरित्यादिर्लुप्यते । ध्रुवाऽसीति प्रतिपद्यते । हस्तग्राभमवीष्टका उपदध्यात् । भद्रं कर्णेभिरिति द्वाभ्यां शान्तिं कृत्वा ताभ्यामुपदधाति " इति । [हस्तग्राभं] हस्तग्राहं हस्तेन गृहीत्वा जलमित्यर्थः । तत्र शान्त्यर्थां प्रथमामृचमाह—

ॐ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिः । व्यशेम देवहितं यदायुः, इति ।

---

१ ग. ॅताः ॥ ७ ॥ हेतून्प्र° । २ ख. 'विधी चैव । ३ ख. °र्तितौ ॥ ८ ॥ रु° । ४ ख. मेधयोश्चै° । ५ ख. प्रवर्तते । ६ ख. ग बोधायने । ७ ग °णाश्च स्व° । ८ ग. °ण्णाश्चाऽऽप ।

हे देवा इन्द्रादयो भद्रं कल्याणं श्रुतिस्मृतिवाक्यरूपं **कर्णेभिराचार्यान्तेवासिरूपाणामृत्विग्यजमानरूपाणां** वाऽस्माकं बहूनां कर्णैः **शृणुयाम** युष्मत्प्रसादात्सर्वदा श्रोतुं समर्थाः स्याम । श्रुत्वा च **यजत्रा** यागक्षमा वयं **भद्रं** कल्याणं यज्ञादिकं कर्माक्षाभिश्चक्षुरिन्द्रियैः साक्षात्पश्येम । **स्थिरैरविकलैरङ्गै**श्चक्षुरादिभिर्हस्तादिभिश्चावयवैस्तनूभिस्तथाविधशरीरैर्युक्ता वयं **तुष्टुवांसो** युष्मदीयां स्तुतिं कुर्वाणा यद्यस्मात्कारणाद्देवहितं देवेन प्रजापतिना समर्पितं सर्वमप्यायुर्व्यशेम विशेषेण प्राप्नवाम । तस्मादपमृत्योरभावाच्चिरं भद्रं शृणुयामेति पूर्वत्रान्वयः ।

अथ द्वितीयामाह—

स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु, इति ।

वृद्धैर्महात्मभिः सदा पुराणादिषु श्रूयत इति **वृद्धश्रवाः** । तादृश **इन्द्रो नोऽस्माकं स्वस्ति दधात्वध्ययनश्रवणानुष्ठानार्थं क्षेमं संपादयतु** । विश्वं वेत्ति जानातीति **विश्ववेदाः** । तादृशः **पूषाऽपि नः स्वस्ति दधातु । अरिष्टम**हिंसा तस्य **नेमि**स्थानीयः । यथा लोहमयी नेमिः काष्ठमयस्य चक्रस्य भङ्गाभावाय पालयत्येवमयं **तार्क्ष्यो** गरुडोऽपि सर्पादिकृतां हिंसां निवार्य तत्पालकत्वादरिष्टनेमिः । तादृशस्तार्क्ष्यो **नः स्वस्ति दधातु । बृहस्पतिश्च** ब्रह्मवर्चसं परिपाल्य **नः स्वस्ति दधातु** । एतन्मन्त्रद्वयं शान्त्यर्थमादौ पठित्वा तन्मन्त्रद्वयेनाऽनिष्टकाद्वयमुपदध्यात् ।

कल्पः—"आपमापामिति पञ्चभिर्महानाम्नीभिरुष्णोदकम्" इति । उपदधातीत्यनुवर्तते । तत्र प्रथमामाह—

आपमापामपः सर्वाः । अस्मादस्मादितोऽमुतः (+ १) ।
अग्निर्वायुश्च सूर्यश्च । सह संचस्करद्धिया, इति ।

अहं सर्वा अपः सर्वदेशवर्तीनि जलान्या**पमापां** पुनः पुनः प्राप्तवानस्मि । आपमित्यस्य वीप्सया पौनःपुन्यं लभ्यते । दीर्घस्य छान्दसत्वाद्द्वितीयोऽप्यापमित्येव शब्दः । जललाभाय स्थानविशेषा निर्दिश्यन्तेऽस्मादस्मादि[ति]दंशब्देन वीप्सायुक्तेन सर्वनाम्ना । जलस्थानानि गङ्गासरस्वतीयमुनागोदावरीकावेर्यादीनि विद्यन्ते तस्मात्सर्वस्माज्जलस्थानात्प्राप्तवानस्मीति पूर्वत्रान्वयः । **इतोऽमुत** इत्याभ्यां शब्दाभ्यां भूलोकस्व-

---

+ वाक्यदशकबोधकोऽयमङ्कः । एवमग्रेऽपि बोध्यम् । अयं च क. ख. पुस्तकयोर्नास्ति । एवमग्रेऽपि स तत्र नास्तीति बोध्यम् ।

---

१ क. ख. 'रीरयुक्ता । २ ख. ग. तीयमा° । ३ क. °यच्च° । ४ ख. ग. °त्वा प्रणवद्व° ।

र्गलोकावभिधीयेते । तस्मादप्युभयस्माज्जलं प्राप्तवानित्यन्वयः । तामेतां सर्वजलप्राप्तिम-
ग्निवायुसूर्याः संपादयन्तिवति शेषः । अहं तैर्देवैः **सह ऋद्ध्या** समृद्धिनिमित्तं
संचस्कर ता अपः संस्करोमि ।

अथ द्वितीयामाह—

वाग्वश्वा रश्मिपतयः । मरीच्यात्मानो अद्रुहः ।
देवीर्भुवनसूवरीः । पुत्रवत्त्वाय मे सुत, इति ।

वायव एवाश्वस्थानीया वोढारो यासामपां ता **वाग्वश्वाः** । आदित्यरश्मय एव
पातारो यासामपां ता **रश्मिपतयः** । मरीचय एवाऽऽत्मा शरीरमाधारभूतं यासामपां
ता **मरीच्यात्मानः** । **अद्रुहः** कस्यचिदपि द्रोहमकुर्वाणाः । **देवीः** स्वच्छत्वेन द्योत-
मानाः । **भुवनसूवरी**र्भूतजातस्य सवित्र्यः । ईदृश्य आपो याः सन्ति तथाविधा हे
आपो यूयं मे मम **पुत्रवत्त्वाय** बहुपुत्रयुक्तत्वाय **सुत**ानुजानीत ।

अथ तृतीयामाह—

महानाम्नीर्महामानाः । महसो महसः स्वः ।
देवीः पर्जन्यसूवरीः । पुत्रवत्त्वाय मे सुत(२),इति ।

महदधिकं नाम यासामपां ता **महानाम्न्यः** । आप्नोतिधातोरुत्पन्नस्याप्शब्दस्य
सर्वफलप्राप्तिवाचकत्वान्महानामत्वम् । **महामाना** अधिकपूजायुक्ताः । सर्वकर्मसु शुद्धि-
हेतुत्वेनाधिकपूज्यत्वम् । **महसो महस**स्तत्तद्देवताविषयपूजायाः **स्वः** सवित्र्यः प्रवर्तिका
इत्यर्थः । सति ह्युदकेऽर्घ्यपाद्यादिना देवाः पूज्यन्ते । **देवीः** स्वच्छत्वेन द्योतमानाः ।
पर्जन्यसूवरीर्मेघेन प्रेरिताः । तादृश्यो या आपः सन्ति तथाविधा हे आपो **मे** मम
पुंत्रवत्त्वाय बहुपुत्रसंपत्तये **सुत** प्रेरयत ।

अथ चतुर्थीमाह—

अपाश्न्युष्णिमपा रक्षः । अपाश्न्युष्णिमपा रघम् ।
अपाघ्राम्पं चावर्तिम् । अप देवीरितो हित, इति ।

अश्नाति भुङ्क्त इत्यग्निर्भोक्ता । ओषति दहतीत्युष्णिर्दाहकोऽग्निः । अश्नीनां भोक्तृ-
णामुष्णिर्दाहको योऽग्निः सोऽयमश्न्युष्णिः । योऽग्निर्गृहान्दहति सोऽयं भोग्य-
वस्तुविनाशकत्वाद्भोक्तृदाहको भवति । तादृशमग्निमितोऽस्मात्पार्श्वाद्धे आपो यूयम-
पहितापहिनुत । वियोजयतेत्यर्थः । तथा **रक्षो** बाधकं राक्षस**मपहित** । तथाऽ-

---

१ क ख. हे यू° । २ क. °हकोऽग्निः ।

इन्युष्णि भोक्तॄणां शरीरदाहकं ज्वरादिरूपमग्निमपहित । [रघं!] ज्वरदाहकृतं शरीरशोषणं तद्धेतुभूतं पापं चापहित । अघ्नां प्राणादिज्ञानशक्त्यभावमपहित । अवर्तिं वृत्तिर्जीवनं तद्विरोधि दारिद्र्यमपहित । देवीः स्वच्छत्वेन द्योतमाना हे आपोऽन्यदपि प्रतिकूलं सर्वमितोऽस्मत्समीपादपहित ।

अथ पञ्चमीमाह—

वज्रं देवीरजीताश्च । भुवनं देवसूवरीः ।
आदित्यानदितिं देवीम् । योनिनोर्ध्वमुदीषत, इति ।

हे आपो यूयं देवीद्योतनात्मिकाः सत्यो वज्रमिन्द्रायुधमूर्ध्वमुपरिदेशे द्युलोक उदीषतास्मद्रक्षार्थमुन्नयत । उपरि हि वज्रे दृश्यमाने शत्रूणां भीतत्वादस्माकं रक्षा भवतीत्यर्थः । अजीताश्शत्रुभिरजितानस्मानप्युपरिदेशे रक्षार्थमुन्नयत । भुवनं भूतजातं गवादिकं चोदीषत । देवसूवरीर्देवानामपि सवित्र्यः प्रेरयित्र्यो यूयमादित्यानदितेः पुत्रान्सर्वान्देवानदितिं देवीं च योनिना कारणत्वेनोदीषत । सर्वेऽपि देवा अस्मद्रक्षायाः * कारणा भवन्वित्यर्थः ।

कल्पः—" शिवा नः शंतमे(मा इ)ति × सौषध्योऽपोऽध्वर्यवे ददाति । स ताः प्रतिगृह्य शिवा न इत्युपदधाति" इति । पाठस्तु—

शिवा नः शंतमा भवन्तु । दिव्या आप ओषधयः, इति ।

दिवि भवा या आपो याश्चौषधयो विद्यन्ते ताः सर्वा नोऽस्माकं शिवाः सुखहेतवः शंतमा अतिशयेन दुःखशान्तिहेतवश्च भवन्तु ।

कल्पः—" सुमृडीकेति भूमिवतीमुपदध्यादेताः पुरस्तात् " इति । पाठस्तु—

सुमृडीका सरस्वति । मा ते व्योम संदृशि (३), इति ।

= अमुतः सुतौषधयो द्वे च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके प्रथमप्रपाठके
प्रथमोऽनुवाकः ॥ १ ॥

---

* अत्र पुंस्त्वं चिन्त्यम् । पाठस्तु सकलादर्शपुस्तकेष्वेवमेवोपलभ्यते । करोतीति कारण इति व्युत्पत्तिर्वा । × छान्दसत्वात्सुधुत्वम् । = एतदनुवाकगतवाक्यदृशकसंकलनार्थं तत्तद्वाक्यदृशकान्तिमपदगणनम् । एवं प्रत्यनुवाकसमाप्तौ ज्ञेयम् । एतच्च क. ख. पुस्तकयोरेकस्याप्यनुवाकस्य समाप्तौ न दृश्यते ।

---

१ क. °त प° । २ ख. °तमाना° । ३ क. °क्षार्थं वज्रमु° ४ क. ख. ग. °क्षार्थं वज्रमु° ।

हे सरस्वति सरोयुक्तभूमिरूप इष्टके त्वं **सुमृडीका** सुष्ठु सुखहेतुर्भव । **ते** तव संबन्धि **व्योम** च्छिद्रमोषधिभिराच्छन्नत्वान्**मा संदृशि** दृष्टं मा भूत् ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यके प्रथमप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

अथ प्रथमप्रपाठके द्वितीयोऽनुवाकः ।

कल्पः—" स्मृतिः प्रत्यक्षमैतिह्यमित्यष्टौ मध्ये शुक्रं ते अन्यदिति च " इति । उ पदध्यादित्यनुवर्तते । तत्र प्रथमामाह—

स्मृतिः प्रत्यक्षमैतिह्यम् । अनुमानश्चतुष्टयम् ।
एतैरादित्यमण्डलम् । सर्वैरेव विधास्यते, इति ।

स्मृतिरनुमेयश्रुतिमूलं मन्वादिशास्त्रम् । **प्रत्यक्षं** सर्वपुरुषाणां श्रोत्रेण ग्राह्यं वेदवाक्यं च । **ऐतिह्यमितिहासपुराणमहाभारतब्राह्मणादिकम् । अनुमानः** शिष्टाचारः । तेन हि मूलभूतं श्रुतिस्मृतिलक्षणं प्रमाणमनुमीयते । तदेतत्स्मृत्यादिचतुष्टयमवगतिकारणभूतं प्रमाणम् । **एतैः** स्मृत्यादिभिः **सर्वैरेव** प्रमाणैरादित्यमण्डलं **विधास्यते** प्रमीयते, यादृशमिदं मण्डलं भवति यथा च प्रवर्तते यथा वा मन्वन्तरादिभेदभिन्नं कालं प्रवर्तयति यथा चोदकसृष्ट्यादिना विश्वमुत्पादयति तत्सर्वं स्मृत्यादिप्रमाणसिद्धम् । हेऽविष्टके त्वं तथाविधमण्डलस्वरूपाऽसीति स्तुतिः ।

अथ द्वितीयामाह—

सूर्यो मरीचिमादत्ते । सर्वस्माद्भुवनादधि ।
तस्याः पाकविशेषेण । स्मृतं कालविशेषणम्, इति ।

अयं **सूर्यो** जगदादौ **मरीचिं** सर्वव्यवहारहेतुभूतं कंचिद्रश्मिमादत्ते । कुत्राऽऽदत्त इति तदुच्यते—**सर्वस्माद्भुवनादधि** सर्वस्य भूतजातस्योपरि, रसवीर्यविकारादिभिः सर्वभूतजातमनुग्रहीतुमित्यर्थः । **तस्या** मरीचेः **पाकविशेषेण** तत्कृतेन पदार्थपरिपाकतारतम्येन **कालविशेषणमस्माभिः स्मृतं** भवति । प्रथमं तावद्बीजं मरीचिकृतेन केनचित्पाकेनाङ्कुरी भवति स चाङ्कुरः पाकान्तरेण काण्डी भवति तच्च काण्डं पाकान्तरेण पत्रपुष्पाण्युत्पादयति तच्च पुष्पं पाकान्तरेण फली[3] भवत्येवं कालकृततत्तत्पदार्थावस्था

---

१ ख. °क्षमिं । २ क. °था मं । ग. °था चामं । ३ ग. फलि ।

दृष्टा । तदुचिताः क्षणमुहूर्तादिवसपक्षमासादिरूपाः कालविशेषा अस्माभिर्निश्चीयन्ते । ईदृशकालरूपा त्वमसीतीष्टकास्तुतिः । एवं सर्वं सर्वत्र द्रष्टव्यम् ।

अथ तृतीयामाह—

नदीव प्रभवात्काचित् । अक्षय्यात्स्यन्दते यथा (१) ।
तां नद्योऽभिसमायन्ति । सोरुः सती न निवर्तते, इति ।

अत्र कालस्य दृष्टान्तोऽभिधीयते—प्रभवत्युत्पद्यते जलमस्मादिति गोदावर्याद्युत्पत्तिप्रदेशः प्रभवः स च निरन्तरजलोत्पत्तिदर्शनादक्षय्यः । तस्मादक्षय्यात्प्रभवादुत्पन्ना **महानदी स्यन्दते** प्रवहति । सा नदी यादृशी तादृशोऽयं संवत्सरः । **यथा** च तां महानदीमन्याः क्षुद्रा **नद्योऽभिसमायन्त्याभिमुख्येन** संयोगं प्राप्नुवन्ति **सा** च महानदी बहुक्षुद्रनदीमेलनादुरुर्विस्तीर्णा **सती न निवर्तते** कदाचिदपि न शुष्यति किंतु निरन्तरं प्रवहति ।

अथ चतुर्थीमाह—

एवं नानासमुत्थानाः । कालाः संवत्सरꣳ श्रिताः ।
अणुश्च महांश्च । सर्वे समवयन्ति तम्, इति ।

अत्र दार्ष्टान्तिकोऽभिधीयते—यथा दृष्टान्ते क्षुद्रा नद्यः सर्वा महानदीमेकामभिसमायन्ति, **एवमेव नानासमुत्थाना** नानासमाकारा **अणुश्च महांश्च** क्षणमुहूर्तादिरूपाः **क्षुद्रकालाश्च** दिवसपक्षादिरूपा महाकालाश्च **संवत्सरं श्रिताः** । ते क्षुद्रा महान्तश्च **सर्वे समवयन्ति तम्** । रेफस्य च्छान्दसत्वात्प्राप्नुवन्तित्यर्थः ।

अथ पञ्चमीमाह—

स तैः सर्वैः समाविष्टः । उरुः सन्न निवर्तते ।
अधिसंवत्सरं विद्यात् । तदेव लक्षणे (२), इति ।

स च संवत्सरस्तैरणुभिर्महद्भिश्च कालावयवैः **सर्वैः सम्यगाविष्ट उरुर्विस्तीर्णः सन्न निवर्तते** कदाचिदपि न विच्छिद्यते, किंतु प्रभवविभवादिरूपेणानुवर्तत एव । तस्मादधिसंवत्सरं संवत्सरस्योपरि सर्वं कालाधीनं जगदाश्रितमिति **विद्यात्** । **लक्षणे** काललक्षणे निरूप्यमाणे सति **तदेव** संवत्सररूपमेव व्यावहारिककालस्य तत्त्वमवगम्यत इति शेषः ।

---

१ ध ऊरुः । २ ख. ग °ति । सं° ।

अथ षष्ठीमाह—

अणुभिश्च महद्भिश्च । समारूढः प्रदृश्यते ।
संवत्सरः प्रत्यक्षेण । नाधिसत्त्वः प्रदृश्यते, इति ।

अणुभिश्च स्वल्पैः क्षणमुहूर्तादिभिरपि **महद्भिश्च** दिवसपक्षादिभिरप्यवयवैः **समारूढः** सम्यक्प्राप्तः **संवत्सरः प्रत्यक्षेण प्रदृश्यते** । आविपालगोपालं हि सार्वजनीनेनानुभवेन व्यवह्रियमाणत्वात् । **अधिसत्त्वः** सत्त्वात्सर्वप्राणिनामस्तित्वेन प्रतीयमानात्संवत्सररूपात्कालादधिको नित्यो निरवयवः परमात्मरूपो व्यावहारिककालस्याप्युत्पादकः कालात्माऽधिसत्त्वः । योऽयं शास्त्रदृष्टिमन्तरेण **न प्रदृश्यते** ।

अथ सप्तमीमाह—

पटरो विक्लिधः पिङ्गः । एतद्वरुणलक्षणम् ।
यत्रैतदुपदृश्यते । सहस्रं तत्र नीयते, इति ।

योऽयमधिसत्त्वनामको व्यावहारिककालस्याप्युत्पादकः परमात्मरूपश्चैन्यात्मकः कालोऽस्ति " ज्ञैः कालकालः " इति श्रुत्यन्तरात् । तस्य कालस्य शास्त्रदृष्टिवर्जितैरदर्शने कारणमुच्यते । पटो वस्त्रसदृशश्चर्मविशेषोऽस्यास्तीति **पटरः** । **विक्लिधो** विविधक्लेदनयुक्तः । **पिङ्गः** पिङ्गलवर्णः । एतच्छुक्लकृष्णादेरुपलक्षणम् । एतैः सर्वैर्विशेषणैर्मांसमयोऽक्षिगोलकविशेषो विभज्यते । अस्ति हि तस्य पक्ष्मा(क्ष्म)पटलाख्यश्चर्मखण्डः पटसदृशः । विक्लेदनमप्यस्ति यदा तदा चक्षुषि जलस्रवणात् । पिङ्गलः शुक्लादिवर्णः स्पष्ट एव । एतादृशं यदक्षिगोलकमेतदेव **वरुणस्य** पारमार्थिककालतत्त्वावरकस्य **लक्षणं** स्वरूपं **वरुणलक्षणं,** मांसदृष्टिरेव तत्त्वविषयां शास्त्रदृष्टिमावृणोतीत्यर्थः । **यत्र** यस्यां मांसदृष्टावेतज्जगत्प्रतीयते **तत्र** क्षणो मुहूर्तो दिवस इत्यादिरूपभेदेन कालभेदानां **सहस्रं नीयते** । व्यवह्रियतेऽवगम्यत इत्यर्थः ।

अथाष्टमीमाह—

एकं हि शिरो नाना मुखे । कृत्स्नं तदतुलक्षणम् (३) ।
उभयतः सप्तेन्द्रियाणि । जल्पितं त्वेव दिह्यते, इति ।

एकमेवास्य व्यावहारिककालस्य **शिरः** संवत्सर एव शिरोवदुत्तमावयवस्थानीयः । **मुखे तु नाना** मुखस्थानीये दक्षिणोत्तरायणे द्विविधे । यच्छिरःस्थानीयस्य संवत्सर-

---

१ च. पढारो । २ ग. यः । ३ क. °दृशः पक्ष्मवि° । ४ ख. ग. °योऽस्थिगो° । ५ ख. °लश्रव° ।

स्यैकत्वं यच्च मुखस्थानीययोर्दक्षिणोत्तरायणयोर्द्वित्वं **तत्कृत्स्नमपि ऋतुलक्षणमृतूनां** ज्ञापनम् । सति हि संवत्सरे ततश्च तदंशयोर्दक्षिणोत्तरायणयोः पश्चात्तदंशत्वेनर्तवो ज्ञातुं शक्यन्ते । **उभयतस्तयोरुभयोर्मुखस्थानीययोरयनयोः सप्तेन्द्रियाणि** सप्तसंख्याकेन्द्रियाधारशीर्षण्यच्छिद्रयुक्तानि शरीराण्युत्पद्यन्ते । तदेवं शास्त्रदृष्टिवर्जितानामेकः संवत्सरो द्वे अयने तदवयवा ऋतवस्तेषु च सर्वेषु कालेषु प्राणिशरीराण्युत्पद्यन्त इत्येवं भ्रान्तो व्यवहारः प्रवर्तते । परमार्थतस्तु शास्त्रदृष्ट्या पर्यालोच्यमानो **जल्पितमेव दिह्यते** संवत्सरायनादिनाममात्रमुपचीयते न त्वभिधेयः कश्चिदर्थोऽस्ति । अत एवोपनिषत्सु—" वाचाऽऽरम्भणं विकारो नामधेयम् " " नेह नानाऽस्ति किंचन " " मायामात्रमिदं द्वैतम् " इति व्यवहारस्य मिथ्यात्वं बहुशश्चाऽऽम्नायते । एवमष्टौ मन्त्रा अभिहिताः ।

अथ ब्राह्मणमुच्यते—

शुक्लकृष्णे संवत्सरस्य । दक्षिणवामयोः
पार्श्वयोः । तस्यैषा भवति, इति ।

संवत्सरस्य व्यावहारिकस्य मुख्यस्य कालस्य **दक्षिणवामपार्श्वस्थानीययोरुभयोः शुक्लकृष्णे** तथाविधवर्णयुक्ते अहोरात्रे विद्येते । **तस्यैतस्यार्थस्य** प्रतिपादिका काचिद्दृग्विद्यते ।

अथ तामृचमाह—

शुक्रं ते अन्यद्यजतं ते अन्यत् । विषुरूपे अहनी द्यौरिवासि । विश्वा
हि माया अवसि स्वधावः । भद्रा ते पूषन्निह रातिरस्त्वति, इति ।

हे **पूषन्**जगतः पोषक संवत्सर ते तवांशरूपं **शुक्रं** श्वेतवर्णमन्यदहरास्यं वस्तु पृथगेवास्ति । तथा ते तव **यजतं** यजनीयं निशितायां निर्वपेदित्यादियागोपलक्षितं रात्रिरूपमन्यत्पृथगेवास्ति । तदेवं **विषुरूपे** परस्परविलक्षणरूपे **अहनी** अहोरात्रे वर्तेते तयोर्मध्ये **द्यौरिव** त्वमसि । तयोः प्रवर्तयिता वर्तसे । हे **स्वधावोऽन्नवत्संवत्सर विश्वा मायाः** सर्वाः पक्षमासादिकल्पितकालावयवाकृतीरिवासि पालयसे । हे **पूषन्निह** कर्मणि ते तव **रात्रिर्भद्राऽस्तु** फलप्रदानं समीचीनमस्तु । इत्यनेन मन्त्रेण । पूर्वमन्त्रवदुपधानं कल्प एवोदाहृतम् ।

---

१ क. °र्जिना° । २ क. °माने ज° । ३ ख. रात्रम° । ४ क. °त्रिरन्य° ।

अथ ब्राह्मणमुच्यते—

नात्र भुवनम् । न पूषा । न पशवः । नाऽऽदित्यः । संवत्सर एव प्रत्यक्षेण प्रियतमं विद्यात् । एतद्वै संवत्सरस्य प्रियतमꣳ रूपम् । योऽस्य महानर्थ उत्पत्स्यमानो भवति । इदं पुण्यं कुरुष्वेति । तमाहरणं दद्यात् (४), इति ।

यथा लक्षण ऋतुलक्षणं भुवनꣳ सप्त च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके प्रथमप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

अस्मिन्ब्राह्मणे पारमार्थिकतत्त्वं व्यावहारिककालश्च विविच्य प्रदर्श्यते—**अत्र** पारमार्थिकतत्त्वे भुवनं भूतजातं नास्ति । तथा सति सर्वस्माद्भुवनादधीति यदुक्तं तन्नोपपन्नम् । न वा **पूषा** कश्चिद्देवोऽस्ति । तेन भद्रा ते पूषन्नित्येतदयुक्तम् । **न च पशवो** द्विपादश्च चतुष्पादो वा सन्ति । तेनोभयतः सप्तेन्द्रियाणीत्येतदयुक्तम् । **नाप्यादित्यः** कश्चिदस्ति । तस्मादेतैरादित्यमण्डलमित्येतन्न युक्तम् । किं तर्हि विद्यत इति चेत्, उच्यते—**संवत्सर एव** निरस्तसमस्तक्षणमुहूर्ताद्यवयवविशेषोऽखण्ड एकाकारः कालतत्त्वमेव विद्यते । तर्हि तथाविध एव नित्यो निरवयवः संवत्सर एव परमार्थभूतः प्राणिभिरवबुध्यतामिति चेत् । मैवम् । **प्रत्यक्षेण** हि लोकसिद्धेन सर्वो जन्तुः **प्रियतममेव** रूपं विन्देन्न तु वस्तुतत्त्वम् । किं तर्हि प्रियतममिति चेत्तदुच्यते । क्षणमुहूर्तदिवसपक्षाद्यात्मकं कालपनिकं संवत्सरे यद्रूपमेतदेव शास्त्रदृष्टिरहितानां **प्रियतमम्** । **अस्य** यजमानस्य **योऽयमिष्टकोपधानपूर्वकः** क्रतुरुत्पत्स्यमानो **महानधिकोऽर्थः** फलहेतुत्वेन पुरुषार्थो भवति **तमेवाऽऽहरणमाहर्तव्यमनुष्ठेयमिष्टकोपधानपूर्वकं क्रतुं दद्याच्छिष्येभ्य** उपदिशेत् । उपदेशप्रकार एवेदं **पुण्यं कुरुष्वेति**वाक्येन स्पष्टं(ष्टी) क्रियते । नात्र भुवन इ(नमि)त्यादिपरमार्थतत्त्वं नोपदिशेत् । यद्यपि तत्त्वमेवोत्तमं तथाऽपि विवेकाभावान्नासावुपदेशार्ह इत्यभिप्रायः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यके प्रथमप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

---

१ ग. द्विपद° । २ ग. °तुष्पदो । ३ क. °दप्ययु° । ४ ख. ग. यथाविध । ५ ख. ग. °यमि° । ६ क. ख. °र्वकं क° ।

अथ प्रथमे तृतीयोऽनुवाकः ।

कल्पः—" साकंजानामित्येकादश पुरस्तात् " इति । उपदधातीत्यनुवर्तते । तत्र प्रथमामाह—

साकंजानाꣳ सप्तथमाहुरेकजम् । षडुद्यमा ऋषयो देवजा इति ।
तेषामिष्टानि विहितानि धामशः । स्थात्रे रेजन्ते विकृतानि रूपशः, इति ।

साकंजानां सहोत्पन्नानामादित्यरश्मीनां मध्ये **सप्तथं** यः स सप्तमो रश्मिः " सूर्यो मरीचिमादत्ते " इति पूर्वत्रोक्तस्तं सप्तमं रश्मिमेकजमाहुरितररश्मिभ्यः पूर्वमेकं एवोत्पन्न इत्यभिज्ञाः कथयन्ति । **देवजा** आदित्यदेवादुत्पन्ना इतरे **षडृषय उद्यमाः** शिक्यस्योद्यमा इव सप्तमरश्मेरुपसर्जनभूता इत्यप्याहुः । ते च रश्मयः प्रकाशवत्त्वाद्ऋषिसमाः । **तेषां** षण्णां रश्मीनामिष्टान्यभिप्रेतानि **धामशः** स्थानानि **विहितानि** प्रजापतिना निर्मितानि । ते च रश्मय ऋत्वात्मका अत एकस्य वसन्तत्वेन प्राथम्यमन्यस्य तदनन्तरभावित्वं ततोऽप्यूर्ध्वभावित्वमन्यस्येत्येवं स्थानविकल्पितानि **स्थात्रे** जगतः स्थित्यर्थं **विकृतानि** शीतोष्णादिरूपेण विलक्षणानि **रूपशः** स्वरूपाणि **रेजन्ते** कम्पन्ते प्रवर्तन्त इत्यर्थः ।

अथ द्वितीयामाह—

को नु मर्या अमिथितः । सखा सखायम-
ब्रवीत् । जहाको अस्मदीषते, इति ।

हे **मर्याः** मरणशीला मनुष्या इदमेकं वचनं ब्रूतेति शेषः । **को नु** युष्माकं मध्ये कः खल्वमिथित इतरेणाबाधितः **सखा** तमबाधकं **सखायमब्रवीत्** । किमब्रवीदिति तदुच्यते—**जहाको** हानशीलोऽयमतोऽस्मत्सकाशादीषते भीतः पलायत इति । अयमर्थः । द्वयोः सख्योः परस्परविरोधे सैत्येकेन बाधित इतरः स्वयमपि तं बाधं बाधितुमिच्छन्निदं ब्रूतेऽयं परित्यागशीलो मत्तः पलायत इति । न त्वेतद्वचनं सख्योर्युक्तं ततो मनुष्या भवतां मध्ये सखा खलु सखायमन्यमेवं ब्रूते न काश्चिदप्येवं वक्तीति ।

अथ तृतीयामाह—

यस्तित्याज सखिविदꣳ सखायम् । न तस्य वाच्यपि

---

१ ग. °थमम । २ क. ख. °ब्रोक्तः स° । ३ ख. °कमेवोत्तरमित्य° । ग. कमेवोत्तरं न इ° । ४ ग. °तीयमा° । ५ ख. ग सतीत्ये° । ६ ग. °तीयमा° ।

भागो अस्ति । यदीꣳ शृणोत्यलकꣳ शृणोति
(१) । न हि प्रवेद सुकृतस्य पन्थामिति, इति ।

यः पुमान्स्वयं क्रूरहृदयः सन्स्वविषये सखिविदं मदीयोऽयं सखेति ज्ञातारमन्यं सखायं तित्याज परित्यजति । अयमर्थः । द्वयोः सख्योर्मध्ये सात्त्विक एकः पुमानितरं प्रति मदीय आप्तः सखाऽसावित्येवं विश्वासेऽवातिष्ठत इतरस्तु दुरात्मा तं परित्यजति । तस्य सखिद्रोहिणो वाच्यपि वेदशास्त्राध्ययनेऽपि भागो भाग्यं नास्ति क्वापि विश्वासाभावात् । किमु वक्तव्यमर्थज्ञानतदनुष्ठानयोर्नास्ति भाग्यमिति । यद्यप्ययं सखिद्रोही ईमिदं वेदवाक्यं शृणोति तथाऽप्यलकमलीकं मिथ्यैव शृणोति । सखिद्रोहिणस्तस्योपकारके वेदेऽपि प्रामाण्यबुद्ध्यभावात् । तस्मादयं वेदद्रोही सुकृतस्य पन्थां पुण्यमार्गं न हि प्रवेद सर्वथा न जानाति । ततो बुद्धिमान्पुरुषः सख्यौ वेदेऽतिविश्वासाभावरूपं द्रोहं परित्यज्याऽऽस्तिकः सन्नारुणकेतुकचयनमनुतिष्ठेदित्यभिप्रायः । इतिशब्दः शाखान्तरप्रदर्शनार्थः । इत्येष शब्दः शाखान्तरे पठ्यतेऽतः सखिद्रोहस्यान्याय्यत्वादेकः सखाऽन्यस्मिन्सख्यावुपलम्भं वक्तुं नार्हतीति पूर्वमन्त्रस्याभिप्रायः ।

चतुर्थीमाह—

ऋतुर्ऋतुना नुद्यमानः । विननादाभिधावः । षष्टिश्च
त्रिꣳशका वलगाः । शुक्लकृष्णौ च षाष्टिकौ, इति ।

अथ संवत्सरगर्भाणामृतूनां स्वभावोऽभिधीयते—ऋतुनैकेनान्य ऋतुर्नुद्यमानः प्रेर्यमाणोऽभिधाव आभिमुख्येन धावन्विननाद विशिष्टशब्दं चकार । अयमर्थः । वसन्तर्तावन्तरमेव ग्रीष्मर्तुः प्रवर्तते न त्वीषदपि व्यवधानमस्ति तदेतत्पूर्वेणोत्तरस्य प्रेर्यमाणत्वम् । स चावच्छिन्नाभिस्तिथिभिरभिनिष्पद्यते तदेतदभिधावनमित्युच्यते । उपरिष्टादेव " एता वाचः प्रयुज्यन्ते " इति तत्तदृत्वनुसारेण प्राणिनां वाच उदाहरिष्यन्ते । तदेतदृतुर्विननादेत्यनेन विवक्षितमिति । मुहूर्तानां त्रिंशत्संख्या यस्मिन्नहोरात्रे विद्यते सोऽयं त्रिंशकः । तादृशा बहवस्त्रिंशका अहोरात्रा वलगा वर्गाः समूहरूपा भूत्वा, ऋतावेकस्मिन्षष्टिः संपद्यन्ते । षष्टिसंख्याकाहोरात्रात्मक ऋतुरित्यर्थः । चकारः पूर्वोक्तनुद्यमानत्वादिस्वभावेन समुच्चयार्थः । तस्याश्च षष्टिसंख्याया द्वौ भागौ तौ च शुक्लकृष्णात्मकौ । एकैकस्मिन्मासि शुक्लैतिथयः पञ्चदशैं मिलित्वा

---

१ ग. वेदे वा° । २ ग. °तुर्थमा° । ३ क. °शिष्ट श° । ४ क. ख. ग. °क्लकृष्णगति° । ५ क. ख °श मासे मि° । ग. घ. °श मासो मि° ।

त्रिंशत् । एवं कृष्णपक्षतिथयोऽपि । चकारः पूर्ववत् । सोऽयमृतूनां स्वभाव इति मन्त्राभिप्रायः ।

अथ पञ्चमीमाह—

सारागवस्त्रैर्जरदक्षः । वसन्तो वसुभिः सह ।
संवत्सरस्य सवितुः । प्रैषकृत्प्रथमः स्मृतः, इति ।

समन्ताद्राग आरागस्तेन सहितानि सारागाणि तादृशानि च वस्त्राणि येषां ते **सारागवस्त्रास्तैर्वसुभिः** प्रजानां निवासहेतुभिर्देवताविशेषैः **सहायं वसन्त** ऋतुर्**जरदक्षो** जरे जले दक्षः कुशलः सन्**सवितु**ऋतूनां प्रेरकस्य **संवत्सरस्य** देवस्य **प्रैषकृदा**ज्ञाकारी **प्रथम** ऋतूनां मध्ये मुख्य इत्यभिज्ञैः **स्मृतः** । ऋतूनां स्वामी संवत्सरो देवस्तस्याऽऽज्ञां सर्व ऋतवः कुर्वन्ति तेषां मध्ये मुख्योऽयं वसन्तः । तदा वृष्टिकालवत्पङ्ककालुष्याभावेन जलं निर्मलं देवतानां वस्त्राणि च शृङ्गारार्थं हरिद्रादिद्रव्यरञ्जितानि भवन्ति सोऽयं वसन्तस्य विशेषस्वभाव इत्यर्थः ।

अथ षष्ठीमाह—

अमूनादयतेत्यन्यान् (२) अमूंश्च परिरक्षतः ।
एता वाचः प्रयुज्यन्ते । यत्रैतदुपदृश्यते, इति ।

वसन्तप्रवृत्तौ ब्राह्मणानां यज्ञोपनयनादिप्रवृत्तेस्तत्र प्राणिभिरेता **वाचः प्रयुज्यन्ते** । काः पुनर्वाच इति ता उच्यन्ते—**अमून्बन्धूनादयत** यथोचितं भोजयतेत्येवमन्यान्स्वगृहवासिनः पुरुषान्प्रति यज्ञोपनयनादिकर्तारो वदन्ति । **अमूंश्चैतानप्यागतान्वैदेशिकान्ब्राह्मणान्परिरक्षतो** हे गृहवार्तिपुरुषा धनादिदानेन परितो रक्षां कुरुत । इत्येतद्वचनजातं यस्मिन्नृतौ **दृश्यते** सोऽयं वसन्त इत्यर्थः ।

अथ सप्तमीमाह—

एतदेव विजानीयात् । प्रमाणं कालपर्यये ।
विशेषणं तु वक्ष्यामः । ऋतूनां तन्निबोधत, इति ।

सारागवस्त्रैरित्यादिमन्त्रद्वयेन वसन्तर्तोरसाधारणस्वरूपं यदुक्तमेतदेव, **कालपर्यये** ग्रीष्माद्यृतुभेदे **प्रमाणं विजानीयात्** । एतद्दृष्टान्तेनानुमातुं शक्यत्वात् । विमता ग्रीष्माद्यृतवोऽसाधारणस्वभावोपेता ऋतुत्वाद्वसन्तवदित्यनुमानम् । तेन च सामान्या-

---

१ ग. °ञ्चमी° । २ ग. षष्ठमी° । ३ ग. °प्तमी° ।

कारेणास्ति काश्चिदसाधारणस्वभाव इत्यवगतम् । ऋतूनां ग्रीष्मादीनां विशेषणं तु तत्तत्स्वभावविशेषं तूत्तरेषु मन्त्रेषु वयं वक्ष्यामो हे बुभुत्सवस्तन्निबोधत ।

अथाष्टमीमाह—

शुक्रवासा रुद्रगणः । ग्रीष्मेणाऽऽवर्तते सह । निज-
हन्पृथिवीꣳसर्वाम् (३) । ज्योतिषाऽप्रतिख्येन सः, इति ।

योऽयमेकादशानां रुद्राणां गणः सोऽयं शुक्रवस्त्रोपेतः सन्ग्रीष्मेणर्तुना सह व(हाऽऽव)र्तते । स ग्रीष्मोऽतिप्र(प्रति)ख्येन निरुपमेनात्यधिकेन ज्योतिषा तापेन सर्वां पृथिवीं निजहन्नितरां धक्ष्यन्वर्तते । यत्रैतल्लक्षणं तं ग्रीष्मं विद्यादित्यर्थः ।

अथ नवमीमाह—

विश्वरूपाणि वासाꣳसि । आदित्यानां निबोधत ।
संवत्सरीणं कर्मफलम् । वर्षाभिर्ददताꣳ सह, इति ।

इत आरभ्य वर्षर्तोरसाधारणः स्वभाव उच्यते—संवत्सरीणमेकस्मिन्संवत्सरे सर्वस्मिन्नपि भोगयोग्यं कर्मफलं व्रीह्यादिरूपं कृष्यादिफलं यदस्ति तत्सर्वं वर्षाभिर्वर्षर्तुना सहावस्थाय ददतां प्रयच्छतामादित्यानां वासांसि वस्त्राणि विश्वरूपाणि विचित्रवर्णोपेतानि निबोधत वर्षर्तौ यत्कृष्यादिकर्म क्रियते तत्फलमागामिवर्षर्तुपर्यन्तं प्राणिभिर्भोक्तुं पर्याप्तं भवति । तच्च फलं वर्षर्तुस्वामिभिरादित्यैर्दीयते । ते च विचित्रवर्णवस्त्रोपेता इत्यर्थः ।

अथ दर्शमीमाह—

अदुःखो दुःखचक्षुरिव । तैग्मा पीत इव दृश्यते ।
शीतेनाव्यथयन्निव । रुरुदक्ष इव दृश्यते, इति ।

अयं वर्षर्तुरदुःखः स्वयं दुःखरहितोऽपि दुःखचक्षुरिव दृश्यते । तस्मिन्काले प्राणिनां चक्षूरोगोत्पत्तेः । तस्मिन्काले प्राणिनां *कामि(म)लादिरोगोपेतत्वात् । अयमृतुः स्वयमपि तथा पीत इव प्राणिद्वारा तद्रोगवानिव दृश्यते । × कामि(म)लरोगग्रस्तस्य पीतत्वाभासात् । किंच शीतेन वृष्ट्या वायुना च दिने यच्छीतं तेन शीतेनायमृतु-

* सर्वेष्वादर्शपुस्तकेषु कामिलादीत्येव पाठः । × अत्राप्यादर्शपुस्तकेषु कामिलरोगेत्यादिरेव पाठः ।

१ क. °शेषमुत्त° । ख. ग. °शेषमन्त्रमुत्त° । २ क. °क्ष्यामो बु° । ३ ग. °ष्टममा° । ४ ग. °निदहत्पृथि° । ५ ख. ग. निदह° । ६ ख. ग. धक्षन्व° । ७ ग. °वममा° । ८ ग °शममा° । ९ ख. ग. तथा । १० क. °त्तेः । तदा त° । ११ क. ख. °था प्रा° । १२ क. ख. °व पीत इव दृ° ।

रव्यथयन्निव पीडामप्राप्नुवन्निव दृश्यते । सत्यपि तदा शीते प्रावरणाग्निसेवादिना शान्तस्य शीतस्य प्राणिभिः परिहियमाणत्वान्नास्ति व्यथा । किंच रुरुदक्ष इव रुरवो मृगविशेषास्तैर्दक्षः समृद्ध इवायमृतुर्दृश्यते । अरण्येषु तृणसमृद्ध्या तस्मिन्नृतौ पुष्टानां मृगयूथानां बहुलमुपलम्भात् ।

अथैकादशीमाह—

ह्लादयते ज्वलतश्चैव । शाम्यतश्चास्य चक्षुषी ।
या वै प्रजा भ्रंश्यन्ते । संवत्सरात्ता भ्रंश्यन्ते, इति ।

अयं वर्षर्तुः सर्वान्प्राणिनो ह्लादयते संतोषयते । अहो सुवृष्टो देवः संपत्स्यन्तेऽस्माकं शस्यानीत्येवं सर्वस्य लोकस्य परितोषः । तस्मिन्नृतौ बीजवापमकृत्वा या भ्रंश्यन्ते [भ्रश्यन्ति] ताः प्रजा न केवलं तस्मादृतोरेव भ्रष्टाः किंतु कृत्स्नादपि संवत्सराद्भ्रष्टाः । आगामिवर्षपर्यन्तमन्नस्य दुर्लभत्वात् । यास्तु प्रजास्तस्मिन्नृतौ क्षेत्रेषु बीजावापं कृत्वा प्रतिष्ठिता भवन्ति ताः प्रजा अन्नस्य सुलभत्वात्समृद्धा दृश्यन्ते । अस्यैवंविधस्य वर्षर्तोश्चक्षुषी ज्वलतश्चैव शाम्यतश्च । अनेन हि ऋतुना दृष्टाः पदार्थाः शक्तिविशेषलाभेनोज्ज्वल्यं भजन्ते । अतस्तदीये चक्षुषी सर्वान्पदार्थानुज्ज्वलयतः । तथा तस्मिन्नृतौ सर्वे पदार्थाः शान्ता उपद्रवरहिता भवन्ति । अतस्तदीये चक्षुषी सर्वान्पदार्थानुपशमयतः । ईदृशेन लक्षणेन वर्षर्तुरवगन्तव्य इत्यर्थः । तैरेतैरेकादशभिर्मन्त्रैरिष्टका उपधेयाः ।

अथ ब्राह्मणमुच्यते—

याः प्रतितिष्ठन्ति । संवत्सरे ताः प्रतितिष्ठन्ति । वर्षाभ्य इत्यर्थः (४), इति ।

शृणोत्यन्यान्सर्वानेव षट्च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके प्रथमप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

याः काश्चित्प्रजास्तस्मिन्नृतौ क्षेत्रेषु बीजावापमकृत्वा भ्रंश्यन्ते[भ्रश्यन्ति] ताः प्रजा न केवलं तस्मादृतोरेव भ्रष्टाः किंतु कृत्स्नादपि संवत्सराद्भ्रष्टाः । आगामिवर्षर्तुपर्यन्तमन्नस्य दुर्लभत्वात् । यास्तु प्रजास्तस्मिन्नृतौ क्षेत्रेषु बीजावापं कृत्वा प्रतिष्ठिता भवन्ति ताः प्रजा अन्नस्य सुलभत्वात्कृत्स्नेऽपि संवत्सरे प्रतिष्ठिता भवन्ति । यद्यपि या भ्रंश्यन्ते

---

१ क. °लत्योप° । २ क. ख. °कं सस्या° । ३ ग. लभन्ते । ४ क. भ्रश्यन्ते । ५ क. ग. °पि ता भ्रश्य° । ख. °पि ता भ्रं । ६ ख. ग. °न्तमित्येत्यै° ।

इत्येतस्मिन्पूर्ववाक्ये भ्रंशस्यापादानवाचकं पञ्चम्यन्तं पदं किमपि नास्ति तथाऽपि वर्षर्तुप्रकरणबलेन तल्लाभाद्वर्षाभ्यो भ्रंश्यन्त इति तस्य वाक्यस्यार्थः संपद्यते ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयारण्यके प्रथमप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

अथ प्रथमे चतुर्थोऽनुवाकः ।

कल्पः—"अक्षिदुःखोत्थितस्यैवेति षडिहेह वः स्वतपसः इति च" इति । अथ प्रथमामाह—

अक्षिदुःखोत्थितस्यैव । विप्रसन्ने कनीनिके ।
आङ्के चाँद्रं गणं नास्ति । ऋभूणां तन्निबोधत इति, ।

अत्र शरदृतुर्वर्ण्यते—**अक्षिदुःखं** नेत्ररोगः, त[स्मादुत्थित]स्य हि **कनीनिके** अक्षिमध्यवर्तिन्यौ तारके **विप्रसन्ने** नेत्रमलस्यापगतत्वाद्विशेषेण प्रसन्ने भवतः । वर्षर्तावुत्पन्ना नेत्रपीडा शाम्यति यथा कनीनिके प्रसन्ने एवं सर्वं जगदपि मेघपङ्कादिमालिन्याभावात्प्रसन्नं भवति । ततोऽक्षिदुःखोत्थितस्यैवेत्ययमेवकार उपमार्थः । किंचाक्षिरोगाभावात्सर्वो जन **आङ्के** चाञ्जनेन चक्षुषी संस्करोत्यपि । तस्मिन्नृतौ **गणं** ग्रहणं दृष्टिविरोधि नीहारादिकं **नास्ति** तत्सर्वमृतुदेवानाम्**ऋभूणां** सामर्थ्यमिति **निबोधत** ।

अथ द्वितीयामाह—

कनकाभानि वासांसि । अहतानि निबोधत ।
अन्नमश्नीत मृज्मीत । अहं वो जीवनप्रदः, इति ।

तेषामृभूणां देवानां **वासांसि** वस्त्राणि **कनकाभानि** सुवर्णसदृशानि । **अहतानि** नूतनत्वान्न क्वापि तेषु च्छिद्रं दृश्यते । हे बुभुत्सव एवं **निबोधत** । किंच शरत्काले वाच एतादृश्यः प्रवर्तन्ते । हे जना **अन्नमश्नीतास्मिन्नृतौ** शरीरपुष्टिहेतुत्वाद्भक्ष्यं भोज्यं च पुष्कलं भक्षयत । ततो **मृज्मीत** लेपाञ्शोधयत । **अहं** शरदाख्य ऋतुर्वो युष्माकं **जीवनप्रदः** सुखभोजनेन युक्तं जीवनं प्रयच्छामि ।

अथ तृतीयामाह—

एता वाचः प्रयुज्यन्ते । शरद्यत्रोपदृश्यते (१) ।

---

१ क. इवेत्ये° । २ क. ग. भ्रश्यन्त । ३ ग °थमसा । ४ ग. चाद्ग्रहणं । ५ ख. ग. °न्नृतावम° । ६ ग. °तीयमा° । ७ ग. °तीयमा° ।

अभिधून्वन्तोऽभिघ्नन्त इव । वातवन्तो मरुद्गणाः, इति ।

यत्र यदा **शरदाख्य** ऋतुरुपदृश्यते तदानीमन्नमश्नीतेत्येता **वाचः** प्राणिभिः **प्रयुज्यन्ते**, अनेन लक्षणेन शरदाख्यमृतुं जानीयादित्यर्थः । अथ हेमन्त ऋतुर्वर्ण्यते - तस्मिन्नृतौ **मरुद्गणा** देवविशेषसंघा **अभिधून्वन्तः** सर्वतः कम्पयन्तोऽभिघ्नन्त आभिमुख्येन हननं कुर्वन्त **इव वातवन्तस्तीव्रेण** वायुना युक्ता भवन्ति ।

अथ चतुर्थीमाह—

अमुतो जेतुमिषुमुखमिव । संनद्धाः सह दृदृशे ह ।
अपध्वस्तैर्वस्तिवर्णैरिव । विशिखासः कपर्दिनः, इति ।

अमुतो वायुलोकादागता वायव **इषुमुखं** योद्धृभिः शत्रुभिः प्रेरितं बाणाग्रं **जेतुमिव संनद्धाः** कवचादिभृतः **सह दृदृशे ह** संघीभूता दृश्यन्त एव । हेमन्तेऽतिप्रबला वायवो युद्धार्थं संनद्धा इव सर्वतः प्रचरन्ति । अत एव प्राणिनोऽपि युद्धार्थिन इव शीतवातोपद्रवपरिहाराय कञ्चुकाद्यावृता दृश्यन्ते । **अपध्वस्तैस्तिरस्कृतैर्मलिनैर्वस्तिवर्णैरिव** वस्त्याकारैः कवचैरिव युक्ता **विशिखासो** विविधशिखायुक्ताः **कपर्दिनः** केशबन्धयुक्ताश्च प्राणिनो दृश्यन्ते । रजकैर्धौतानां घटितानां लिप्तानां वस्त्राणामतिशैत्येन परित्यज्य नूतनाः स्थूलतन्तवो मलिनाश्च पटा द्वित्रि(त्र?)गुणाः प्रावियन्त उष्णीषादिभिश्च शिरांसि वेष्टयन्त इत्यर्थः ।

अथ पञ्चमीमाह—

अक्रुद्धश्च योत्स्यमानस्य । क्रुद्धस्येव लोहिनी । हेम-
तश्चक्षुषी विद्यात् । अक्ष्णयोः क्षिप्तेणोरिव (२), इति ।

अक्रुद्धस्य क्रोधरहितस्यैव **हेमतो** हेमन्ततोश्चक्षुषी, **लोहिनी** रक्ताकारे **विद्यात्** । तत्र दृष्टान्तः—**क्रुद्धस्य** क्रोधाविष्टस्य परान्हन्तुं पुरुषं प्रेरयतोऽक्षिणी रक्ते तद्वत् । न चात्र क्रुद्धस्य **योत्स्यमानस्येत्यनेन** पुनरुक्तिः । उभयोरेकवाक्यत्वाङ्गीकारात् । क्रोधाविष्टपुरुषसाम्यं वक्तुमेक इवकारः । अक्षिसाम्यं वक्तुमपर इवकारः ।

अथ षष्ठीमाह—

दुर्भिक्षं देवलोकेषु । मनूनामुदकं गृहे । एता
वाचः प्रवदन्तीः । वैद्युतो यान्ति शैशिरीः, इति ।

पूर्वत्र यथा वाताभिघातादिकं हेमन्तस्य लक्षणमुक्तमेवमत्र शिशिरस्य लक्षणमु-

---

१ ग. °तुर्थमा° । २ ग. °ञ्चममा° । ३ ग. °पणेरि° । ४ ग. षष्ठमा° ।

च्यते—देवलोकेष्वन्तरिक्षभागेषूदकं दुर्भिक्षं भिक्षितुमपि दुर्लभम्। तस्मिन्नृतौ वृष्टेरभावात्। मनूनां मनुष्याणां गृहे कूपादिसद्भावादुदकमल्पं विद्यते। तस्मादुदकार्थिभिर्गृहेषु गत्वा जलं ग्राह्यं न तु मार्गेषु। तदस्मिन्नेता एवंरूपा वाचः प्रवदन्तीरुच्चारयन्त्यः प्रजाः शैशिरीः शिशिरर्तौ विद्यमाना वैद्युतो विद्युत्संबन्धिन्यो विद्युदुपलक्षितसंतापयुक्ता यान्ति मार्गे गच्छन्ति, तदिदं शिशिरर्तोर्लक्षणम्। एभिः षड्भिर्मन्त्रैरिष्टका उपदध्यात्।

अतः परं ब्राह्मणमुच्यते—

ता अग्निः पवमाना अन्वैक्षत। इह जीविकां-
मपरिपश्यन्। तस्यैषा भवति, इति।

अग्निर्देव इह लोके प्राणिनां जीविकां जीवनहेतुमुदकमपरिपश्यन्पवमानाः शोधयन्तीर्निरुदकत्वं प्रकाशयन्तीर्मार्गे गच्छन्तीस्ताः प्रजा अन्वैक्षतानुसृत्यैवं विचारितवान्। एताः प्रजा एवं वदन्ति, इह चोदकं न पश्यामि[1] किंवा प्राणिनां भविष्यतीति चिन्तितवानित्यर्थः। तस्याग्निविचारस्य प्रतिपादिकैषर्ग्विद्यते।

तामृचमाह—

इहेह वः स्वतपसः। मरुतः सूर्यत्वचः।
शर्म सप्रथा आवृणे (३), इति।
दृश्यत इवाऽऽवृणे॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके प्रथमप्रपाठके
चतुर्थोऽनुवाकः॥ ४॥

स्वतपसः स्वायत्ततपसः संतापोदकयोः स्वतन्त्रा इत्यर्थः। सूर्यत्वचः सूर्यसमानदीप्तयस्तादृशा हे मरुतो वो युष्मत्सकाशात्सप्रथा विस्तारयुक्तं शर्म सुखकारणमुदकमिहेहैतेषु सर्वेषु जलरहितप्रदेशेष्वावृणे प्राणिजीवनार्थमहमग्निः सर्वतः प्रार्थये। अनेनापि मन्त्रेण कांचिदिष्टकामुपदध्यात्॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयारण्यके चतुर्थोऽनुवाकः॥ ४॥

---

१ ग. पश्यामः। २ क. ख. ब।

अथ प्रथमप्रपाठके पञ्चमोऽनुवाकः ।

कल्पः—"अतिताम्राणीति चतस्रो मदन्तीस्तिस्रः प्रवर्ग्यवदाद्यन्तयोः शान्तिं कृत्वा" इति । यथा प्रवर्ग्यस्याऽऽदौ नमो वाच इति शान्तिः पठ्यतेऽन्ते शं नो वात इति शान्तिः पठ्यत एवमत्रापि चतसृणामिष्टकानामादावन्ते च तच्छान्तिद्वयं पठेत् । इष्टका अपि पूर्वेष्टकाषदन्या आपो न भवन्ति किंतु मदन्तिकासंज्ञिकास्तिस्रा आपस्ताश्चतसृभिरुपदध्यात् । तत्र प्रथमामाह—

अतिताम्राणि वासा॑ꣳसि । अष्टि॑वज्रिशताग्नि च ।
विश्वे देवा विप्रहरन्ति । अग्निजिह्वा असश्चत, इति ।

यथा पूर्वत्र वसन्ताद्यृतुसहभाविनां वसुरुद्रादीनां सारागशुक्लवस्त्रादीन्येवमत्रापि शिशिरर्तुसहभाविनां विश्वेषां देवानामतिताम्राणि वस्त्राण्यायुधानि चाष्टन्वादीनि । ते च विश्वे देवास्तैरष्टिवज्रिशताग्निनामकैरायुधविशेषैर्विविधं शत्रून्प्रहरन्ति । ततोऽग्निजिह्वा आरुणकेतुकाग्निरूपजिह्वायुक्ता असश्चत जयनिमित्तेनोत्साहेनात्युच्चं शब्दं कृतवन्तः ।

अथ द्वितीयामाह—

नैव देवो न मर्त्यः । न राजा वरुणो विभुः ।
नाग्निर्नेन्द्रो न पवमानः । मातृकञ्चन विद्यते, इति ।

यदास्फोटनं विश्वैर्देवैः कृतं तदत्र स्पष्टी क्रियते—कञ्चन(कञ्चन) कश्चन कोऽपि देवो मातृङ्मादृङ्मत्सदृशो न विद्यते । एवं न मर्त्य इत्यादिष्वपि योज्यम् । सोऽयं विश्वैर्देवैरुद्घोषितः शब्दः ।

अथ तृतीयामाह—

दिव्यस्यैका धनुरार्त्निः । पृथिव्यामपरा श्रिता (१)
तस्येन्द्रो वज्रिरूपेण धनुर्ज्यामच्छिनत्स्वयम्, इति ।

अस्य विश्वे(श्व)देवाजिह्वारूपस्याऽऽरुणकेतुकस्याग्नेरेका धनुरार्त्निर्धनुष ऊर्ध्वकोटिर्दिवि श्रिता । अपरा त्वधस्तनी कोटिः पृथिव्यां श्रिता । वम्रयः पिपीलिकासमाना जन्तवः । यदीयवमनान्मृत्तिका द्रवी क्रियते । इन्द्रो यथोक्तधनुर्दर्शनेन भीतः

---

१ ग. °न्तीस्तान्याम्र° । २ ग. °सि । ऋष्टि° । ३ ग. असंश्चत । ४ ख. ग. 'नि चष्टर्चाद्री°। ५ क. ख. 'स्तैर्ऋष्टि° । ६ ग. असंश्चत । ७ ग. मातृकञ्चन । ८ ख ग °श्चिन्नाग्नि° ।

सन्वाग्निरूपेणाधःकोटिसमीपे स्थाने स्थित्वा तस्याऽऽरुणकेतुकस्याग्नेर्धनुष्यवस्थितां ज्यां स्वयम(मे?)वाच्छिनत् ।

अथ चतुर्थीमाह—

तदिन्द्रधनुरित्यज्यम् । अभ्रवर्णेषु चक्षते ।
एतदेव शंयोर्बार्हस्पत्यस्य । एतद्रुद्रस्य धनुः, इति ।

यस्य धनुषो ज्या छिन्ना तत्तदेतदभिज्ञा अभ्रवर्णेषु मेघस्थितप्रकाशेषु दृष्ट्वेन्द्रेण च्छिन्नत्वाज्ज्यारहितमिन्द्रधनुरित्याचक्षते । योऽयं बृहस्पतिपुत्रः शंयुस्तस्याप्येतदेव धनुः । अनेनैव धनुषाऽसौ स्वकार्यं संपादयति । एतद्रुद्रस्य धनुस्तस्मादिदमुत्कृष्टम् । रुद्रो नामाग्नेऽऽरुणकेतुकोऽग्निः । " रुद्रो वा एष यदग्निः " इति श्रुतेः । एताभिश्चतसृभिरुष्णोदकरूपाभिश्चितस्य [इष्टका] उपधेयाः ।

अथ ब्राह्मणम्—

रुद्रस्य त्वेव धनुरार्त्निः । शिर उत्पिपेष । स प्रवर्ग्योऽभवत् ।
तस्माद्यः सप्रवर्ग्येण यज्ञेन यजते । रुद्रस्य स शिरः प्रतिदधाति । नैनꣳ रुद्र आरुको भवति । य एवं वेद (२), इति ।
श्रिता यजते त्रीणि च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके प्रथमप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

यदेतदुच्छिन्नज्याकं धनुस्तस्येन्द्रवशं पुराणं धनुष्टङ्कमित्येतावदेव न किंतु ज्यायां छिन्नायामुत्पतन्ती धनुष ऊर्ध्वा कोटिर्यस्य रुद्रस्य गलमवष्टभ्य पूर्वमवस्थिता तस्य रुद्रस्य शिरश्छिन्दत्यूर्ध्वं नीत्वाऽधः पतन्ती पिपेष तच्छिरश्चूर्णीचकार । स च पिष्टार्धशिरोभागः प्रवर्ग्यरूपेणाऽऽविर्बभौ । यस्माद्रुद्रस्य शिर एव प्रवर्ग्यस्तस्मात्प्रवर्ग्यसहितेन यज्ञेन यो यजते सोऽयं रुद्रस्य तच्छिरः प्रतिदधाति पुनः समादधाति । यः पुमानेवं शिरःसमाधानप्रकारं वेद तमेनं रुद्र आरुको न भवति तस्य हिंसां न करोतीत्यर्थः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यके प्रथमप्रपाठके पञ्चमोऽनुवाकः ॥ ९ ॥

अथ प्रथमप्रपाठके षष्ठोऽनुवाकः।

कल्पः—" अत्यूर्ध्वाक्ष इति त्रीण्यृतुमण्डलान्यवद्रप्स इति च " इति। ऋतुमण्डलशब्दस्य मन्त्रनामत्वादुपधेयानामिष्टकानामपि तदेव नाम। तत्र प्रथमामृचमाह—

अत्यूर्ध्वाक्षोऽतिरश्चात्। शिशिरः प्रदृश्यते।
नैव रूपं न वासांस्यसि। न चक्षुः प्रतिदृश्यते, इति।

योऽयं शिशिर ऋतुः सोऽयं प्राणिषु प्रकर्षेण **दृश्यते**। कदृशः शिशिरोऽत्यूर्ध्वाक्षः। तस्मिन्नृतौ यदा शीतबाहुल्यं भवति तदानीं कम्पमानाः प्राणिनो हस्ताभ्यामुर आच्छादयन्तो मुखेन सीत्कारं कुर्वन्तो द्वे भ्रुवावत्यूर्ध्वमुन्नमयन्ति तदिदं तस्यर्तोरत्यूर्ध्वाक्षत्वम्। शीतपीडितत्वादेव दक्षिणतो वामतो वा तिर्यङ्न पश्यन्ति तदिदम**तिरश्चा**दित्युच्यते। यत्तु शरीरस्य **रूपं** तदपि शीतवेलायां प्राणिभि**र्नैव दृश्यते**। **वासांस्यपि** नैव दृश्यन्ते। **चक्षुरपि** दर्पणादौ **न प्रतिदृश्यते**। रूपवस्त्रादिषु नात्यन्तमादरः किंतु शीतपरिहारमेवान्विच्छन्तीत्यर्थः।

अथ द्वितीयमाह—

अन्योन्यं तु न हिंस्रातः। सतस्तदेवलक्षणम्।
लोहितोऽक्षिण शार शीर्ष्णिः। सूर्यस्योदयनं प्रति, इति।

यौ परस्परमत्यन्तद्वेषिणौ युद्धार्थमुद्युक्तौ तावपि शिशिरर्तौ**अन्योन्यं तु न हिंस्रातः** शीतनिवारणाय प्रावरण एव प्रयत्नयुक्तौ सन्तौ परस्परं हिंसामपि न कुरुतः। यदेतदीदृशं प्राणिनां वर्तनं **तदेतत्सतो** वर्तमानस्य शिशिरर्तो**र्देवलक्षणं** देवेन सूर्येण संपादितं चिह्नम्। अनेन लक्षणेन शिशिरत्वं विद्यात्। किंच तस्यर्तोरभिमानिदेवताविग्रहेऽक्षिण चक्षुषि **लोहितो** वर्णो भवति, **शीर्ष्णिः** शिरसि **शार** सारिदा(का)याः शुष्कस्त्रिया यो वर्णः स वर्णो भवति। कस्मिन्काले‌ऽयं वर्णविशेष इत्युच्यते—**सूर्यस्योदयनं प्रति** सूर्योदयवेलायाम्। अत्र सर्वत्रोच्यमानेषु काललक्षणेषु यत्प्रजासु संभवति तत्प्रजाद्वारेण कालं लक्षयति। यत्तु प्रजासु न संभवति तत्साक्षादेव कालाभिमानिदेवतायां द्रष्टव्यम्।

अथ तृतीयामाह—

त्वं करोषि न्यञ्जलिकाम्। त्वं करोषि नि जानुकाम् (१)।

---

१ ख. °षु च ना°। २ ग. शीर्ष्णि। ३ क. ख. 'र्तोस्तल्लक्ष' । ग. °र्तोर्लक्ष°। ४ ग. शीर्ष्णि। ५ ख. ग. सारिमायाः। ६ ख. शुक्लस्त्रिया । ग. शुक्लिपाया । ७ क. ख. ग. यथा प्रजा°। ८ क. ख. ग. तत्र प्रजा°।

नि जानुका मे न्यञ्जलिका । अमी वाचमुपासतामिति, इति ।

हे शिशिरर्तो त्वमञ्जलिकां हस्ताग्रवर्तिनमञ्जलिं निकरोषि न्यग्भूतं करोषि । यथा जानुकां जानुप्रदेशमपि त्वं निकरोषि न्यग्भूतं करोषि सर्वे प्राणिनः शीतबाहुल्यादग्निसेवार्थं हस्तौ न्यग्भूतौ कुर्वन्ति । उदरादिदेहावयवतापनाय व्यवधानभूते जानुनी अपि भूमिस्पर्शिनी यथा भवतस्तथा न्यग्भूते कुर्वन्ति । स्वयमेवं कुर्वन्तो बुद्धिमन्तोऽप्रबुद्धान्बालान्प्रत्येवमुपदिशन्ति । हे बाला अमी भवन्त ईदृशीं वाचमुपासताम् । कीदृशी वागिति तदुच्यते—मे मदीया जानुका न्यग्भूता भवतु, अञ्जलिकाऽपि न्यग्भूता भवत्विति । श्रौत इतिशब्द एवंविधलक्षणप्रदर्शनार्थः । अनुक्तमप्येतादृशं लोकव्यवहारं दृष्ट्वा तमृतुं जानीयात् । ऋतुमण्डलाख्यैरतैर्मन्त्रैस्तिस्र इष्टका उपदध्यात् ।

अथ ब्राह्मणमुच्यते—

तस्मै सर्व ऋतवो नमन्ते । मर्यादाकरत्वात्पं पुरोधाम् । ब्राह्मणं आप्नोति । य एवं वेद । स खलु संवत्सर एतैः सेनानीभिः सह । इन्द्राय सर्वान्कामानभिवहति । स द्रप्सः । तस्यैषा भवति (२), इति ।

यः पुमानेवमुक्तैरनुवाकैः प्रतिपादितमृतुस्वभावं वेद तस्मै पुरुषाय सर्व ऋतवो वसन्तादयो नमन्ते प्रह्वी भवन्ति स्वाधीना भवन्ति । किंच स ब्राह्मणः पुरोधां पुरतोऽवस्थितिं सर्वेषु ब्राह्मणेषु प्राधान्यं प्राप्नोति । ऋतूनां स्वाधीनत्वं दुःखानुत्पादकत्वम् । तस्मिन्स्वाधीनत्वे प्राधान्यप्राप्तौ च हेतुरुच्यते—मर्यादाकरत्वादिति । अयं हि विद्वान्पुरुषस्तेषां वसन्ताद्यृतूनां मर्यादां करोति यस्मिन्यस्मिन्नृतौ ये धर्मास्तत्र तान्प्रवर्तयति । मर्यादाकरत्वमेव कथमिति तदुपपाद्यते—स खलु विद्वान्ब्राह्मणो देहपातादूर्ध्वं संवत्सरो भूत्वा संवत्सरनिष्पादकादित्यरूपी भूत्वाऽऽरुणकेतुकाग्नितादात्म्यं प्राप्यैतैः सेनानीभिः "वसन्तो वसुभिः सह" "शुक्रवासा रुद्रगणः" इत्यादिवाक्येषु प्रतिपादितैर्वसन्तादिदेवतासहवर्तीभिर्वस्वादिभिः सेनाधिपतिभिः सह वर्तमानः सन्निन्द्राय कर्मस्वामिने यजमानाय सर्वान्कामानभिवहत्याभिमुख्येन संपादयति । तस्मादारुणकेतुकाग्निप्राप्तियोग्यत्वादयं विद्वान्मर्यादाकरो भवत्येव । स च विदुषा प्राप्य आरुणकेतुको द्रप्स उदकस्वरूपो वृष्टिहेतुत्वात् । तस्य द्रप्सरूपस्याऽऽरुणकेतुकाग्नेः प्रतिपादिकेयं काचिदभिद्यते ।

१ क. °वस्थानं स° ।

अथ तामृचं दर्शयति—

अवं द्रप्सो अꣳशुमतीमतिष्ठत् । इयानः कृष्णो दशभिः सहस्रैः ।
आवर्तमिन्द्रः शच्या धमन्तम् । उपꣳ स्तुहि तं नृमणामथद्राम् इति, इति ।

द्रप्स उदकात्मकोऽयमारुणकेतुकः, अंशुमतीमंशुशब्देन सोमलताखण्डवाचिन। सर्वा ह्योषधय उपलक्ष्यन्ते तद्युक्तत्वादंशुमती पृथिवी तामवातिष्ठदवगम्य प्राप्य तत्रावस्थितः । कीदृशो द्रप्सः, दशभिः सहस्रैरनेकसहस्रसंख्याकैरादित्यराश्मिभिरियानः संचरन् । " आदित्याज्जायते वृष्टिः " इति स्मृतेः । कृष्णः कृषिहेतुः । सति ह्युदके भूमिं कृषन्ति । हे आदित्यरूपाऽऽरुणकेतुकाग्न इन्द्रो वृष्टेरीश्वरस्त्वमावर्तं पुनः पुनरिहाऽऽवृत्यै शच्या स्वकीयया शक्त्या तदा तदाऽपेक्षितकाले समागत्य धमन्तं गर्जनादिना शब्दयन्तं नृमणां नृभिर्मनुष्यैर्मननीयं सर्वदा प्रार्थनीयमथद्रामधोद्रवणशीलं तं द्रप्समुदकविशेषमुपꣳस्तुहि भूमौ प्रस्रावय । इत्यनेन मन्त्रेण द्रप्सवतीमिष्टकामुपदधात् ।

अथ ब्राह्मणमुच्यते—

एतयैवेन्द्रः सलावृक्या सह । असुरान्परिवृश्चति । पृथिव्यꣳशुमती । तामन्ववस्थितः संवत्सरो दिवं च । नैवंविदुषाऽऽचार्यान्तेवासिनौ । अन्योन्यस्मै द्रुह्याताम् । यो द्रुह्यति । भ्रश्यते स्वर्गाल्लोकात् । इत्यृतुमण्डलानि । सूर्यमण्डलान्याख्यायिकाः । अत ऊर्ध्वꣳ संनिर्वचनाः (३), इति ।

नि जानुकां भवति द्रुह्यातां पश्च च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके प्रथमप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

योऽयमिन्द्र आरुणकेतुको वृष्टिस्वामी सलावृक्या सलः सलिलं जलं तस्याऽऽवृङ् आदानं तद्युक्ता भूमिः सलावृक्येतया सलावृक्या निमित्तभूतया सहासुरानसवः प्राणा रमन्ते क्रीडन्ते(न्ति) येषु मेघेषु सत्सु ते मेघा असुरास्तान्परिवृश्चति परितश्छिनत्ति । अयं देवो जलार्थी पृथिवीनिमित्तं मेघभेदं कृत्वा वर्षयतीत्यर्थः । पूर्वोक्तमन्त्रे येयमंशुमती कथिता सेयं पृथिवी विवक्षिता तां पृथिवीं, दिवं चानुसृत्यायं संवत्सरात्मक

---

१ ख. ग. °पस्तुहि । २ ग. नृम्णाम° । ३ क. ख. °त्य तं श° । ग. °त्य त्वं श° । ४ ग. नृम्णां । ५ ख. ग. °मथो द्र° । ६ ख. ग. °पस्तुहि । ७ ख. ग. °वृका दा° ।

आरुणकेतुको देवो वह्निरूपेणाऽऽदित्यरूपेण वाऽवस्थितः । यः पुमानेवमारुणकेतुकाग्नेर्महिमानं जानाति तेनैवंविदुषा सहाऽऽचार्यान्तेवासिनावन्योन्यस्मै द्रोहं कर्तुं नार्हतः । आचार्योऽध्वर्युः, यज्ञे धर्मानाचरतीति व्युत्पत्तेः । यजमानोऽन्तेवासी, तस्याध्वर्योः समीपे निवासात् । तावध्वर्युयजमानावभिज्ञेन सह द्रोहयोग्यौ न भवतः । स्वयं द्रोह्यावपि न भवतो द्रोग्धारावपि न भवत इति वक्तुमन्योन्यस्मा इत्युक्तम् । तस्मै विदुषे स्वयं द्रोहमकृत्वा सोऽपि यथा न द्रुह्यति तथा वर्तितव्यम् । **यो मूढस्तस्मै विदुषे स्वयं द्रुह्यति** सोऽयं **स्वर्गलोकाद्भ्रष्टो** भवति । तस्मान्न द्रोहः कर्तव्यः । "स्मृतिः प्रत्यक्षम्" इत्यारभ्य पञ्चस्वनुवाकेषु प्रोक्तोऽर्थ उपसंहियते—**इति** एवमतीते ग्रन्थे "ऋतुर्ऋतुना नुद्यमानः" इत्यादिभिर्**ऋतुमण्डल**प्रतिपादकानि वाक्यान्युक्तानि, "एतैरादित्यमण्डलम्" इत्यादिभिः **सूर्यमण्डल**प्रतिपादकानि वाक्यान्युक्तानि, पूर्वोक्त एवार्थो दृढमाख्यायते यास्वृक्षूदाहृतासु ता **आख्यायिकाः** "शुक्रं ते अन्यत्" इत्यादयस्ता अप्युक्ताः । **अत** ऊर्ध्वमुपरितनेष्वनुवाकेषु **सनिर्वचना** निःशेषेण वचनं निर्वचनं ब्राह्मणं तेन सहिता **आख्यायिकाः** सनिर्वचनाः । पूर्वेष्वनुवाकेषु मन्त्रप्रतिपादितेऽर्थे संवादार्थमृच उदाहृता उत्तरेष्वनुवाकेषु ब्राह्मणप्रतिपादितेऽर्थे संवादार्थमृच उदाह्रियन्त इत्यर्थः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयारण्यके प्रथमप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

अथ प्रथमप्रपाठके सप्तमोऽनुवाकः ।

कल्पः—"आरोग इत्यष्टौ पदशो यत्ते शिल्पमिति च" इति[1] । तत्र ब्राह्मणमारोग इत्यादिपदप्रतिपादिकामृचमुदाहरति—

आरोगो भ्राजः पटरः पतङ्गः । स्वर्णरो ज्योति-
षीमान्विभासः । ते अस्मै सर्वे दिवमातपन्ति ।
ऊर्जं दुहाना अनपस्फुरन्त इति, इति ।

आरोगादीनि विभासान्तानि सप्त पदानि सप्तानां सूर्यविशेषाणां नामधेयानि । **ते** सप्तापि सूर्या **अस्मै** लोकार्थं **दिवमाकाशमातपन्ति** सर्वतः प्रकाशयन्ति । किं कुर्वन्तः **ऊर्जं** दुहाना वृष्टिद्वारेण क्षीरादिरसं संपादयन्तः । **अनपस्फुरन्तः** प्राणिनां प्रातिकूल्येन

---

१ ख. ग. °ति । आरोगादीनि विभासान्तानि । त° । २ ख. ग. °णभाग ।

प्रकाशनमस्फुरणं तदकुर्वन्तः । अनुकूलमेव प्रकाशनं सर्वदा कुर्वन्तीत्यर्थः । **श्रोतइति-शब्द** उपधानप्रदर्शनार्थः । उदाहृतायामस्यामृच्युक्तैरारोगादिनामभिः सप्तभिरिष्टका उपदध्यादित्यर्थः । आरोगस्तया देवतयाऽङ्गिरस्वद्ध्रुवाऽऽसीदेत्येवमुपधानमन्त्रा उन्नेयाः ।

अथाष्टमं नामधेयं दर्शयति—

कश्यपोऽष्टमः स महामेरुं न जहाति । तस्यैषा भवति, इति ।

पूर्वोक्तारोगादिसप्तसूर्यापेक्षया योऽयमष्टमः सूर्यस्तस्य **कश्यप** इति नामधेयम् । तेन नाम्नेष्टका उ(मु?)पदध्यात् । **स** च कश्यपो **मेरुपर्वतं न** कदाचिदपि परित्यजति मेरुस्थानमेव सर्वदा प्रकाशं करोति । तस्य कश्यपस्य प्रतिपादिका काचिदृग्विद्यते ।

अथ तामृचं दर्शयति —

यत्ते शिल्पं कश्यप रोचनावत् । इन्द्रियावत्पुष्कलं चित्रभानु । यस्मिन्त्सूर्या अर्पिताः सप्त साकम् (१) । तस्मिन्राजानमधिविश्रयेममिति, इति ।

हे **कश्यपाष्टमसूर्य यत्ते** तव **शिल्पं** जगत्प्रकाशलक्षणं चित्रं कर्म **यस्मिन्स्वकीये** प्रकाशरूपे चित्रकर्मण्यारोगादयः **सप्त सूर्याः साकमर्पितास्त्वया** सह स्थापितास्तस्मिञ्शिल्पे प्रकाशलक्षण **इमं** यजमानं **राजानं** दीप्तियुक्तं कृत्वाऽधिविश्रय सर्वेषामुपरि विशिष्टत्वेन स्थापय । कीदृशं शिल्पम्, **रोचनावत्**प्रकाशयुक्तम् । **इन्द्रियावदिन्द्रिय**सामर्थ्ययुक्तम् । **पुष्कलं** संपूर्णम् । **चित्रभानु** विविधरश्मियुक्तम् । इत्येषा कश्यपप्रतिपादिकाऽभिहिता ।

कश्यपस्य शिल्पे सप्तसूर्याणामर्पितत्वं स्पष्टी करोति—

ते अस्मै सर्वे कश्यपाज्ज्योतिर्लभन्ते । तान्त्सोमः कश्यपादधिनिर्धमति । भ्रस्ताकर्मकृदिवैवम्, इति ।

ते सर्वे सप्तापि सूर्या **अस्मै** जगत्प्रकाशनार्थं **कश्यपात्सकाशाज्ज्योतिर्लभन्ते** । यद्यपि सूर्याः पूर्वमेव ज्योतिष्मन्तस्तथाऽपि **तान्सूर्यान्सोमो** देवः **कश्यपात्सकाशादधिनिर्धमत्यधिकत्वेन** निस्तमस्का यथा भवन्ति तथा शोधयति । सोमो हि तानाहूय कश्यपसमीपं प्रापितवान् । तस्य कश्यपस्यानुग्रहादेतेषां प्रकाशाधिक्यं संपन्नमित्यर्थः । **भ्रस्तेत्यादिस्तत्र** दृष्टान्तः । रेफस्य व्यत्यये सति भस्त्राशब्दो धमनसाधनमित्याचष्टे ।

---

१ ग. °षा काश्य° । २ ख. स्थापितवान् । ३ क. ग. °मित्येवा° ।

यथा चर्ममय्या दृत्या वायुमुत्पाद्य ज्वलिताग्निना सुवर्णादेः किट्टादिकमपनीय **भस्त्राकर्मकृत्सुवर्णकारः** शोधयत्येवं कश्यपसंबन्धकारी सोमस्तान्सूर्यानशोधयत् ।

तेषां सप्तसूर्याणां स्वरूपे मतभेदं दर्शयति—

प्राणो जीवानीन्द्रियजीवानि । सप्त शीर्षण्याः
प्राणाः । सूर्या इत्याचार्याः, इति ।

मुखनासिकयोः संचारी यः **प्राणः** स एव सप्तभिर्वृत्तिभेदैः **सप्त सूर्या** इत्येवं केचिदाचार्या आहुः । **जीवानि** जीवननिमित्तभूतानि महदहंकारपञ्चतन्मात्ररूपाणि तत्त्वानि **सप्त सूर्या** इत्येवमन्य **आचार्याः** प्रचक्षते । **इन्द्रियजीवानि** चक्षुरादीनि पञ्चेन्द्रियाणि मनोबुद्धिसहितानि जीवननिमित्तभूतानि **सप्त सूर्या** इत्येवमपरे प्रचक्षते । शिरस्यवस्थितानि यानि सप्त च्छिद्राणि तेषु संचरन्तः **प्राणाः सप्त सूर्या** इत्यन्ये । एते सर्वेऽप्याचार्याः सप्तसूर्यबुद्ध्या स्वैरुपास्यानि तत्त्वान्याहुरतो नैते मुख्याः सप्त सूर्याः ।

अथ मुख्यानां सप्तसूर्याणां द्रष्टारावृषी उदाहरति—

अपश्यमहमेतान्त्सप्त सूर्यानिति । पञ्चकर्णो वात्स्यायनः ।
सप्तकर्णश्च प्लाक्षिः (२) । आनुश्रविक एव नौ कश्यप
इति । उभौ वेदयिते । न हि शेकुमिव महामेरुं गन्तुम्, इति ।

पञ्चकर्णनामकः कश्चिद्वत्सस्य पुत्रो महर्षिरेतान्रोगादीन्**सप्त सूर्यान्प्रत्यक्षेणैवाहमपश्यमि**त्युवाच । तथा **सप्तकर्ण**नामकः कश्चित्प्लक्षस्य पुत्रो महर्षिरप्यहमपश्यमित्युवाच । अतो मनुष्यैः संनिहितत्वादेक एव सूर्योऽवलोक्यते न तु व्यवहितत्वादितरे षट्सूर्या अवलोक्यन्ते । किंच तावुभावपि पञ्चकर्णसप्तकर्णाख्यौ महर्षी **वेदयिते** इत्थं वेदयतः प्राणिनः सर्वान्बोधयतः । किमिति तदुच्यते— **कश्यपाख्योऽष्टमः सूर्यो नावयोरुभयोरानुश्रविक एव** न तु प्रत्यक्षः । गुरूपदेशमनु श्रूयत इत्यनुश्रवो वेदस्तत्रैवावगत **आनुश्रविकः** । "यत्ते शिल्पं कश्यप" इत्यादिमन्त्रादेवावगम्यत इत्यर्थः । प्रत्यक्षादर्शने हेतुमप्याहतुः—**महामेरुं** कश्यपस्य स्थानं **गन्तुमावां न हि शेकुमिव** न शक्तौ भवाव एव, तस्माद्वेदादेव जानीवः ।

अथ कश्यपदर्शिनमृषिमुदाहरति—

अपश्यमहमेतत्सूर्यमण्डलं परिवर्तमानम् । गार्ग्यः प्राण-
व्रातः । गच्छन्त महामेरुम् । एकं चाजहतम्, इति ।

---

१ क. ख. °उदाहरन्ति । २ क. ग. °वानु° । ३ ग. गच्छतं ।

गर्गस्य पुत्रः **प्राणत्रात**नामकः काश्चिन्महर्षिस्तौ पञ्चकर्णसप्तकर्णौ प्रत्येवमुवाच । **महामेरावेव परिवर्तमानमेत**त्कश्यपाभिधं **सूर्य**मण्डलं प्रत्यक्षेणैवा[हम]पश्यम् । अतो हे मुनी युवामपि **महामेरुं** गच्छन्त यौग्येन मार्गेण गच्छतम्, अजहतं मेरुं कदाचिदप्यपरित्यजन्तमेकं कश्यपाख्यं सूर्यं च गच्छतम् ।

अथ मेरुगमने मार्गं दर्शयति—

भ्राजपटरपतङ्गा निहने । तिष्ठन्ति तपन्ति । तस्मादिह तप्त्रि-तपाः (३) । अमुत्रेतरे । तस्मादिहातप्त्रितपाः, इति ।

य एते सप्त सूर्यास्तेषां मध्य आरोगाख्यस्यास्माभिर्दृश्यमानस्य सूर्यस्य गतिः प्रसिद्धा । तदनन्तरभाविनो **भ्राजादयस्त्रयस्ते निहने** मेरुमार्गस्य निहतप्रदेशेऽधोभागे **तिष्ठन्ति तपन्ति** अवस्थिताः सन्तो रश्मिभिरधोमुखैर्मेरुमार्गादधोवर्तिनः प्राणिनः सर्वतः प्रकाशयन्ति । यस्मादेषामधोमुखा रश्मयस्तस्मादिह लोके **तप्त्रितपास्तपनशीलरश्मियुक्ताः** । इतरे तु भ्राजपटरपतङ्गेभ्योऽन्ये स्वर्णरज्योतिष्मद्विभासाख्यः सूर्यास्तेऽमुत्र मेरुमार्गादुपरिभागे वर्तन्ते । यस्मात्तेषां रश्मय ऊर्ध्वमुखास्तस्मात्त इहाधोलोकेष्वतप्त्रितपास्तपनशीलरश्मियुक्ता न भवन्ति । भ्राजादीनामधोमुखरश्मित्वात्स्वर्णरादीनामूर्ध्वमुखरश्मित्वाच्च वर्गद्वयमध्ये तापाभावाच्छीतलेन मार्गेण मेरुं गन्तुं शक्यत इत्यर्थः ।

अथ सूर्याणां मध्यवर्तिमार्गप्रतिपादिकामृचमवतारयति—

तेषामेषा भवति, इति ।

तेषां सप्तसूर्याणां संबन्धिनी मेरुमार्गप्रतिपादिकेयमृग्विद्यते ।

तामृचं दर्शयति—

सप्त सूर्या दिवमनुप्रविष्टाः । तानन्वेति पथिभिर्दक्षिणावान् ।
ते अस्मै सर्वे घृतमातपन्ति । ऊर्जं दुहाना अनपस्फुरन्त इति , इति ।

आरोगादयः **सप्त सूर्या दिवमन्तरिक्षमनुप्रविष्टा** अनुक्रमेण व्याप्ताः । **दक्षिणावान्**शब्दोक्ताविष्टकादक्षिणायुक्तोऽनुष्ठितारुणकेतुकाग्निः प्रागुक्तान्सप्त सूर्याननुसृत्य **पथिभिः** सूर्यवर्गद्वयवर्तिभिः शीतैर्मार्गैरेति मेरुं गच्छति । ते सूर्याः **सर्वेऽप्यस्मै** यजमानाय **घृतमातपन्ति** मेरुमार्गरूपमाकाशं घृतादिभोग्यवस्तुसंपूर्णं यथा भवति तथा

---

१ ग. गच्छतं । २ क. योगेन । ३ ख. ग. °म् । तत्त्वतस्त्विहाभ्राज° । ४ क. °मेतं क° । ५ ख. ग. °स्त्रोक्त इद्र° । ६ क. °ष्टकं द° । ग. °ष्ट द° । ७ ख °भिः शीतमार्गै° । ८ ग. °र्देऽस्मै° ।

प्रकाशयन्ति । किं कुर्वन्तः, ऊर्जं दुहाना भोग्यं क्षीरादिकं संपादयन्तः, अनपस्फुरन्तः संतापमकुर्वन्तः, हे यजमानेहाऽऽस्यतामिह भुज्यतामित्येवं प्रियोक्तिं वदन्ति । यथा चाऽऽथर्वणिका आमनन्ति—"एह्येहीति तमाहुतयः सुवर्चसः सूर्यरश्मिभिर्यजमानं वहन्ति प्रियां वाचमभिवदन्त्योऽर्चयन्ते" इति । इत्येषा सप्त सूर्या इत्यादिका मार्गप्रतिपादिका, तयेष्टकामुपदध्यात् । तथा च बौधायनः—"सप्त सूर्याः सप्त दिशो नानाँ यद्द्यावाश्चित्रं देवानामिति चतस्रः सौरीः पुररतात्" इति ।

इदानीं सूर्यस्वरूपे पक्षान्तरमुपन्यस्यति—

सप्तर्त्विजः सूर्या इत्याचार्याः, इति ।

य एते यज्ञे होत्रादयः सप्तर्त्विजस्त एव सप्त सूर्या इति केचिदाचार्याः प्रचक्षते । अस्मिन्नर्थे कांचिदृचमवतारयति—

तेषामेषा भवति, इति ।

तेषामृत्विग्रूपाणां सप्तसूर्याणां प्रतिपादनार्थेयमृग्विद्यते ।

तामेतामृचं दर्शयति—

सप्त दिशो नानासूर्याः (४) । **सप्त होतार ऋत्विजः** ।
देवा आदित्या ये सप्त । **तेभिः सोमाभीरक्ष ण इति**, इति ।

अष्टसु दिक्षु मध्ये या प्राची सा सूर्यवतीति सर्वेषां प्राणिनां प्रसिद्धा । यास्त्वन्या आग्नेयाद्याः सप्त दिशस्ता अपि नानाविधसूर्योपेताः । ते च सप्तसु दिक्ष्ववस्थिताः । तत्स्वामिनः सूर्या इह कर्माणि होत्रादय ऋत्विजो भूत्वा चरन्ति । होता प्रशास्ता ब्राह्मणाच्छंसी पोता नेष्टाच्छावाक आग्नीध्र इत्येते सप्त होतारः । य एतेऽत्र होत्रादय ऋत्विजो देवा भूत्वा सप्ताऽऽदित्या इत्युच्यन्ते, हे सोम यागाधिपते तेभिर्होतृरूपैरादित्यैर्नोऽस्मानभिरक्ष । इत्यनयाऽपीष्टकामुपदध्यात् ।

[* ननु सूर्या ऋत्विग्रूपा इत्यस्मिन्नर्थे इयमृगाहृता । तत्र दिशो नानासूर्या इत्येतदप्रस्तुताभिधानमित्याशङ्क्योत्तरमाह]—

तदप्याम्नायः । दिग्भ्राज ऋतून्करोति, इति ।

यदुक्तं दिशां नानासूर्योपेतत्वं तदप्याम्नायः, शाखान्तरे कश्चिन्मन्त्रो ब्रूते । अतो वेदान्तरसिद्धत्वादेतदपि वक्तव्यमेव न त्वप्रस्तुतम् । किंच तस्मिन्नर्थे युक्तिरप्यस्ति । दिग्भ्राजस्तां तां दिशं प्राप्यावस्थिताः सूर्या ऋतून्वसन्तादिसूचितानृतुधर्मान्करोति

* एतदारभ्योत्तरमाहेत्यन्तं क. पुस्तके नास्ति ।

१ क. हीरादिकं । २ ख. ग °ना पन्थानश्चि° ३ ग. °स्तुतं किंचित् । त° ।

तस्यां तस्यां दिशि कुर्वन्ति । न हि ऋतुनिष्पादकसूर्यव्यतिरेकेण तत्तदृतुधर्माः संभवन्ति, तस्मात्सन्त्येव दिक्षु विभिन्नाः सूर्याः ।

अथ कैमुतिकन्यायेन दिशां बहुसूर्यत्वं दृढी करोति—

एतयैवाऽऽवृताऽऽ सहस्रसूर्यताया इति वैशम्पायनः, इति ।

एतयैवाऽऽवृता अनेन(वृताऽनेन)नैव प्रकारेणर्तुधर्मा यत्र सन्ति तत्र तत्संपादकः सूर्योऽस्तीति न्यायेनाऽऽ **सहस्रसूर्यतायाः** सहस्रसंख्याकसूर्योपेतत्वपर्यन्तं दिक्षु सूर्यभेदाः कल्पनीयाः, तत्र सप्तसूर्यत्वे किमाश्चर्यमिति **वैशम्पायन** आचार्यो मन्यते । आसहस्रमित्युपलक्षणम्, अनन्ताः सूर्या इत्यर्थः ।

अनन्तसूर्यप्रतिपादिकामृचमवतारयति—

तस्यैषा भवति, इति ।

तस्य सहस्रसूर्यवत्त्वस्य प्रतिपादिकेयमृग्विद्यते ।

तामेतामृचं दर्शयति—

यद्द्यावः इन्द्र ते शतꣳ शतं भूमीः । उत
स्युः । न त्वा वज्रिन्त्सहस्रꣳ सूर्याः (५) ।
अनु न जातमष्ट रोदसी इति, इति ।

यद्यदि हे इन्द्र ते तव **शतं द्यावः** स्युर्बहुभिः शतसंख्याभिर्युक्ता द्युलोकाः संभवेयुः, **उतापि च शतं भूमीः** स्युर्बह्वीभिः शतसंख्याकाभिर्युक्ता भूमयोऽपि यदि संभवेयुः, हे **वज्रिन्**स्तदानीमपि **रोदसी** जातं द्यावापृथिव्योर्मध्ये समुत्पन्नं **त्वां सहस्रसू(स्रं सू)र्याः** सहस्रोपलक्षिता अनन्ताः सूर्या [न] **नान्वष्ट** [न] नान्वश्नुवते त्वामनु न [न] व्याप्नुवन्ति । एतावत्सु द्युलोकेषु भूलोकेषु च सत्स्वपि तत्र तत्र स्थितं त्वामनु सूर्यव्याप्तेरपर्याप्ता देशाः, सूर्याणामनन्तत्वादित्यर्थः । इत्यनयाऽपीष्टका उ(मु?)पदध्यात् ।

मन्त्रोक्तमनन्तसूर्यत्वं युक्त्योपपादयति—

नानालिङ्गत्वादृतूनां नानासूर्यत्वम्, इति ।

यद्येक एव सूर्यः स्यात्तदानीं वसन्ताद्यृतूनां नानालिङ्गत्वं न स्यात्, न हि कारणभेदमन्तरेण कार्यभेदः संभवति । तस्मादृतुधर्मवैलक्षण्यसिद्धये बहुसूर्यत्वमभ्युपेयम् ।

कथं तर्हि पूर्वत्र कश्यपोऽष्टम इत्येवं सूर्याणामष्टसंख्या स्वीकृतेत्याशङ्क्य तदभिप्रायं दर्शयति—

अष्टौ तु व्यवसिता इति, इति ।

---

१ ख. ग. °येन स°। २ ग. सूर्याण्या°।

बाढम्। सन्त्येव तत्तल्लिङ्गकल्प्या अतन्ताः सूर्याः किंतु तत्रास्ति कश्चिद्विशेषो व्यवसिता निश्चिताः सूर्या अष्टाविंत्येवंविधः, पञ्चवर्णसप्तकर्णाभ्यां सप्तानां सूर्याणां प्रत्यक्षेण दृष्टत्वात्प्राणत्रातेनाष्टमस्यापि दृष्टत्वात्।

अष्टसंख्यां निगमयति—

सूर्यमण्डलान्यष्टांत ऊर्ध्वम्, इति।

यस्मादृषिभिर्दृष्टत्वेनाष्टौ सूर्या निश्चिता अतः कारणादस्माभिरदृश्यमानान्यप्यूर्ध्वमाकाशे सूर्यमण्डलान्यष्ट विद्यन्त इत्यभ्युपेयम्। तत्र संनिहितत्वादेकमेवास्माभिर्दृश्यते।

बहुमण्डलप्रतिपादिकामृचमुदाहरति—

तेषामेषा भवति, इति।

तेषामनेकसूर्यमण्डलानां प्रतिपादिकेयमृग्विद्यते।

तामेतामृचं दर्शयति—

चित्रं देवानामुदगादनीकम्। चक्षुर्मित्रस्य वरुणस्याग्नेः। आप्रा द्यावापृथिवी अन्तरिक्षम्। सूर्य आत्मा जगतस्तस्थुषश्चेति(६),इति।
साकं प्राक्षिस्तपुत्रिषा नानासूर्याः सूर्या नव च॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके प्रथमप्रपाठके सप्तमोऽनुवाकः॥ ७॥

चित्रं बहुमण्डलरूपत्वेन विचित्रं देवानामनीकमन्धकाररूपवृत्रशरीरात्मकस्य शत्रोर्विनाशकत्वेन देवसैन्यरूपमादित्यमण्डलमुदगात्पूर्वस्यां दिश्युदेति। तच्च मण्डलजातं मित्रादीनां चक्षुःस्वरूपम्। अन्धकारनिवारणेन चक्षुषोऽनुग्रहात्। तादृशं सैन्यं द्यावापृथिवी अन्तरिक्षं चाऽऽप्रा लोकत्रयं स्वकीयप्रकाशेनाऽऽपूर्य वर्तते। तथाविधमण्डलसमूहस्वामी सूर्यो जगतो जङ्गमस्य तस्थुषः स्थावरस्य चाऽऽत्मा स्वरूपम्। इत्यनेनेष्टकामुपदध्यात्॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये प्रथमप्रपाठके सप्तमोऽनुवाकः॥ ७॥

अथ प्रथमेऽष्टमेऽनुवाकः ।

कल्पः--"पुस्तात्केदमभ्रमित्येकाम्" इति । पाठस्तु--

केदमभ्रं निविशते । कायꣳ संवत्सरो मिथः ।

काहः केयं देव रात्री । क मासा ऋतवः श्रिताः, इति ।

अपो बिभ्रती(भर्ती) त्यभ्रं मेघस्वरूपं तच्चाऽऽकाशे निरालम्बत्वेनास्माभिर्दृश्यतेऽतः कुत्राऽऽधारे निवसतीति प्रश्नः । न ह्यालम्बनमन्तरेण निर्देष्टुं शक्यम् । एतच्चोपलक्षणम्, कारणमपि किमिति प्रष्टुरभिप्रायः । एवं **संवत्सराहोरात्रमासर्तवः** कस्मिन्नाश्रयेऽवस्थिताः किं वा तेषां कारणमिति हे **देव** जगत्कर्तः कथय । संवत्सरस्य बह्ववयवसमष्टित्वं द्योतयितुं **मिथ** इत्युक्तम् । बहवः कालावयवाः संभूय वसन्ति यत्र सोऽयं **संवत्सरः** ।

कल्पः--"अर्धमासा इत्युपरिष्टात्" इति ।

अर्धमासा मुहूर्ताः । निमेषास्त्रुटिभिः सह ।

केमा आपो निविशन्ते । यदीतो यान्ति संप्रति, इति ।

अर्धमासमुहूर्तनिमेषाः प्रसिद्धाः । कालपरमाणुद्वयात्मकः कालस्त्र्यणुकस्त्रुटिः, तथाविधैस्त्रुटिभिः **सह**ार्धमासादयः कुत्राऽऽधारे स्थिताः कुतश्चोत्पन्नाः । भूमौ वर्तमाना **आपो** याः सन्ति ता **यदि** घर्मकाल **इतो** भूमेः सकाशाद्**यान्ति** । दृश्यते हि तस्मिन्काले सर्वत्र जलशोषः । **संप्रति** तदानीमिमा आपः **क निविशन्ते** चाऽऽसामाधारः कः ।

कल्पः--"काला अप्सु निविशन्ते(न्त) [इति द्वे?]" इति । तत्र प्रथमामाह--

काला अप्सु निविशन्ते । आपः सूर्ये समाहिताः (१)।

अभ्राण्यपः प्रपद्यन्ते । विद्युत्सूर्ये समाहिता, इति ।

पूर्वमन्त्रद्वयोक्तानां प्रश्नानामिदमुत्तरम् । संवत्सरादयस्त्रुट्यन्ताः कालाः पृष्टास्ते सर्वे **काला अप्सु निविशन्ते** । "आपो वा इदमग्रे सलिलमासीत्" इत्यपां जगत्कारणत्वेनाऽऽम्नातत्वात् । तत्रैव कालानामवस्थानमुत्पत्तिश्च । तथा हि **मनुना** तावदेवं स्मर्यते--

"अप एव ससर्जाऽऽदौ तासु वीर्यमवासृजत् ।
तदण्डमभवद्धैमं सूर्यकोटिसमप्रभम्" इति ।

---

१ क. °म्बनत्वे° । २ क. °न्ते वा तासा° । ३ ख ग. °न्त्यादयः का° ।

परमेश्वरेण प्रथमं सृष्टास्वप्सु घनीभावसामर्थ्ये प्रक्षिप्ते सति ब्रह्माण्डं निष्पन्नं[1] तच्च[2] ब्रह्माण्डमभिन्नं सद्यावदवस्थितं तावतः कालस्य संवत्सर इति नाम संपन्नम्। तथा च वाजसनेयिनो **बृहदारण्यके** समामनन्ति—"तद्ध[3]द्रेत आसीत्संवत्सरोऽभवन्न ह पुरा ततः संवत्सर आस" इति। एवं ब्रह्माण्डेन सहाप्सु संवत्सरे समुत्पन्ने सति तदवयवाः कालविशेषाः सर्वेऽप्यद्भ्य एवोत्पन्ना अप्स्वेव **निविशन्ते**, तदिदं कालप्रश्नस्योत्तरम्। या एता **आपो** भूमौ **श्रुप्यन्ति** ताः सर्वा रश्मिद्वारा **सूर्ये समाहिता** भवन्ति। घर्मकाले हि तीक्ष्णैः सूर्यरश्मिभिर्जलशोषः सर्वैः प्राणिभिर्दृश्यते। अत एव **बुद्धिमद्भिरुक्तम्**— "सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः" इति। इदं च केमा आपो निविशन्त इत्यस्योत्तरम्। तेभ्यः सूर्यरश्मिभ्यः सकाशाद[4] **भ्राणि** जलं प्राप्नुवन्ति। रश्मयो हि स्वानिष्ठजलं धूमज्योतिर्मरुतां मेलनेनाभ्राकारमापादयन्ति, अतोऽभ्रस्य रश्मिगता आप एवोत्पत्तिकारणमाधारश्च। इदं च केदमभ्रमितिप्रश्नस्योत्तरम्। येयं **विद्युन्मेघेषु** दृश्यते येयं **सूर्ये समाहिता**। सूर्यरश्मेरेव विद्युदाकारेण परिणतत्वात्। एतदुत्तरसामर्थ्यात्केयं विद्युन्निविशत इत्यपि प्रश्नोऽत्र द्रष्टव्यः।

अथ द्वितीयामाह—

अनवर्णे इमे भूमी। इयं चासौ च रोदसी, इति।

वर्णो रूपविशेषस्तद्राहित्यमवर्णत्वं कुरूपत्वम्। केनापि कुरूपत्वेन रहितत्वमनवर्णत्वं सुरूपत्वम्। **इमे भूमी** उभे **अनवर्णे** सुरूपे दृश्येते। अत्र द्विवचनान्तभूमिशब्देन विवक्षितमर्थं श्रुतिरेव ब्रूते। **इयं च** भूमिरप्यसौ **च** द्यौरप्येते **रोदसी** द्यावापृथिव्यौ भूमिशब्देन विवक्षिते इत्यर्थः। द्यावापृथिव्योः सुरूपत्वं नाम बहुविधदेवपरिपूर्णत्वम्।

कल्पः—"किंस्विदत्रेति पञ्च वैष्णवीः" इति। तत्र प्रथमामाह—

किꣳस्विदत्रान्तरा भूतम्। येनेमे विधृते उभे।

विष्णुना विधृते भूमी। इति वत्सस्य वेदना, इति।

येन वस्तुनेमे द्यावापृथिव्यावुभे अपि **विधृते** विशेषेण सर्वजगदाधारत्वेन धृते **अत्रान्तरा**ऽनयोर्द्यावापृथिव्योर्मध्ये **किंस्विद्भूतं** किं नाम वस्तु तादृशं विधारकमभूत्, इति प्रश्नः। **विष्णुना** व्यापिना परमेश्वरेण **भूमी** द्यावापृथिव्यौ **विधृते** इत्येवं **वत्सास्यस्य** महर्षेर्**वेदना** विज्ञानम्। वत्सो हि स्मृतिकर्ता स च विष्णुमेव द्यावापृथिव्योर्विधारकं स्मरति। इदं च किंस्विदत्रेतिप्रश्नस्योत्तरम्।

---

१ ख. °न्नं स°। २ क. तत्र ब्र°। ३ क. तद्रे°। ४ ख. ग. आभाति। ५ ख. ग. °द्रे स°। ६ क. °प्रश्नोत्त°। ७ क. °ष्णवीभिरवति। ख. ग. °ष्णवीति।

अथ द्वितीयामाह—

इरावती धेनुमती हि भूतम्। सूयवसिनी मनुषे दशस्ये (२)।
व्यष्टम्नाद्रोदसी विष्णवेते। दाधर्थ पृथिवीमभितो मयूखैः, इति।

मनुषे मनुष्यार्थमेते द्यावापृथिव्यौ **इरावती** अन्नवत्यौ बह्वन्नयुक्ते **धेनुमती** धेनुमत्यौ **सूयवसिनी** शोभनैर्यवसैर्भक्ष्यैर्युक्ते **दशस्ये** दातुमर्हे भूतम्[1] अन्नादिदानशक्ते भवतः। **रोदसी** द्यावापृथिव्यावेतादृशौ **व्यष्टम्नाद्विष्णुर्विशेषेण** धृतवान्। हे **विष्णो** त्वं **पृथिवीमेतां** द्युलोकसहितामभितोऽध उपरि च **मयूखैः** शङ्कुस्थानीयै रश्मिभिः **दाधर्थ** धृतवानसि।

अथ तृतीयामाह—

किं तद्विष्णोर्बलमाहुः। का दीप्तिः किं परायणम्।
एको यद्धारयद्देवः। रेजती रोदसी उभे, इति।

यद्देवो यो विष्णुरेक एव **रेजती** राजमाने **रोदसी** द्यावापृथिव्यावुभे **धारयद्धृ**तवांस्तस्य **विष्णोः किं तद्बलं** तादृशी शक्तिः कुत आगता, यैर्मयूखैर्धृतवान्सा **दीप्तिः का** कुत्रत्या[2], **किं** च **परायणं** तस्य सहायभूतं वस्तु, इति प्रष्टार **आहुः**।

अथ चतुर्थीमाह—

वाताद्विष्णोर्बलमाहुः। अक्षरादीप्तिरुच्यते। त्रिप-
दाद्धारयद्देवः। यद्विष्णोरेकमुत्तमम् (३), इति।

विष्णुर्हि वातरूपं सूत्रात्मानमुत्पाद्य तेन सूत्रेण सर्वं जगद्धारयति। तथा च **वाजसनेयिन** आमनन्ति—"वायुर्वै गौतम तत्सूत्रं वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानि भवन्ति" इति। तस्माद्विष्णोर्बलं धारणसामर्थ्यं **वातादागतमित्यभिज्ञा उत्तरमाहुः**। दीप्तिर्जगद्वभासकं ज्योतिः, तच्च विष्णोरक्षराद्विनाशरहितात्स्वकीयात्परमपदाद्भवतीत्यभिज्ञैरुच्यते। विष्णोर्हि जगत्सृष्ट्यादिनिर्वाहकमुपासकैरुपास्यमिदमपरं यच्च ज्ञानिभिर्वेद्यं परं[3] पदम्, अत एवाऽऽम्नायते—"तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः" इति। तत्र परविद्यागम्यं स्वरूपं विनाशराहित्यादक्षरम्। अत एवाऽऽथर्वणिका आमनन्ति—"अथ परा यया तदक्षरमधिगम्यते" इति। तस्मादक्षराज्जगद्वभासिका चैतन्यरूपा दीप्तिर्लभ्यते[4]। "तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति" इति श्रुतेः। इदं च का

---

१ क. °मवाद्दि°। २ ग. कुतत्या। ३ ख ग. रमम्,। ४ क. °र्लभते।

दीप्तिरित्यस्योत्तरम्—**पुरुषसूक्ते**—"पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि" इत्याम्नायते। सर्वमप्येतज्जगदस्य परमेश्वरस्य चतुर्थोंऽशः। अवशिष्टमंशत्रयं व्यवहारातीतत्वादमृतमविनश्वरं सद्द्योतनात्मके स्वस्वरूपे सर्वदाऽवतिष्ठते। तादृशात्त्रिपात्स्वरूपाद्ब्रह्मणो लब्धसामर्थ्यो **देवो** विष्णुर्धारयत्सर्वं जगद्धारयति। **यत्त्रिपाद्वस्तु विष्णोरेकमेवोत्तमं** स्वरूपं तस्मात्त्रिपदादिति पूर्वत्रान्वयः। अथ वैतदुत्तरवशात्पूर्वत्रैको यद्धारयदिति वाक्ये कथमेको धृतवानिति प्रश्न उन्नेयः।

अथ पञ्चमीमाह—

अग्नयो वायवश्चैव। एतदस्य परायणम्, इति।

य एतेऽग्नयः सावित्रादय आरुणकेतुकान्ताः, ये च तत्सखिभूता **वायवः** चकाराद्येऽप्यादित्याः, **एतत्सर्वं** देवताजातम**स्य** विष्णोः **परायणं** सहकारिभूतम्। इदं च किं परायणमित्यस्योत्तरम्।

कल्पः—"पृच्छामि त्वा परं मृत्युमिति चतस्रो मृत्युमतीः" इति। तत्र प्रथमामाह—

पृच्छामि त्वा परं मृत्युम्। अवमं मध्यमं चतुम्।
लोकं च पुण्यपापानाम्। एतत्पृच्छामि संयति, इति।

अत्र कश्चिन्मुनिर्जिज्ञासुरभिज्ञमन्यं मुनिं पृच्छति—हेऽभिज्ञ मुने त्वां प्रति चतुर्विधान्मृत्यून्पृच्छामि। परोऽवमो मध्यमश्चतुर्थश्चेत्येते मृत्यवस्तेषां स्वरूपं ब्रूहि। चतुर्थ इत्येतस्मिन्नर्थे **चतुः** तु)शब्दः। तथा पुण्यकृतां पापिनां च **लोकं** ब्रूहि। एतत्सर्वमिदानीं **पृच्छामि**।

अथ द्वितीयामाह—

अमुमाहुः परं मृत्युम्। अवमानं तु मध्यमम्।
अग्निरेवावमो मृत्युः। चन्द्रमाश्चतुरुच्यते (४), इति।

इदमभिज्ञस्योत्तरम्—योऽसावादित्योऽमुमेव **परं मृत्युं** पूर्वे महर्षय **आहुः**। आदित्यस्य परिस्पन्दबाहुल्येनाऽऽयुषः क्षये सति मृत्योरलङ्घनीयत्वात्। **अवमानं** वायुं **मध्यमं मृत्युमाहुः**। प्राणवायोर्नाडीष्वन्यथा संचारे सति तत्क्लेशेन मृत्युः प्राप्यते स च प्राणायामकुशलैर्योगिभिः क्लेशेन समाधातुं शक्यते, तस्मान्मध्यमो मृत्युः। जाठराग्निर्यदा मन्दो भवति तदा व्याधिद्वारा मृत्युः प्राप्नोति स च चिकित्सकैरल्प-

---

१ ख. °रं तदर्था°। २ क. ख. °यः। ए३°। ३ ख. त्वां। ४ ख. त्वां। ५ क. त्वा। ६ क. ख. परमो मध्यमोऽवमोऽधमश्च°। ७ क. °तुर्थे°। ८ ख. °त्युः। ज८°। ९ क. ख. मन्दी।

प्रयासेन समाधातुं शक्यते तस्मादग्निरवमो मृत्युः। चन्द्रमा ओषधीनामधिपतिः, तदनुग्रहाभावे सत्यन्नाभावान्मृत्युः प्राप्नोति, तस्मादसौ चतुर्थो मृत्युः।

अथ तृतीयामाह--

अनाभोगाः परं मृत्युम्। पापाः संयन्ति सर्वदा।
आभोगास्त्वेवं संयन्ति। यत्र पुण्यकृतो जनाः, इति।

पापाः श्रुतिस्मृत्युल्लङ्घनेन पापमेवाऽऽचरन्तः पुरुषा **अनाभोगाः** सुखलेशेनापि हीनाः कृमिकीटादयः सन्तः **सर्वदा परं मृत्युं संयान्ति** कतिपयैरेवाऽऽदित्यपरिस्पन्दैरल्पायुषः सन्तः पुनः पुनर्जायन्ते म्रियन्ते च। सेयं सर्वदा परमृत्युप्राप्तिः। ये तु श्रुतिस्मृतिमार्गवर्तिनस्ते सर्वेऽप्याभोगाः संपूर्णाः सर्वभोगयुक्ताः सन्तस्तादृशं स्थानं प्राप्नुवन्ति। **यत्र** यस्मिन्स्वर्गे पूर्वे **पुण्यकृतो जना** देवा वर्तन्ते तत्र गच्छन्ति। एतत्तु लोकं च पुण्यपापानामित्यस्योत्तरम्।

अथ चतुर्थीमाह—

ततो मध्यममायान्ति। चतुर्थीं च संप्रति, इति।

ततः पूर्वोक्तेभ्योऽत्यन्तपापकृद्भ्योऽत्यन्तपुण्यकृद्भ्यश्चान्ये ये पुरुषा मिश्राणि पुण्यपापान्याचरन्ति ते **संप्रति** मनुष्यजन्मनि मध्यमाधमचतुर्थमृत्युं च तदा प्राप्य प्रतीकारैः समादधते। एतदपि पुण्यपापलोकप्रश्नस्योत्तरम्।

कल्पः--"पृच्छामि त्वा पापकृतश्चतस्रो निरयवतीः" इति। तत्र प्रथमामाह—

पृच्छामि त्वा पापकृतः। यत्र यातयते यमः।
त्वं नस्तद्ब्रह्मन्प्रब्रूहि। यदि वेत्थासतो गृहान् (५), इति।

हे **ब्रह्मंस्त्वामिदं पृच्छामि**। किं पृच्छसीति तदुच्यते—**पापकृतः** प्राणिनो **यमो यत्र स्थाने यातयते** क्लेशयति तत्स्थानं **नोऽस्मभ्यं त्वं प्रब्रूहि**। **यद्यसतः** पापिनो जन्तोर्**गृहा**[1]**नायतनानि वेत्थ** तर्हि शुश्रूषवे मह्यं ब्रूहि।

अथ द्वितीयामाह—

कश्यपादुदिताः सूर्याः। पापान्निघ्नन्ति सर्वदा।
रोदस्योरन्तर्देशेषु। तत्र न्यस्यन्ते वासवैः, इति।

योऽयं कश्यपाख्योऽष्टमः सूर्यो महामेरौ नित्यं वसति तस्मादुत्पन्ना आरोगादयः सप्त सूर्यास्तदीयमूर्तिविशेषा अन्ये सहस्रसंख्याकास्ते सर्वेऽपि **रोदस्योरन्तर्द्यावापृथि-**

---

१ ग. च. परं मृत्युं प्रा°। २ ग. °हान्पातकान।

व्योमध्य(ध्ये)देशेषु रौरवादिनरकप्रदेशेषु, **पापान्पापिनः** प्राणिनः **सर्वदा निर्घ्नन्ति** निःशेषेण मारयन्ति । मारिताश्च ते पापिनो **वासवैर्निर्वासहेतुभिः** सूर्यराश्मिरूपैर्देवैस्तत्र **न्यस्यन्ते** तेष्वेव नरकप्रदेशेषु पुनरपि बाधिता उत्पाद्य स्थाप्यन्ते ।

अथ तृतीयामाह—

तेऽशरीराः प्रपद्यन्ते । यथाऽपुण्यस्य कर्मणः ।

अपाण्यपादकेशासः । तत्र तेऽयोनिजा जनाः, इति ।

ते पापिनस्तेषु नरकस्थानेष्वशरीराः[1] संपूर्णावयवसमीचीनावयवरहिताः **प्रपद्यन्ते** जन्म प्राप्नुवन्ति, **अपुण्यस्य कर्मणो यथा** योग्यं तथा प्राप्नुवन्ति । तत्र कश्चित्पापी पाणिशून्यः कुणिर्भवति । अपरः पादहीनः पङ्गुर्भवति । अपरः **केशहीनः** खलतिर्भवति । एवमपाण्यपादकेशासो विकृतशरीरा जायन्ते । किंच **तत्र** तेषु नरकस्थानेषु कोचिदयोनिजा जन्तवो भवन्ति । तन्मध्ये केचित्स्वेदजाः कृमिदंशाद्या अपर उद्भिदस्तरुगुल्माद्या भवन्ति । अत एव **वाजसनेयिनः** पञ्चाग्निविद्यायां दक्षिणोत्तरमार्गरहितानां पापिनामीदृशं जन्माऽऽमनन्ति—" अथ य एतौ पन्थानौ न विदुस्ते कीटाः पतङ्गा यदिदं दन्दशूकम् " इति । **छन्दोगाश्चैवमामनन्ति**—"तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति " इति ।

अथ चतुर्थीमाह—

मृत्वा पुनर्मृत्युमापद्यन्ते । अद्यमानाः स्वकर्मभिः (६) ।

आशातिकाः क्रिमय[3] इव । ततः पूयन्ते वासवैः, इति ।

तेषु नरकस्थानेषूत्पन्नाः प्राणिनः सकृन्मृत्त्वा **पुनरुत्पद्यन्ते मृत्युं** प्राप्नुवन्ति, जन्ममरणसहस्राणि प्रतिपद्यन्त इत्यर्थः । ते च **स्वकर्मभिः** स्वकीयैः **पापैरद्यमाना** भक्ष्यमाणाः, कर्मपरवशा इत्यर्थः । तेषामेव मध्येऽस्मत्प्रत्यक्षसिद्धो दृष्टान्त उदाह्रियते— **आशातिका** आगत्य शात्यमाना अस्माभिरेव बाध्यमानाः शिरोवस्त्रखट्वादिषु वर्तमानाः **क्रिमय इव** यूका मत्कुणादय इव । यूकादयः पापिनो यथाऽस्माभिः प्रतिक्षणं मार्यन्त एवमन्येऽपि पापिनो देवैर्मार्यन्त इत्यर्थः ।

अथ ब्राह्मणम्—

अपैतं मृत्युं जयति । य एवं वेद । स खल्वेवं[4]-

विद्ब्राह्मणः । दीर्घश्रुत्तमो भवति । कश्यप-

---

१ क. °रीरा अस° । २ क. °यवाः स° । ३ ग. कृमयः । ४ ख. ग. खल्वेवं° ।

स्यातिथिः सिद्धगमनः सिद्धागमनः, इति।

यः पुमानेवं कश्यपादुदिताः सूर्या इत्याद्युक्तप्रकारेण कश्यपमहिमानं जानाति, असावेतमपमृत्युं कृमिकीटादिकेषूक्तमपकृष्टमृत्युं जयति। विदुषः पापेष्वप्रवृत्तेर्युक्तो मृत्युजयः। किं च स खलु ब्राह्मण एवंवित्कश्यपमहिमाभिज्ञः सन्दीर्घश्रुत्तमो भवति, दीर्घं चिरकालं कश्यपेन श्रूयते सम्यगनुष्ठाताऽयमिति, ततोऽप्यतिशयो बहूनां देवानां मुखाच्छ्रवणं बहवोऽपि देवाः कश्यपसमीपं गत्वा ब्राह्मणोऽयमारुणकेतुकं सम्यगनुतिष्ठतीति पुनः पुनः कथयन्त्यतोऽयं दीर्घश्रुत्तमः। परलोके कश्यपस्यातिथिरिव पूज्यो भवति। किंच स ब्राह्मणः स्वेच्छया कश्यपसमीपगमनागमनयोः समर्थो भवति।

अथ ब्राह्मणोक्तार्थस्य प्रतिपादिकामृचमवतारयति—

तस्यैषा भवति, इति।

तामेतामृचं दर्शयति—

आ यस्मिन्त्सप्त वासवाः। रोहन्ति पूर्व्या रुहः (७)।

ऋषिर्ह दीर्घश्रुत्तमः। इन्द्रस्य घर्मो अतिथिरिति, इति।

यस्मिन्कश्यपे सप्तसंख्याका आरोगादयः सूर्या आ रोहन्ति कश्यपादेवोत्पद्य स्थितिं लभन्त इत्यर्थः। कीदृशाः सप्त सूर्याः, वासवा जगन्निवासहेतवः, पूर्व्या रुहः सृष्ट्यादावुत्पन्नत्वेन प्रथमाङ्कुरभूताः, तस्येन्द्रस्य परमैश्वर्ययुक्तस्य कश्यपस्य दीर्घश्रुत्तमनामकः कश्चिदृषिर्घर्मो दीप्यमानः सन्नतिथिः संपन्नः। इत्यनयेष्टकामुपदध्यात्। अत एव बौधायनः—"मा यस्मिन्नग्ने नयेति द्वे" इति।

अथ ब्राह्मणमुच्यते—

कश्यपः पश्यको भवति। यत्सर्वं
परिपश्यतीति सौक्ष्म्यात्, इति।

योऽयमष्टमः सूर्यो रूढ्या कपश्य इतिनाम्नाऽभिधीयते स एवावयवार्थपर्यालोचनायामाद्यन्तयोरक्षरयोर्व्यत्यासेन पश्यको भवति। यद्यस्मात्कारणादत्यन्तसूक्ष्मत्वेन दिव्यदृष्ट्या सर्वमतीतानागतादिकं पारितः पश्यति।

तदेवं कश्यपप्रकरणं समाप्याग्निप्रकरणमारभते—

अथाग्नेरष्टपुरुषस्य। तस्यैषा भवति, इति।

---

१ क. °कीट्यूढे°। ख. ग. °कीटोढके°। २ ख. °र्हि दी°। ३ क. °रभ्यते।

अथ कश्यपमहिमकथनानन्तरमष्टपुरुषस्याष्टसंख्याकमूर्तियुक्तस्याग्नेर्महिमा कथ्यत इति शेषः। तस्याग्नेर्महिमप्रतिपादिकेयमृग्विद्यते।

तामेतामृचं दर्शयति—

अग्ने नय सुपथा राये अस्मान् । विश्वानि देव
वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनः ।
भूयिष्ठां ते नमउक्तिं विधेमेति (८), इति ।

समाहिता दशस्ये उत्तममुच्यते गृहान्त्स्वर्कर्मभिः पूर्व्या रुहं इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके प्रथमप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

हेऽग्ने राये धनप्राप्त्यर्थमस्मान्सुपथा नय शोभनेन मार्गेण प्रापय। हे देव त्वं विश्वानि वयुनानि सर्वान्मार्गाञ्जानन्सन्वर्तसे। जुहुराणं कुटिलमेनः पापमस्मद्युयोध्यस्मत्सकाशाद्वियोजय। ते तुभ्यं भूयिष्ठामत्यधिकां नमउक्तिं नमस्कारप्रतिपादकं वाक्यं विधेम कुर्यास्म। इत्यनयेष्टकामुपदध्यात्॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यके प्रथमप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

अथ प्रथमे नवमोऽनुवाकः।

कल्पः—" अग्निश्च जातवेदाश्चेत्यष्टौ " इति। पाठस्तु—

अग्निश्च जातवेदाश्च । सहोजा अंजिराप्रभुः । वैश्वानरो
नर्यापाश्च । पङ्क्तिराधाश्च सप्तमः । विसर्पेवाऽष्टमोऽ
ग्नीनाम् । एतेऽष्टौ वसवः क्षिता इति, इति ।

अग्न्यादयः शब्दा मूर्तिविशेषाणां नामधेयानि। तत्र यः पङ्क्तिराधाः सोऽग्नीनां मूर्तिविशेषाणां मध्ये सप्तमो ज्ञेयः। विसर्पच्छ(र्पेवश)ब्देन विसर्पीति नाम विवक्ष्यते। सोऽयमग्नीनां मध्येऽष्टमः। एतेऽग्न्यादयोऽष्टौ मूर्तिविशेषा वसवः सर्वेषां प्राणिनां निवासहेतवः, स्वयं च क्षिताः सुखेन निवासं प्राप्ताः। इतिशब्द उपधानप्रदर्शनार्थः। अस्यामृच्यभिहितानि नामान्येवोपधानमन्त्राः। अग्निस्तया देवतयाऽङ्गिरस्वद्ध्रुवाऽऽसीदेत्येवं सर्वत्रोपधानम्।

---

१ ख. ग. °सर्पो वाऽ°।

अथ ब्राह्मणमुच्यते—

यथर्त्वेवाग्नेरर्चिर्वर्णविशेषाः। नीलार्चिश्च पीतकार्चिश्चेति, इति।

ऋतूननतिक्रम्य **यथर्तु**, यस्यर्तोर्यादृशो वर्णविशेषस्तस्मिन्नृतावग्नेरपि **वर्णविशेषस्तादृगेव** भवति। एवं सति क्वचिदसौ **नीलार्चिः** क्वचिच्च **पीतार्चिरि**त्यादिकं द्रष्टव्यम्।

कल्पः—"प्रभ्राजमाना इत्येकादश रुद्राः प्रभ्राजमान्य इत्येकादश रुद्राण्यः" इति। तदेतदुभयविधं विधत्ते—

अथ वायोरेकादशपुरुषस्यैकादशस्त्रीकस्य, इति।

अथाग्नेरष्टविधस्य मन्त्रस्य कथनादनन्तरम्, एकादशभिः पुरुषमूर्तिभिरेकादशाभिः स्त्रीमूर्तिभिश्च युक्तस्य वायोरिष्टका उपधेयाः।

तत्र पूर्ववन्नामधेयरूपान्मन्त्रान्दर्शयति—

प्रभ्राजमाना व्यवदाताः (१)। याश्च वासुकि-
वैद्युताः। रजताः पर्षाः श्यामाः। कपिला अति-
लोहिताः। ऊर्ध्वा अवपतन्ताश्च। वैद्युत इत्येकादश, इति।

अत्रापि प्रभ्राजमानास्तया देवतयाऽङ्गिरस्वद्ध्रुवाऽऽसीदेत्यादिकं द्रष्टव्यम्। **याश्चेत्यु**पन्यासार्थमुच्यते नतु नामान्तःपाती। वैद्युतपर्यन्ता या (य) उक्तास्ता (स्त) **इतिशब्देन** परामृश्यन्ते। **इत्येकादश** वायुसंबन्धिपुरुषाणाः। एकैकस्मिन्गणे पुरुषबाहुल्यात्**प्रभ्राजमाना** इत्यादिबहुवचननिर्देशः। एकादशस्त्रीकस्येति विहितत्वादनाम्नाता अपि स्त्रीनाममन्त्रा अत्रोन्नेयाः। तथा च प्रभ्राजमान्यस्तया देवतयाऽङ्गिरस्वद्ध्रुवाऽऽसीदेति मन्त्रपाठः संपद्यते।

उक्तवायुगणवेदनं प्रशंसति—

नैनं वैद्युतो हिनस्ति। य एवं वेद, इति।

यः पुमान्वायुगणमाहात्म्यं **वेदै**नं **वैद्युतो**ऽङ्गिरशनिरूपो **न हिनस्ति**।

एतस्योत्तमफलत्वं द्योतयितुं वैद्युतवधस्य कष्टतां दर्शयति—

स होवाच व्यासः पाराशर्यः।
विद्युद्वधमेवाहं मृत्युमैच्छामिति, इति।

पराशरस्य पुत्रो **व्यास**ाख्यो महर्षिर्योऽस्ति **स** खल्वेव**मुवाच**, विद्युताऽशनिना क्रियमाणो यो वधस्तमेवाहं **मृत्युमैच्छं** तस्य मरणस्यातिकष्टत्वात्स एव वध एको

---

१ ख. ग. °स्त्रीगणक°। २ ग. °ति (२), इ°।

मृत्युशब्दस्य मुख्यार्थः । तदपेक्षयाऽन्येषां पापिष्ठत्वाभावादितरे वधा मृत्यव एव न भवन्तीत्यहं मन्ये ।

विद्युद्वधस्यातिकष्टत्वं प्रदर्श्य वेदितुस्तद्वधराहित्यलक्षणं फलं पूर्वोक्तमुपसंहरति —

न त्वकामꣳ हन्ति (२) । य एवं वेद, इति ।

एवं वेदितुर्विद्युद्वधपरिहारार्थित्वाद्विद्युद्वधे कामरहितं वेदितारं स वैद्युतोऽशनिर्नैव हन्ति ।

कल्पः—" स्वानभ्राडित्येकादश गन्धर्वाः पदशः पश्चात् " इति । तदेतद्विधत्ते—

अथ गन्धर्वगणाः, इति ।

वायुगणानन्तरं **गन्धर्वगणा** उपधेयाः ।

गन्धर्वाणां नाममन्त्रान्दर्शयति —

स्वानभ्राट् । अङ्घारिर्बम्भारिः । हस्तः
सुहस्तः । कृशानुर्विश्वावसुः । मूर्धन्वान्सूर्य-
वर्चाः । कृतिरित्येकादश गन्धर्वगणाः, इति ।

स्वानादीनि गणनामधेयानि । स्वानत(स्त?)या देवतयाऽङ्गिरस्वद्ध्रुवाऽसीदेत्येवमुपधानं कर्तव्यम् ।

एकादशसंख्याका य एते गन्धर्वगणास्तान्प्रशंसति—

देवाश्च महादेवाः । रश्मयश्च देवा गरगिरः (३) । इति ।

देवाः स्वयं द्योतमानाः, **महादेवा** इतरेषु देवेषु मध्ये गुणैर्महान्तः **रश्मयो** दीप्तिमन्तः, **देवा** इतरेषामपि द्योतयितारः, **गरगिरो** विषमपि निगीर्य जरयन्ति ।

एतद्वेदनं प्रशंसति—

नैनं गरो हिनस्ति । य एवं वेद, इति ।

वेदितुर्विषबाधा नास्ति ।

कल्पः—" गौरी मिमायेत्येका " इति ।

गौरी मिमाय सलिलानि तक्षती । एकपदी
द्विपदी सा चतुष्पदी । अष्टापदी नवपदी बभू-
वुषी । सहस्राक्षरा परमे व्योमन्निति, इति ।

गौरी शुक्लवर्णा सरस्वती या शब्दब्रह्मात्मिका सा **मिमाय** मिमीते स्वकीयैः **शब्दैरभिधेयं** सर्वं जगत्पारिच्छिनत्ति । किं कुर्वती, **सलिलान्युदकजन्यानि** सर्वाणि

भूतजातानि तक्षती स्वव्याप्त्या नाना कुर्वती। एकैकस्य हि पदार्थस्य बहूनि नामधेयानि, वृक्षो महीरुहः शाखीत्येवं पार्यायबहुत्वदर्शनात्। यद्यप्यत्र प्रवृत्तिनिमित्तभूता अवयवार्था भिद्यन्ते तथाऽपि देशभेदेन भिन्नभाषासु नास्ति प्रवृत्तिनिमित्तभेदः। अतः शब्दप्रपञ्चस्य बाहुल्यादर्थप्रपञ्चोऽपि स्वल्पो भवति। सा च सरस्वती छन्दोभेदादेकपद्यादिरूपेण वर्धमाना **सहस्राक्षरा** सहस्रशब्दस्यानन्तपर्यायत्वादनन्ताक्षरा, अत्र **बभूवुषी** भवितुमिच्छां कृतवती **परमे व्योमन्विविधरक्षके** परमे जगत्कारणे ब्रह्मणि स्थिता। इत्यनयेष्टकामुपदध्यात्।

अस्या ऋचस्तात्पर्यं दर्शयति—

वाचो विशेषणम्, इति।

वाग्देवतायाः स्तुतिरस्यामृचि क्रियत इत्यर्थः।

कल्पः—"वराहव इति सप्त वाताः पदशः" इति तदेतद्विधत्ते—

अथ निगदव्याख्याताः। ताननुक्रमिष्यामः, इति।

अथ सारस्वतेष्टकोपधानानन्तरं **निगदव्याख्याता** उपधेयाः। निगद्यमानेनैव मन्त्रपाठेनैव तेषां वायूनां महिमा विस्पष्टमाख्यातो भवति। **तानेतान्मन्त्रानानुक्रमेण** कथयिष्यामः।

प्रतिज्ञातान्मन्त्रान्दर्शयति—

वराहवः स्वतपसः(४)। **विद्युन्महसो धूपयः।**
श्वापयो गृहमेधाश्चेत्येते। ये चेमेऽशिमिविद्विषः, इति।

अत्र वराहव इत्यारभ्य गृहमेधा इत्यन्तै षड्भिः पदैः पर्जन्यप्रवर्तका वायुविशेषा उच्यन्ते। तेषां गणरूपत्वादेकैकगणस्थान्बहून्विवक्षित्वा वराहव इत्यादिबहुवचननिर्देशः। वरं श्रेष्ठं वर्षमाह्वयतीति वराहः (हुः), ते च बहवो **वराहवः**। ये वायवः **स्वतपसः** स्वयमेव तपन्ति न तु तापार्थमादित्यं वाऽपेक्षन्ते **स्वतपसः**। विद्युत्समानं महस्तेजो येषां ते **विद्युन्महसः धूपयो** गुग्गुलदशाङ्गादिद्रव्यान्तरैरन(न्तरान)पेक्षेण स्वशरीरगतसुगन्धेनैव सर्वान्पदार्थान्धूपयन्तो वासितान्कुर्वन्तो वर्तन्ते। **श्वापयः**। शुशब्द आशुशब्दपर्यायस्ततः शीघ्रव्यापिन इत्युक्तं भवति। गृहेषु मेधार्हा **गृहमेधाः**। चकारः षण्णां समुच्चयार्थः। **इत्येत** इतिशब्दद्वयेन यथोक्तनिर्वचनप्रख्यातमहिमत्वं प्रदर्श्यते। एवं षड्विधा वायुगणा एकदेशवर्तिनो निर्दिष्टाः। गणान्तरं तु देशान्तरवर्ति-

---

१ ग. °श्वेतीति। ये। २ क. °त्याद्यार°। ३ ख. ग. वधार्हा ४ ग. इतीतीति°।

त्यापृथङ्नि[1]र्दिश्यते । शिमिः कर्म कृष्यादिकं तस्य विघातकाः शिमिविद्विषः, तद्विपरीता **अशिमिविद्विषः** कृष्याद्यनुकूलप्रवृत्तयो वायव इत्यर्थः । तादृशा[2] ये **च** सन्ति तेऽपि पूर्वोक्तषड्गणवन्निगदेनैव व्याख्यातमहिमान इत्यभिप्रायः । अत्र नामान्येव मन्त्राः । तथा सति वराहवस्तया देवतयाऽङ्गिरस्वद्ध्रुवाऽऽसीदित्येवमुपधानं संपद्यते ।

तैत्तच्छब्दैरेव व्याख्यापितो यो महिमा तं महिमानं संगृह्य पुनः प्रकटयति—

पर्जन्याः सप्त पृथिवीमभिवर्षन्ति । वृष्टिभिरिति ।
एतयैव विभक्तिविपरीताः सप्तभिर्वातैरुदीरिताः ।
अमूँल्लोकानभिवर्षन्ति । तेषामेषा भवति, इति ।

पूर्वोक्तैः सप्तभिर्वायुगणैः प्रवर्तिताः सप्तविधा मेघा **वृष्टिभिरस्माभिर्दृश्यमानाभिः पृथिवीमभिलक्ष्य वर्षन्ति,** इत्येषां वायूनां महिमा । निराधारेऽन्तरिक्षे मेघान्संधाद्य बहुविधजलसंग्रहो योऽस्ति यस्य देशविशेषस्य यावदपेक्षितं तत्र तावदेव वर्षणं यच्चास्ति स सर्वोऽप्यचिन्त्यत(स्त)न्महिमेति दर्शयितुमितिशब्दप्रयोगः । यया रीत्या भूमावभिवर्षणमेतयैव रीत्याऽमून्सर्वाँल्लोकान्पर्जन्या **अभिवर्षन्ति** । इयांस्तु विशेषः यद्विभक्तिवैपरीत्यम् । विशिष्टं भजनं विभक्तिः । भूमिं प्रति पर्जन्यानामधोमुखत्वम्, उपरितनाँल्लोकान्प्रत्यभिवर्षणार्थमूर्ध्वमुखत्वमिति वैपरीत्यम् । न चोर्ध्वाभिवर्षणमयुक्तमिति शङ्कनीयम्, यस्मादेते पर्जन्याः पूर्वोक्तैः **सप्तभिर्वायुगणैरुदीरिता** ऊर्ध्वं प्रेरिताः दृश्यते हि वायूनां सर्वतः प्रेरणसामर्थ्यम् । तस्मादधोवर्षणवद्वायुवशादूर्ध्ववर्षणमपि संभवत्येव । **तेषां** पूर्वोक्तवायूनामूर्ध्वाधोवर्षणसामर्थ्यप्रतिपादिकेयमृग्विद्यते ।

तामेतामृचं दर्शयति—

समानमेतदुदकम् (५) । **उच्चैत्यव चाहभिः । भूमिं**
पर्जन्या जिन्वन्ति । दिवं जिन्वन्त्यग्नय इति, इति ।

यदुदकं भूमौ वृष्टं यच्चोर्ध्वलोकेषु तत्सर्वं **समानं** द्रवस्वभावमेव तथाऽप्यहभिः कैश्चिदहोभिर्दिनैरुदेति चोर्ध्वमपि गच्छति पुनरपि कैश्चिद्दिनैरवैति **चा**धोऽपि गच्छति । तत्राऽऽगतेनोदकेन **पर्जन्या भूमिं जिन्वन्ति** प्रीणयन्ति । यथाऽग्नय ऊर्ध्वज्वाला एवमूर्ध्वाभिमुखाः पर्जन्या ऊर्ध्वगतिसामान्यादग्नय इत्युच्यन्ते । ते चोर्ध्वाभिवर्षणेन **दिवं** प्रीणयन्ति । इत्यनयेष्टकामुपदध्यात् । तथा च **बौधायन** आह—

---

१ क. °थगिति° । २ ख. ग. तच्छ° । ३ क. ख. °त्येतेषां । ४ ख. ग. °त्यवि° । ५ क. °शिष्टभ° । ६ ग °नं भू° । ७ ख. ग. °रीत्यं च नोर्ध्वा° । ८ ख ग °दूर्ध्व° । ९ ग. उदेत्य° । १० ग °वैतामे° । ११ ख. ग. °ति च पु° ।

"समानमेतदिति वृष्टिमतीम्" इति। इष्टकाविशेषस्य वृष्टिमतीति नामधेयम्। एवमुक्तैस्त्रिभिर्मन्त्रैर्लोकाप्यायितशंयुनामकानामिष्टकाविशेषाणामुपधानं स एवाऽऽह--"यदक्षरमिति लोको जमदग्निरित्याप्यायितस्तच्छंयोरिति शंयुः" इति।

तत्र प्रथमं मन्त्रमाह--

यदक्षरं भूतकृतम्। विश्वे देवा उपासते।
महर्षिमस्य गोप्तारम्। जमदग्निमकुर्वत, इति।

न क्षरति न विनश्यति कदाचिदपीत्यक्षरं यत्परं ब्रह्म वस्तु भूतकृतमाकाशादि भूतरूपेण निष्पन्नम्। अत एवोपनिषद्याम्नायते--"तदात्मानं स्वयमकुरुत" इति। तादृशं विश्वे सर्वेऽपि देवा उपासते। अस्याक्षरस्य गोप्तारं रक्षितारं जमदग्न्याख्यं महर्षिमकुर्वत। देवा इन्द्रादयः स्वपुरुषार्थसिद्ध्यर्थं स्वयमुपासते मनुष्याणामनुग्रहार्थं जमदग्निप्रभृतिकं महर्षिसंघमस्याक्षरस्योपदेष्टारमकुर्वत। ऋषयो हि तत्तद्वेदप्रवर्तनेन मनुष्येभ्योऽक्षरमुपदिश्य तत्संप्रदायं परिपालयन्ति।

अथ द्वितीयं मन्त्रमाह—

जमदग्निराप्यायते। छन्दोभिश्चतुरुत्तरैः। राज्ञः सोमस्य तृप्तासः
(६)। ब्रह्मणा वीर्यावता। शिवा नः प्रदिशो दिशः, इति।

स च जमदग्निश्चतुरुत्तरैरक्षरचतुष्टयादुत्तरभाविभिर्गायत्र्यादिभिश्छन्दोभिः स्वेनोपदिष्टैर्मन्त्रैर्वाऽऽप्यायते प्राणिनोऽभिवर्धयति। ते च प्राणिनो वीर्यावता शक्तिमता ब्रह्मणा मन्त्रेण राज्ञो राजमानस्य सोमस्य लतात्मकस्य पातारो भूत्वा तृप्तासः कृतकृत्यत्वबुद्ध्या तृप्ता भवन्ति। सैव तृप्तिः स्पष्टी क्रियते—नोऽस्माकं प्रदिशः प्राच्याद्या मुख्या दिश आग्नेयाद्या अवान्तरदिशश्च शिवाः शान्ताः संपन्नाः, सर्वदिग्वार्तिप्रजासुखहेतवः संपन्ना इत्यर्थः।

अथ तृतीयं मन्त्रमाह--

तच्छं योरावृणीमहे। गातुं यज्ञाय। गातुं यज्ञपतये।
दैवी स्वस्तिरस्तु नः। स्वस्तिर्मानुषेभ्यः। ऊर्ध्वं
जिगातु भेषजम्। शं नो अस्तु द्विपदे। शं चतुष्पदे, इति।

शं प्राप्तानां रोगादीनामुपशमनकारणम्। योः, आगामिनां रोगादीनां वियोगका-

---

१ ख. ग. °शेषमु°। २ ग. °र्वते। इ°। ३ ख ग. °र्वते। दे°। ४ ग. °तिकम°। ५ ग. °र्वते। ऋ°। ६ ख. ग °मान्यस्य। ७ ग. मुख्यदि°।

रणम्, तत्कर्माऽऽरुणकेतुकाख्यमावृणीमह आभिमुख्येन प्रार्थयामहे । यज्ञाय तस्मिन्नारुणकेतुकेऽनुष्ठीयमानस्योत्तरकर्तोर्गातुं गतिमावृणीमहे प्रार्थयामहे । यज्ञपतये यजमानस्य च गातुं गतिं फलप्राप्तिमावृणीमहे । नोऽस्माकं दैवी स्वस्तिर्दैवैः संपादितः क्षेमोऽस्तु । मानुषेभ्यः पुत्रादिभ्यश्च स्वस्तिः क्षेमोऽस्तु । इत ऊर्ध्वं सर्वदा भेषजं सर्वानिष्टनिवारणं जिगातु प्राप्नोतु । स(?) नोऽस्मदीयाय द्विपदे मनुष्याय च शं सुखमस्तु चतुष्पदे पशवेऽपि शं सुखमस्तु ।

अथ ब्राह्मणवाक्यमुच्यते—

सोमपाऽ असोमपाऽ इति निगदव्याख्याताः (७), इति ।

व्यवदाता ह्यन्ति गरगिरस्ततपस उदकं तृप्तासश्चतुष्पद एकं च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके प्रथमप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

अथ निगदव्याख्याता इति यदुपक्रान्तं तदत्रोपसंहियते—वराहव इत्यादिषु शं चतुष्पद इत्यन्तेषु मन्त्रेषु ये सोमपा देवा ये चासोमपास्ते सर्वेऽप्यभिहिताः । प्लुतिद्वयमाख्यानार्थम् । " [अनन्त्यस्यापि] प्रश्नाख्यानयोः" इति सूत्रेण प्रश्नवन्निश्चिताख्यानेऽपि प्लुतस्य विहितत्वात् । त एते सर्वे देवा निगदव्याख्याताः । मन्त्रपाठेनैव तदर्थपर्यालोचनायां तत्तन्महिम्नः प्रतीयमानत्वात् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयारण्यके प्रथमप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

अथ प्रथमे दशमोऽनुवाकः ।

कल्पैः—" सहस्रवृदियमित्यष्टौ संयानीः " इति । तत्र प्रथमामाह—

सहस्रवृदियं भूमिः । परं व्योम सहस्रवृत् । अश्विना भुज्यू नासत्या । विश्वस्य जगतस्पती, इति ।

इयं दृश्यमाना भूमिः सहस्रवृदुपकारकतया सहस्रसंख्याकैः पुरुषैर्व्रियमाणा प्रार्थ्यमाना । भवति तथा परं व्योमोत्कृष्टं स्वर्गस्थानमपि सहस्रवृत्सहस्रसंख्याकैर्देवैः प्रार्थ्यमानं भवति । ते एते द्यावापृथिव्यावश्विनावश्विसदृशौ, यथाऽश्विनौ सर्वेषामुपकुरुत एवमेते द्यावापृथिव्यावपीत्यर्थः । कीदृशावश्विनौ, प्राणिनां रोगनिवर्तनेन

---

१ ग. सर्वदे° । २ ग. °लयः । इति स° ।

भुज्यू भोगहेतू, **नासत्यौ**, कदाचिदप्यसत्यरहितौ, अत एव **विश्वस्य जगतः पती** पालयितारौ।

अथ द्वितीयामाह—

जाया भूमिः पतिर्व्योम । मिथुनं ता अतुर्यथुः । पुत्रो बृहस्पती रुद्रः । सरमा इति स्त्रीपुमम्, इति ।

पूर्वमन्त्रे द्यावापृथिव्यावश्विरूपेण स्तुते, इह तु मिथुनरूपेण स्तूयेते—येयं **भूमिः** सा **जाया**, जायतेऽस्यां प्राणिजातमिति व्युत्पत्तेः। यत्तु **व्योम** स **पतिः**, देवानां विविधरक्षकत्वेन पालयतीति पतिरिति व्युत्पत्तिसंभवात्। तस्माद्द्यावापृथिव्यौ ते उभे **मिथुनं** यथा भवति तथाऽतुर्यथुः परस्परं गच्छथः। तुरी गताविति धातुः। तथासंगतयोर्द्यावापृथिव्योरुत्सङ्गवर्ती **बृहस्पतिरेकः पुत्रः**। रुद्रोऽग्निः, "रुद्रो वा एष यदग्निः" इति श्रुतेः। सोऽयमपरः पुत्रः। **सरमा** वेदिः, सरः सरणमनुष्ठानप्रवृत्तिः सा च मीयते परिच्छिद्यतेऽत्रेति **सरमा** सा च तयोर्दुहिता। इत्येवं **स्त्रीपुमेका** स्त्री द्वौ पुमांसावित्यपत्यत्रयं संपन्नम्।

अथ तृतीयामाह—

शुक्रं वामन्यद्यजतं वामन्यत् । विषुरूपे अहनी द्यौरिव स्थः (१)। विश्वा हि माया अवथः स्वधावन्तौ । भद्रा वां पूषणाविह रातिरस्तु, इति ।

पूर्वत्र द्यावापृथिव्यौ दंपतिरूपेण स्तुते, इह त्वहोरात्ररूपेण स्तूयेते—हे द्यावापृथिव्यौ **वां** युवयोर्मध्येऽन्यत्परं स्वरूपं **शुक्रं** शुक्लवर्णं भास्वरमहः। **अन्यदितरत्स्वरूपं र(य)जतं** निश्यनुष्ठितयागोपलक्षितकृष्णवर्णोपेता रात्रिः। इत्येवं युवां **विषुरूपे** विलक्षणरूपयुक्ते **अहनी** अहोरात्रे **स्थः**। ते युवां **द्यौरिव** द्युलोकस्थ आदित्य इव सर्वस्योपकुरुत(थ)इति शेषः। हे **स्वधावन्तावन्नवन्तौ** युवां देवौ **हि** यस्माद्विश्वा **मायाः** सर्वा अपि मतीरवथो रक्षथः। सति ह्यन्ने सर्वेषां बुद्धिः प्रसीदति। तस्माद्धे **पूषणौ** पोषकौ देवौ **वां** युवयोरिह कर्मणि **रातिर्भद्राऽस्तु**, अन्नादिदानं कल्याणं भवतु।

अथ चतुर्थीमाह—

वासोत्यौ चित्रौ जगतो निधानौ । द्यावाभूमी

---

१ ग. अतुर्थाः। २ ण. °म तत्पतिः। ३ क °लनात्पतिरि°। ४ ख. ग. °तू। द्यावा°। ५ ग. °र्थाः प°। ६ ग. °न्यद्रज°। ७ क पूर्वं। ८ ख. ग. °स्माद्वं पू°।

चरथः स॒ सखा॑यौ । ता॒वश्वि॑ना॒ रास॑भाश्वा
ह॒वं मे । शु॒भस्पती॒ आग॑त॒ꣳ सूर्य॑या॒ सह, इति ।

अहोरात्ररूपेण स्तुतयोः पुनः सखिद्वयरूपेण स्तुतिः क्रियते—हे **द्यावाभूमी** द्यावापृथिव्यौ युवां **सखायौ** सखिद्वयमिव **संचरथः** संभूय वर्तेथे । कीदृशौ सखायौ, **वासात्यौ** वसतिमर्हतः, देवानां मनुष्याणां च निवासं प्रयच्छथ इत्यर्थः । **चित्रौ** विलक्षणभोगप्रदत्वेन नानाविधौ, **जगतो निधानौ** सर्वस्यापि प्राणिजातस्य निधानस्थानीयौ, **रासभाश्वा** रासभौ गर्दभावेवाश्वस्थानीयौ ययोरश्विनोर्देवयोस्तौ रासभाश्वाख्यौ, तथाविधावश्विनावश्विसदृशौ तौ देवौ युवां **शुभस्पती** शोभनस्य कर्मणः पालकौ सन्तौ **सूर्ययोषसा सह** (+ द्यावापृथिव्या सह) **हवं** मदीयं यज्ञं प्रत्या(आ)**गतमागच्छतम्** ।

अथ पञ्चमीमाह—

त्युग्रो॑ ह भुज्यु॒मश्वि॑नोदमेघे । र॒यिं न क॒श्चि-
न्ममृ॒वाँ॑ ३ अवा॑हाः । त॒मू॒हथु॒र्नौभि॑रात्मन्व॒-
तीभिः । अन्तरि॑क्षप्रु॒द्भिर॑पोदकाभिः (२), इति ।

हेऽश्विनावुदमेघ उदकसहितमेघेऽवस्थितं **भुज्युं** पालकं तमुदकसंघमूहथुर्वहथः संपादयथः । कीदृशमुदकसंघम्, **नौभिः**, तरणीयमिति शेषः । कीदृशीभिर्नौभिः, **आत्मन्वतीभि**र्दृढस्वरूपयुक्ताभिः । **अन्तरिक्षप्रुद्भि**र्भूमिस्पर्शमन्तरेण जलस्योपर्यन्तरिक्षे प्लवनशीलाभिः । **अपोदकाभि**रुदकप्रवेशरहिताभिः, निश्छिद्राभिरित्यर्थः । अश्विनोरुदकस्य वहने दृष्टान्तः—त्युग्रोऽत्युग्रो मूर्खः **कश्चित्पुमान्ममृवान्मरणं** प्राप्यमाणोऽपि **रयिं** धनं **न** प्रयच्छति किंत्ववाहा आवहत्येव । यद्वा स्वयमेवावहरति(हति) । यथा स लुब्धोऽत्यादरेण धनं संपादयत्येवमश्विनावप्यादरेण वृष्टिं संपादयत इत्यर्थः ।

अथ षष्ठीमाह—

तिस्रः क्षॅप॑स्त्रिरहा॑ऽतिव्रजद्भिः । नास॑त्या
भुज्यु॒मू॑हथुः पतङ्गैः । स॒मु॒द्रस्य॒ धन्व॑न्नार्द्रस्य॑
पा॒रे । त्रिभी॒ रथै॑: श॒तप॑द्भिः ष॒डश्वैः, इति ।

+ एतच्चिह्नान्तर्गतमाधिक्यमिव भाति ।

---

१ क. प्रयच्छत । २ क. ख. 'सा द्या' । ३ क. °थिव्यौ स° । ४ ग. °वां अ° । ५ ग. °क्षपास्त्रि° ।

नासत्याऽसत्यरहितावश्विनौ देवौ **तिस्रः क्षपा(पो)** रात्रित्रयं **त्रिरह्नाऽह्नत्रयं च नैरन्तर्येणातिव्रजद्भिरतिशयेन गच्छद्भिः पतङ्गैः** पक्षिसदृशैरितस्ततः संचारिभिर्मेघैर्भुज्युं पालकं जलसमूहमूहथुर्युवां वहथः। कुत्र देश इति तदुच्यते–**आर्द्रस्य** जलपूर्णस्य **समुद्रस्य पारे** परभागे **धन्वन्निर्जले** मरुदेशे। कीदृशैर्मेघैः, **त्रिभिस्तत्तद्देशमनुसृत्योत्तममध्यमाधमभावेन त्रिविधैः। रथ्यै** रथसदृशैः। यथा रथा उपरि महान्तं भारं वहन्ति तथा बहुजलभारवाहिन इत्यर्थः। **शतपद्भिः** शतसंख्याकाः पदा (दो) जलधाराः पादसदृशा येषां तादृशैः, अनन्तधारैरित्यर्थः। **षडश्वैः** षट्प्रकारव्याप्तियुक्तैः। उत्तमादीनां त्रयाणामागमनार्थास्तिस्रो व्याप्तयः पुनर्गमनार्थास्तिस्र इत्येवं षड्विधव्याप्तयः।

अथ सप्तमीमाह—

सवितारं वितन्वन्तम्। अनुवध्नाति शाम्बरः।
+आपपूरुः पम्बरश्चैव। सविताऽरेपसो भवत्, इति।

शम्बरमुदकं तस्योदकस्य धारको मेघः **शाम्बरः** स च **वितन्वन्तं** वृष्ट्यर्थं रश्मीन्विस्तारयन्तं **सवितारमादित्यमनुवध्नाति** स्वानुग्रहार्थमाश्रयति **आपपूरापशब्दो** जलवाची तेन जलेन पूर्णः **श(ष)म्बरः** पूर्वोक्तः शाम्बरो मेघो यः सोऽप्यरेपसः पापरहितायाः सर्वानुग्राहिकाया वृष्टेः **सविता भवदेवोत्पादयिता** भवत्येव।

अथाष्टमीमाह—

त्यꣳ सुतृप्तं विदित्वैव। बहुसोमगिरं वशी (३)।
अन्वेति तुग्रो वाक्रियां तम्। आयसूयान्त्सोमतृप्सुषु, इति।

सुतृप्तं सुष्ठु तृप्तियुक्तमुदकपूर्णमित्यर्थः। **बहुसोमगिरं** बहवः [सोमाः] सो(सौ)म्या गिरः शब्दाः स्तनितरूपा यस्यासौ बहुसोमगीः, बहुविधगर्जनयुक्त इत्यर्थः। तादृशं **त्यं** पूर्वोक्तं मेघं **विदित्वा वशी** स्वाधीनमेघः। **तुग्र** आदित्यः, **तुग्रश**ब्दो रश्मिनाम तद्वांस्तुग्रः स च **वाक्रियां** वक्रं कुटिलं वृष्टिविमुखं तं मेघमन्वेति वर्षयितुमनुगच्छति। किं कुर्वन्, **सोमतृप्सुष्वायसूयान्**। सोमेन तृप्यन्तीति सोमतृप्सवो यजमानास्तेषु निमित्तभूतेषु वृष्टेरागमनमायस्तस्य प्रेरणमायसूस्तत्प्रेरणं यान्प्राप्नुवन्नायसूयान्, वृष्टिं प्रेरयितुमुद्यमं कुर्वन्नित्यर्थः। एतैरष्टभिर्मन्त्रैरिष्टका उपदध्यात्

+ आपपूर्षम्बरश्चैवेत्यपि वैदिकानां पाठः प्रसिद्धः।

---

१ ग °त्यभाषणर°। २ ग. °पूरपशम्ब°। ३ क. °वं मुख्यस्य भरणात्तस्यो°। ४ ग. °ष्यरे°। ५ क तुक्शब्दो। ६ क °शिलवृष्टिं विमुञ्चन्तं मे°।

कल्पः—" स संग्राम इति द्वे " इति । तत्र प्रथमामाह—

स संग्रामस्तमोद्योऽत्योतः । वाचो गाः पिपाति तत् ।
स तद्भोभिः स्तवाऽत्येत्यन्ये । रक्षसाऽनन्विताश्च ये, इति ।

स आदित्यो **गा** गवादीन्पशूंस्तदुत्पादकं **पिपाति** पाययति । कीदृशीः, **वाचः** शब्दयन्तीः । पूर्वमुदकाभावात्तृषार्ताः सत्यो जलपानार्थं हम्भारवं कुर्वन्तीत्यर्थः । कीदृशः स आदित्यः— **संग्रामः**, समूहवाची ग्रामशब्दोऽत्र रश्मिसंघमाचष्टे । संप्राप्तो ग्रामो रश्मिसंघो येनासौ संग्रामः, रश्मिभिः पूर्ण इत्यर्थः । तमो द्यति खण्डयतीति **तमोद्यः**, अत्यैरश्वैस्तो रक्षितो धृत इत्यत्योतः । " अश्वोऽसि हयोऽस्यत्योऽसि नरोऽसि " इत्यश्वनामस्वत्यशब्द आम्नातः । आदित्यो ह्यश्वैः स्वकीयरथे स्थितः **स** आदित्यस्तत्तदा **गोभिर्वृष्ट्या** परितुष्टानां प्राणिनां वाग्भिः **स्तवा** स्तूयमानः सन्नन्येऽन्यान्देवानत्येत्यतिक्रामति, सर्वदेवाधिकत्वेन भासत इत्यर्थः । ये च दिव्या जना **रक्षसा** रक्षसो जात्याऽनन्विता असंबद्धा देवपक्षपातिनस्तैः सर्वैः स्तूयत इति शेषः ।

अथ द्वितीयामाह—

अन्वेति परिवृत्यास्तः । एवमेतौ स्थो अश्विना ।
ते एते द्युःपृथिव्योः । अहरहर्गर्भं दधाथे (४), इति ।

अस्तः क्षिप्त आदित्येन प्रेरितो मेघः **परिवृत्य** पुनरपि वृष्ट्यर्थं पर्यागत्यान्वेत्यानुकूल्येन गच्छति, वर्षतीत्यर्थः । हेऽश्विना(नौ)ते **एते** यथोक्तवृष्टियुक्ते द्यावापृथिव्यौ ये विद्येते तयोरेवमुक्तेन प्रकारेणोपकुर्वन्तावेतौ युवां **स्थो** वर्तेथे । कथमुपकार इति तदेव स्पष्टी क्रियते—**द्युःपृथिव्योर्द्यावापृथिव्योरहरहः** प्रतिदिनं **गर्भं दधाथे** जलद्वारा तत्तत्प्राण्युत्पत्तिबीजं संपादयथः । एवमेताभ्यां मन्त्राभ्यामिष्टके उपदध्यात् ।

अतः परं ब्राह्मणवाक्यमुच्यते । तत्र द्यावापृथिव्यौ बहुधा प्रशस्येते । तत्रैकां प्रशंसामाह—

तयोरेतौ वत्सावहोरात्रे । पृथिव्या अहः । दिवो
रात्रिः । ता अविसृष्टौ । दंपती एव भवतः, इति ।

तयोर्द्यावापृथिव्योरेतावहोरात्ररूपौ कालौ वत्सस्थानीयौ, तत्रोत्पन्नत्वात् । तयोर्मध्ये **पृथिव्या** गोस्थानीयाया **अहर्वत्सस्थानीयं दिवश्च रात्रिर्वत्सस्थानीया** । प्रशं-

---

१ क. °ब्दो र° । २ ख. ग. °श्वैरूतो । ३ ख. पराग° । ४ ख. ग. प्रशंस्यते । ५ क. रात्रिस्थानीयाया । ६ ख. ग. °त्रिश्च वत्स° ।

सारूपत्वान्नात्र विभागे कारणमन्वेष्टव्यम् । तावेतावहोरात्ररूपौ वत्सौ परस्परमविसृष्टौ दंपती एव भवत इति ।

अथ द्वितीयां प्रशंसामाह—

तयोरेतौ वत्सौ । अग्निश्चाऽऽदित्यश्च । रात्रेर्वत्सः ।
श्वेत आदित्यः । अह्नोऽग्निः । (५) । ताम्रो अरुणः ।
ता अविसृष्टौ । दंपती एव भवतः, इति ।

तयोर्द्यावापृथिव्योर्यौ वत्सावहोरात्ररूपौ पूर्वमुक्तौ तयोरहोरात्रयोरग्न्यादित्यौ वत्सौ । योऽयं श्वेत आदित्यः सोऽयं रात्रेर्वत्सस्थानीयः, रात्रेः परभागे तदाविर्भावात् । योऽयं ताम्रोऽरुणश्चाग्निरीषदक्तस्ताम्रोऽत्यन्तरक्तोऽरुणः सोऽयमह्नो वत्सस्थानीयः, अहनि पाकाद्यर्थमग्निः प्राणिभिः प्रज्वाल्यते । अन्यत्पूर्ववत् ।

तृतीयां प्रशंसामाह—

तयोरेतौ वत्सौ । वृत्रश्च वैद्युतश्च । अग्नेर्वृत्रः । वैद्युत
आदित्यस्य । ता अविसृष्टौ । दंपती एव भवतः, इति ।

तयोरग्न्यादित्ययोः । वृत्र आवरको धूमः । वैद्युत आतपः । अन्यत्पूर्ववत् ।

अथ चतुर्थीं प्रशंसामाह—

तयोरेतौ वत्सौ (६) । उष्मा च नीहारश्च । वृत्रस्योष्मा ।
वैद्युतस्य नीहारः । तौ तावेव प्रतिपद्येते, इति ।

तयोर्वृत्रवैद्युतयोः । वृत्रस्याऽऽवरकस्य धूमस्योष्मा वत्सस्थानीयः । सति हि धूमेऽष्मोष्मा भवति । उष्णत्वमूष्मा । वैद्युतस्याऽऽतपस्य नीहारो वत्सस्थानीयः । नीहारो हिमम् । तावुष्मनीहारौ तावेव स्वकारणभूतौ वृत्रवैद्युतावेव प्रतिपद्येते कारणयोरेव लीयेते न तु कार्यान्तरं जनयतः । एवं साक्षात्परम्परया च द्यावापृथिव्यौ प्रशस्ते ।

अथ रात्रिं तद्वत्समादित्यं च विशेषेण प्रशंसति—

सेयꣳ रात्री गर्भिणी पुत्रेण संवसति । तस्या वा
एतदुल्बणम् । यद्रात्रौ रश्मयः । यथा गोर्ग-
र्भिण्या उल्बणम् । एवमेतस्या उल्बणम्, इति ।

येयं रात्रिरादित्यवत्सस्य मातृत्वेन निरूपिता सेयं रात्रिर्गर्भरूपमादित्यं धारयन्ती

१ ग. हिमवान् । २ ख. ग. समातृत्वेन ।

तेनाऽऽदित्येन पुत्रेण सह निवसति । अत एव रात्रावादित्यो नास्माभिर्दृश्यते । आदित्यस्य रश्मय उल्बणस्थानीयाः । यथा लोके गर्भिण्या गोरुल्बो गर्भेण सहान्तर्वर्तत एवमादित्यस्य रश्मयोऽपि रात्रावादित्येन सहावस्थितत्वान्नास्माभिर्दृश्यन्ते ।

यथोक्तरात्र्यादित्ययोर्वेदनं प्रशंसति—

प्रजयिष्णुः प्रजया च पशुभिश्च भवति । य एवं वेद । एतमुद्यन्तमपियन्तं चेति । आदित्यः पुण्यस्य वत्सः, इति ।

यो रात्रिमाहात्म्यं वेद सोऽयं प्रजापशूत्पादको भवति । आदित्यमहिमवेदनादुदयास्तमययुक्तमादित्यं प्राप्नोति । उदयस्थानेऽस्तमयस्थाने च स्वेच्छया गन्तुं समर्थो भवति। किंचाऽऽदित्यवत्पुण्यस्य वत्सो धर्मदेवतापुत्रो भवति ।

वक्ष्यमाणानुवाकतात्पर्यं संगृह्य दर्शयति—

अथ पवित्राङ्गिरसः (७), इति ।

स्थोऽपोदकाभिर्वशी दधाथे अग्निस्तयोरेतौ वत्सौ भवति चत्वारि च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके प्रथमप्रपाठके दशमोऽनुवाकः ॥ १० ॥

संयौन्यादीष्टकामन्त्रकथनानन्तरं पवित्रभूता अङ्गिरोनामाङ्किता इष्टकामन्त्रा वक्ष्यन्त इति शेषः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यके प्रथमप्रपाठके दशमोऽनुवाकः ॥ १० ॥

अथ प्रथमप्रपाठक एकादशोऽनुवाकः ।

कल्पः—"पवित्रवन्तः पवित्रं ते ब्रह्मा देवानामसतः सदिति चतस्रः पवित्रवत्य उत्तरस्मिन्" इति । तत्र प्रथमामाह—

पवित्रवन्तः परि वाजमासते । पितैषां प्रत्नो अभिरक्षति व्रतम् । महः समुद्रं वरुणास्तिरोदधे । धीरा इच्छेकुर्धरुणेष्वारभम्, इति ।

---

१ क. °थोक्तं रा° । २ ख. ग. क्तित्वादि°। ३ ख. ग. °यानीद्ध° ।

पवित्रवन्तो दशापवित्रयुक्ता ऋत्विग्यजमाना **वाजमन्नं पर्यासते** परितः सेवन्ते। अन्नमुद्दिश्य सोमयागं कुर्वन्तीत्यर्थः। **एषां** सोमयाजिनां **पिता** पालकः **प्रत्नः** पुरातनो **ब्रह्मा व्रतमेतत्कर्माभिरक्षति**। **महो** महाप्रौढं **समुद्रं** समुद्रस्य सदृशमन्तरिक्षं **वरुणो** जलाधिपतिर्देवास्तिरोदधे कर्मफलत्वेन वृष्टिं दातुं मेघैराच्छादयति। **धीरा इद्** बुद्धिमन्त एव **धरुणेष्वग्निधारकेषु** यागगृहेष्वारभं कर्माऽऽरब्धुं **शेकुः** शक्ताः।

अथ द्वितीयामाह—

पवित्रं ते विततं ब्रह्मणस्पते। प्रभुर्गात्राणि
पर्येषि विश्वतः। अतप्ततनूर्न तदामो
अश्नुते। शृतास इद्वहन्तस्तत्समाशत, इति।

हे **ब्रह्मणस्पते**ऽन्नस्य मन्त्रस्य वा पालक सोम ते त्वदर्थं **पवित्रं** शोधकमिदं दशापवित्रं **विततं** विस्तारितम्। **प्रभुस्तेन** पवित्रेण शोधितत्वात्त्वं कर्मणे समर्थः **सन्विश्वतः** सर्वतो **गात्राणि** यज्ञाङ्गानि **पर्येषि** व्याप्नोषि। पवित्रेणाशोधितस्य यज्ञाङ्गत्वं नास्ति शोधितस्य तु सोमस्य यज्ञाङ्गत्वमस्तीत्यत्र हविरन्तरं दृष्टान्तत्वेनोपन्यस्यते। **अतप्ततनूरतप्ता** तनूः स्वरूपं यस्य पुरोडाशादेः सोऽयमतप्ततनूस्तादृशः पुरोडाश **आमोऽपक्वः** संस्तद्यज्ञाङ्गत्वं **नाश्नुते** न व्याप्नोति "यो विदग्धः **स** नैर्ऋतो योऽशृतः **स** रौद्रः" इति श्रुतेः। **शृतास** इत्पक्वा एव पुरोडाशादयो **वहन्तो** यज्ञं निर्वहन्तस्तद्यज्ञाङ्गत्वं **समाशत** सम्यक्प्राप्तवन्तः "यः शृतः स देवः" इति श्रुतेः। अपक्वस्य पुरोडाशादेर्यज्ञाङ्गत्वं यथा नास्ति पक्वस्य तु यथा विद्यते, तथा पवित्रेणाशोधितस्य सोमस्य यज्ञाङ्गत्वं नास्ति शोधितस्य तु विद्यत इत्यभिप्रायः।

अथ तृतीयमन्त्रप्रतीकं दर्शयति—

ब्रह्मा देवानाम्, इति।

ब्रह्मा देवानां पदवीः कवीनामित्ययं मन्त्रस्त्वमग्ने बृहद्वय इत्यनुवाके व्याख्यातः।

अथ चतुर्थमन्त्रमाह—

असतः सद्ये ततक्षुः (१)। ऋषयः सप्तात्रिश्च यत्।
सर्वेऽत्रयो अंगस्त्यश्च। नक्षत्रैः शंकुतोऽवसन्, इति।

असच्छब्देन जगत्कारणमव्यक्तावस्थापन्नमुच्यते। सच्छब्देन व्यक्तदशापन्नं जगत्। **ये सप्त ऋषयो** मरीचिवसिष्ठप्रमुखास्तन्मध्ये मुख्योऽत्रिश्च यद्यो विद्यते ते

---

१ क. °शतोनि, इ°। २ ख °स्यति। अ°।

सर्वेऽसतो जगत्कारणादव्यक्तात्सकाशात्सद्व्यक्तं जगत्ततक्षुस्तक्षणोपलक्षितं निष्पादनं कृतवन्तः । एते हि पूर्वस्मिन्कल्पे सृष्ट्यधिकारार्थं तपस्तप्त्वा वर्तमानकल्पे जगत्कारणादव्यक्तात्सकाशात्स्वस्वाधिकारोचितं व्यक्तं जगदुत्पादितवन्तः । अव्यक्ताव्यक्तमुत्पन्नमित्ययमर्थ उपनिषद्व्याख्यायते—"असद्वा इदमग्र आसीत्, ततो वै सदजायत" इति । एवं सति सप्तर्षिवद्ये पुरुषा अस्मिञ्जन्मन्यारुणकेतुकमग्निं चिन्वन्ति ते सर्वेऽप्यागामिजन्मन्यव्यगस्त्यसमानाश्च भवन्ति । किंचैते कर्मानुष्ठातारो **नक्षत्रैर्दिवि भासमानैः सह शंकृतोऽवसन्सर्वप्राणिनां** सुखकारिणो वसन्ति । द्युलोके नक्षत्ररूपेणोत्पद्यन्त इत्यर्थः । तथा चान्यत्राऽऽम्नायते—"यो वा इह यजते । अमुं स लोकं नक्षते । तन्नक्षत्राणां नक्षत्रत्वम्" इति । एतैश्चतुर्भिर्मन्त्रैरुपदर्श्यात् ।

अथैकं ब्राह्मणवाक्यमाह—

अथ सवितुः श्यावाश्वस्यावर्तिकामस्य, इति ।

पूर्वमथ पवित्राङ्गिरस इत्यङ्गिरोनाम्नो महर्षेः संबन्धिन इष्टकामन्त्रान्प्रतिज्ञाय ते दर्शिताः, **अथ** तेभ्योऽनन्तरं **श्यावाश्वस्य** श्यावाश्वनाम्नः कस्यचिन्महर्षेः संबन्धिन इष्टकामन्त्रा उच्यन्त इति शेषः । कीदृशस्य **सवितुः** प्रेरकस्य, मन्त्रसंप्रदायप्रवर्तकस्येत्यर्थः । **अवर्तिकामस्य,** वर्तिर्वर्तनं लोकव्यवहारे साधनं धनं तद्राहित्यमवर्तिर्दारिद्र्यं तेन वैराग्यमुपलक्ष्यतेऽतो वैराग्यकामस्येत्युक्तं भवति ।

कल्पः—"अमी य इति सप्त मध्ये" इति । तत्र प्रथमामाह—

अमी य ऋक्षा निहितास उच्चा । नक्तं
ददृश्रे कुहचिद्दिवेयुः । अदब्धानि वरुणस्य
व्रतानि । विचाकशच्चन्द्रमा नक्षत्रमेति, इति ।

ऋक्षा नक्षत्रविशेषाः, अमी अस्माभिर्दृश्यमानाः, **उच्चोच्चस्थाने दिवि निहितासः** प्रजापतिनाऽवस्थापिताः । ते नक्षत्रविशेषा **नक्तं** रात्रौ **ददृश्रे** विस्पष्टं दृश्यन्ते । **दिवाऽहनि कुहचित्कापि** गताः, अस्माभिर्न दृश्यन्त इत्यर्थः । **वरुणस्य** नक्षत्रज्योतिषामावरकस्यैं सौर्यतेजसः, **व्रतान्यदब्धानि** व्यापाराः केनाप्यहिंसिताः । तस्मात्तेजोन्तराभिभावकस्यैं सूर्यतेजसः केनाप्यहिंसितत्वादहनि तेनाभिभूतानि नक्षत्राणि न भासन्त इत्यर्थः । **चन्द्रमास्तु विचाकशद्विशेषेण** प्रकाशमानं **नक्षत्रमेति** प्राप्नोति न तु सूर्यवन्नक्षत्राण्यभिभवति । तस्माद्रात्रौ दृश्यन्त इत्यर्थः ।

---

१ ख. ग. °षद्याम्नां° । २ ख. ग. जयने । ३ ख. ग. नक्षत्रे । ४ ख. ग. ददृशे । ५ क. ग. °हिताः प्र° । ६ ख. ग. ददृशे । ७ ख. °स्य भावस्य सौ° । ८ ख. ग. °स्य भावस्य सू° ।

अथ द्वितीयामाह—

तत्सवितुर्वरेण्यम्। भर्गो देवस्य धीमहि (२)।
धियो यो नः प्रचोदयात्, इति।

वरेण्यं वरणीयं श्रेष्ठं **सवितुः** प्रेरकस्य सूर्यस्य तत्प्रसिद्धं **भर्गस्तेजो धीमहि** ध्यायामः। **यः** सविता **नोऽस्माकं धियो** बुद्धीः **प्रचोदयात्प्रकर्षेण** प्रेरयति, तस्य सवितुरिति पूर्वत्रान्वयः।

अथ तृतीयामाह—

तत्सवितुर्वृणीमहे। वयं देवस्य भोजनम्। श्रेष्ठꣳ
सर्वधातमम्। तुरं भगस्य धीमहि, इति।

वयं यजमानाः **सवितुर्देवस्य** तत्तेजो **वृणीमहे** प्रार्थयामहे। कीदृशं तेजः, **भोजनं** भोगसाधनं, **श्रेष्ठमतिशयेन** प्रशस्तं, **सर्वधातमं** सर्वस्य जगतोऽतिशयेन धारयितृ, **तुरं** तूर्णं **भगस्य** सौभाग्ययुक्तस्याऽऽदित्यस्य, **धीमहि** तत्तेजो ध्यायामः।

अथ चतुर्थीमाह—

अपागूहत सविता तृभीन्। सर्वान्दिवो अन्धसः।
नक्तं तान्यभवन्दृशे। अस्थ्यस्था संभविष्यामः, इति।

सविता सूर्यो नक्षत्रप्रकाशस्याऽऽवरणेनाऽऽन्ध्यापादकान्सर्वास्तृभीन्रश्मीन्दिवोऽन्तरिक्षात्सकाशादपागूहतावगूहति रात्रौ गुप्तत्वेन स्थापयति। तस्मात्कारणात्तानि नक्षत्रज्योतींषि **नक्तं** रात्रौ **दृशे** दर्शनीयान्यभवन्द्रष्टुं योग्या [नि] भवन्ति। अयमर्थः। अहनि सूर्यरश्मिप्वाविर्भूतेषु तैरभिभूतत्वान्नक्षत्रज्योतींष्यन्धानि भवन्ति प्रकाशरहितानि भवन्ति रात्रौ तु सूर्यः स्वकीयान्रश्मीनुपसंहरत्यत आच्छादकाभावान्नक्षत्रज्योतींषि प्रकाशन्त इति। अहनि नक्षत्रज्योतिषामभावे दृष्टान्त उच्यते—यथा वयमस्थि शरीरगतमस्थाऽसृजा रक्तेन संभविष्याम एवमिदमपि द्रष्टव्यम्।

अथ पञ्चमीमाह—

नाम नामैव नाम मे (३)। नपुꣳसकं पुमाꣳस्यस्मि।
स्थावरोऽस्म्यथ जङ्गमः। यजेऽयक्षि यष्टाहे च, इति।

यथा पूर्वेषु मन्त्रेषु सूर्यनक्षत्रादिरूपेणेष्टकां स्तोतुं तत्तद्वस्तुमहिमा वर्णितः, एवमत्रापि परमात्मरूपेण स्तोतुं परमात्मनः स(सा)र्वात्म्यमुच्यते तदेतन्मन्त्रद्रष्टुर्ब्रह्मविदो वच-

---

१ ख. ग. °न्योग्या।

नम्। अत्राऽऽद्यौ द्वौ नामशब्दौ नकारान्तौ नामधेयमाचक्षाते। तृतीयो नामशब्दः प्रसिद्धिवाचकमव्ययम्। तत्र ब्रह्मवित्पुमान्स्वानुभवं प्रकटयति—मे मम ब्रह्मात्मभूतस्य पूर्वमज्ञानदशायां देवो मनुष्यो गौरश्व इत्येवं तत्तज्जन्मसु यन्नाम व्यवहियते तत्सर्वं नामैव नामशब्दमात्रमेव खलु, न तु तत्र परस्परविलक्षणः कश्चिदर्थोऽस्ति। अत एव च्छन्दोगा उपनिषद्येवमामनन्ति—"वाचाऽऽरम्भणं विकारो नामधेयम्" इति। योऽयं विकारः शरीरादिर्दृश्यते स सर्वोऽपि वाङ्निष्पाद्यं नाममात्रमेव न तु वास्तवः कश्चिद्विकारोऽस्तीति तस्यार्थः। देवतिर्यङ्मनुष्यादिशरीरभेदस्य तत्तन्नामव्यतिरेकेण वास्तवत्वाभावे सति किं तद्वास्तवं स्वरूपमिति चेत्तदुच्यते, सर्वेष्वपि वस्तुषु यदनुगतं सर्वाधिष्ठानकारणरूपं ब्रह्म तदेव ब्रह्मविदो वास्तवं स्वरूपमित्यभिधीयते। लोके यन्नपुंसकं शरीरं यश्च पुमान्या च स्त्री तत्सर्वमहमेवास्मि। यश्च स्थावरो वृक्षादिर्योऽपि जङ्गमो मनुष्यपश्वादिस्तदुभयमप्यहमेवास्मि। तथा वर्तमानयजमानरूपेण यजे यजनं करोमि, अतीतयजमानरूपेणायाक्षि यागं कृतवानस्मि, भविष्यद्यजमानरूपेण यष्टा [हे] यागं करिष्यामि। सर्ववस्तुष्वनुगतं सच्चिदानन्दरूपमेकाकारं यद्ब्रह्म वस्तु तदेवाहमित्येवं स्वानुभवो मन्त्रदर्शिना प्रकटीकृतः।

अथ षष्ठीमाह—

मयां भूतान्यंयक्षत । पशवो मर्म
भूतानि । अंनूबंन्ध्योऽस्म्यंहं विभुः, इति।

मया मद्रूपेणैव भूतानि सर्वे प्राणिनोऽयक्षत यागं कृतवन्तः, अहमेव यजमानशरीरेषु जीवरूपेण प्रविश्य तं तं यागमकार्षमित्यर्थः। मम भूतानिं मया सृष्टत्वेन मदीयानि पृथिव्यादीनि पञ्च भूतानि पशवो द्विपादश्चतुष्पादः संपन्नाः। अहं ब्रह्मचैतन्यरूपेण विभुर्व्याप्त एवं सन्नंनूबन्ध्योऽस्मि तत्तच्छरीरेषु प्रविश्य तदात्मत्वाभिमानं कृत्वाऽनुबन्ध्य(न्ध)वान्संबन्धवानस्मि।

अथ सप्तमीमाह—

स्त्रियः सतीः। ता उं मे पुंस आहुः। पश्यदक्षण्वान्न ·
विंचेतदन्धः। कविर्यः पुत्रः स इमा चिकेत
(४)। यस्ता विजानात्सवितुः पिता संत्, इति।

या लोके प्रसिद्धाः स्त्रियः सतीः सद्रूपा गुरुकटाक्षेण "सदेव सोम्येदमग्र आसीत्"

---

१ क. °नुभावे। २ ख. ग. अनुब°। ३ ख. °बन्धाऽस्म्य°। ४ क. °नि मायया सृष्टत्व°। ५ क. ख. °व वस°। ६ ख. ग. °अनुब°। ७ ग. विवेत्तद°। ८ क. °व सौम्ये°।

इत्यादिश्रुत्युक्तं सद्वस्तु बुद्ध्वा तदनुभवेन तद्रूपा वर्तन्ते ता उ ता अपि स्त्रियो मे मते पुंस आहुर्ब्रह्मविदः पुरुषान्कथयन्ति । यद्यपि शरीरे स्तनवृद्ध्यादि स्त्रीलक्षणं दृश्यते, तयाऽपि पुरुषस्योचितं तत्त्वज्ञानमस्तीति पुरुषलक्षणसद्भावात्पुरुषत्वं तासामभिज्ञाः कथयन्ति । ये तु शरीरे श्मश्रुप्रभृतिभिः पुरुषलक्षणैर्युक्ता अपि पुरुषस्योचितं तत्त्वज्ञानं न संपादयन्ति, ते स्त्रीणामुचितेन मोहेनोपेतत्वात्स्त्रिय एवेत्याभिप्रायः। यथा स्त्रीपुरुषविभागो लोकविपरीत एवमन्धानन्धविभागोऽपि द्रष्टव्यः। अक्षण्वांश्चक्षुरिन्द्रिययुक्तः पश्यन्नीलपीतादिरूपं पश्यन्नपि न विचेतद्विवेकेन सद्वस्तुतत्त्वं न जानाति चेत्सोऽयमन्ध एव । मांसदृष्टिरहितोऽपि स्वरूपतत्त्वाभिज्ञश्चेत्सोऽयं चक्षुष्मानेवेत्यपि द्रष्टव्यम् । यथाऽयमलौकिकान्धानन्धविभागः एवं पितृपुत्रविभागोऽप्यलौकिकः कश्चिद्द्रष्टव्यः । लोके यत्र पिता न जानाति पुत्रस्तु कविर्वेदशास्त्रपारंगतस्तत्र स पुत्र इमा, एतानि दृश्यमानानि सर्वाणि भूतानि विवेकेन स्वात्मत्वेन जानाति, तदानीं यः पुत्रस्ता विजानात्तानि सर्वाणि भूतानि स्वात्मतया जानाति स पुत्रः सवितुरुत्पादकस्यापि पिता सत्पिता भवति । ज्ञानोपदेशेन पालयितुं समर्थत्वात्। किं बहुना तत्त्वज्ञानमेव प्रशस्तमज्ञानं निकृष्टमिति तात्पर्यार्थः।

कल्पः—"अन्धो मणिमिति पञ्च वैश्वदेव्य उत्तरतः" इति तत्र प्रथमामाह—

अन्धो मणिमविन्दत् । तमनङ्गुलिराबध्नात् ।

अग्रीवः प्रत्यमुञ्चत् । तमजिह्वा असश्चत, इति ।

लोके हि पुरुषश्चक्षुषा मणिं दृष्ट्वा तमङ्गुलिभिरादाय ग्रीवायां प्रतिमुच्य जिह्वया प्रशंसति, चिद्रूप आत्मा तु चक्षुरङ्गुलिग्रीवाजिह्वावर्जित एव सन्नचिन्त्यशक्तित्वात्तान्सर्वान्व्यापारान्करोति । तथा च श्वेताश्वतरा बाह्यसाधनरहितस्यैव सर्वव्यापारकर्तृत्वमामनन्ति—" अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः " इति आत्मा ह्युपाधिभेदाद्द्विविधः, जीव ईश्वरश्चेति । तथाच सिद्धान्तरहस्याभिज्ञा आहुः—" कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः " इति । कार्यं देहेन्द्रियादिसंघातरूपं, कारणमचिन्त्यशक्तिः । तत्र कार्योपाधिर्जीवः स्वतो निरुपाधित्वेन सर्वसाधनशून्य एव सन्नज्ञानेन देहेन्द्रियतादात्म्यं स्वस्मिन्नारोप्य भ्रान्त्या सर्वमिदं करोतीति लक्ष्यते, ईश्वरस्तु भ्रान्तिरहितोऽप्यचिन्त्यशक्तियुक्तत्वाच्चक्षुरादिसाधनहीन एव सन्संकल्पमात्रेण सर्वव्यापारं करोति, तदुभयमभिप्रेत्यायं मन्त्रः प्रवृत्तः । अथवा योगाभ्यासेन चक्षुरादीन्द्रियं निरुप्य नीलपीतादिष्वन्धः सन्मणिमिव स्वयंप्रकाशमा-

---

१ ख. ग. तु ते श° । २ ख. ग. उत्तर । ३ ग. °जिह्व अ° । ४ ख. ग. निरुह्य । ५ क. ख. °गिरिव ।

त्मानं समाधिना पश्यति । तस्य च दृष्टस्य वस्तुनः स्वस्वरूपत्वेन निश्चयः स्वीकारः । [*अतोऽङ्गुलिव्यापाररहितोऽपि स्वी करोतीत्युच्यते । तस्मिन्वस्तुनि स्थैर्यं प्रत्यमुच्चदित्युच्यते । कृतकृत्योऽस्मीत्यादि भाषणं जिह्वया प्रशंसेत्युच्यते (?)] ।

अथ द्वितीयामाह—

ऊर्ध्वमूलमवाक्छाखम् । वृक्षं यो वेद संप्रति ।

न स जातु जनः श्रद्दध्यात् । मृत्युर्मा मारयादिति[1], इति ।

लौकिकस्य हि वृक्षस्याधोभागे मूलमूर्ध्वभागे शाखाश्च । संसारवृक्षस्य तद्विपरीत्यम् । ऊर्ध्वं सर्वोत्कृष्टं ब्रह्म मूलम्, अवाञ्चोऽधमा ब्रह्मादिस्तम्बान्ता देहाः शाखाः, अयं च संसारो वश्चनयोग्यत्वाद्वृक्षः । तत्त्वज्ञानेन हि सोऽयमज्ञानजन्यो वृक्षश्छिद्यते । तमीदृशं वृक्षं यः पुमान्गुरुशास्त्रमुखाद्वेद स जनः संप्रति तदानीमेव न श्रद्दध्यान्न विश्वस्यात् । किंविषयोऽयमविश्वास इति तदुच्यते—जातु कदाचिदपि मृत्युर्मा मारयान्मां हन्यादिति । अयमर्थः । सर्वो ह्यज्ञानेन जन्तुः कदाचिन्मृत्युर्मां मारयिष्यतीति विश्वासं कृत्वैव वर्तते, अयं तु ब्रह्मज्ञानी ब्रह्मरूपस्य स्वस्य जन्ममरणाभावं निश्चित्य तस्मिन्नेव क्षणे स्वकीयमरणविश्वासं परित्यजति । आत्मनो मरणाभावाद्देहस्य च स्वव्यतिरिक्तत्वान्मृत्योर्न बिभेतीत्यर्थः ।

अथ तृतीयामाह—

हसितꣳ रुदितं गीतम् (५) । वीणा पणवलासितम् ।

मृतं जीवं च यत्किंचित् । अङ्गानि स्नेव विद्धि तत्, इति ।

अत्र शरीरस्याऽऽत्म[त्व]शङ्कां वारयितुं तदीया विकारा उपन्यस्यन्ते—हसितं कदाचिन्मुखे हासो दृश्यते, कदाचिद्रोदनं, कदाचिदुत्साहेन गानं कदाचिद्धस्ते वाद्यमाना वीणा, कदाचित्पणवस्य मृदङ्गस्य लासितं वादनरूपो विनोदः, कदाचिच्छरीरं मृतं दृश्यते, कदाचिज्जीवनोपेतम्, एवमन्यदपि यत्किंचिद्विकारजातमस्ति तत्सर्वं अङ्गानि स्नेव विद्धि, यथा हस्तपादाद्यङ्गानि शरीरगतानि स्नाशब्देन स्नायवोऽभिधीयन्ते यथा वा स्नायवः शरीरगता एवमेता हसितादिविकाराः शरीरादिगता न त्वात्मनो योग्या इति हे विवेकिंस्त्वं विजानीहि ।

अथ चतुर्थीमाह—

अतृष्यꣳस्तृष्यं ध्यायत् । अस्माज्जाता मे मिथू चरन् ।

---

* इत आरभ्य प्रशंसेत्युच्यत इत्यन्तं क. पुस्तके नास्ति

---

१ ख. ग. °दिति, इति । २ क. °यं मृ°।

पुत्रो निर्ऋत्या[1] वैदेहः। अचेता यश्च चेतनः, इति।

अत्र पूर्वोक्तेन हसितादिगुणयुक्तेन शरीरादिना सह चिदात्मनस्तादात्म्याध्यासो वर्ण्यते। अयं चिदात्मा स्वयमतृष्यन्नेव [तृष्य] तृष्यंस्तृषां प्राप्नोति, तृषाया जडधर्मत्वेन स्वस्मिन्नसंभवेऽपि जडतादात्म्यभ्रमेण तृषां प्राप्नोतीव लक्ष्यते। तथा ध्यायद्ध्यायतीव, स्वयं ध्यानरहितोऽपि ध्यानयुक्तेन मनसा सह तादात्म्यभ्रमात्स्वयं ध्यायतीव लक्ष्यते। अस्मादृश्याज्जडदेहाज्जाता हसितादिविकारा मे मदीया इति भ्रान्त्या ध्यायतीति शेषः। मिथूशब्दो मिथःशब्दपर्यायः संश्चिज्जडयोः परस्परमेलनं ब्रूते, तेन मेलनेन चरन्मदीयमिति वृथाऽभिमन्यते। कोऽसावेवमभिमन्यत इति तदुच्यते—निर्ऋत्या निर्ऋतिवत्प्रतिकूलाया मायायाः। पुत्रोऽहंकारो विदेहस्य शरीररहितस्य चिदात्मनः संबन्धी वैदेहश्चैतन्यच्छायायुक्त इत्यर्थः। तदेव स्पष्टी क्रियते योऽहंकारोऽचेताः स्वयमचेतनः संश्चेतनश्च चैतन्यच्छायायोगेन चेतनोऽपि भवति, तादृशः पदार्थः। देहेन्द्रियादिधर्मानात्मन्यारोप्य तदारोपेण सुखध्यानादिधर्मा आत्मनि प्रतिभासन्ते।

अथ पञ्चमीमाह—

स तं मणिमविन्दत्। सोऽनङ्गुलिरावयत्। सोऽग्रीवः प्रत्यमुञ्चत् (६)। सोऽजिह्वो असश्चत, इति।

यः पूर्वोक्तश्चेतनाचेतनयोरन्योन्यतादात्म्याध्यासेन निष्पन्नः संसारी स एव तं मणिम्, अतीतेऽन्धो मणिमित्यादिमन्त्रे प्रोक्तं मण्याद्युपलक्षितमाभरणं चक्षुषा दृष्टवान्। स एव स्वतोऽङ्गुलिरहितोऽपि देहतादात्म्याध्यासेन तदीयैरङ्गुलिभिरावयत्स्वीकृतवान्। तथा स्वतो ग्रीवारहितोऽपि शरीरगतायां ग्रीवायां प्रत्यमुञ्चत्। तथा स एव स्वतो जिह्वारहितोऽपि शरीरगतया जिह्वयाऽसश्चत प्रशंसां कृतवान्।

अथ ब्राह्मणमाह—

नैतमृषिं विदित्वा नगरं प्रविशेत्। यदि प्रविशेत्। मिथौ चरित्वा प्रविशेत्। तत्संभवस्य व्रतम्, इति।

एतमृषिं पूर्वोक्तं विवेकप्रतिपादकं मन्त्रसंघं विदित्वा मन्त्रप्रतिपाद्यं परमार्थतत्त्वमवगत्य नगरं जनसंमर्दयुक्तं न प्रविशेत्। यद्वा नगरोपलक्षितं देहं न प्रविशेत्, देहे तादात्म्यभ्रमं न कुर्यादित्यर्थः। यदि कथंचित्पूर्ववासनाबलात्प्रविशेद्देहे तादात्म्यबुद्धिं

---

१ ख. नैर्ऋत्या। २ ख. ग. °थाऽध्या°। ३ क. ख. मिथुश°। ४ क. °रं संपद्य°। ५ ख. देहता°। ६ ख. °दि किंचि°। ७ ख. °देहता°।

कुर्यात्तदानीं मिथौ चरित्वा शास्त्रार्थपर्यालोचनया मिथ्येदमिति निश्चित्य प्रविशेत्तादात्म्यभ्रमरहितेन देहेन प्रारब्धभोगाय लोकव्यवहारं कुर्यात्। तदेतत्संभवनान्न ऋषेर्व्रतमाचारः, स ह्येवमाचरितवान्।

कल्पः— "आ तमग्ने रथमिति तिस्रः" इति। तत्र प्रथमामाह—

आ तमग्ने रथं तिष्ठ। एकाश्वमेकयोजनम्।
एकचक्रमेकधुरम्। वातध्राजिगतिं विभो, इति।

हे अग्न आरुणकेतुकेह कर्मण्यागमनाय तं तादृशं रथमातिष्ठाऽऽरोह। कीदृशम्। एकाश्वमेक एव प्रबलोऽश्वस्तं वहति, एकयोजनं निमिषमात्रेण योजनरूपं (प) [मध्वानं] गच्छति, एकचक्रं लौकिकरथवच्चक्रद्वयं नापेक्षते किं त्वेकचक्रेण वर्तते, एकधुरमश्वस्यैकत्वात्तद्योजनाय धूरप्येकैव, वातध्राजिगतिं ध्राजिशब्दोऽपि गमनवाची वातस्य ध्राजिर्वातध्राजिस्त[द्व]द्गतिर्यस्यासौ वातध्राजिगतिस्तादृशम्, यथोक्तरथस्यालौकिकत्वात्तेन गमनायाचिन्त्यशक्तिमग्नेर्द्योतयितुं विभुशब्देन संबोधनम्।

अथ द्वितीयामाह—

न रिष्यति न व्यथते (७)। नास्याक्षो यातु सज्जति।
यच्छ्वेतान्रोहितांश्चाग्नेः। रथे युक्त्वाऽधितिष्ठति, इति।

अयमेकचक्रो रथो न रिष्यति न विनश्यति न व्यथते न नि(वि)षीदति, इतस्ततश्चलति, अस्य रथस्याक्षो यातु याने गमनवेलायां न सज्जति क्वापि पाषाणवृक्षादौ सक्तो न भवति, यद्यस्मात्कारणादेवंरूपमग्नेः श्वेतान्रोहितांश्च प्रसिद्धान्प्रबलानश्वान्पर्यायेणास्मिन्रथे युक्त्वा तं रथमधितिष्ठति तस्मादश्वसामर्थ्याद्रथस्य न कोऽपि बाध इत्यर्थः।

अथ तृतीयामाह—

एकया च दशभिश्च स्वभूते। द्वाभ्यामिष्टये
विंशत्या च। तिसृभिश्च वहसे त्रिंशता च।
नियुद्भिर्वायविह ता विमुञ्च (८), इति॥

ततक्षुर्धीमहि नाम मे चिकेत गीतं प्रत्यमुञ्चद्व्यथते सप्त चं॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके प्रथमप्रपाठक
एकादशोऽनुवाकः॥ ११॥

---

१ क. °क्तित्वम्°। २ ग. °दय°।

नियुच्छब्दो वायुसंबन्धिनीरश्वयोपित आचष्टे। हे वायो, इष्टयेऽस्मत्संबन्धियागार्थं स्वभूते स्वाधीने रथे, एकादिसंख्यायुक्ताभिर्नियुद्भिस्तं रथं योजयित्वा वहसेऽस्मत्समीपं प्रापयसि। अश्वादिविषयाः षट्प्रकाराः संख्याविकल्पिताः। हे वायो, इहाऽऽगत्य ता नियुतो विमुञ्च॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयारण्यके प्रथमप्रपाठक एकादशोऽनुवाकः॥ ११॥

अथ प्रथमे द्वादशोऽनुवाकः।

कल्पः—"आतनुष्वेति चतस्रः" इति। तत्र प्रथमामाह—

आतनुष्व प्रतनुष्व। उद्धमाऽऽधमं संधमं।
आदित्ये चन्द्रवर्णानाम्। गर्भमाधेहि यः पुमान्, इति।

हे इन्द्र त्वमातनुष्व समन्तादात्मानं विस्तारय, स्वरूपं प्रदर्श्य सर्वाननुगृहाण। प्रतनुष्व प्रकर्षेण ऋतुषु स्वात्मानं विस्तारय, ऋतुष्वागत्य संनिहितो भव। उद्धमोत्कर्षेण शब्दय, अहमागत इत्येवमुच्चैः कथय। आधमाऽऽभिमुख्येन शब्दय। संधम सम्यगानुकूल्येन शब्दय। ततस्त्वं चन्द्रवर्णानां हिरण्यवर्णानामपां गर्भमादित्ये धेहि, आदित्यरश्मिषु जलं संगृहाणेत्यर्थः। यस्त्वं पुमान्पुंस्त्वशक्तियुक्तः स तं गर्भमाधेहि।

अथ द्वितीयामाह—

इतः सिक्तꣳ सूर्यंगतम्। चन्द्रमसे रसं कृधि।
वारादं जनयाग्रेऽग्निम्। य एको रुद्र उच्यते, इति।

इतः कर्मणः सकाशात्सिक्तमाज्याद्याहुतिद्रव्यं सूर्यगतं कृत्वा चन्द्रमसे चन्द्रवृद्ध्यर्थं रसं कृधि कुरु। अग्नौ प्रक्षिप्तं द्रव्यमादित्यं प्राप्य जलं भूत्वा दिवि चन्द्रं भूमावोषधीश्चाभिवर्धयति, तत्सर्वमिन्द्र त्वं कुरु। ततो वारादं वरणीयस्य फलस्याऽऽसमन्ताद्दातारमग्निमारुणकेतुकरूपमग्रेऽस्माकं पुरतो जनयोत्पादय। योऽग्निरेको रुद्र इति सर्वत्रोच्यते। तथा चान्यत्राऽऽम्नातम्,—"एक एव रुद्रो न द्वितीयाय तस्थे" इति। "रुद्रो वा एष यदग्निः" इति च।

---

१ ग. °तीयोऽवत°।

अथ तृतीयामाह—

असंख्याताः सहस्राणि । स्मर्यते न च
दृश्यते (१) । एवमेतं निबोधत, इति ।

एकस्य रुद्रस्य मूर्तीनां सहस्राणि, असंख्याता असंख्यातानि, गणयितुं न शक्यन्ते । स चैं रुद्रः स्वयं स्मर्यते श्रुतिदृङ्मुखादवगत्य स्मर्तुं शक्यते, स रुद्रो न द्रष्टुं शक्यः । एतं रुद्रमग्निमेवमुक्तप्रकारेण निबोधत हे यजमाना अवगच्छत ।

अथ चतुर्थीमाह—

आ मन्द्रैरिन्द्र हरिभिः । याहि मयूररोमभिः ।
मा त्वा केचिन्न्येमुरिन्न पाशिनः । दधन्वेव ता इहि, इति ।

हे इन्द्र मन्द्रैर्मदनीयैर्हर्षहेतुभिर्मयूररोमभिर्मयूरसदृशवर्णरोमयुक्तैर्हरिभिरश्वैरायाहि, अस्मिन्कर्मण्यागच्छ । आयान्तं त्वां केचिदपि जना मा न्येमुर्मा नियमयन्तु, प्रतिबन्धं मा कुर्वन्त्वित्यर्थः । पाशिन इत्, अश्वानां पाशधारिणः सारथयोऽपि न न्येमुर्नियमनं विलम्बरूपं न कुर्वन्तु । दधन्वेव सर्वाभिमतानां दातेव ता इहि ता अस्मद्युक्तभुव इहि गच्छ ।

कल्पः—" आ (मा)मन्द्रैरित्येकां यजमान उपदध्यात् " [इति] । पाठस्तु—

मां मन्द्रैरिन्द्र हरिभिः । यामि मयूररोमभिः । मा मा
केचिन्न्येमुरिन्न पाशिनः । निधन्वेव ताँ३ इमि, इति ।

मेत्ययं शब्दः प्रथमैकवचनमुपलक्षयति तस्मादहमित्यर्थः संपद्यते । मन्द्रैरित्यादि पूर्ववद्योजनीयम् । हे इन्द्र त्वया सहाहमपि त्वदीये लोके यामि गच्छामि, त्वामिव मामपि जनाः पाशिनो मा प्रतिबध्नन्तु, ततोऽहं निधन्वेव निधानवानिव लब्धनिधिरिव तुष्टः संस्तानुत्तमलोकानिमि, एमि प्राप्नवानि ।

कल्पः—" अणुभिश्चेति द्वे " इति । तत्र प्रथमामाह—

अणुभिश्च महद्भिश्च (२) । निघृष्वैरसमायुतैः ।
कालैर्हरित्वमापन्नैः । इन्द्राऽऽयाहि सहस्रयुक्, इति ।

हे इन्द्र त्वं कालैः कालविशेषैः सहाऽऽयाहि, आगच्छ । कीदृशैः कालैः ।

---

१ क. चन्द्रः स्व° । २ क. °तिदर्शिमुखा° । ३ क. चिन्निये° । ४ क. ख. धावन्तं । ५ क. मा नियेमु° । ६ ग. आ । ७ ख. ग. इत्यर्थः । ८ क. ख, ग. °नो मां मा । ९ ख. निधन° । १० क. द्वये ।

अणुभिश्च क्षणमुहूर्ताद्याकारेण सूक्ष्मरूपैः, **महद्भिश्च** संवत्सरयुगादिरूपेण **प्रौढैरपि, निघृष्वैर्निंतरां** दीप्यमानैः, यद्यपि कालस्य नीरूपत्वान्नास्ति दीप्तिस्तथाऽपि तदभिमानिनां देवानामस्त्येव दीप्तिः । **असमायुतैः** परस्परमसंगतैः, न ह्येकस्मिन्काले वर्तमाने कालान्तरं सह प्रवर्तते । **हरित्वमापन्नैर्हरिनामकत्वदीयाश्वत्वं प्राप्तैः**, कालाभिमानिदेवा एव तवाश्वा इत्यर्थः । कीदृश इन्द्रः । **सहस्रयुगक्षिसहस्रेण युक्तः** ।

अथ द्वितीयामाह —

अग्निर्विभ्राड्वसनः । वायुः श्वेतसिकद्रुकः ।
संवत्सरो विषूवर्णैः । नित्यास्तेऽनुचरास्तव, इति ।

हे इन्द्राग्निर्वायुः संवत्सरश्च ये त्रयः सन्ति ते त्रयोऽपि **तव नित्या अनुचराः** । कदाचिदप्यनपायिनो नित्याः । कीदृशोऽग्निः, **विभ्राड्वसनो** विशेषेण भ्राजमानवसनयुक्तः । कीदृशो वायुः, **श्वेतसिकद्रुकः** श्वेतानां सिकतानां द्रोग्धा । तदेतदुपलक्षणम्, नानाविधां धूलिमुत्पादयतीत्यर्थः । कीदृशः संवत्सरः, **विषूवर्णैर्**नानाविधैर्वर्णैर्युक्तः । वसन्ताद्यृतुभेदाः पूर्वमेवोक्ताः ।

कल्पः—" सुब्रह्मण्योमित्येकाम् " इति । पाठस्तु—

सुब्रह्मण्योꣳ सुब्रह्मण्योꣳ सुब्रह्मण्योम् । इन्द्राऽऽगच्छ हरिव
आगच्छ मेधातिथेः । मेष वृषणश्वस्य मेने (३) । गौरावस्क-
न्दिन्नहल्यायै जार । कौशिकब्राह्मण गौतमब्रुवाण, इति ।

शोभनं ब्रह्म सुब्रह्म वेदस्तस्मै हितः **सुब्रह्मण्य** इन्द्रः । ओमिति संबोधनार्थः । हे सुब्रह्मण्येति । त्रिरभिधानमादरार्थम् । तद्गुणकथनेन स्तुत्यर्थमिन्द्रादिपदैः संबोधनम् । हे इन्द्र परमैश्वर्ययुक्त, इह कर्मण्यागच्छ । हरिवो हरिनामकावश्वावस्य विद्येते इति हरिवांस्तस्य संबोधनम्, शुक्लकृष्णपक्षदेवावेव तदीयाश्वत्वं प्राप्य हरिशब्देनोच्येते, तादृश हे हरिव इह कर्मण्यागच्छ । मेधातिथेर्मेधातिथिर्नामकः कश्चिदृषिः कण्वस्य पुत्रस्तत्संबन्धिन्, हे मेषरूप । वृषणश्वो नाम कश्चिन्मुनिस्तस्य संबन्धिनी या मेनकाख्या दुहिता तां मन्यमाने तस्मिन्नर्थे **वृषणश्वस्य मेने**, इति संबुद्ध्यन्तं प्रयुक्तम् । **गौरावस्कन्दिन्**गौरमृगो भूत्वा यागमध्ये समागत्य सोमं पीत्वा हे विनाशक । तदेतत्सर्वं **शाखान्तरब्राह्मणे** समाम्नातम्—"हरिव आगच्छेति पूर्वपक्षापरपक्षौ वा इन्द्रस्याश्वौ ताभ्यां ह्येष सर्वं हरतीति, मेधातिथेर्मेषेति मेधातिथिं काण्वायनिं मेषो भूत्वा जहार,

---

१ क. ख. °स्य निरू° । २ ख. °भेदात्पूर्वं° । ३ ख. °वोक्तः । ४ ख. °वेवैत° । ५ ख. ग. °च तूर । ६ ख. ग. °क्षावप° । क. °न्द्रस्य हरी ता° ।

वृषणश्वस्य मेन इति वृषणश्वस्य मेनका नाम दुहिता तामिन्द्रश्चकमे, गौरावस्कन्दिन्निति गौरमृगो भूत्वा राजानं पिबहि(ति)"इति । अहल्यायै जार, अहल्या गौतमस्य भार्या तस्या इन्द्रो जार इति पुराणे प्रसिद्धम् । कौशिकब्राह्मण कौशिकनामा कश्चिन्महर्षिस्तस्य समीपे ब्राह्मणवेषेण समागतवान् । गौतमब्रुवाण गौतमो महर्षिस्तं प्रसादयितुं स्तुतिं कृतवान् । तथाविध हे इन्द्राऽऽगच्छेत्यन्वयः ।

कल्पः—" अरुणाश्वा इति चतस्रः " इति । तत्र प्रथमामाह—

अरुणाश्वा इहाऽऽगताः । वसवः पृथिविक्षितः ।
अष्टौ दिग्वाससोऽग्नयः । अग्निश्च जातवेदाश्चेत्येते, इति ।

अष्टावग्नय इह कर्मणि, आगताः, कीदृशाः । अरुणाश्वा अरुणवर्णैरश्वैर्युक्ताः, वसवो जगतो निवासहेतवः, पृथिविक्षितो भूमिनिवासिनः, दिग्वाससो दिश एतेषामग्नीनां वासांसि । के तेऽष्टावग्नय इति तदुच्यते—अग्निश्च जातवेदाश्च, इत्यस्मिन्मन्त्रे ये पूर्वमभिहितौ एतेऽग्नयो वेदितव्याः ।

अथ द्वितीयामाह—

ताम्राश्वास्ताम्ररथाः । ताम्रवर्णास्तथाऽसिताः ।
दण्डहस्ताः खादग्दतः । इतो रुद्राः परां गताः ।
(४) । उक्तꣳ स्थानं प्रमाणं च पुरꣳ इत, इति ।

ये रुद्राः सन्ति त इतः स्थानात्पृथिवीरूपात्परां दिवं गताः । कीदृशा रुद्राः—ताम्रवर्णैरश्वै रथैश्च युक्ताः, स्वयं च तथा ताम्रवर्णाः, असिता ईषदपि सितं श्वेत्यं येषां नास्ति ते तादृशाः, दण्डहस्ता गदापाणयः, खादग्दतः खादयन्तो भक्षयन्तो दन्ता येषां तादृशाः, एवंविधा हे रुद्रा युष्माकं स्थानमुक्तं शास्त्रेषु प्रसिद्धम् । तथा तस्य स्थानस्य प्रमाणं चेयत्तानिश्चयः शास्त्रसिद्धः, तस्मात्पुरो भवदीयाः पुरीरित गच्छत ।

अथ तृतीयामाह—

बृहस्पतिश्च सविता च । विश्वरूपैरिहाऽऽगताम् ।
रथेनोदकवर्त्मना । अप्सुषा इति तद्द्वयोः, इति ।

योऽयं बृहस्पतिर्यश्च सविता तावुभौ विश्वरूपैर्नानाविधरूपैरश्वैरिह कर्मण्याग

---

१ क. पिबति । २ क. ख. ग. तस्य । ३ क. ख. °नाम क° । ४ ख. ग. °मिश्रा° । ५ क. इत्येतस्मि° । ६ क. °तास्तेऽग्न° । ७ घ, यित । ८ ग. °ता । वि° । ९ ग. अप्सषा ।

तामागच्छताम् । केन साधनेन । **उदक्वर्त्मना रथेन**, उदकस्येव वर्त्म मार्गो यस्य रथस्य सोऽयमुदक्वर्त्मा यथा वृष्टिजलस्यान्तरिक्षमेव मार्ग एवमेतदीयरथस्याप्यन्तरिक्षमेव मार्गः । कीदृशावेतौ, **अप्सुषा**, अपां सवितारौ । **इति**, एवमुक्तप्रकारेण **द्वयोः** सवितृबृहस्पत्योरुभयोः, तत्स्वरूपमुक्तमिति शेषः । एवं त्रयो मन्त्रा उक्ताः, चतुर्थस्तूपरिष्टादुदाहारिष्यते ।

उक्तो वेषो वासांसि च । कालावयवानामितः प्रतीज्या । वासात्या इत्यश्विनोः । कोऽन्तरिक्षे शब्दं करोतीति । वासिष्ठो रौहिणो मीमांसां चक्रे । तस्यैषा भवति, इति ।

कालावयवानां वसन्ताद्यृतूनामितोऽस्मादनुवाकात्प्रतीच्येष्वतीतेष्वनुवाकेषु साकं जानामित्यादिषु **वेष** आकारविशेष **उक्तः, वासांसि च** वस्त्राण्यप्युक्तानि । " ऋतु ऋतुना नुद्यमानः । विननादाभिधावः । षष्टिश्च त्रिंशका वत्साः " इत्यादिना यत्स्वरूपमृतूनामभिहितं सोऽयं वेष इत्युच्यते । " सारागवस्त्रैर्जरदक्षः । वसन्तो वसुभिः सह " इत्यादिना वस्त्राण्युक्तानि । तथा वासात्यौ चित्रावित्यादिनाऽश्विनोर्देवयोर्वेष उक्तः । यद्यप्येतद्ब्राह्मणं न संनिहितमन्त्रोपयुक्तं तथाऽप्युक्तं स्थानमिति वचनेन बुद्धिस्थमर्थं प्रसङ्गाद्ब्रूते । अथ चतुर्थमन्त्रोदाहरणार्थमिदमुच्यते—**वासिष्ठो** वसिष्ठगोत्रोत्पन्नः, **रौहिणः**, रोहिणाश्चस्य मुनेः पुत्रः, सोऽयमाकाशे कंचिद्ध्वनिं श्रुत्वा **मीमांसां चक्रे** विचारितवान् । किमिति । को नामान्तरिक्षे शब्दं करोति, न ह्यूर्ध्वमवलोक्यमाने कश्चिदपि पुमानुपलभ्यते शब्दश्चायं भेरीवादनादप्यधिकः श्रूयते । तस्माद्विस्मयं प्राप्तस्य को नाम शब्दकर्तेति विचारः । **तस्य** विचारस्यैषा निर्णयवादिनी काचिदृग्विद्यते ।

तस्या ऋचः प्रतीकं दर्शयति—

वाश्रेव विद्युदिति, इति ।

वाश्रेव विद्युन्मिमातीत्ययं मन्त्रोऽग्निना रयिमश्नवदित्यनुवाके व्याख्यातः । **वाश्रा** वाशनशीला गौर्यथा वत्सं प्रति शब्दं करोत्येवमियं विद्युत्सूर्यतेजोरूपमेघवर्तिनी **मिमाति** शब्दं निर्मिमीत इत्यर्थः ।

कल्पः—" ब्रह्मण उदरणमसीति चतस्रो ब्रह्मसदनाः " इति । पाठस्तु—

ब्रह्मण उदरणमसि । ब्रह्मण उदीरणमसि । ब्रह्मण

---

१ क. ख. °क्षमा° । २ ख. ग. सनितारौ । ३ ख. ग. प्रतीच्या । ४ क. °तीच्या प्रतीच्ये° । ५ ख. ग. °ब्दश्च मे° ।

आस्तरणमसि । ब्रह्मण उपस्तरणमसि(५), इति ॥

दृश्यते च मेने परां गताश्चक्रे षट् च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके प्रथमप्रपाठके
द्वादशोऽनुवाकः ॥ १२ ॥

हे इष्टके त्वं ब्रह्मणो हिरण्यगर्भस्योदरणमुदीरणत्वहेतुरसि । उदीरणमुदीर्णत्वहेतुरसि । उदीरणत्वं लोभराहित्यम् । उदीर्णत्वं गुणान्तरैरन्येभ्य आधिक्यम् । आस्तरणमासनम् । उपस्तरणमुपर्याच्छादनम् । एतैश्चतुर्भिर्यजुर्मन्त्रैश्चतस्र इष्टका उपदध्यात् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यके प्रथमप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

अथ प्रथमे त्रयोदशोऽनुवाकः ।

कल्पः—" अष्टयोनीमित्यष्टौ दिश्याः " इति । तत्र प्रथमामाह—

अष्टयोनीमष्टपुत्राम् । अष्टपत्नीमिमां महीम् ।
अहं वेद न मे मृत्युः । न चामृत्युरघाऽहरत्, इति ।

अष्टावष्टसंख्याकानि मूलप्रकृतिसहितानि महदहंकारपञ्चतन्मात्ररूपाणि तत्त्वानि योनयः कारणानि यस्याः पृथिव्याः सेयमष्टयोनी ताम् । अष्टसंख्याका वक्ष्यमाणा मित्रावरुणादयः पुत्रा यस्याः पृथिव्याः सेयमष्टपुत्रा ताम् । अष्टसंख्याका इन्द्रादयो दिग्वर्तिनः पतयः पालका यस्याः पृथिव्याः सेयमष्टपत्नी ताम् । तथोक्तगुणयुक्तामिमां महीं पृथिवीमहं मन्त्रद्रष्टा वेद जानामि, अतो ज्ञानप्रभावेन मे मृत्युर्नास्ति, किं त्वमृतो मुक्त एव भविष्यामीति शेषः । किंच । अमृत्युः परममृत्योरन्योऽपमृत्युरित्यर्थः । सोऽघा पापानि दुःखानि न चाहरज्ज्ञानप्रभावादेव नैव संपादयिष्यति ।

अथ द्वितीयां तृतीयां चाऽऽह—

अष्टयोन्यष्टपुत्रम् । अष्टपदिदमन्तरिक्षम् । अहं
वेद न मे मृत्युः । न चामृत्युरघाऽहरत् ।
अष्टयोनीमष्टपुत्राम् । अष्टपत्नीममूं दिवम् (१) ।
अहं वेद न मे मृत्युः । न चामृत्युरघाऽहरत्, इति ।

---

१ ख. ग. °परि द्यु° ।

अष्टपदष्टपत्तिः, अष्टसंख्याका (क) पालका इ(कमि)त्यर्थः । अन्यत्पूर्ववत् ।

अथ चतुर्थपञ्चममन्त्रयोः प्रतीके दर्शयति—

सुत्रामाणं महीमूषु, इति ।

सुत्रामाणं पृथिवीं द्यामित्येको मन्त्रः । महीमूषु मातरमित्यपरो मन्त्रः । एतौ चोभौ वैश्वानरो न ऊत्येत्यनुवाके व्याख्यातौ ।

अथ षष्ठीमाह—

अदितिर्द्यौरदितिरन्तरिक्षम् । अदितिर्माता स पिता स पुत्रः । विश्वे देवा अदितिः पञ्च-जनाः । अदितिर्जातमदितिर्जनित्वम्, इति ।

अदितिशब्दवाच्यदेवता सर्वात्मकत्वेन स्तूयते—**माता** पृथिवी, अतो लोकत्रयात्मकांशदेवताविशेषोऽदित्याख्यः सर्वस्य जगतः **पिता स** एव **पुत्रश्च** । ये **विश्वे देवाः** सर्वेऽपि देवाः, ये च **पञ्चजना** निषादपञ्चमा ब्राह्मणक्षत्रियवैश्यशूद्रास्ते सर्वेऽप्य-**दितिरेव, जातं** यत्पूर्वमुत्पन्नं जगत्, **जनित्वं** जननरूपो व्यापारस्तत्सर्वमप्यदितिरेव ।

अथ सप्तमीमाह—

अष्टौ पुत्रासो अदितेः । ये जातास्तन्वः परि ।
देवाँ२ उपप्रैत्सप्तभिः (२) । परा मार्ताण्डमास्यत्, इति ।

अदितेर्देवताया अष्टौ पुत्रासोऽष्टसंख्याकाः पुत्रा विद्यन्ते, ये पुत्रास्**तन्वः परि** शरीरस्योपरि जाता औरसा इत्यर्थः । तेषां मध्ये **सप्तभिः** पुत्रैः सह **देवानुपप्रैत्स**मीपे प्राप्तवती, **मार्ताण्डमष्टमं** पुत्रं **परास्यत्**परात्कृतवती । तमेकं परित्यज्यान्यैरेव सप्तभिः सह देवलोकं गता ।

अथाष्टमीमाह—

सप्तभिः पुत्रैरदितिः । उपप्रैत्पूर्व्यं युगम् । प्रजायै मृत्यवे त्वत् । परा मार्ताण्डमाभरदिति, इति ।

अस्यामृच्यदितिदेवतायाः सप्तपुत्रस्वीकारे मार्ताण्डपरित्यागे च कारणमुच्यते—**इयमदितिर्देवी सप्तभिः पुत्रैर्निमित्तभूतैस्तदुत्पादनार्थं पूर्व्यं युगं** तदुत्पत्तेः पूर्वकालीनं **पतिसंयोगं प्रजायै** प्रजोत्पत्त्यर्थम्**उपप्रैत्**प्रीतिपूर्वकं प्राप्तवती । एतेषु सप्तसु पुत्रेषूत्पन्नेषु **तद्द्वारा** प्रजावृद्धिर्भवतीत्यभिप्रेत्य तैः सह देवलोके गमनम् । मार्ताण्डाख्यमष्टमं पुत्रं

---

१ क ख. पूर्वं ।

परोभरत्परित्यक्तवतीति यत्तन्मृत्यवे मृत्युनिमित्तम्, मार्ताण्डो हि मृत्योरेव हेतुर्न प्रजाभिवृद्धेः। मार्ताण्डो ह्यादित्यः, स चाण्डभेदेनोत्पद्यते। तथा हि च्छन्दोगाः—"तदाण्डं निरवर्तत तत्संवत्सरस्य मात्रामदायत। तन्निरभिद्यत" इत्युपक्रम्यान्ते समामनन्ति—"यत्तदजायत सोऽसावादित्यः" इति। शब्दानिर्वचनमपि तादृशमेव, मृतमण्डं यदीयजन्मना स मार्ताण्ड इति। तथा च स्मर्यते—"मृतेऽण्डे जायते यस्मान्मार्ताण्डः स उदाहृतः" इति। अतोऽयं मृत्यवे मृत्युप्रीत्यर्थमेवोपयुज्यते न त्वभिवृद्ध्यर्थमित्यदितेस्तत्परित्यागो युक्तः। इतिशब्दो मन्त्रसमाप्तिद्योतनार्थः।

अथ ब्राह्मणवाक्यमुच्यते—

ताननुक्रमिष्यामः, इति।

अष्टपुत्रामिति ये पुत्राः सूचितास्तान्पुत्राननुक्रमेण वक्ष्यामः।

कल्पः—"मित्रश्च वरुणश्चेत्यष्टौ दिश्याः" इति। पाठस्तु—

मित्रश्च वरुणश्च। धाता चार्यमा च। अꣳशश्च भगश्च। इन्द्रश्च विवस्वाꣳश्चेत्येते, इति।

मित्रादिनामान्येवात्र मन्त्राः। मित्रस्तया देवतयाऽङ्गिरस्वद्ध्रुवासीदित्युपधानं द्रष्टव्यम्। इत्येते मित्रावरुणादयोऽष्टौ पुत्रा उक्ताः।

अथ मन्त्रचतुष्टयस्य प्रतीकानि दर्शयति—

हिरण्यगर्भो हꣳसः शुचिषत्। ब्रह्मजज्ञानं तदित्पदमिति, इति।

हिरण्यगर्भ इत्ययं मन्त्र ऊर्ध्वा अस्येत्यनुवाके व्याख्यातः। हꣳसः शुचिषदित्ययं मन्त्र इन्द्रस्य वज्रोऽसीत्यनुवाके व्याख्यातः। ब्रह्मजज्ञानमित्ययं मन्त्रोऽभ्यस्थाद्विश्वा इत्यनुवाके व्याख्यातः। तदित्पदमित्ययं मन्त्र उदस्तार्प्सीत्सवितेत्यनुवाके व्याख्यातः। तत्र हिरण्यगर्भ इति मन्त्रो हिरण्मयपुरुषोपधानार्थः। हꣳसः शुचिषदिति मन्त्रः पुष्करपर्णोपधानार्थः। ब्रह्मजज्ञानमिति मन्त्रो रुक्मोपधानार्थः। तदित्पदमिति मन्त्रः कूर्मोपधानार्थः। एतदेवाभिप्रेत्य कल्पेऽभिहितम्—"पुष्करपर्णे रुक्मं हिरण्मयं पुरुषं कूर्मम्" इति। इतिशब्दः प्रतीकसमाप्त्यर्थः।

अथ ब्राह्मणमुच्यते—

गर्भः प्राजापत्यः। अथ पुरुषः सप्तपुरुषः (३), इति॥

---

१ क. °रास्यत्य° । २ क. ख. °त्युर्निमि° । ३ क. °णमु° । ४ ख. ग. °स्वदित्यु° । ५ ख. ग. 'णी हि° ।

अमूं दिव॑ꣳ सप्तभि॑रेते चत्वारि॑ च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके प्रथमप्रपाठके
त्रयोदशोऽनुवाकः ॥ १३ ॥

प्रजापतेरयं **प्राजापत्यः**, तादृशो **गर्भः** पूर्वमुक्तः, हिरण्यगर्भ इति मन्त्रे प्राजापत्यगर्भाभिधानात् । **अथानन्तरमुत्तरेणानुवाकेन पुरुष** आदित्याख्यः प्रतिपाद्यते । स च कीदृशः, **सप्तपुरुषः** सप्त पुरुषाः किंकरस्थानीया नक्षत्रमासार्धमासर्तुसंवत्सराहोरात्राख्यपुरुषा यस्यासौ सप्तपुरुषः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयारण्यकभाष्ये त्रयोदशोऽनुवाकः ॥ १३ ॥

अथ प्रथमप्रपाठके चतुर्दशोऽनुवाकः ।

योऽसावित्यनुवाकस्योपघाने विनियोगादर्शनाल्लिङ्गानुसारेणाऽऽयुष्काम एतेनाऽऽदित्यमुपतिष्ठेत्(त) । तस्मिन्ननुवाके प्रथमं मन्त्रमाह—

**योऽसौ॑ तपन्नुदे॑ति । स सर्वे॑षां भूता॑नां
प्राणानादायोदे॑ति । मा मे॑ प्रजाया मा
पशू॑नाम् । मा मम॑ प्राणानादायोद॑गाः, इति ।**

योऽसौ यादित्यः प्रातःकाले प्राच्यामुदेति स आदित्यः **सर्वेषां** प्राणिनां **प्राणानादाय** स्वीकृत्योदेति । आयुःक्षेपणेन[1] प्राणानपहरति । सूर्योदये सति पूर्वदिनस्य समाप्तत्वादेकदिनमात्रमायुः क्षीणं भवति । तस्मादेवं प्रार्थयामहे, आदित्य मदीयानां **प्रजानां पशूनां** च **मम** च **प्राणानादायोदयं मा गा** माऽऽप्नुहि । प्राणापहारहेतुमायुःक्षयं मा कुर्वित्यर्थः ।

अथ द्वितीयं मन्त्रमाह—

**असौ॑ योऽस्तमे॑ति । स सर्वे॑षां भूता॑नां प्राणा-
नादायास्तमे॑ति । मा मे प्रजाया मा प॑शूनाम् ।
मा मम॑ प्राणानादायास्तं॑ गाः, इति ।**

---

१ ख. ग. °योगद° । २ ग. °क्षयोपादाने° । ३ क. °पादेन ।

योऽसावादित्यः सायंकालेऽस्तं प्राप्नोति सोऽप्येकमहः समाप्य तावन्मात्रमायुः क्षयपति । अन्यत्पूर्ववत् ।

अथ तृतीयं[1] मन्त्रमाह—

असौ य आपूर्यति । स सर्वेषां भूतानां प्राणैरापूर्यति (१) । मा मे प्रजाया मा पशूनाम् । मा मम प्राणैरापूरिष्ठाः, इति ।

उदेतुं प्रक्रान्तः सूर्यः क्रमेण यावद्यावद्रश्मि[भि]रापूर्यते तावत्तावत्प्राणिनामायुः क्षीयते । अन्यत्पूर्ववत् ।

अथ चतुर्थ[2]माह—

असौ योऽपक्षीयति । स सर्वेषां भूतानां प्राणैरपक्षीयति । मा मे प्रजाया मा पशूनाम् । मा मम प्राणैरपक्षेष्ठाः, इति ।

अस्तं प्रातुमुपक्रान्तः सूर्यो यावद्यावद्रश्मिभिः क्रमेण क्षीणो भवति तावत्तावत्प्राणिनामायुःक्षयः । अन्यत्पूर्ववत्सर्वत्र योज्यम् ।

अथ पञ्च[3]ममाह—

अमूनि नक्षत्राणि । सर्वेषां भूतानां प्राणैरप प्रसर्पन्ति चोत्सर्पन्ति च । मा मे प्रजाया मा पशूनाम् । मा मम प्राणैरप प्रसृपत मोत्सृपत (२), इति ।

अमून्येतानि नक्षत्राणि दिवि संचरन्ति तानि सर्वाण्यहन्यप[प्र]सर्पन्ति, अपगतज्योतींषि भूत्वा प्रकर्षेण संचरन्ति । रात्रौ चोत्सर्पन्ति, उत्कृष्टज्योतींषि भूत्वा प्रवर्तन्ते । तस्मिन्नुभयस्मिन्नपि काले प्राणिनां प्राणैः सहैव प्रवर्तन्ते । यावद्यावत्कालातिक्रमस्तावत्तावदायुषा (षां) क्षीयमाणत्वात् । ततो हे नक्षत्राणि प्रजादीनां प्राणैः सह माऽप[प्र]सृपताहन्यपसर्पणं मा कुरुत, मोत्सृपत रात्रावुत्सर्पणमपि मा कुरुत । भवदीयप्रजारक्षणनिमित्तमायुःक्षयो मा भूदित्यर्थः ।

अथ षष्ठसप्त[4]ममन्त्रावाह—

इमे मासाश्चार्धमासाश्च । सर्वेषां भूतानां प्राणैरप प्रसर्पन्ति चोत्सर्पन्ति च । मा मे प्रजाया मा पशूनाम् । मा मम प्राणैरप प्रसृपत मोत्सृपत ॥

इम ऋतवः । सर्वेषां भूतानां प्राणैरप प्रसर्पन्ति

---

१ क. °तीयामा° । २ क. ग. °वत्या° । ३ क. ख. °तुर्थीमा° । ४ क. ख. °श्चमीमा° ।

चोत्सर्पन्ति च । मा मे प्रजाया मा पशूनाम् ।
मा मम प्राणैरप प्रसृपत मोत्सृपत इति, ।

नक्षत्रवाक्यवद्व्याख्येयम् ।

अथाष्टममाह—

अयꣳ संवत्सरः । सर्वेषां भूतानां प्राणैरप प्रसर्पति चोत्सर्पति च (३)। मा मे प्रजाया मा पशूनाम् । मा मम प्राणैरप प्रसृप मोत्सृप, इति ।

अत्र संवत्सरशब्दस्यैकवचनान्तत्वा[दु]त्सर्प प्रसर्पेति चैकवचनम् । अन्यत्पूर्ववत् ।

अथ नवमदशमौ मन्त्रावाह—

इदमहः । सर्वेषां भूतानां प्राणैरप प्रसर्पति चोत्सर्पति च । मा मे प्रजाया मा पशूनाम् । मा मम प्राणैरप प्रसृप मोत्सृप । इयꣳ रात्रिः । सर्वेषां भूतानां प्राणैरप प्रसर्पति चोत्सर्पति च । मा मे प्रजाया मा पशूनाम् । मा मम प्राणरप प्रैसृप मोत्सृप, इति ।

एतद्वाक्यद्वयं संवत्सरवाक्यवद्व्याख्येयम् ।

अथैकादशं मन्त्रमाह——

ॐ भूर्भुवः स्वः, इति ।

योऽयं प्रणवप्रतिपाद्यः परमात्मा स एव लोकत्रयरूप इत्यर्थः ।

अथ द्वादशमाह——

एतद्वो मिथुनं मा नो मिथुनꣳ रीदृवम् (४), इति ।
प्राणैरापूर्यति मोत्सृपत चोत्सर्पति च मोत्सृप द्वे च ॥
*उदेत्यस्तमेत्यापूर्यत्यपक्षीयत्यमूनि नक्षत्राणीमे मासा इम ऋतवोऽयꣳ संवत्सर इदमहरियꣳ रात्रिर्दश ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके प्रथमप्रपाठके चतुर्दशोऽनुवाकः ॥ १४ ॥

नक्षत्रमासार्धमासर्तुसंवत्सराहोरात्ररूपा हे सप्त पुरुषाः प्रणवप्रतिपाद्यपरमात्मरूपे-

* एतदनुवाकमन्त्राद्यवाक्यगतान्तिमपदभागसंकलनमेतत् ।

णाऽऽदित्येन सहावस्थानं यदस्त्येतद्वो युष्माकं मिथुनं संबन्ध उपकार्योपकारकलक्षणः, एतस्य ध्यानेनास्माकमपि मिथुनं स्त्रीपुंसलक्षणं मा रीद्वं हिंसितं मा कुरुत ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यके प्रथमप्रपाठके चतुर्दशोऽनुवाकः ॥ १४ ॥

अथ प्रथमप्रपाठके पञ्चदशोऽनुवाकः ।

कल्पः—"वसूनां रुद्राणामित्यष्टावुत्तरतः" इति । तदेतद्ब्राह्मणवाक्येन संग्रहरूपेप्रतिजानीते—

अथाऽऽदित्यस्याष्टपुरुषस्य, इति ।

अष्टयोनीमित्यनुवाकोक्तैर्मन्त्रैरिष्टकोपधानानन्तरं वस्वाद्यष्टविधपुरुषेणावस्थितस्याऽऽदित्यस्य संबन्धिभिर्मन्त्रैरिष्टका उपदध्यादिति शेषः ।

तत्र प्रथमं मन्त्रमाह—

वसूनामादित्यानाꣳ स्थाने स्वतेजसा भानि, इति ।

पूर्वमृतुप्रकरणे—"वसन्तो वसुभिः सह" "शुक्लवासा रुद्रगणः" इत्यादिना ये च रुद्रादयो निर्दिष्टास्ते सर्वेऽप्यादित्यस्यैवावतारविशेषाः, ते चात्र मन्त्रेषु क्रमेण निर्दिश्यन्ते । अष्टवसुरूपेणावतीर्णा य आदित्यमूर्तिविशेषाः, तेषां **स्थाने** तिष्ठन्नहं तत्प्रसादलभ्येन स्वकीयेन **तेजसा भानि** भासमानो भूयासम् ।

अथ द्वितीयमाह—

रुद्राणामादित्यानाꣳ स्थाने स्वतेजसा भानि, इति ।

एकादशरुद्ररूपेणावतीर्णा आदित्यमूर्तिविशेषाः । अन्यत्पूर्ववत्सर्वत्र व्याख्येयम् ।

अथ तृतीयमाह—

आदित्यानामादित्यानाꣳ स्थाने स्वतेजसा भानि, इति ।

द्वादशादित्यरूपेणावतीर्णाः परमात्मरूपादित्यस्य मूर्तिविशेषाः ।

अथ चतुर्थमाह—

सताꣳ सत्यानाम् । आदित्यानाꣳ
स्थाने स्वतेजसा भानि, इति ।

---

१ ख. 'न्त्रेण । २ क. ख. 'तीयामा' ३ क. ख. 'तीयामा' । ४ क. 'स्य भूतिवि' । ५ क. ख. 'तुर्थीमा' ।

सन्तः सत्पुरुषा निजावतारेण सर्वलोकसंप्रतिपन्ना महर्षयः, ते च **सत्याः** सर्वदा सत्यवादिनः, तादृशाः केचिदादित्यावतारविशेषाः ।

अथ पञ्चममाह—

अभिधून्वतामभिघ्नताम् । वातवतां मरुताम् ।

आदित्यानाꣳ स्थाने स्वतेजसा भानि, इति ।

ऋतुप्रकरणे—'अभिधून्वन्तोऽभिघ्नन्तः' इत्यादिना मरुद्गणा उक्तास्ते चाभितो धून्वन्ति वृष्टिजलं चालयन्ति, इतस्ततः कम्पयन्ति । मार्गे गच्छतः पुरुषानभिघ्नन्ति, आभिमुख्येन ताडयन्ति । ते च **वातवन्तस्तीव्रवायुयुक्ता** भवन्ति, ते च मरुद्गणा आदित्यावतारविशेषाः ।

अथ षष्ठमाह—

ऋभूणामादित्यानाꣳ स्थाने स्वतेजसा भानि, इति ।

"ऋभूणां तन्निबोधत" इत्यत्र य ऋभवो देवविशेषा उक्तास्तेऽप्यादित्यावतारविशेषाः ।

अथ सप्तममाह—

विश्वेषां देवानाम् । आदित्यानाꣳ स्थाने स्वतेजसा भानि, इति ।

ये प्रसिद्धा विश्वे देवास्तेऽप्यादित्यावतारविशेषाः ।

अथाष्टममाह—

संवत्सरस्य सवितुः । आदित्यस्य स्थाने स्वतेजसा भानि, इति ।

ऋतुप्रकरणे—"स खलु संवत्सर एतैः" इति संवत्सरोऽभिहितः स चाऽऽदित्यस्यावतारविशेषः ।

अथ सर्वमन्त्रेष्वनुषञ्जनीयं वाक्यद्वयमाह—

ओं भूर्भुवः स्वः । रश्मयो वो मिथुनं

मा नो मिथुनꣳ रीद्ध्वम् (१), इति ।

ऋभूणामादित्यानाꣳ स्थाने स्वतेजसा भानि षट् च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके प्रथमप्रपाठके

पञ्चदशोऽनुवाकः ॥ १५ ॥

---

१ ग. °मषष्ठावाह । २ ग. °नि । ऋभूणामादित्यानाꣳ स्थाने स्वतेजसा भानि, इति । ३ ग. °थ सप्तममा° । ४ ख. ग °द्धास्ते वि° ।

प्रणवप्रतिपाद्यस्य लोकत्रयात्मकस्याऽऽदित्यस्य संबन्धिनो हे **रश्मयो वो** युष्माकं स्वामिनाऽऽदित्येन सह **मिथुनं** मिथुनवदुपकार्योपकारकभावोऽस्ति, अतस्तादृशा **यूयं नोऽस्माकं** स्त्रीपुरुषलक्षणमिथुनं **मा** रीढ्वं हिंसितं मा कुरुत ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्ति-
रीयारण्यके प्रथमप्रपाठके पञ्चदशोऽनुवाकः ॥ १५ ॥

अथ प्रथमप्रपाठके षोडशोऽनुवाकः ।

कल्पः—" आरोगस्येत्यष्टावुपरिष्टात् " इति । " आरोगो भ्राजः पटरः पतङ्गः " इत्यादीन्यष्ट सूर्यनामानि मन्त्ररूपाणि पूर्वमाम्नातानि, इदानीं तेनैव क्रमेणाष्टौ मन्त्रान्तराण्यत्राऽऽम्नायन्ते । तानि दर्शयति—

आरोगस्य स्थाने स्वतेजसा भानि । भ्राजस्य स्थाने स्वतेजसा भानि । पटरस्य स्थाने स्वतेजसा भानि । पतङ्गस्य स्थाने स्ततेजसा भानि । स्वर्णरस्य स्थाने स्वतेजसा भानि । ज्योतिषीमतस्य स्थाने स्वतेजसा भानि । विभासस्य स्थाने स्वतेजसा भानि । कश्यपस्य स्थाने स्वतेजसा भानि । ॐ भूर्भुवः स्वः । आपो वो मिथुनं मा नो मिथुनꣳ रीढम् (१), इति ।

आरोगस्य दश ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके प्रथमप्रपाठके
षोडशोऽनुवाकः ॥ १६ ॥

आरोगनामको यः प्रथमः सूर्यस्तस्य स्थाने तिष्ठन्नहं तत्प्रसादलभ्येन स्वकीयेन **तेजसा** भासमानो भूयासम् । प्रणवप्रतिपाद्यो लोकत्रयात्मको यः सूर्यस्तेन **सहाऽऽपो वो** युष्माकमुपकार्योपकारकभावोऽस्ति, अतस्तथाविधा यूयमस्मदीयं **मिथुनं** हिंसितं **मा** कुरुत । एतच्च वाक्यद्वयं पूर्ववत्सर्वमन्त्रशेषः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयारण्यकभाष्ये प्रथमप्रपाठके षोडशोऽनुवाकः ॥ १६ ॥

अथ प्रथमे सप्तदशोऽनुवाकः ।

कल्पः—"प्रभ्राजमानानामित्येकादश प्रभ्राजमानीनामिति चैकादश मध्ये" इति । तेषां मन्त्राणां संग्रहरूपेण ब्राह्मणवाक्येन प्रतिज्ञां दर्शयति—

अथ वायोरेकादशपुरुषस्यैकादशस्त्रीकस्य, इति ।

एक एव वायुः प्रभ्राजमानाद्येकादशरुद्रमूर्तिरूपेण प्रभ्राजमान्याद्येकादशस्त्रीमूर्तिरूपेणाप्यवतीर्णः, तस्य संबन्धिनो मन्त्रा उच्यन्त इति शेषः ।

तान्मन्त्रान्दर्शयति—

प्रभ्राजमानानाꣳ रुद्राणाꣳ स्थाने स्वतेजसा भानि । व्यवदातानाꣳ रुद्राणाꣳ स्थाने स्वतेजसा भानि । वासुकिवैद्युतानाꣳ रुद्राणाꣳ स्थाने स्वतेजसा भानि । रजतानाꣳ रुद्राणाꣳ स्थाने स्वतेजसा भानि । परुषाणाꣳ रुद्राणाꣳ स्थाने स्वतेजसा भानि । श्यामानाꣳ रुद्राणाꣳ स्थाने स्वतेजसा भानि । कपिलानाꣳ रुद्राणाꣳ स्थाने स्वतेजसा भानि । अतिलोहितानाꣳ रुद्राणाꣳ स्थाने स्वतेजसा भानि । ऊर्ध्वानाꣳ रुद्राणाꣳ स्थाने स्वतेजसा भानि (१) । अवपतन्तानाꣳ रुद्राणाꣳ स्थाने स्वतेजसा भानि । वैद्युतानाꣳ रुद्राणाꣳ स्थाने स्वतेजसा भानि । प्रभ्राजमानीनाꣳ रुद्राणीनाꣳ स्थाने स्वतेजसा भानि । व्यवदातीनाꣳ रुद्राणीनाꣳ स्थाने स्वतेजसा भानि । वासुकिवैद्युतीनाꣳ रुद्राणीनाꣳ स्थाने स्वतेजसा भानि । रजतानाꣳ रुद्राणीनाꣳ स्थाने स्वतेजसा भानि । परुषाणाꣳ रुद्राणीनाꣳ स्थाने स्वतेजसा भानि । श्यामानाꣳ रुद्राणीनाꣳ स्थाने स्वतेजसा भानि । कपिलानाꣳ रुद्राणीनाꣳ स्थाने स्वतेजसा भानि । अतिलोहिती-

नाꣳ रुद्राणीनाꣳ स्थाने स्वतेजसा भानि। ऊर्ध्वानाꣳ
रुद्राणीनाꣳ स्थाने स्वतेजसा भानि। अवपतन्तीनाꣳ
रुद्राणीनाꣳ स्थाने स्वतेजसा भानि। वैद्युतीनाꣳ रुद्रा-
णीनाꣳ स्थाने स्वतेजसा भानि। ओं भूर्भुवः स्वः।
रूपाणि वो मिथुनं मा नो मिथुनꣳ रीद्वम् (२), इति।
ऊर्ध्वानाꣳ रुद्राणाꣳ स्थाने स्वतेजसा भान्यतिलोहितीनाꣳ
रुद्राणीनाꣳ स्थाने स्वतेजसा भानि पञ्च च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके प्रथमप्रपाठके
सप्तदशोऽनुवाकः ॥ १७ ॥

प्रभ्राजमाननामको वायुसंबन्धी यो रुद्रविशेषस्तस्य बहवो मूर्तिविशेषाः। अतः प्रभ्राजमानानामिति बहुवचनम्। एवं सर्वत्र द्रष्टव्यम्। **रूपाणि** स्त्रीपुरुषविशेषाः, हे **रूपाणि वो** युष्माकं संबन्धि यन्मिथुनं तत्प्रसादादस्मदीयमपि **मिथुनमहिंसितं** भवतु। अयं च सर्वमन्त्रशेषः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयारण्यकभाष्ये प्रथमप्रपाठके सप्तदशोऽनुवाकः ॥ १७ ॥

अथ प्रथमेऽष्टादशोऽनुवाकः।

कल्पः—"अग्नेः पूर्वदिश्यस्येत्यष्टौ दिश्याः" इति। तत्र संग्रहरूपेण ब्राह्मण-वाक्येन मन्त्रान्प्रतिजानीते—

अथाग्नेरष्टपुरुषस्य, इति।

अग्निजातवेदःप्रभृतयः पुरुषा मूर्तिविशेषा यस्याग्नेः सन्ति सोऽयमष्टपुरुषः, तस्याग्नेः संबन्धिनो मन्त्राः पूर्वोक्तवायुसंबन्धिद्विविधैकादशरुद्रमन्त्रानन्तरमुच्यन्ते।

तान्मन्त्रान्दर्शयति—

**अग्नेः पूर्वदिश्यस्य स्थाने स्वतेजसा भानि। जातवेदस उपादि-
श्यस्य स्थाने स्वतेजसा भानि। सहोजसो दक्षिणदिश्यस्य**

१ ख. ग. °द्ररुद्राण्यन°।

स्थाने स्वतेजसा भानि । आजिरप्रभव उपदिश्यस्य स्थाने स्वतेजसा भानि । वैश्वानरस्यापरादिश्यस्य स्थाने स्वतेजसा भानि । नर्यापस उपदिश्यस्य स्थाने स्वतेजसा भानि । पङ्क्तिराधस उदग्दिश्यस्य स्थाने स्वतेजसा भानि । विसर्पिण उपादिश्यस्य स्थाने स्वतेजसा भानि । ओं भूर्भुवः स्वः । दिशो वो मिथुनं मा नो मिथुनꣳ रीढ्वम् (१), इति ॥

स्वरेकं च ॥

+एतद्रश्मय आपो रूपाणि दिशः पञ्च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके प्रथमप्रपाठकेऽष्टादशोऽनुवाकः ॥ १८ ॥

पूर्वा दिक्प्राची तस्यां भवः पूर्वादिश्यः, तथाविधोऽग्निनामको यो मूर्तिविशेषस्तस्य स्थाने तिष्ठन्नहं तत्प्रसादाल्लब्धेन स्वतेजसा भासमानो भूयासम् । उपदिगाग्नेयी तस्यां भव उपदिश्यो जातवेदोनामकः । एवं सर्वत्र योज्यम् । हे दिशो वो युष्माकमग्निना स्वामिना सहोपकार्योपकारकभावः । अतो युष्मत्प्रसादेनास्मदीयं मिथुनमहिंसितं भवतु । सोऽयं सर्वमन्त्रशेषः । अथवा, ओमित्यादिः सर्वत्र यजमानाभिमन्त्रणमन्त्रो द्रष्टव्यः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये प्रथमप्रपाठकेऽष्टादशोऽनुवाकः ॥ १८ ॥

अथ प्रथम एकोनविंशोऽनुवाकः ।

कल्पः—" दक्षिणपूर्वस्यामिति चतस्रो नरकवतीर्यथालिङ्गम् " इति । तत्र प्रथमं मन्त्रमाह—

दक्षिणपूर्वस्यां दिशि विसर्पी नरकः । तस्मान्नः परिपाहि, इति ।

दक्षिणस्याः पूर्वस्याश्चान्तरालवर्तिनी दिगाग्नेयी तस्यां विसर्पिनामको नरको विद्यते, इष्टके तस्मान्नरकान्नोऽस्मान्परिपाहि ।

+ चतुर्दशानुवाकमारभ्यैतदनुवाकसमाप्तिपर्यन्तमुक्तपर्यायगणनाय तत्तत्पर्यायान्तिमवाक्योपदानां सूचनमेतत् । एतच्च क. ग. पुस्तकयोर्नास्ति ।

अथ द्वितीयमाह[1]—

दक्षिणापरस्यां दिश्यविसर्पी नरकः । तस्मान्नः परिपाहि, इति ।

नैर्ऋती दक्षिणापरा तस्यामविसर्पी नाम नरकः । पूर्वत्र वेदनातिशयाद्विविधमितस्ततः सर्पन्ति जन्तवो यत्रेति व्युत्पत्त्या विसर्पी, इह तु दुःखस्यात्यन्तमाधिक्याद्विसर्पितुमपि न क्षमन्ते तस्मादविसर्पी । शेषं पूर्ववत् ।

अथ तृतीयमाह[2]—

उत्तरपूर्वस्यां दिशि विषादी नरकः । तस्मान्नः परिपाहि, इति ।

ऐशानी दिगुत्तरपूर्वा, तत्र हि विषादिसंज्ञको नरकः किमर्थमस्माभिः पापं कृतमिति जन्तवो विषादं कुर्वन्ति तस्मादयं विषादी । अन्यत्पूर्ववत् ।

अथ चतुर्थमाह[3]—

उत्तरापरस्यां दिश्यविषादी नरकः । तस्मान्नः परिपाहि, इति ।

वायवी दिगुत्तरापरा तत्राविषादी नरकः, दुःखातिशयाज्जन्तवो विषादमपि कर्तुं न क्षमन्ते तस्मादविषादी । शेषं पूर्ववत् ।

कल्पः—"आ यस्मिन्निन्द्रियाणि शतक्रतविति द्वे" इति । तयोर्मन्त्रयोः प्रतीके दर्शयति—

आ यस्मिन्सप्त वासवा इन्द्रियाणि शतक्रतवित्येते (१), इति ।

दक्षिणपूर्वस्यां नवं ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके प्रथमप्रपाठक एकोनविंशोऽनुवाकः ॥ १९ ॥

इत्येते ये ऋचौ ताभ्यामिष्टके उपदध्यादित्यर्थः । एतच्चोभयमिन्द्रं वो विश्वतस्परीत्यनुवाके व्याख्यातम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये प्रथमप्रपाठक एकोनविंशोऽनुवाकः ॥ १९ ॥

अथ प्रथमे विंशोऽनुवाकः ।

कल्पः—"इन्द्रघोषा वः संज्ञानमिति षड्दिश्याः" इति । पाठस्तु—

इन्द्रघोषा वो वसुभिः पुरस्तादुपदधताम् । मनोजवसो वः पितृ-

---

१ क. ख. °तीयामा° । २ ग. क्षमते । ३ क. °तीयामा° । ४ ख. °तुर्थीमा° ।

भिर्दक्षिणत उपदधताम् । प्रचेता वो रुद्रैः पश्चादुपदधताम् । विश्वकर्मा व आदित्यैरुत्तरत उपदधताम् । त्वष्टा वो रूपै-रुपरिष्टादुपदधताम् । संज्ञानं वः पश्चादिति, इति ।

हेऽब्रूपा इष्टका वो युष्मान्पुरस्तान्पूर्वस्यां दिशि वसुभिर्देवैः सहिता इन्द्रघोष-नामका देवा उपदधताम् । पितृभिः सहिता मनोजवसो देवा वो युष्मान्दक्षिणस्यां दिश्युपदधताम् । एवं सर्वत्र योज्यम् । संज्ञानं समीचीनज्ञानयुक्तं देवतास्वरूपं वो युष्मान्पश्चात्, उपदधतामिति शेषस्य सूचनार्थं इतिशब्दः प्रयुक्तः । त एते षण्मन्त्राः ।

कल्पः—"आदित्यः सर्व इति पञ्च दिश्याः" इति । पाठस्तु—

आदित्यः सर्वोऽग्निः पृथिव्याम् । वायुरन्तरिक्षे । सूर्यो दिवि । चन्द्रमा दिक्षु । नक्षत्राणि स्वलोके, इति ।

आदित्यात्मकः सर्वोऽप्यग्निः पृथिव्यामुपदधातु । एवं वाय्वादिषु योज्यम् ।

कल्पः—"एवा ह्येवेति षड्दिश्याः" इति । पाठस्तु—

एवा ह्येव । एवा ह्यग्ने । एवा हि वायो । एवा हीन्द्र । एवा हि पूषन् । एवा हि देवाः (१), इति ।

दिक्षु, सप्त च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके प्रथमप्रपाठके विंशोऽनुवाकः ॥ २० ॥

ई गताविति धातोरुत्पन्न एवशब्दः, हे एव, अयनशीलाऽऽदित्य, एवा एतव्याः प्राप्तव्याः कामास्ते सर्वे त्वमसीति शेषः । हिशब्देनाऽऽदित्यस्य सर्वकामहेतुत्वप्रसिद्धि-रुच्यते । एवमुत्तरत्रापि योज्यम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरी-यारण्यकभाष्ये प्रथमप्रपाठके विंशोऽनुवाकः ॥ २० ॥

---

१ ख. ग. °दधातीति ।

अथ प्रथम एकविंशोऽनुवाकः ।

कल्पः—" आपमापामिति नवोपरिष्टात् " इति । पाठस्तु—

आपमापामपः सर्वाः । अस्मादस्मादितोऽमुतः । अग्निर्वायुश्च सूर्यश्च । सह संचस्करद्भिया । वाय्वश्वा रश्मिपतयः । मरीच्यात्मानो अद्रुहः । देवीर्भुवनसूवरीः । पुत्रवत्त्वाय मे सुत । महानाम्नीर्महामानाः । महसो महसः स्वः (१) । देवीः पर्जन्यसूवरीः । पुत्रवत्त्वाय मे सुत । +अपाश्चुष्णिमपा रक्षः । अपाश्चुष्णिमपा रघम् । अपाघ्रामपं चावतिम् । अप देवीरितो हित । वज्रं देवीरजीताश्च । भुवनं देवसूवरीः । आदित्यानदितिं देवीम् । योनिनोर्ध्वमुदीषत (२) । भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिः । व्यशेम देवहितं यदायुः । स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु । केतवो अरुणासश्च । ऋषयो वातरशनाः । प्रतिष्ठाꣳ शतधा हि । समाहितासो सहस्रधायसम् । शिवा नः शंतमा भवन्तु । दिव्या आप ओषधयः । सुमृडीका सरस्वति । मा ते व्योम संदृशि (३) । इति ।

स्वरुदीषत वातरशनाः षट् च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके प्रथमप्रपाठक एकविंशोऽनुवाकः ॥ २१ ॥

अत्र केतव इति मन्त्रं विहायान्येऽष्टौ मन्त्राः प्रथमानुवाके व्याख्याताः । पुनरप्युपधानार्थं मन्त्रपाठः । केत्वरुणवातरशनशब्दा ऋषिसंघानाचक्षते । ते सर्वेऽपि ऋषिसंघाः

+ यकाररहितः पाठो वैदिकानाम् । एवं प्रथमानुवाकेऽपि बोध्यम् । भाष्यात्तु यकारसहितः पाठ इति भाति । यकारसहितः पाठः प्रथमानुवाके ग. पुस्तके दिश्यते

समाहितासोऽप्रमत्ताः सन्तः, **शतधा** हि शतसंख्याकेनापि प्रकारेण **प्रतिष्ठां स्थैर्यहेतुं सहस्रधायसं** सहस्रसंख्याकस्य फलस्य धारयित्रीम्, इष्टकामुपदधत्विति शेषः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये प्रथमप्रपाठक एकविंशोऽनुवाकः ॥ २१ ॥

अथ प्रथमे द्वाविंशोऽनुवाकः ।

एतावत्स्वनुवाकेषूपधानमन्त्राः प्रायेणाभिहिताः, अतः परमिष्टकानां ब्राह्मणमुच्यते । तत्राऽऽदौ तावदापो बहुधा प्रशस्यन्ते । तत्र प्रथमां प्रशंसामाह—

योऽपां पुष्पं वेद । पुष्पवान्प्रजावान्पशुमान्भवति । चन्द्रमा वा अपां पुष्पम् । पुष्पवान्प्रजावान्पशुमान्भवति । य एवं वेद, इति ।

अमृतमयं हि चन्द्रमण्डलम् । अतो जलकार्यत्वादपां पुष्पस्थानीयम् । एतस्य वेदिता स्वयं भोगार्थं चम्पकबकुलादिपुष्पैः पुत्रादिप्रजया गवादिपशुभिश्च समृद्धो भवति । वेदने प्ररोचनार्थमादौ फलकथनम्, उपसंहारार्थं पुनः कथनम् ।

अथ द्वितीयां प्रशंसामाह—

योऽपामायतनं वेद । आयतनवान्भवति । अग्निर्वा अपामायतनम् । आयतनवान्भवति । योऽग्नेरायतनं वेद (१) । आयतनवान्भवति । आपो वा अग्नेरायतनम् । आयतनवान्भवति । य एवं वेद, इति ।

सृष्टिश्रुतौ " अग्नेरापः " इत्यग्नेर्जलकारणत्वाभिधानादग्निरपामाश्रयः । अत्रापि प्ररोचनार्थमादौ फलकथनम्, उपसंहारार्थं पुनरप्यायतनवानित्यभिधानम् । तत्र य एवं वेदेत्यध्याहरणीयम् । महासृष्टावपामग्निकार्यत्वेऽपि ब्रह्माण्डाद्यवान्तरसृष्टौ " आपो वा इदमासन्सलिलमेव " इत्यादिवाक्येनापां सर्वकारणत्वाभिधानाद्ब्रह्माण्डान्तःपातिनोऽस्मदृदृश्यस्याग्नेर्जलकार्यत्वादपामग्न्याधारत्वम् । अत्रापि प्ररोचनार्थमुपसंहारार्थं द्विः फलकथनम् । सेयं जलाग्न्योः परस्परापाधारत्वोक्तिर्द्वितीया प्रशंसा । एवमुत्तरत्र द्रष्टव्यम् ।

---

१ क. ख. ग. °दथात्वि° । २ ख. ग. प्रशंस्यते । ३ क. ख. °थमप्र° । ४ ग. °गार्थच° । ५ ग. °बहुला° । ६ ख. ग. °लमा°वित्या° ।

अथ तृतीयां प्रशंसामाह—

योऽपामायतनं वेद । आयतनवान्भवति । वायुर्वा अपामायतनम् । आयतनवान्भवति । यो वायोरायतनं वेद । आयतनवान्भवति (२) । आपो वै वायोरायतनम् । आयतनवान्भवति । य एवं वेद, इति ।

महासृष्टौ " वायोरग्निः । अग्नेरापः " इति श्रुतेरग्निद्वारा वायोरप्कारणत्वादायतनत्वम् । अपां त्ववान्तरसृष्टौ पूर्वोक्तन्यायेन वाय्वाधारत्वम् । अन्यत्पूर्ववद्व्याख्येयम् ।

अथ चतुर्थीमाह—

योऽपामायतनं वेद । आयतनवान्भवति । असौ वै तपन्नपामायतनम् । आयतनवान्भवति । योऽमुष्य तपत आयतनं वेद । आयतनवान्भवति । आपो वा अमुष्य तपत आयतनम् (३) । आयतनवान्भवति । य एवं वेद, इति ।

योऽसावादित्यस्तपन्नुपलभ्यते सोऽयमपामाधारः । ' आदित्याज्जायते वृष्टिः ' इति जलकारणत्वस्मृतेः । अपां च पूर्ववदादित्याधारत्वं द्रष्टव्यम् ।

अथ पञ्चमीमाह—

योऽपामायतनं वेद । आयतनवान्भवति । चन्द्रमा वा अपामायतनम् । आयतनवान्भवति । यश्चन्द्रमस आयतनं वेद । आयतनवान्भवति । आपो वै चन्द्रमस आयतनम् । आयतनवान्भवति (४) । य एवं वेद, इति ।

तुहिनरूपाणां किरणानां चन्द्रजन्यत्वाच्चन्द्रमसो जलाधारत्वम् ।

अथ षष्ठीमाह—

योऽपामायतनं वेद । आयतनवान्भवति । नक्षत्राणि वा अपामायतनम् । आयतनवान्भवति । यो नक्षत्राणामायतनं वेद । आयतनवान्भवति । आपो वै नक्षत्राणामायतनम् । आयतनवान्भवति । य एवं वेद (५), इति ।

पुष्याश्लेषादिषु महानक्षत्रेषु वर्तमानेषु वृष्ट्याधिक्यदर्शनान्नक्षत्राणामप्याधारत्वम् ।

अथ सप्तमीमाह—

योऽपामायतनं वेद। आयतनवान्भवति। पर्जन्यो वा अपामायतनम्। आयतनवान्भवति। यः पर्जन्यस्याऽऽयतनं वेद। आयतनवान्भवति। आपो वै पर्जन्यस्याऽऽयतनम्। आयतनवान्भवति। य एवं वेद, इति।

वृष्टिद्वारा पर्जन्याख्यस्य मेघस्य जलाधारत्वं प्रसिद्धम्।

अथाष्टमीमाह—

योऽपामायतनं वेद (६)। आयतनवान्भवति। संवत्सरो वा अपामायतनम्। आयतनवान्भवति। यः संवत्सरस्याऽऽयतनं वेद। आयतनवान्भवति। आपो वै संवत्सरस्याऽऽयतनम्। आयतनवान्भवति। य एवं वेद, इति।

वर्षर्तुद्वारा संवत्सरस्य जलाधारत्वम्।

अथ नवमीमाह—

योऽप्सु नावं प्रतिष्ठितां वेद। प्रत्येव तिष्ठति (७)। इमे वै लोका अप्सु प्रतिष्ठिताः। तदेषाऽभ्यनूक्ता, इति।

यः पुमानप्सु प्रतिष्ठितां स्थैर्येणावस्थितां नावं वेद स स्वयं लोके प्रतिष्ठायुक्तो भवति। काऽसौ प्रतिष्ठिता नौरिति सेयमुच्यते—इमे वै दृश्यमाना एव भूरादयो लोका अप्सु स्थैर्येणावस्थिता नौस्थानीयाः। अतः सर्वलोकाधारभूता आप इति वेदनेन प्रतिष्ठाप्राप्तिः। नद्यादिषु परतीरगमनाय जनैर्या नौः संपाद्यते सा जले प्रतिष्ठिता न भवति। गमनागमनाभ्यां चञ्चलत्वात्। सर्वलोकसंघरूपा तु नौर्न कदाचिदपि चलति किं त्वप्सु स्थैर्येणावतिष्ठते। आवरणसहितं ब्रह्माण्डं घनोदाख्ये महाजलेऽवतिष्ठत इति हि पौराणिकप्रसिद्धिः। तत्तस्मिन्सर्वजगदाधारभूता आप इत्येवंरूपेऽर्थे काचिद्गभ्यनूक्ता शाखान्तरे समाम्नाता।

तामेतामृचं दर्शयति—

अपाꣳ रसमुदयꣳसत। सूर्ये शुक्रꣳ समाभृतम्।
अपाꣳ रसस्य यो रसः। तं वो गृह्णाम्युत्तममिति, इति।

---

१ ख. °ति। प°। २ ख. ग. °लिष्ठताप्रा°। ३ ख. ग. सर्वलो। ४ ख. ग. °म्नातत्ता°।

योऽयमपां रसः सारस्तं रसमभिलक्ष्योदयंसन्सर्वे लोका उद्भृताः । तस्मादेव रसादुत्पद्यन्तेऽस्मिन्नेवावतिष्ठन्त इत्यर्थः । कीदृशं रसम्, सूर्य आदित्यमण्डले वृष्टिजननाय समाभृतं संपादितम्, अत एव शुक्रं निर्मलम् । अपां रसस्य त्रैलोक्यरूपस्योदकसारस्य तदु(य उ)त्तमो रसः सोमरूपः, हे, आपो युष्मदीयं तमुत्तमं रसं गृह्णामि तेषु तेषु स्वी करोमि । इतिशब्दो मन्त्रसमाप्त्यर्थः । अनेन मन्त्रेण काचिदिष्टकोपधेया । तथाच बौधायन आह—"अपाꣳ रसमित्येका" इति ।

मन्त्रस्य तात्पर्यं दर्शयति—

इमे वै लोका अपाꣳ रसः । तेऽमुष्मिन्नादित्ये समाभृताः, इति ।

य एते पृथिव्यादयो लोकास्ते सर्वेऽप्यपां मध्ये सारभूताः सर्वलोकगर्भिताः । ब्रह्माण्डगोलकरूपा पृथिवी क्षीरमध्ये मण्डमिव जलमध्ये घनीभूता । तथाच वाजसनेयिन आमनन्ति—"यदपां शर आसीत्तत्समाहन्यत सा पृथिव्यभवत्" इति । ते चोदकसारभूता लोका अमुष्मिन्दृश्यमान आदित्यमण्डले समाभृताः सम्यगाश्रिताः । आदित्यस्य वृष्टिद्वारेण सर्वलोकस्थितिहेतुत्वात् ।

तदेवं योऽपां पुष्पमित्यारभ्यामुष्मिन्नादित्ये समाभृता इत्यन्तेन ग्रन्थेनेष्टकोपधानार्थमपां बहुधा प्रशंसा कृता । अथ प्रयोगं विधत्ते—

जानुदघ्नीमुत्तरवेदीं खात्वा । अपां पूरयित्वा गुल्फदघ्नꣳ ।
(८) । पुष्करपर्णैः पुष्करदण्डैः पुष्करैश्च सꣳस्तीर्य ।
तस्मिन्विहायसे । अग्निं प्रणीयोपसमाधाय, इति ।

तत्र सावित्रचयनवद्रथचक्रं परिलिख्य तत्र जानुप्रमाणामुत्तरवेदीं खात्वा तां खातामुत्तरवेदीं गुल्फदघ्नं यथा भवति तथा जलैः पूरयित्वा तज्जलमादौ पद्मपत्रैः संछाद्य तत उपरि पत्ररहितैः केवलैः पद्मदण्डैः संछाद्य ततोऽप्युपरि मूलदण्डपत्रसहितैः कृत्स्नैः पद्मैः संछाद्य तस्मिन्विहायसे तत्र स्थापितस्य मञ्चकस्योपरि कर्मानुगुणमग्नेः प्रणयनं कृत्वा तं चाग्निमुपसमाधाय तस्याग्नेः परित इष्टका उपदध्यादिति वक्ष्यमाणेनान्वयः ।

अथाऽऽक्षेपसमाधानाभ्यां तामिमं प्रयोगं समर्थयते—

ब्रह्मवादिनो वदन्ति । कस्मात्प्रणीतेऽयमग्निश्चीयते ।
साप्रणीतेऽयमप्सु ह्ययं चीयते । असौ भुवनेऽप्यना-

---

१ ख. °घतेऽस्मि° ; २ ख. ग. °ष्ठत इ° । ३ क °त्समह° । ४ ग. अ°पू° । ५ ख. ग. तत्तस्यापि त° ।

हिताग्निरेताः। तमभित एता अबीष्टका उपदधाति, इति।

अग्न्यन्तरेभ्योऽस्य वैलक्षण्यं दर्शयितुं **ब्रह्मवादिनोऽत्र** पर्यनुयोगमाहुः। इतरत्र हि चयने संपूर्णे सति पश्चादग्निः प्रणीयते, अत्र तु कस्मात्कारणान्मञ्चकस्योपरि वह्नौ प्रणीते सति पश्चादिष्टकाभिरयमारुणकेतुकोऽग्निश्चीयते * मञ्चकं तु **बौधायनेन** दर्शितम्,—"दीर्घदोरुभिर्मञ्चकं कृत्वा पृष्टो दिवीति पुरीषव्यूहनम्" इति। अतोऽस्य मञ्चकस्योपर्याकाशेऽग्निप्रणयनादूर्ध्वं पुनरिष्टकोपधानमितरचयनाद्वैलक्षण्यादयुक्तमिति ब्रह्मवादिनामाक्षेपाभिप्रायः। तस्याऽऽक्षेपस्योत्तरं साप्प्रणीत इत्यादिनोच्यते। अद्भिः सह वर्तत इति साप्, यस्मादयं जलसहितस्तस्मादयमिष्टकाचयनरूपोऽग्निरङ्गाररूपे वह्नौ प्रणीते सति पश्चाच्चेतव्यः। अप्सु ह्ययं चीयत इत्यनेन जलसहितत्वमेव स्पष्टी क्रियते। आदावुत्तरवेद्यामद्भिः पूरणम्, ततः पुष्करपर्णादिसंछादनम्, ततो मञ्चकस्योपरि वह्निप्रणयनम्, एवं सत्यप्स्वेवायं प्रणीतो भवति। इतरस्त्वग्निर्नाप्सु प्रणीयते तस्मादितरवैलक्षण्यात्प्रणयनादूर्ध्वमबीष्टकोपधानं कर्तव्यम्। पश्चात्प्रणयने सत्यसावग्निः परितो रक्षकाभावेन **भुवने** देवयजनाद्बहिर्भूते लोकेऽपि गत्वाऽनाहिताग्निः सन्नेता गमिष्यति। इतराग्नयो जलभयाभावाद्देवयजन एव तिष्ठन्ति, अयं तु जलाद्भीतः सन्बहिरपि गमिष्यति। **एता** इति शब्दो लुडन्तो गमिष्यतीत्यस्मिन्नर्थे वर्तते। अतो बहिर्गमनं मा भूदित्येवमर्थं तं प्रणीतमग्निमभितः सर्वतो रक्षार्थमेता **अबीष्टका** उपदध्यात्। तदेवमाक्षेपसमाधानाभ्यामग्निं प्रणीयोपसमाधाय तमभित एता अबीष्टका उपदधातीत्ययमर्थ उपपादितः।

अथायमारुणकेतुकोऽग्निः कस्मिन्कर्मण्यङ्गभूत इत्याकाङ्क्षायामङ्गीनि कर्माणि दर्शयति—

अग्निहोत्रे दर्शपूर्णमासयोः। पशुबन्धे चातुर्मास्येषु।
(९)। अथो आहुः। सर्वेषु यज्ञक्रतुष्विति, इति।

अग्निहोत्रादिविषयत्वेन संकोचो मा भूदिति सोमयागविषयत्वमप्यभिप्रेत्य पक्षान्तरोपन्यासः।

अथ प्रश्नोत्तरपर्यायैः सप्तभिरारुणकेतुकस्याग्नेरधिकफलत्वं वक्तुं प्रथमं प्रश्नोत्तरपर्यायं दर्शयति—

एतद्ध स्म वा आहुः शाण्डिलाः। कमग्निं चिनुते।

---

* नपुंसकत्वं चिन्त्यम्।

---

१ ख. ग. °दा उत्तिर्मञ्चं कृ°। २ क. °यनवे°। ३ क. °लसाहित्यमे°। ४ ख. ग. °त्यग्निधानाभावे स°। ५ ख. ग. °नेवाऽऽग°। ६ ख. ग. शब्द उल्लङ्घ्य ग°। ७ क. रक्षणार्थं°।

सत्रियमग्निं चिन्वानः । संवत्सरं प्रत्यक्षेण, इति ।

शण्डिलो नाम कश्चिन्महर्षिस्तस्य वंशे समुत्पन्नाः सर्वे शण्डिलाः, ते[1] चैतदारुणकेतुकफलं निश्चेतुं परस्परमेवमाहुः स्म 'ह स्म वै' इति निपातत्रयस्याप्येक एवार्थः । तत्र कश्चिदेवं पृच्छति—सत्रियं सत्रे भवमग्निं यश्चिनुते सोऽयं कमग्निं किंफलमग्निं चिनुत इति । तत्राभिज्ञैरुत्तरमुच्यते—प्रत्यक्षेण मुख्यया वृत्त्या, संवत्सरं संवत्सरप्राप्तिफलकमग्निं चिनुत इत्युत्तरम् ।

अथ द्वितीयं पर्यायं दर्शयति—

कमग्निं चिनुते । सावित्रमग्निं चिन्वानः । अमुमादित्यं प्रत्यक्षेण, इति ।

अनुपचारेणाऽऽदित्यप्राप्तिफलकः सावित्रोऽग्निः ।

तृतीयं पर्यायं दर्शयति—

कमग्निं चिनुते । (१०)। नाचिकेतमग्निं चिन्वानः । प्राणान्प्रत्यक्षेण, इति ।

यथा सावित्रस्याऽऽदित्यरूपत्वम् " एष वाव सावित्रो य एष तपति " इति श्रुत्याऽवगतम्, एवम् "अयं वाव यः पवते सोऽग्निर्नाचिकेतः" इति श्रुत्या नाचिकेतस्य वायुरूपत्वावगमात्तच्चयनेन वायुरूपप्राणप्राप्तिः ।

चतुर्थं पर्यायं दर्शयति—

कमग्निं चिनुते । चातुर्होत्रियमग्निं चिन्वानः । ब्रह्म प्रत्यक्षेण, इति ।

'ब्रह्म वै चतुर्होतारः' इत्युक्तत्वाद्ब्रह्मप्राप्तिः । ब्रह्मशब्देन वेदपुरुष उच्यते ।

पञ्चमं पर्यायं दर्शयति—

कमग्निं चिनुते । वैश्वसृजमग्निं चिन्वानः । शरीरं प्रत्यक्षेण, इति ।

शरीरं हिरण्यगर्भस्य देहम् ।

षष्ठं पर्यायं दर्शयति—

कमग्निं चिनुते । उपानुवाक्यमाशुमग्निं चिन्वानः । (११)। इमाँल्लोकान्प्रत्यक्षेण, इति ।

'यदेकेन सꣳस्थापयति' इत्यादिकमुपानुवाक्यकाण्डं तत्र प्रोक्तोऽग्निरप्युपानुवाक्यः स चाऽऽशुः शीघ्रं(घ्रो) महानित्यर्थः । अत एव तच्चयनेन सर्वलोकप्राप्तिः ।

---

१ ख. ग. ते वै तं° । २ क. °ग्निं चि° । ३ क. °पचरे° । ४ ख. ग. °वाक्याका° ।

सप्तमं पर्यायं दर्शयति—

कमग्निं चिनुते । इममारुणकेतुकमग्निं चिन्वान इति ।
य एवासौ । इतश्चामुतश्चाव्यतीपाती । तमिति, इति ।

इमं चामुं च लोकं व्यतीत्यातिक्रम्य हित्वा यो न गच्छति सोऽयमव्यतीपाती सूर्यः, तं सूर्यं प्राप्नोति । आद्य इतिशब्दः प्रश्नसमाप्त्यर्थः, द्वितीय उत्तरसमाप्त्यर्थः । आरुणकेतुकाग्नेरपां च संबन्धरूपो यो मिथुनीभावस्तद्वेदनं प्रशंसति—

योऽग्नेर्मिथूया वेद । मिथुनवान्भवति ।
आपो वा अग्नेर्मिथूयाः । मिथुनवा-
न्भवति । य एवं वेद (१२), इति ।
वेद भवत्यायतनमायतनवान्भवति वेद वेदं तिष्ठति
गुल्फदघ्नं चातुर्मास्येष्वमुमादित्यं प्रत्यक्षेण कमग्निं चिनुत
उपानुवाक्यमाशुमग्निं चिन्वानो मिथूया मिथुनवान्भव-
त्येकं च ॥[+पुष्पमग्निर्वायुरसौ वै तपन् चन्द्रमा नक्षत्राणि
पर्जन्यः संवत्सरस्तिष्ठति सत्रियꣳ संवत्सरꣳ सावित्रममुं
नाचिकेतं प्राणाꣳश्चातुर्होत्रियं ब्रह्म वैश्वसृजꣳशरीरमुपा-
नुवाक्यमाशुमिमाँल्लोकानिममारुणकेतुकं य एवासौ ॥]

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके प्रथमप्रपाठके
द्वाविंशोऽनुवाकः ॥ २२ ॥

मिथूया मिथुनगमनाः । मिथुनवान्मिथुनशक्तिमान् । वेदनफलस्य पुनर्वचनमुपसंहारार्थम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये प्रथमप्रपाठके द्वाविंशोऽनुवाकः ॥ २२ ॥

+ एतदादि य एवासावित्यन्तं क. ख. पुस्तकयोर्नास्ति ।

---

१ ख. ग. °मं च । २ ग. °द प्रत्येति° । ३ ग. °नो मिथु° । ४ घ. °नुकमग्निं चिन्वानो य । ५ क. मिथुनगमनम् ।

अथ प्रथमप्रपाठके त्रयोविंशोऽनुवाकः ।

अथास्मिन्नप्यनुवाके सृष्ट्युपन्यासमुखेनाऽऽरुणकेतुकमग्निं तदङ्गभूता अपश्च प्रशंसति। तत्र सृष्ट्यादौ कामोत्पत्तिं दर्शयति—

आपो वा इदमासन्त्सलिलमेव । स प्रजापतिरेकः पुष्करपर्णे समभवत् । तस्यान्तर्मनसि कामः समवर्तत । इदꣳसृजेयमिति । तस्माद्यत्पुरुषो मनसाऽभिगच्छति । तद्वाचा वदति । तत्कर्मणा करोति । तदेषाऽभ्यनूक्ता, इति ।

यदिदं जगदिदानीमस्माभिर्दृश्यते **तदिदमु**त्पत्तेः पूर्वमाप एवाऽऽसन्, न तु देवतिर्यङ्मनुष्यादिकं किंचिदपि भौतिकमासीत् । पृथिव्यादिभूतान्तरमपि वारयितुं **सलिलमेवे**त्युच्यते । तास्वप्सु मध्ये कस्मिंश्चित्**पुष्करपर्णे** जगदीश्वरः **स प्रजापतिः समभवत्**समग्राविर्भूयावस्थितः । **तस्य** प्रजापतेर्मनसोऽन्तर्मध्ये सर्वमिदं जगत्**सृजेयमि**त्येवं **काम** उदपद्यत । तस्मात्प्रजापतेर्वाक्शरीरप्रभृतिभ्यां पूर्वं सर्वप्रवृत्तिहेतुः कामो **मनस्या**विरभूत्**तस्मा**त्प्रजापतिसंततावुत्पन्नः सर्वः **पुरुष** इदं कार्यं करिष्यामीत्यादौ **मनसा** चिन्तयति **तत्त**थैव **वाचा** वदति **कर्मणा** शरीरव्यापारेणापि तथैव **करो**ति । **तत्त**स्मिन्कामस्य प्रथमोत्पत्तिलक्षणेऽर्थे काचिदृक्शाखान्तरेऽभ्यनूक्ता ।

तामेतामृचं दर्शयति—

कामस्तदग्रे सम्वर्तताधि । मनसो रेतः प्रथमं यदासीत् (१)।
सतो बन्धुमसति निरविन्दन् । हृदि प्रतीष्या कवयो मनीषेति, इति ।

तत्तदानीं सृष्टिकाले प्रजापतेः सकाशादग्रे प्रथमं **कामः** सर्वं सृजेयमित्यभिलाषः **अधि समवर्तता**ऽऽधिक्येन सम्यगुत्पन्नः । **यद्यदा मनसः प्रथमं रेतः** कार्यमासीत् । **तदे**ति पूर्वत्रान्वयः । पूर्वसृष्टौ लीनायामव्यक्ते जगत्कारणे स्रक्ष्यमाणप्राणिकर्मोद्भवे सति यदा प्रजापतेर्मानसं प्रथमं कार्यमुत्पन्नं तदा तत्कार्यं सृष्टिविषयेच्छारूपेण निष्पन्नमित्यर्थः । **मनीषा** मनस ईशितारः **कवयो** विद्वांसस्तत्तत्सृष्टिगताः प्रजापतयो **हृदि** स्वचित्ते **प्रतीष्य** प्रत्येकं निश्चित्य **सतो** विद्यमानस्य व्यक्तस्य जगतो **बन्धुं** बन्धकमुत्पत्तिहेतुं काममसत्यव्यक्ते कारणे **निरविन्द**न्निष्कृष्य लब्धवन्तः । न केवलमेतस्यामेव सृष्टौ किंतु सर्वास्वपि सृष्टिषु प्रवृत्ताः प्रजापतयः काममेव प्रथमं

---

१ ख. ग. °र्मनोमध्ये । २ ग. तद्विति ।

लभन्त इत्यर्थः। इतिशब्दो मन्त्रसमाप्तौ। अनेन मन्त्रेणैकामिष्टकामुपदध्यात्। तथा च बौधायन आह—'कामस्तदग्र इति संकल्पवतीम्' इति।

यथोक्तकाममाहात्म्यवेदनं प्रशंसति—

उपैनं तदुपनमति। यत्कामो भवति। य एवं वेद, इति।

यः पुमान्काममाहात्म्यं वेद स पुमान्यत्कामो यद्विषयकामनावान्भवति तद्वस्तु, एनं वेदितारमुपनमति प्राप्नोति। देशकालयोः सामीप्यविवक्षया द्वावुपशब्दावुक्तौ।

कामानन्तरभाविनीं सृष्टिं दर्शयति—

स तपोऽतप्यत। स तपस्तप्त्वा। शरीरमधूनुत। तस्य यन्मा॒-
समासीत्। ततोऽरुणाः केतवो वातरशना ऋषय उद॑-
तिष्ठन् (२)। ये नखाः। ते वैखानसाः। ये वालाः।
ते वालखिल्याः। यो रसः। सोऽपाम्, इति।

स प्रजापतिः सृष्टिं कामयित्वा तपः कृतवान्। नात्र तप उपवासादिरूपं किंतु स्रष्टव्यं वस्तु कीदृशमिति पर्यालोचनरूपम्। अत एवाऽऽथर्वणिका आमनन्ति—'यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः' इति। स प्रजापतिः, तपः पर्यालोचनरूपं कृत्वा स्रष्टव्यविशेषं निश्चित्य स्वकीयं शरीरमधूनुत कम्पितवान्। तस्य कम्पनस्य शरीरस्य यन्मांसमस्ति, तस्मान्मांसादरुणादिनामकास्त्रिविधा ऋषय उदपद्यन्त। प्रजापतेः सत्यसंकल्पत्वात्तत्संकल्पानुसारेण तत्तद्वस्तूत्पद्यते। तस्य शरीरस्य ये नखा आसंस्ते वैखानसनामका मुनयोऽभवन्। ये च शरीरे वालाः केशास्ते वालखिल्यनामका मुनयोऽभवन्। यः शरीरस्य रसः सारांशः सोऽपां मध्ये कश्चित्कूर्मोऽभूदिति शेषः।

तेन कूर्मेण सह प्रजापतेः संवादं दर्शयति—

अन्तरतः कूर्म भूत॒सर्पन्तम्। तमब्रवीत्। मम वै त्वञ्चा॒सा।
समभूत् (३)। नेत्यब्रवीत्। पूर्वमेवाहमिहाऽऽसमिति।
तत्पुरुषस्य पुरुषत्वम्। स सहस्रशीर्षा पुरुषः। सह-
स्राक्षः सहस्रपात्। भूत्वोदतिष्ठत्। तमब्रवीत्। त्वं वै
पूर्व॒ समभूः। त्वामिदं पूर्वः कुरुष्वेति, इति।

अन्तरतो जलस्य मध्ये कूर्माकारेण निष्पन्नं तत्रैव संचरन्तं तं पुरुषं प्रजापतिर-

१ क. 'सादारु'। २ क. ख. 'खिल्याना'। ३ ख. ग. 'षं स प्र'।

ब्रवीत्, हे कूर्म मम वै त्वङ्मा॰सा त्वचो मांसस्य च संबन्धिनो रसात्समभूत्त्वं समुत्पन्नोऽसीति। तदा स कूर्मो नेत्यब्रवीत्, यत्त्वयोक्तं तन्न त्वदीयशरीररसान्नाहमुत्पन्नः किंतु कूर्माकारं शरीरमेव निष्पन्नम्, अहं तु सर्वगतनित्यचैतन्यस्वरूपत्वात्पूर्वमेवेहास्मिन्स्थाने स्थितोऽस्मीत्येतत्कूर्मस्य वचनम्। यस्मात्पूर्वमासमित्युवाच तस्मात्पुरुष इति परमात्मनो नाम संपन्नम्। एवमुक्त्वा स कूर्मशरीरवर्ती परमात्मा स्वसामर्थ्यप्रकटनाय विराड्रूपं कृत्वा सहस्रसंख्याकैः शिरोभिरक्षिभिः पादैश्च युक्तो भूत्वा प्रादुरभूत्। तदानीं प्रजापतिस्तं विराड्रूपं दृष्ट्वा तत्रत्यं परमात्मानमेवमब्रवीत्। भोः परमात्मन्मच्छरीरात्पूर्वं त्वमेव सर्वदा विद्यमानोऽतो मत्तः पूर्वभावी संस्त्वमेवेदं सर्वं जगत्कुरुष्वेति।

तेन प्रजापतिनैवमुक्तस्य परमेश्वरस्य सृष्टिप्रकारं दर्शयति—

स इत आदायापः (४)। अञ्जलिना पुरस्तादुपादधात्। एवा ह्येवेति। तत आदित्य उदतिष्ठत्। सा प्राची दिक्, इति।

स परमेश्वरः स्वयमारुणकेतुकरूपः सन्नितः सृष्टेरपि पूर्वसिद्धात्सलिलमेवाऽऽसीदित्युक्तान्महाजलात्किंयतीरपः स्वकीयेनाञ्जलिना समादाय पूर्वस्यां दिशि तामवीष्टकामुपधत्तवान्। केन मन्त्रेण, एवा ह्येवेति, अनेन मन्त्रेण। तस्य मन्त्रस्याऽऽदित्यपरत्वं पूर्वमेव दर्शितम्। ततः समन्त्रकोपधानादादित्य उत्पन्नः। स यस्यां दिश्युत्पन्नः सा प्राची दिगभूत्।

अनेन प्रकारेण क्रमात्सर्वदिगुत्पत्तिं दर्शयति—

अथाऽऽरुणः केतुर्दक्षिणत उपादधात्। एवा ह्यग्न इति। ततो वा अग्निरुदतिष्ठत्। सा दक्षिणा दिक्। अथाऽऽरुणः केतुः पश्चादुपादधात्। एवा हि वायो इति। (५)। ततो वायुरुदतिष्ठत्। सा प्रतीची दिक्। अथाऽऽरुणः केतुरुत्तरत उपादधात्। एवा हीन्द्रेति। ततो वा इन्द्र उदतिष्ठत्। सोदीची दिक्। अथाऽऽरुणः केतुर्मध्य उपादधात्। एवा हि पूषन्निति। ततो वै पूषोदतिष्ठत्। सेयं दिक्। (६)। अथाऽऽरुणः केतुरुप-

---

१ क ग. °हेवाहमस्मि°। २ क. ख. ग. °रक्षभिः।

रिष्टादुपादधात्। एवा हि देवा इति। ततो देवमनुष्याः पितरः। गन्धर्वाप्सरसश्चोदतिष्ठन्। सोर्ध्वा दिक्, इति।

एतेषु मन्त्रेषु एवा एतस्याः प्राक्तन्याः कामाः। हिशब्दः प्रसिद्धौ। सर्वेषां देवानां कामप्रदत्वेन तत्कामरूपत्वं प्रसिद्धमिति पूर्वं व्याख्यातम्। एवाहीतिशब्द आगच्छेत्येतस्मिन्नर्थे वा व्याख्येयः। सेयमित्यधोदिगुच्यते। अन्यत्पूर्ववद्व्याख्येयम्।

देवसृष्टिमभिधायासुरसृष्टिं दर्शयति—

या विप्रुषो वि परापतन्। ताभ्योऽसुरा रक्षाꣳसि पिशाचाश्चोदतिष्ठन्। तस्मात्ते परा-भवन्। विप्रुड्भ्यो हि ते समभवन्, इति।

अञ्जलिनोपधीयमानानामपां संबन्धिन्यो या विप्रुषो बिन्दवो विविधा भूत्वा तस्मादुपधानप्रदेशाद्बहिः परापतंस्ताभ्यो विप्रुड्भ्योऽसुरादय उत्पन्नाः। ते चावान्तर ज्ञातिभेदात्त्रिविधाः। यस्मात्ते पराभवन्तीभ्यो विप्रुड्भ्य उत्पन्नास्तस्मात्पराभूताः, अधमाः सन्तो विनष्टा इत्यर्थः।

अपां सकाशाद्येयं सृष्टिः प्रपञ्चिता, तस्याः संग्रहरूपामृचमवतारयति—

तदेषाऽभ्यनूक्ता (७) इति।

तत्तस्मिन्नद्भ्यः सर्वं समुत्पन्नमित्यस्मिन्नर्थे काचिदियमृक्शाखान्तरेऽभ्यनूक्ता। तामेतामृचं दर्शयति—

आपो ह यद्बृहतीर्गर्भमायन्। दक्षं दधाना जनयन्तीः स्वयꣳभुम्। ततः समभवत्। तत इमेऽध्यसृज्यन्त सर्गाः। अद्भ्यो वा इदꣳ समभूत्। तस्मादिदꣳ सर्वं ब्रह्म स्वयंभ्वितिं, इति।

अत्राद्भ्यो वा इति वाक्यं ब्राह्मणरूपमपि तृतीयपादतात्पर्यप्रदर्शनाय मन्त्रमध्ये समाम्नातम्। बृहतीः प्रौढा आपो यं गर्भं जाग्रद्भूमायन्प्राप्तवत्यः। कीदृश्य आपः। दक्षं वृद्धिशीलं गर्भं दधाना धारयन्त्यः, स्वयंभुं कूर्मरूपं परमात्मानं जनयन्तीर्जनयितुकामाः, ततस्तस्माद्विराड्रूपादपां गर्भादिमे भूरादयः सर्गाः सृज्यमाना लोका अध्यसृज्यन्त, सृष्ट्यर्हानेतान्सृष्टवानित्यर्थः। अद्भ्य एवेदं सर्वं जगद्भुत्पन्नमिति कृत्वा पादत्रयेणोक्तोऽर्थो युक्त एव। यस्मात्कारणात्कूर्मरूपं ब्रह्मैव सर्वं सृष्टवांस्तस्मात्कारणादिदं सर्वं जगत्स्वयंभु स्वतःसिद्धं ब्रह्मैव। इति अनेन मन्त्रेणैकामिष्टकामुपदध्यात्। तथाच बौधायन आह—"आपो ह यदित्योघवतीम्" इति।

कार्यत्वं जगतो युक्त्योपपादयति—

तस्मादिदꣳ सर्वꣳ शिथिलमिवाध्रुवमिवाभवत्, इति ।

यस्माच्छिथिलाभ्योऽद्भ्यो जातम्, आपो हि शिथिला न तु पाषाणवद्दृढाः, **तस्मात्कारणादिदं सर्वं** जगच्छिथिलमिव दृश्यते । तस्यैव व्याख्यानमध्रुवमिवेति । अनित्यत्वमध्रुवत्वम् ।

अथास्य जगतो दार्ढ्योपायं दर्शयति—

प्रजापतिर्वाव तत् । आत्मनाऽऽत्मानं
विधायं । तदेवानुप्राविशत्, इति ।

केवलकार्यत्वे समुत्पन्नं शिथिलं भवेन्न तु तदस्ति । किंतु **तज्जगत्प्रजापतिरेव** । यथा घटे मृदंशः पृथुबुध्नोदराकारांशश्चेत्यंशद्वयमेवं जगत्यपि सच्चिदानन्दरूपप्रजापत्यंशो नामरूपांशश्चेत्यंशद्वयम्, तत्र नामरूपयोरेव कार्यत्वेन शैथिल्येऽपि सच्चिदानन्दप्रजापत्यंशस्य दार्ढ्यमस्ति । स हि प्रजापतिरात्मना साधनान्तरनिरपेक्षेण स्वसामर्थ्येनाऽऽत्मानं स्वस्वरूपं जगदाकारेण **विधाय** तदेव जगदनुसृत्य शरीरेषु स्वयं चिद्रूपेण **प्राविशत्** ।

अस्मिन्नर्थे ऋचमुदाहरति—

तदेषाऽभ्यनूक्ता (८), इति ।

तत्तस्मिन्स्वयमेव सृष्ट्वा प्रविष्ट इत्यस्मिन्नर्थे काचिदेकशाखान्तरेऽभ्यनूक्ता ।

तामेतामृचं दर्शयति—

विधायं लोकान्विधायं भूतानि । विधाय सर्वाः
प्रदिशो दिशश्च । प्रजापतिः प्रथमजा
ऋतस्यं । आत्मनाऽऽत्मानमभिसंविवेशेति, इति ।

ऋतस्य सत्यस्य परब्रह्मणः सकाशात्प्रथममुत्पन्नः **प्रजापतिर्लोकान्भूरादीन्विधाय** भूतानि प्राणिनश्च विधाय प्राच्याद्या मुख्यादिश आग्नेय्याद्या विदिशश्च **विधायाऽऽत्मना** स्वकीयेन चैतन्येनाऽऽत्मानं स्वशरीररूपं जगदभितः **सम्यक्प्राविवेश** । इत्यनेन मन्त्रेण काचिदिष्टकोपधेया । तथाच **बौधायन** आह—'विधाय लोकानिति स्तम्भनवतीम्, इति ।

---

१ ख. ग. °र्थत्वं सृ° । २ ख. ग. भवन् । ३ क. °पप्राजा° । ४ क. °पत्योऽशो । ५ ख. ग. °योरत्र° ।

यथोक्तसृष्टिवेदनं प्रशंसति—

सर्वमेवेदमाप्त्वा। सर्वमवरुध्य। तदेवानुप्राविशति। य एवं वेद (९), इति॥

आसीदतिष्ठन्नभूदपो वायो इति सेयं दिगभ्यनूक्ताऽभ्यनूक्ताऽष्टौ च॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके प्रथमप्रपाठके त्रयोविंशोऽनुवाकः॥ २३॥

यः पुमानेवं प्रजापतिसृष्टिप्रकारं विजानाति स पुमान्सर्वमेव जगति विद्यमानमिदं फलं प्राप्य तच्च सर्वं वशीकृत्य तदेव जगदनुप्राविशति। सर्वात्मको भवतीत्यर्थः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये प्रथमप्रपाठके त्रयोविंशोऽनुवाकः॥ २३॥

अथ प्रथमे चतुर्विंशोऽनुवाकः।

अंतीतेनानुवाकद्वयेनापां प्रशंसामुक्त्वाऽस्मिन्ननुवाकेऽग्नीष्टकानामनुष्ठानविशेष उच्यते। तत्राऽऽदौ सामान्येनापां ग्रहणं विधत्ते—

चतुष्टय्य आपो गृह्णाति। चत्वारि वा अपाꣳ रूपाणि। मेघो विद्युत्। स्तनयित्नुर्वृष्टिः। तान्येवावरुन्धे, इति।

उपधानार्थं चतुर्विधा आपो ग्रहीतव्याः, अपां रूपाणि[2] निरूपकाणि वस्तूनि मेघादीनि चत्वारि एव। ततः स्तनयित्नुशब्देन गर्जनं विवक्षितम्। अपां चतुर्विधत्वेन मेघादिचतुष्टयमपि स्वाधीनं भवति।

तेषु चतुर्विधेषु जलेषु प्रथमं जलविशेषं विधत्ते—

आतपति वर्ष्या गृह्णाति। ताः पुरस्तादुपदधाति। एता वै ब्रह्मवर्चस्या आपः। मुखत एव ब्रह्मवर्चसमवरुन्धे। तस्मान्मुखतो ब्रह्मवर्चसितरः (१), इति।

आतपयुक्ते प्रदेशे वर्षेण संपन्ना या आपस्ताः पात्रेण केनचिद्गृह्णीयात्, ताश्च गृहीताश्चयनक्षेत्रे पूर्वस्यां दिश्युपदध्यात्। एता आतपयुक्ते देशे वृष्टा आप एव

---

१ ख. ग. °गादिति। २ क. °णि चतुर्विधानि। ३ क. ख. °ऽरिव°।

प्रकाशोपेतत्वाद्ब्रह्मवर्चसयोग्याः, तासां पुरस्तादुपधानेनाग्नेर्मुख **एव ब्रह्मवर्चसमवरुद्धं** भवति । यस्मादेवं **तस्माल्लोकेऽपि** वेदशास्त्रपाठरूपस्य ब्रह्मवर्चसस्य जिह्वावर्तित्वान्मुखप्रदेश एवातिशयेन ब्रह्मवर्चसयुक्तो भवति ।

द्वितीयं जलविशेषं विधत्ते—

कूप्या गृह्णाति । ता दक्षिणत उपदधाति ।
एता वै तेजस्विनीरापः । तेज एवास्य दक्षि-
णतो दधाति । तस्मादक्षिणोऽर्धस्तेजस्वितरः, इति ।

कूपे भवाः कूप्याः । तासां बहुविधगृहकृत्योपयोगित्वेन तेजस्विनीत्वम् । तासां दक्षिणदिश्युपधाने सत्यग्नेर्दक्षिणभागे तेजः संपादयति । यस्मादेवं **तस्माल्लोकेऽपि** शरीरे दक्षिणभागोऽतिशयेन तेजस्वी शक्तिमान्भवति ।

तृतीयं जलविशेषं विधत्ते —

स्थावरा गृह्णाति । ताः पश्चादुपदधाति । प्रति-
ष्ठिता वै स्थावराः । पश्चादेव प्रातिष्ठति, इति ।

नदीषु क्वचिदगाधो ह्रदो दृश्यते, तत्राऽऽपो न प्रवहन्ति किंतु स्थिरावस्थितिशीलास्तासां प्रतिष्ठितस्वभावानां पश्चिमदिश्युपधानेन स्वकीयानां सर्वेषां प्रतिष्ठां कृत्वा **पश्चात्स्वस्य** प्रतिष्ठां करोति ।

चतुर्थं जलविशेषं विधत्ते—

वहन्तीर्गृह्णाति (२) । ता उत्तरत उपदधाति ।
ओजसा वा एता वहन्तीरिवोह्यमानीरिव आकू-
जन्तीरिव धावन्तीः । ओज एवास्योत्तरतो
दधाति । तस्मादुत्तरोऽर्ध ओजस्वितरः, इति ।

नद्यां प्रवहन्त्यो या आपस्ता गृहीत्वोत्तरस्यां दिश्युपदध्यात् । **एता** आपो यदा धावन्ति तदानीमोजसा स्वकीयेन बलेन प्रवाहमध्यपतितान्काष्ठादिपदार्थान्वहन्तीरिवाऽऽकर्षयन्त्य इव भवन्ति, उह्यमानीरिव पाषाणादिषु लग्नाः स्वबिन्दुभिरूर्ध्वं गच्छन्त्य इव, **आकूजतीरिव** तत्र तत्र निम्नोन्नतप्रदेशेषु सचाराच्छब्दं कुर्वत्य इव भवन्ति । तस्यैतस्य वहनस्योद्वमनस्याऽऽकूजनस्य चौज एव कारणम्, अत उत्तरस्यां **दिश्योज एवाऽऽस्थापयति** । यस्मादेवं **तस्माल्लोकेऽपि** शरीरस्योत्तरो भाग **ओज-**

---

१ ग. °स्विनीस्ता द° । २ ग. °यन्ति । य° । क. °न स्वयमपि स्व° ।

स्वितरः । पूजाहोमादिकार्येषु दक्षिणहस्तस्य तेजस्वित्वं पूर्वमुक्तं पादप्रक्षालनादिषु वामहस्तस्यौजस्वित्वमत्रोच्यते । चतुष्टय्य इत्यस्याः संख्याया उपलक्षणत्वात्षड्विधा आपो द्रष्टव्याः ।

तत्र पञ्चमं जलविशेषं विधत्ते—

संभार्यो गृह्णाति । ता मध्य उपदधाति । इयं वै संभार्याः । अस्यामेव प्रतितिष्ठति, इति ।

गृहे घटेषु संपादनीया आपः संभार्याः, ता गृहीत्वा चतसृणां दिशां मध्य उपदध्यात् । संभार्याणां घटेष्ववस्थितत्वेन भूमिसदृशत्वादुपधानेन भूम्यामेव प्रतिष्ठितो भवति ।

षष्ठं जलविशेषं विधत्ते—

पल्वल्या गृह्णाति । ता उपरिष्टादुपादधाति (२)। असौ वै पल्वल्याः । अमुष्यामेव प्रतितिष्ठति, इति ।

यत्र कदाचिदपि जलशोषो नास्ति द्रवमात्रानुवृत्तिः सर्वदा दृश्यते तत्पल्वलं तत्रोत्पन्ना अपो गृहीत्वा मध्ये स्थापितानामिष्टकानामुपरिष्टादुपदध्यात् । पल्वल्यानां कूपादिवत्खननमन्तरेण भूमेरुपर्येव वर्तनात्तदुपधानेन द्युलोके प्रतिष्ठितो भवति ।

यथोक्तं दिक्षूपधानं प्रशंसति—

दिक्षूपदधाति । दिक्षु वा आपः । अन्नं वा आपः । अद्भ्यो वा अन्नं जायते । यदेवाद्भ्योऽन्नं जायते । तदवरुन्धे, इति ।

दिक्ष्वपां जातत्वाददृम्यश्चान्नोत्पत्तेर्दिक्षूपधानेनान्नं प्राप्नोति ।

अस्य चितस्याग्नेरारुणकेतुकनाम निर्वक्ति—

तं वा एतमरुणाः केतवो वातरशना ऋषयोऽचिन्वन् । तस्मादारुणकेतुकः, इति ।

अरुणादिभिस्त्रिविधैर्मुनिभिश्चितत्वात्तत्संबन्धेनाऽऽरुणकेतुकत्वम् । यद्यपि वातरशनैरप्ययं चितस्तथाऽप्यरुणानां केतूनां च मुख्यत्वात्तन्नाम्नैव व्यवहारः ।

उक्तार्थप्रतिपादिकामृचमवतारयति—

तदेषाऽभ्यनूक्ता, इति ।

तत्तस्मिन्नारुणकेतुकसंबन्धोऽयमग्निरित्यस्मिन्नर्थे काचिदक्शाखान्तरे पठिता ।

---

१ क. गृहव° ।

तामेतामृचं दर्शयति—

केतवो अरुणासश्च । ऋषयो वातरशनाः । प्रतिष्ठाꣳ
शतधा हि । समाहितासो सहस्रधायसमिति, इति ।

एषा चाऽऽपमापामित्यनुवाके व्याख्याता । इत्यनेन मन्त्रेणापि कांचिदिष्टकामुपदध्यात् । तथाच बौधायन आह—' केतव इत्येका ' इति ।

चयनवेदने प्रशंसति—

शतशश्चैव सहस्रशश्च प्रतितिष्ठति । य एत-
मग्निं चिनुते । य उ चैनमेवं वेद, इति ॥

ब्रह्मवर्चसितरो वहन्तीर्गृह्णाति ता उपरिष्टादुपादधात्यारुणके-
तुकोऽष्टौ च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके प्रथमप्रपाठके
चतुर्विंशोऽनुवाकः ॥ २४ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये प्रथमप्रपाठके चतुर्विंशोऽनुवाकः ॥ २४ ॥

अथ प्रथमप्रपाठके पञ्चविंशोऽनुवाकः ।

अग्नीष्टकाः पूर्वानुवाकेऽभिहिताः । तत्र पुष्करपर्ण्युपधानं विधत्ते । तत्राऽऽदावुत्तरवेदिखननं पूर्वमेव विहितं प्रशंसति—

जानुदघ्नीमुत्तरवेदीं खात्वा । अपां
पूरयति । अपाꣳ सर्वत्वाय, इति ।

जानुपरिमाणेन खातायामुत्तरवेद्यां गुल्फपरिमाणेन पूरितमुदकं यदस्ति तेनापां सर्वत्वं संपादितं भवति । यस्मात्खातस्याप्युदकमयत्वमपेक्षितं तस्मादितरस्य वस्तुनो जलमयत्वं किमु वक्तव्यमित्यभिप्रायः ।

पुष्करपर्णꣳ रुक्मं पुरुषमित्युपदधाति । तपो वै पुष्कर-
पर्णम् । सत्यꣳ रुक्मः । अमृतं पुरुषः । एतावद्वावास्ति ।
यावदेतत् । यावदेवास्ति (१) । तदवरुन्धे, इति ।

पुष्करपर्णस्य पवित्रत्वेन तपोरूपत्वाद्ब्रुवमग्न्याग्निसंयोगेऽपि विनाशाभावेन सत्यत्वाद्धिरण्मयपुरुषस्याप्यत एवामृतत्वान्नयाणामुपधानेन **यावत्सारमस्ति** तत्सर्वं प्राप्तं भवति।

उक्तत्रितयादनन्तरं कूर्मोपधानं विधत्ते—

कूर्ममुपदधाति। अपामेव मेधमवरुन्धे।
अथो स्वर्गस्य लोकस्य समष्ट्यै, इति।

अपां संबन्धी मेधः सारः कूर्मस्तदुपधानेन सारं प्राप्नोति। किंच स्वर्गोऽपि प्राप्यते।

अथाबीष्टकाविधिं सूचयितुं तन्मन्त्रान्पूर्वमेवाऽऽम्नातान्प्रदर्शयितुं लेशतः पठति—

आपमापामपः सर्वाः। अस्मादस्मादितोऽमुतः। अग्निर्वायुश्च
सूर्यश्च। सह संचरकरर्धिया इति। वाय्वश्वा रश्मिपतयः, इति।

आपमापामित्यारभ्य वाय्वश्वा इत्यादिभिरबीष्टका उपधेया इति तात्पर्यार्थः।

लोकंपृणेष्टकोपधानमन्त्रं दर्शयति—

लोकं पृण च्छिद्रं पृण (२)। यास्तिस्रः परमजाः, इति।

हे इष्टके **लोकं** पूर्वमुपधानरहितं स्थानं **पृण** पूरय, तत्पूरणेन चित्याग्नेश्छिद्रं **पृण** पूरय। **यास्तिस्रः** स्वयमातृण्णाः प्रथममध्यमोत्तराचितिषूपधेयतया **परमजाः** प्रकृष्टमुत्पन्नाः, ता अपि पूरय।

मन्त्रान्तरमपि पूर्वमाम्नातमेवोपधानविध्यभिप्रायेण पुनः प्रदर्शयति—

इन्द्रघोषा वो वसुभिरेवा ह्येवेति, इति।

इन्द्रघोषा व इत्यादयो मन्त्रा एवा ह्येवेत्यादयश्च ये मन्त्रा **इति**शब्दप्रदर्शिता अन्ये च ये मन्त्रास्तैः सर्वैरुपदध्यादित्यर्थः।

चितीनां संख्यां विधत्ते—

पञ्च चितय उपदधाति। पाङ्क्तोऽग्निः।
यावानेवाग्निः। तं चिनुते, इति।

जानुप्रमाणेन खातस्य मध्ये पञ्चसंख्याकाश्चितीरुपदध्यात्। गुल्फदघ्नमुदकं पूरयित्वा पर्णैर्दण्डैः कृत्स्नपुष्करैश्च संछाद्य मृन्मयपात्रेष्वपो धृत्वा ता अबीष्टका उपद-

---

१ ख. ग. याश्च तिस्रः। २ ग. स्वमातृण्णाः प्र.। ३ क. °त्तमाचि°। ४ ख. °दृब्ने पू°। ५ ख. ग. °ष्वपो धृ°।

ध्यात्। तत उपर्यपि पूर्ववत्पत्रैर्दण्डैः कृत्स्नपुष्करैश्च च्छादयित्वा पुनरप्यष्टका उपदध्यात्। एवं पञ्चकक्ष्याभिरुत्तरवेद्यां पूरितायां तत्र पञ्च चितयः संपद्यन्ते। तत्रोर्ध्वैः काष्ठैर्मञ्चकं कृत्वा तस्योपरि पुरीषं प्रसार्य पुरीषस्योपर्यग्निं प्रणीयोपसमाधाय तस्याग्नेश्चतुर्दिक्षु तत्तन्मन्त्रैरष्टका उपदध्यात्। एवं कृतेऽग्निः पञ्चचितियुक्तो भवति। आहवनीयमार्हपत्यदक्षिणाग्निसभ्यावसथ्यरूपेण पञ्चसंख्यायोपात्पाङ्क्तोऽग्निः सर्वोऽपि चितो भवति।

द्विचितौ विशेषं विधत्ते—

लोकंपृणया द्वितीयामुपदधाति। पञ्चपदा वै
विराट्। तस्या वा इयं पादः। अन्तरिक्षं पादः।
द्यौः पादः। दिशः पादः। परोरजाः पादः, इति।

येयं द्वितीया चितिः सेयं लोकंपृणयैवेष्टकोपधेया, सर्वपूरकत्वादियं लोकंपृणा विराड्देहरूपी(पा)। सा च विराण्मूर्तिः पञ्चपादोपेता। लोकत्रयं च दिशश्च पादचतुष्टयम्। रजोगुणात्मकस्य संसारस्य परस्ताद्बाह्ये योऽयं चिदात्मा वर्तते परोरजाः, स च पञ्चमः पादः, एवं प्रशस्ता लोकंपृणा।

तच्चयनवेदने प्रशंसति—

विराज्येव प्रतितिष्ठति। य एतमग्निं
चिनुते। य उ चैनमेवं वेद (३), इति॥
अस्ति पृणान्तरिक्षं पादः षट्च॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके प्रथमप्रपाठके
पञ्चविंशोऽनुवाकः॥ २५॥

विराज्येवान्न एव, विराड्देह एव वा॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयारण्यकभाष्ये पञ्चविंशोऽनुवाकः॥ २५॥

---

१ ख. ग. °कस्थाग्नि°। २ ग. °यं चितदेश°। ३ ख. ग. °तेऽप°।

अथ प्रथमे षड्विंशोऽनुवाकः ।

पूर्वानुवाके पुष्करपर्णाद्युपधानमुक्तम् । इह फलविशेषा व्रतविशेषाश्चोच्यन्ते । पूर्वं विहितमेवार्थं पुनर्विशेषकथनायाऽऽदावनुवदति—

अग्निं प्रणीयोपसमाधार्यं । तमभित एता अवीष्टका उपदधाति । अग्निहोत्रे दर्शपूर्णमासयोः । पशुबन्धे चातुर्मास्येषु । अथो आहुः । सर्वेषु यज्ञक्रतुष्विति, इति ।

एतत्सर्वं योऽपां पुष्पं वेदेत्यनुवाके व्याख्यातम् ।

अस्याऽऽरुणकेतुकस्य स्वातन्त्र्येण क्रत्वङ्गत्वमाक्षेपसमाधानाभ्यामुपपादयितुं मतद्वयमुपन्यस्यति—

अथ ह स्माऽऽहारुणः स्वायंभुवः । सावित्रः सर्वोऽग्निरित्यननुषङ्गं मन्यामहे । नाना वा एतेषां वीर्याणि, इति ।

स्वयंभुवः पुत्रः कश्चिदरुणनामको मुनिरेवमाह स्म । काठकेषु यो[२] यो विहितोऽग्निः सावित्रादिरारुणकेतुकान्तः स सर्वोऽपि सावित्र एव, उत्तरोत्तरेषु पूर्वपूर्वानुषङ्गस्य विद्यमानत्वात् । यो नाचिकेतः स सावित्रपूर्वक एवानुष्ठेयः । चातुर्होत्री(त्रि)यस्तदुभयपूर्वकः । वैश्वसृजस्त्रैतयपूर्वकः । आरुणकेतुकस्तच्चतुष्टयपूर्वकः । एवमनुषङ्गे सत्यारुणकेतुकस्येतरनिर(सा)पेक्षस्य स्वातन्त्र्यं नास्ति । सावित्रस्य तु तद्विद्यते । तस्मात्सर्वेष्वनुषक्तत्वात्सर्वोऽपि सावित्र इत्येव व्यवहार्यः । अतस्तस्यैव क्रत्वङ्गत्वं न त्वारुणकेतुकस्य (स्या)स्वतन्त्रस्येत्यरुणस्य मुनेर्मतं तदिदं दूष्यते । ब्रह्मवादिनो वदन्ति सावित्रः सर्वोऽग्निरित्यननुषङ्गं मन्यामहे[३] इति, न कोऽप्यग्निरितरत्रानुषज्जति । एतेषामग्नीनां वीर्याणि फलानि नाना पृथगुक्तान्येव । तानि च योऽपां पुष्पमित्यनुवाके संवत्सरं प्रत्यक्षेणामुमादित्यं प्रत्यक्षेणेत्यादिना निरूपितानि ।

तदेतत्फलनानात्वं प्रपञ्चेन प्रदर्श्यते[४] —

कमग्निं चिनुते (१) । सत्रियमग्निं चिन्वानः । कमग्निं चिनुते । सावित्रमग्निं चिन्वानः । कमग्निं चिनुते । नाचिकेतमग्निं चिन्वानः । कमग्निं चिनुते ।

---

१ क. पूर्वेवि° । २ ख. ग. योऽयं वि° । ३ क. °यमुत्त° । ४ ग. °महे, न । ५ क. °ज्जते । ए° । ६ ख. ग. प्रदर्शयति ।

चातुर्होत्रियमग्निं चिन्वानः । कमग्निं चिनुते ।
वैश्वसृजमग्निं चिन्वानः । कमग्निं चिनुते (२) ।
उपानुवाक्यमाशुमग्निं चिन्वानः । कमग्निं चिनुते ।
इममारुणकेतुकमग्निं चिन्वान इति, इति ।

द्वादशाहादिसत्राङ्गत्वेन चीयमानो योऽयं महाग्निः सोऽयं **सत्रिय**., तं चिन्वानः पुमान्**कमग्निं** किंफलकमग्निं **चिनुत** इत्येवं भो अरुणाख्यमुने त्वं विचारय । संवत्सरदेवताप्राप्तिस्तस्य फलम्, इतरेषां त्वन्यदेव पृथक्पृथक्फलमादित्यप्राप्त्यादिरूपम्, अतो नैकफलस्य संभावनाऽप्यस्तीति किंशब्दस्याभिप्रायः । एवमुत्तरत्रापि योज्यम् । उपानुवाक्यमाशुमग्निमित्यत्र यदेकेनेत्याद्युपानुवाक्यकाण्डोक्तो महानग्निर्विवक्षितः । यद्यसौ सत्रियमिति वाक्येनैव गतार्थस्तर्हि शाखान्तरप्रसिद्धं किंचिदन्यन्तरमस्तु । तदेव फलनानात्वमतिस्पष्टमिति ब्रह्मवादिनामभिप्रायः ।

सावित्राग्नेरनुषङ्गपक्षे बाधं दर्शयति—

वृषा वा अग्निः । वृषाणौ सꣳस्फालयेत् ।
हन्येतास्य यज्ञः । तस्मान्नानुषज्यः, इति ।

योऽयमग्न्युपलक्षितोऽग्निचित्सोऽयं **वृषा** सेक्ता रेतःसेचनेन प्रजामुत्पादयितुं समर्थः, तादृशो यद्यनुषङ्गं कुर्यात्तदानीमस्याग्निचितो वृषणद्वयं कश्चिद्वैरी **संस्फालयेत्**पीडयेत् । अस्य **यज्ञो**ऽपि विनश्येत् । तस्मात्सावित्राग्निरितरत्र नानुषञ्जनीयः, स्वतन्त्रा एवैते सर्वेऽग्नयः, तस्मादारुणकेतुकस्य स्वातन्त्र्येणैव क्रत्वङ्गत्वं युक्तमित्यर्थः ।

क्रतुविशेषे तत्संबन्धं विधत्ते—

सोत्तरवेदिषु क्रतुषु चिन्वीत । उत्तरवेद्याꣳ ह्याग्निश्चीयते, इति ।

उत्तरवेदिसहिता ये क्रतवः पशुबन्धादयस्तेष्वेवाऽऽरुणकेतुकमग्निं **चिन्वीत** नतूत्तरवेदिरहितेष्वग्निहोत्रादिषु । यस्मादयमग्निरुत्तरवेदिस्थाने **चीयते** तस्मात्तद्रहिते[2] तच्चयनं न युक्तम् । एवं[3] च सत्यस्मादग्निनिषेधात्पूर्वोक्तादग्निहोत्रे दर्शपूर्णमासयोरित्यादिविधानाच्चाग्निहोत्रादावारुणकेतुकस्य विकल्पो द्रष्टव्यः ।

अथास्य चयनस्य काम्यप्रयोगाः । तत्रैकं काम्यं दर्शयति—

प्रजाकामश्चिन्वीत (३) । प्राजापत्यो वा एषोऽग्निः ।

---

१ क. यदेके° । २ ख. ग. °हितं त° । ३ ख. ग. °वं स° ।

प्राजापत्याः प्रजाः । प्रजावान्भवति । य एवं वेद, इति ।

अग्नेः प्रजानां च प्रजापतिसृज्यत्वात्प्राजापत्यत्वं तेन साम्येन प्रजाफलकत्वमग्नेः ।

अथ द्वितीयं काम्यं दर्शयति—

पशुकामश्चिन्वीत संज्ञानं वा एतत्पशूनाम् ।
यदापः । पशूनामेव संज्ञानेऽग्निं चिनुते ।
पशुमान्भवति । य एवं वेद (४), इति ।

ये तृषार्ताः पशवो यत्र क्वाप्यपोऽन्विष्य जानन्ति तस्मादापः पशूनां सम्यग्ज्ञानसाधनमतोऽप्सु चयने सति पशूनां ज्ञानसाधन एवाग्निश्चितो भवति ।

अथ तृतीयं दर्शयति—

वृष्टिकामश्चिन्वीत । आपो वै वृष्टिः । पर्जन्यो
वर्षुको भवति । य एवं वेद, इति ।

चतुर्थं दर्शयति—

आमयावी चिन्वीत । आपो वै भेषजम् ।
भेषजमेवास्मै करोति । सर्वमायुरेति, इति ।

तापशान्तिकरत्वादपां भेषजत्वम् ।

पञ्चमं दर्शयति—

अभिचरन्[1]श्चिन्वीत । वज्रो वा आपः (५) । वज्रं-
मेव भ्रातृव्येभ्यः प्रहरति । स्तृणुत एनम्, इति ।

उपरिष्टात्ता आपो वज्री भूत्वेत्येवं वक्ष्यते तस्मादपां वज्रत्वम् । अत्रापामेवोपधेयत्वात्सर्वतः फलसाधनत्वेनापामेव प्रशंसनम् ।

षष्ठसप्तमाष्टमनवमफलानि दर्शयति—

तेजस्कामो यशस्कामः । ब्रह्मवर्चसकामः
स्वर्गकामश्चिन्वीत । एतावद्वावास्ति यावदेतत् । यावदेवास्ति । तदवरुन्धे, इति ।

एतत्प्रजापश्वादिकं स्वर्गान्तं यावत्फलमुक्तमेतावदेव लोकेऽपि विद्यमानमुत्तमं फलम् । अतो यावदुत्तमं फलमस्ति तत्सर्वमनेन चयनेन प्राप्नोति ।

---

१ ख, ग. °तिना सृ° । २ ख ग. °मेवोपशं° ।

अथाऽऽरुणकेतुकाग्निचितो नियमविशेषं विधत्ते—

तस्यैतद्व्रतम् । वर्षति न धावेत् (६)। अमृतं
वा आपः । अमृतस्यानन्तरित्यै, इति ।

पर्जन्ये वर्षति सति यदा मार्गे गच्छति तदा क्लेदनभीत्या धावनं न कुर्यात् । तत्र करणे चामृतरूपाणामपां परित्यागेन स्वर्गसुखरूपममृतमन्तरितं भवेत्, तन्मा भूदिति न धावेत् ।

नियमान्तराणि विधत्ते —

नाप्सु मूत्रपुरीषं कुर्यात् । न निष्ठीवेत् । न विवसनः स्नायात् ।
गुह्यो वा एषोऽग्निः । एतस्याग्नेरनतिदाहाय, इति ।

एष आरुणकेतुकोऽग्निरवीष्टकाभिर्निष्पाद्यत्वादप्सु गूढो वर्तते । तादृशो मूत्रादिकारिणमतिशयेन दहति । स दाहो मा भूदिति मूत्रादिकं न कुर्यात् । पुरुषार्थत्वेन शास्त्रेषु निषिद्धस्याप्यत्र पुनर्निषेधः श्रौतप्रायश्चित्तार्थः ।

नियमान्तरं विधत्ते—

न पुष्करपर्णानि हिरण्यं वाऽधितिष्ठेत् । एतस्याग्नेरनभ्यारोहाय, इति ।

पुष्करपर्णस्य हिरण्यस्य वा पादेनाऽऽक्रमणे सति तमग्निमारूढवान्भवेत् । अतस्तदुभयं नाधितिष्ठेत् ।

नियमान्तरं विधत्ते—

न कूर्मस्याश्नीयात् । नोदकस्याघातुकान्येनमोदकानि भवन्ति । अघातुका आपः । य एतमग्निं चिनुते । य उ चैनमेवं वेद (७), इति ।
चिनुते चिनुते प्रजाकामाश्विन्वीत य एवं वेदाऽऽपो धावेदश्नीयाच्चत्वारि च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके प्रथमप्रपाठके षड्विंशोऽनुवाकः ॥ २६ ॥

---

१ ख. °चितौ नि° । २ ग. °त्तार्थम् । नि° ।

कूर्मस्याङ्गं किंचिदपि न भुञ्जीत । उदकशब्देन तत्रत्यो मीनादिरुपलक्ष्यते, तदीयमप्यङ्गं नाश्नीयात् । य एतमारुणकेतुकमग्निं चिनुते यश्चैवं वेद तमेनं प्रत्योदकान्युदकवर्तीनि मीनादीनि, अघातुकान्यहिंसकानि भवन्ति । आपोऽप्यघातुकाः । उदकमरणं न भवेदित्यर्थः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये प्रथमप्रपाठके षड्विंशोऽनुवाकः ॥ २६ ॥

अथ प्रथमे सप्तविंशोऽनुवाकः ।

कल्पः—" इमा नुकमिति + चतस्रः " इति । तत्र प्रथमामाह—

इमा नुकं भुवना सीषधेम । इन्द्रश्च विश्वे च देवाः, इति ।

इन्द्रश्च विश्वे देवाश्च वयं चेमा भुवनानि नुकं सीषधेम । सुखनामसु नुकमिति पठितं सुखं यथा भवति तथा साधयाम ।

अथ द्वितीयामाह—

यज्ञं च नस्तन्वं च प्रजां च ।
आदित्यैरिन्द्रः सह सीषधातु, इति ।

अयमिन्द्र आदित्यैः सह नोऽस्माकं यज्ञं शरीरं प्रजां च साधयतु ।

अथ तृतीयामाह—

आदित्यैरिन्द्रः सगणो मरुद्भिः ।
अस्माकं भूत्वविता तनूनाम्, इति ।

आदित्यैर्मरुद्भिश्च युक्तत्वात्सगणोऽयमिन्द्रोऽस्माकं तनूनामविता भूतु रक्षिता भवतु ।

कल्पः—" आप्लुवस्वेति सप्तदश क्षपण्यः " इति । तत्र प्रथमामाह—

आप्लुवस्व प्रप्लुवस्व । आण्डी भव ज मा मुहुः । सुखादीं
दुःखनिधनाम् । प्रतिमुञ्चस्व स्वां पुरम् (१), इति ।

जशब्देन जन्मवान्यजमान उच्यते । आप्लुवनमागमनं जन्म, प्रप्लुवनं प्रायणम्, हे

+ अत्र तिस्र इत्यपेक्षितमुत्तरत्र तिसृणामनुक्तत्वात् । आदर्शपुस्तकेषु तु चतस्र इत्येव पाठ उपलभ्यते ।

यजमान जन्मोपेत मा मुहुराप्लुवस्व पुनः पुनर्जन्मलक्षणमागमनं मा कुरु मुहुर्मा प्लुवस्व पुनः पुनर्मरणलक्षणं प्लवनं मा कुरु । मा मुहुराण्डी भव आण्डो ब्रह्माण्डमध्य (भव) इत्यर्थः । आण्डीत्यभूततद्भाव उच्यते । पूर्वमनाण्ड इदानीमाण्डीभव त(भूतस्त)स्य निषेधो माशब्देनोच्यते, पुनः पुनर्ब्रह्माण्डवर्तित्वं तव मा भूदित्यर्थः । शेषं स्पष्टार्थम् ।

अथ द्वितीयामाह—

मरीचयः स्वायंभुवाः । ये शरीराण्यकल्पयन् ।
ते ते देहं कल्पयन्तु । मा च ते ख्या स्म तीरिषत्, इति ।

स्वायंभुवाः स्वयंभूः सवितृमण्डलवर्ती परमात्मा तस्येमे स्वायंभुवाः, ये मरीचयो रश्मयः शरीराण्यात्मोपासकदेहानकल्पयन्कृतवन्तस्ते मरीचयस्ते तव देहं कल्पयन्तु जनयन्तु स्मशब्देनाऽऽवश्यकत्वं द्योतयति । संसारोत्तरणविषया न ते ख्यातिः सर्वथा विनश्यत्वित्यर्थः ।

अथ तृतीयामाह—

उत्तिष्ठत मा स्वप्त । अग्निमिच्छध्वं भारताः ।
राज्ञः सोमस्य तृप्तासः । सूर्येण सयुजोषसः, इति ।

हे ऋत्विजो यूयमुत्तिष्ठतोत्थिता भवत, उत्साहं कुरुतेत्यर्थः । **मा स्वप्त** स्वप्नं मा कुरुत, अलसा मा भूतेत्यर्थः । **भारता** हविरादिभरणशीलाः सन्तोऽग्निमारुणकेतुकमिच्छध्वम् । कीदृशा ऋत्विजः । **राज्ञो** राजमानस्य **सोमस्य** पानेन तृप्तासस्तृप्ताः, **सूर्येण सयुजोषसः** समानप्रीतयः । यद्यप्येवंविधा मन्त्रा अनुष्ठेयार्थस्येष्टकोपधानस्य प्रकाशका न भवन्ति तथाऽप्येतदर्थानुस्मरणेन कश्चिददृष्टातिशयो द्रष्टव्यः ।

अथ चतुर्थ्याः प्रतीकं दर्शयति—

युवा सुवासाः, इति ।

सोऽयं मन्त्रोऽञ्जन्ति त्वामध्वरे देवयन्त इत्यनुवाके व्याख्यातः ।

अथ पञ्चमीमाह—

अष्टाचक्रा नवद्वारा (२) । देवानां पूर्-
योध्या । तस्याꣳ हिरण्मयः कोशः ।

---

१ क. ग. तृताः । २ ख. ग. विधो म° । ३ ख. ग. मन्त्रोऽनु । ४ ख ग. °शको न । ५ ख. ग. भवति ।

स्वर्गो लोको ज्योतिषाऽऽवृतः, इति ।

पूरिति शरीरमुच्यते । देवानामिन्द्रादीनां पूरष्टाचक्रा । चक्रवदावरणभूतास्त्वग-सृङ्मांसमेदोस्थिमज्जौशुक्रौजोरूपा अष्टौ धातवो यस्याः सेयमष्टाचक्रा । शिरोवर्तिभिः सप्तभिर्द्वारैरधोवर्तिभ्यां द्वाराभ्यामुपेता नवद्वारा । अयोध्या कर्मगतिमन्तरेण केनापि प्रहर्तुमशक्या । तस्यां पुरि हिरण्मयः सुवर्णनिर्मितपदार्थसदृशः कोशोऽवकाशरूपः स्वर्गः सुखमयो लोकः स्थानविशेषो ज्योतिषा भासकेन जीवचैतन्येनाऽऽवृतः परिवेष्टितो वर्तते ।

अथ षष्ठीमाह—

यो वै तां ब्रह्मणो वेद । अमृतेनाऽऽवृतां पुरीम् ।
तस्मै ब्रह्म च ब्रह्मा च । आयुः कीर्तिं प्रजां ददुः, इति ।

ब्रह्मणः सत्यं ज्ञानमनन्तमित्यादिश्रुतिप्रतिपादितस्य वस्तुनः संबन्धिनीममृतेन परमानन्देनाऽऽवृतां तां पुरीं यो वै यः कोऽपि पुमान्वेद तस्मै विदुषे ब्रह्म च परमात्माऽपि ब्रह्मा च प्रजापतिरपि, चकाराभ्यामन्येऽपि सर्वे देवा आयुरादिकं प्रयच्छन्ति ।

अथ सप्तमीमाह—

विभ्राजमानां हरिणीम् । यशसा संपरीवृताम् । पुरं[2]
हिरण्मयीं ब्रह्मा (३)। विवेशापराजिता, इति ।

ब्रह्मा प्रजापतिः पुरं शरीरं विवेश प्रविष्टवान् । कीदृशीं पुरम्, विभ्राजमानां[3] विशेषेण राजमानाम्, हरिणीं पापहरणशीलाम्, यशसा जगत्स्रष्टृत्वलक्षणया कीर्त्या संपरीवृतां सम्यक्परिवेष्टिताम्, हिरण्मयीं सुवर्णनिर्मिताम्, [अपराजिता] कदाचिदपि पराजयरहिताम्[4] ।

अथाष्टमीमाह—

पराङेत्यज्यामयी । पराङेत्यनाशकी । इह
चामुत्र चान्वेति । विद्वान्देवासुरानुभयान्, इति ।

विद्वान्परब्रह्मतत्त्ववित्, पराङ्पुनरावृत्तिरहितः, एति ब्रह्मतत्त्वं प्राप्नोति । कीदृशो विद्वान् । अज्यामयी ज्या वयोहानिः, आमयो व्याधिः, तद्वाञ्ज्यामयी तदुभयरहित्यादयमज्यामयी, नाशकोऽपमृत्युबन्धकं कर्म वा तद्योगान्नाशकी तद्रहि-

---

१ ख. °ज्जाम्नाय्वोजो° । २ क. ख. °तां पु° । ३ क. ख. °नां ह° । ४ क. °हिता । अ° ।

त्यादनाशकी । देहतादात्म्यभ्रमाभावाद्वयोहानिव्याध्यपमृत्युरहितः पुनरावृत्तिशून्यः सन्ब्रह्म प्राप्नोति । इह चामुत्र च लोकद्वयेऽपि देवासुरानुभयानन्वेति, अनुगच्छति, सर्वात्मको भवतीत्यर्थः ।

अथ नवमीमाह—

यत्कुमारी मन्द्रयते । यद्योषित्पतिव्रता । अरिष्टं
यत्किंच क्रियते । अग्निस्तदनुवेधति, इति ।

कुमारी विवाहरहिता स्त्री यत्पापं पुरुषसंभोगरूपमुद्दिश्य मन्द्रयते हर्षं करोति, योषित्युवतिश्च यत्पापं परपुरुषसंभोगरूपमुद्दिश्य मन्द्रयते हृष्टा भवति, पतिव्रताऽपि स्वभर्तृसंयोगाभावेन क्लिष्टा सती यत्पापं देहत्यागरूपमुद्दिश्य मन्द्रयते । यच्चान्यदपि किंचिदरिष्टं दानादिना रेष्टुं विनाशयितुमशक्यं महत्पापमस्य यजमानस्य येन केनापि क्रियते तत्सर्वमयमारुणकेतुकोऽग्निरनुवेधति, अनुक्रमेण विनाशयति ।

अथ दशमीमाह—

अशृतासः शृतासश्च (४) । यज्वानो येऽप्ययज्वनः ।
स्वर्यन्तो नापेक्षन्ते । इन्द्रमग्निं च ये विदुः, इति ।

अशृतासोऽपक्वचित्ताः शृतासश्च पक्वचित्ता अपि, यज्वानः श्रुतिस्मृतिविहितकर्मानुष्ठायिनः, येऽप्य[यज्वनोऽ]यज्वानस्तद्विपरीताः, तेषां मध्ये ये पुरुषा इन्द्रं परमैश्वर्ययुक्तं परमात्मानमग्निमारुणकेतुकं च विदुर्याथात्म्येन जानन्ति । ते ज्ञानिनः स्वर्यन्तः स्वर्गं मोक्षं वा प्राप्नुवन्तो ज्ञानव्यतिरिक्तसाधनान्तरं नापेक्षन्ते ।

अथैकादशीमाह—

सिकता इव संयन्ति । रश्मिभिः समुदीरिताः ।
अस्माल्लोकादमुष्माच्च । ऋषिभिरदात्पृश्निभिः, इति ।

यथा लोके वायुना प्रेरिताः सिकताः क्वचित्परस्परं संयन्ति राशिरूपेण संगच्छन्ते, तद्वदेते जीवा रश्मिभी रज्जुस्थानीयैः कर्मभिः समुदीरिताः प्रेरिताः सन्तः कर्मार्जनस्थानीयादस्माल्लोकात्कर्मफलभोगरूपादमुष्माच्च लोकात्तदा तदा निर्गत्य क्वचित्क्वचित्संयन्ति । तेषां सर्वेषामनुग्रहाय परमेश्वरः पृश्निभिः शुक्लैस्तत्त्वप्रकाशकैर्ऋषिभिर्मन्त्रैरदात्, ज्ञानं प्रयच्छति ।

---

१ ग. यद्° । २ ग. °यज्वानः ।

अथ द्वादशीमाह—

अपेत वीत वि च सर्पतातः । येऽत्र स्थ पुराणा
ये च नूतनाः । अहोभिरद्भिरक्तुभिर्व्यक्तम् ।
(५) । यमो ददात्ववसानमस्मै, इति ।

यमेन नियुक्ताः पुरुषाः पुरातना नूतनाश्च सर्वस्यां भूमौ व्याप्य वर्तन्ते तान्संबोध्येदमुच्यते—हे यमदूता ये यूयं **पुराणा** अत्राग्निक्षेत्रे ये पूर्वं स्थिताः, **ये च नूतना ये चात्र स्थ** ते सर्वे यूयमपेतास्मात्स्थानादपगच्छत, **वीत** परस्परं वियुज्य गच्छत । किंचातो **विसर्पत**तास्मात्स्थानाद्विदूरं गच्छत । **अहोभिर्दिवसैरक्तुभी** रात्रिभिश्च, **अद्भिरबीष्टकाभिर्व्यक्तं** विशेषेण संबद्धमवसानमिदं स्थानमस्मै यजमानाय **यमो ददातु**, यमेन दत्ते सति केषुचिदहोरात्रेष्वत्राबीष्टकोपधानं कुर्म इत्यर्थः ।

अथ त्रयोदशीमाह—

नृ मुंणन्तु नृ पात्वर्यः । अकृष्टा ये च कृष्टजाः ।
कुमारीषु कनीनीषु । जारिणीषु च ये हिताः, इति ।

अविभक्तिको नृशब्दो मनुष्यजातिमात्रे ज्ञेयः । परपीडादिना परभृत्यभावादिना जीवन्तो गर्हिताः पुरुषास्ते जातिमात्रान्वयवन्तो नृशब्देनात्र विवक्षिताः । तादृशाः पुरुषाँ **मुणन्तु**, अस्मात्स्थानादपगच्छन्तु नृ तादृशानां मनुष्याणामर्यः स्वामी च **पातु**, इतः स्थानादपेत्यास्मान्पातु । **अकृष्टा** अकर्मयोग्या दुष्कृतप्रसूताः, ये **च कृष्टजा** विशुद्धवंशजाता एव सँन्तोऽकर्मयोग्या अन्धादयः पातकिनो वा, ते सर्वेऽप्यस्मात्स्थानादपयन्तु । तथा **कुमारीषु** विवाहरहितासु स्त्रीषु ये हिता गर्भत्वेन स्थापिताः, **कनीनीषु** कुमार्याः पुत्रीषु, विवाहयुक्तास्वपि ये गर्भत्वेन स्थापिता, तथा **जारिणीषूपपतियुक्तासु** स्त्रीषु ये हिता गर्भत्वेन स्थापिताः, ते दुष्टक्षेत्रजाः सर्वेऽप्यस्मादुपधानस्थानादपगच्छन्तु ।

अथ चतुर्दशीमाह—

रेतःपीता आण्डपीताः । अङ्गारेषु च ये हुताः ।
उभयान्पुत्रपौत्रकान् । युवेऽहं यमराजगान्, इति ।

---

१ ग. °त्रस्थाः पु° । २ ख. येऽत्र । ३ येऽत्रस्थास्ते स° । ३ क. ख. °षा न मु° । ४ ख. सन्तः कर्मायो° ।

रेतःपीताः पीतरेतस्काः पुरुषाः, **आण्डपीता** अण्डस्पृष्टोदकपायिनः, एवमाद्यभक्ष्यभक्षणाः सर्वेऽपीतोऽपगच्छन्तु । तथाऽङ्गारेषु ये पश्चादयोऽशास्त्रीयमार्गेण **हुताः** पिपीलिकादयो वा पिशाचादिभावेन जगति वर्तन्ते [ते] सर्वेऽप्यस्मात्स्थानादपगच्छन्तु । तथा **पुत्रपौत्रकाञ्श्रुतवृत्तहीनताकुत्सितान्पुत्रान्पौत्रांश्चोभयानहं युवेऽस्मात्स्थानात्पृथक्करोमि** । तथा **यमराजगान्यमेन** पातयितुं योग्यान्सर्वानप्यपनयामि ।

अथ पञ्चदश्याः प्रतीकं दर्शयति—

शतमिन्नु शरदः, इति ।

इयं च **शाखान्तरीया** वैश्वदेवकाण्डे योगे योग इत्यनुवाके समाम्नाता । तत्पाठस्तु "शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् । पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषताऽऽयुर्गन्तो" इति । हे **देवाः शतमिन्नु** शतमपि **शरदः** संवत्सरा **अन्ति** अस्माकमन्तिकस्था एव । स्वल्पा एव शतायुः पुरुष इति श्रुत्या शतं शरद आधिक्येन तत्र तत्र प्रशस्यन्ते, अस्माकं तु न पर्याप्ताः । तत्र हेतुरुच्यते— **यत्रेषु** शतसंवत्सरेषु **नोऽस्मदीयानां तनूनां जरसं** शरीराणां वयोहानिलक्षणं शैथिल्यं **चक्रा** हे देवा यूयं कृतवन्तः । किंच **यत्र** यस्यां जरायां **पुत्रासः** पुत्राः स्वकीयोदरजाताः स्वेन रक्षिता एव **पितरो भवन्ति** प्रत्युत पालका भवन्ति । तादृशमायुः कथं पर्याप्तं भवेत् । आस्तां तावदायुषः पर्याप्तिः । हे देवा **यूयमायुर्गन्तोस्तादृशमप्यायुः** सर्वं प्राप्तुमिच्छा विद्यते तस्मान्मध्या तस्याऽऽयुषो मध्ये **नोऽस्मान्मा रीरिषत** हिंसितान्मा कुरुत । इति **शाखान्तरीयमन्त्रस्यार्थः** ।

अथ षोडशीमाह—

अदो यद्ब्रह्म विलबं । पितॄणां च यमस्य च ।
वरुणस्याश्विनोरग्नेः । मरुतां च विहायसाम्, इति ।

पूर्वोक्तं जगत्कारणमस्ति, **अदो** ब्रह्म पित्रादीनां सर्वेषां **विलबं** विशेषेणाऽऽलम्बनम् । **विहायसामित्यनेनाऽऽकाशवर्तिनो** यक्षगन्धर्वादय उच्यन्ते ।

अथ सप्तदशीमाह—

कामप्रयवणं मे अस्तु । स ह्येवास्मि सनातनः ।
इति नाको ब्राह्मिश्रवो रायो धनम् । पुत्रानापो देवीरिहाऽऽहता(६), इति ॥

---

१ क °हीनान्कुत्सि° । २ ख. ग. प्रशंस्यन्ते । ३ ग. °ते यस्य त°।

पुरं नवद्वारा ब्रह्मा च व्यक्तꣳ शरदोऽष्टौ च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके प्रथमप्रपाठके
सप्तविंशोऽनुवाकः ॥ २७ ॥

प्रकर्षेण यवनं मिश्रीकरणं प्रयवणं कामानां प्रयवणं येन ब्रह्मणा भवति तत्काम-प्रयवणम्, मे मम ब्रह्म प्रकामप्रापकमस्तु । हि यस्मात्, अतः सनातनोऽनादिसिद्धः स एव परमात्मैवास्मि । इत्यतः कारणान्नाको दुःखरहितस्थानविशेषो ब्रह्मिश्रवो ब्रह्मविषयवाक्यश्रवणं रायो हिरण्यादयो धनं प्रीतिसाधनं स्त्रीपुत्रादि चेत्येतत्सर्वं ममास्त्विति शेषः । देवीर्देवनशीला आपो यूयमवोष्टका इहास्मि-न्कर्मणि पुत्रानाहि-ताऽऽधत्त संपादयत ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयारण्यकभाष्ये प्रथमप्रपाठके सप्तविंशोऽनुवाकः ॥ २७ ॥

अथ प्रथमेऽष्टाविंशोऽनुवाकः ।

कल्पः—' विशीर्ष्णीमिति द्वे ' इति । तत्र प्रथमामाह—

विशीर्ष्णीं गृध्रशीर्ष्णीं च । अपेतो निर्ऋतिꣳ हथः ।
परिबाधꣳ श्वेतकुक्षम् । निजङ्घꣳ शबलोदरम्, इति ।

हेऽग्ने विशीर्ष्णीं शिरोरहितां गृध्रशीर्ष्णीं च गृध्रसमानशिरोयुक्तां च निर्ऋतिं राक्षसीमलक्ष्मीमितोऽस्मात्स्थानादपहथोऽपजहि । परिबाधादिनामकान्निर्ऋतिसंबन्धिनः पुरुषानप्यपजहि । परिबाधं परितो बाधकं श्वेतकुक्षं श्वेतवर्णकुक्षियुक्तं निजङ्घं न्याभूतजङ्घायुक्तं शबलोदरं शुक्लवर्णमिश्रितोदरयुक्तम् ।

अथ द्वितीयामाह—

स तान्वाच्यायया सह । अग्ने नाशय संदृशः ।
ईर्ष्यासूये बुभुक्षाम् । मन्युं कृत्यां च दीधिरे । रथेन
किꣳशुकावता । अग्ने नाशय संदृशः (१), इति ।

* इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके प्रथमप्रपाठकेऽष्टा-विंशोऽनुवाकः ॥ २८ ॥

---

* अत्र प्र प्र पुस्तके विशीर्ष्णीं इत्येवाधीतं वर्तते ।

---

१ क. 'षयं वा' । २ ग हथ । ३ ग. 'हथाप०' ।

वाच्यानि जनैर्निन्द्यानि पूर्वोक्तपरिबाधादिरूपाण्यपत्यानि तान्यात्मन इच्छतीति वाच्याया परिबाधादीनां माता काचिदलक्ष्मीः । अस्मदुपद्रवोपायं सम्यक्पश्यन्तीति संदृशः परिबाधादयः । हेऽग्ने स त्वं तान्परिबाधादीन्वाच्यायया मात्रा सह विनाशय । किंच ये विद्वेषिणोऽस्माकमीर्ष्यादीन्दीधिरे[1] दीपयन्ति । अस्मद्गुणानामसहनमीर्ष्या, तेषु दोषारोपोऽसूया, अन्नाभावेन बाधा बुभुक्षा, मन्युरस्मद्विषयः क्रोधः, कृत्याऽस्मद्विषयोऽभिचारः, एतेषामीर्ष्यादीनां दीपनमभिवृद्धिं कुर्वन्तो ये[2] विद्वेषिणोऽस्मान्मारयितुं सम्यक्पश्यन्ति तान्सर्वान्रथेन तदीयेन सह नाशय । कीदृशेन रथेन, किंशुकावता कुत्सिताः शुकाः किंशुकाः प्राण्युपद्रवकारिणः पक्ष्याकारा राक्षसविशेषास्तैर्युक्तेन ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये प्रथमप्रपाठकेऽष्टाविंशोऽनुवाकः ॥ २८ ॥

अथ प्रथम एकोनत्रिंशोऽनुवाकः ।

कल्पः—'पर्जन्यायेति तिस्रः' इति । तत्र प्रथमामाह—

पर्जन्याय प्रगायत । दिवस्पुत्राय मीढुषे । स नो यवसमिच्छतु, इति ।

हे ऋत्विग्यजमानाः पर्जन्याय वृष्ट्यभिमानिदेवार्थं प्रगायत प्रकर्षेण स्तुतिं कुरुत । कीदृशाय दिवस्पुत्राय दिव्युत्पन्नत्वात्पुत्रत्वम् । मीढुषे वृष्टिरूपेण जलस्य सेचकाय । स पर्जन्यदेवो नोऽस्माकं यवसमन्नादिरूपं भक्ष्यं संपादयितुमिच्छतु ।

अथ द्वितीयामाह—

इदं वचः पर्जन्याय स्वराजे । हृदो अस्त्वन्तरं तद्युयोत । मयो-
भूर्वातो विश्वकृष्टयः सन्त्वस्मे । सुपिप्पला ओषधीर्देवगोपाः, इति ।

स्वराजे स्वत एव राजमानाय पर्जन्याय पर्जन्यदेवार्थमस्माभिरुक्तमिदं[3] स्तुतिरूपं वचो हृदोऽन्तरमस्तु तदीयचित्ते प्रविष्टमस्तु । तदस्मदीयं वचो युयोत तच्चिते हे ऋत्विजो मिश्रयत । वातो वायुरस्मे अस्मासु मयोभूः सुखस्य भावयिता भवतु । विश्वकृष्टयः सर्वेऽपि मनुष्या अस्मासु मयोभुवः सन्तु । ओषधीर्व्रीहियवाद्याः सुपिप्पलाः शोभनफलोपेताः, देवगोपा हविर्द्वारा देवानां पालयित्र्यः सन्तु ।

---

१ ख. ग. °दीनाशय मा° । २ ख. ग. ये द्वे° । ३ क. °देवतार्थ° ।

अथ तृतीयामाह—

यो गर्भमोषधीनाम् । गवां कृणोत्यर्वताम् ।
पर्जन्यः पुरुषीणाम् (१) , इति ॥
***विशीर्ष्णी पर्जन्याय दश दश ॥**

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके प्रथमप्रपाठक
एकोनत्रिंशोऽनुवाकः ॥ २९ ॥

यः पर्जन्यो देवो व्रीहियवाद्योषधीनां **गवामश्वानां** मनुष्यस्त्रीणां च **गर्भं कृणोति** करोति । नोऽस्माकं मयोभूरिति शेषः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये प्रथमप्रपाठक एकोनत्रिंशोऽनुवाकः ॥ २९ ॥

अथ प्रथमे त्रिंशोऽनुवाकः ।

कल्पः—"पुनर्मा प्रैत्विति च" इति । तत्र प्रथमामाह—

पुनर्मामैत्विन्द्रियम् । पुनरायुः पुनर्भगः । पुन-
र्ब्राह्मणमैतु मा । पुनर्द्रविणमैतु मा, इति ।

यदिन्द्रियं भोगेन नष्टं तत्पुनरपि मां प्रत्यैत्वागच्छतु । **आयुरपि पुनरैतु** । ब्रह्मण इदं **ब्राह्मणं** ब्रह्मवर्चसं तदपि **पुनर्मामैतु** । द्रविणं धनमपि पुनर्मामैतु । एतत्सर्वं मम पुनर्वर्धतामित्यर्थः ।

अथ द्वितीयामाह—

यन्मेऽद्य रेतः पृथिवीमस्कान् । यदोषधीरप्यसरद्य-
दापः । इदं तत्पुनराददे । दीर्घायुत्वाय वर्चसे, इति ।

अथा (द्या?)स्मिन्दिने **मे** मदीयं **यद्रेतः पृथिवीं** प्रत्यस्कान्प्रमादेन स्कन्नमासीत् । **ओषधीरपि** मदीयं यद्रेतोऽसरत्प्राप्नोत्, ओषधीषु स्कन्नमित्यर्थः । **यच्च** रेत आपोऽसरदप्सु स्कन्नं, **तदिदं रेतः पुनरप्यहमाददे** । किमर्थम्, **दीर्घायुत्वाय वर्चसे**, आयुर्वृद्धये ब्रह्मवर्चसाय च ।

---

* ग. पुस्तके पर्जन्याय दशेत्येतावन्मात्रमेव वर्तते ।

---

१ ग. °युस्त्वाय । २ ख. यत्र । ग. अत्र । ३ ग. °युरत्वाय ।

अथ तृतीयामाह—

यन्मे रेतः प्रसिच्यते । यन्म आजायते पुनः ।
तेन माममृतं कुरु । तेन सुप्रजसं कुरु (१), इति ।
पुनर्द्वे च ॥
इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके प्रथमप्रपाठके
त्रिंशोऽनुवाकः ॥ ३० ॥

मे मदीयं यद्रेतो गर्भाशये प्रकर्षेण सिच्यते मे मदीयं यद्रेतः पुनरप्याजायतेऽपत्यरूपेणोत्पद्यते, तेनापत्येन मां यजमानममृतं सुखयुक्तं कुरु । तेनापत्यरूपेण रेतसा मां सुप्रजसं शोभनपुत्रपौत्रादिप्रजायुक्तं कुरु ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये प्रथमप्रपाठके त्रिंशोऽनुवाकः ॥ ३० ॥

अथ प्रथम एकत्रिंशोऽनुवाकः ।

अथ वैश्रवणयज्ञमन्त्रा उच्यन्ते । तत्र चतसृभिर्वैश्रवणमावाहयेत् । तासु प्रथमामाह—

अद्भ्यस्तिरोधाऽजायत । तत्त्वं वैश्रवणः सदा ।
तिरो धेहि सपत्नान्नः । ये अपोऽश्नन्ति केचन, इति ।

अत्रानादिसिद्धः कुबेरः संबोध्योच्यते—हे कुबेर त्वया गृहीतो यो वैश्रवणो विश्रवसोऽपत्यं स खलु सदा तवाद्भ्यस्तिरोधाऽजायत, अनु(बु)पलक्षितानां त्वदीयकर्मणां तिरोधायक आसीत् । अतो वैश्रवणस्य कर्मतिरोधायकत्वं निवार्य तन्मुखेन नोऽस्मदीयाञ्शत्रूंस्तिरो धेहि विनाशय । ये केचनान्येऽपि अपोऽस्मदीयानि कर्माण्यश्नन्ति तिरो दधति नाशयन्ति तानपि सर्वांस्त्वं तिरो धेहि ।

अथ द्वितीयामाह—

त्वाष्ट्रीं मायां वैश्रवणः । रथꣳ सहस्रवन्धुरम् ।
पुरुश्चक्रꣳ सहस्राश्वम् । आस्थायाऽऽयाहि नो बलिम्, इति ।

हे कुबेर वैश्रवणसहितस्त्वं रथमास्थाय नो बलिमस्मदीयां पूजां प्रत्यायाह्यागच्छ । कीदृशं रथम्, सहस्रवन्धुरमराणां सहस्रं यस्मिंश्चक्रे तच्चक्रं सहस्रवत्तद्युक्ता धूर्यस्य

---

१ ग. °स्रव-धु° । २ ख. ग °स्रव-धु° ।

रथस्य सोऽयं सहस्रवन्धुरस्तादृशम्, पुरुश्चक्रं बहुचक्रोपेतम्, सहस्राश्वं सहस्रसंख्याकैरश्वैरुपेतम् । तस्य रथस्योपमानमुच्यते— त्वाष्ट्रीं मायां यथा त्वष्ट्रा निर्मिता मायाऽऽश्चर्यकरी तद्वदाश्चर्यकरम् ।

अथ तृतीयामाह—

यस्मै भूतानि बलिमावहन्ति । धनं गावो हस्तिहिरण्यमश्वान् (१) ।
असाम सुमतौ यज्ञियस्य । श्रियं विभ्रतोऽन्नमुखीं विराजम्, इति ।

यस्मै कुबेराय भूतानि सर्वे प्राणिनो बलिं पूजामावहन्ति संपादयन्ति । कीदृशं बलिम्, धनादिरूपम् । धनं माणिमुक्तादिकम् । हस्तिभिः सहितं हिरण्यं हस्तिहिरण्यम् । यज्ञियस्य बलिना पूजनीयस्य तस्य कुबेरस्य सुमतावनुग्रहबुद्धावसामावस्थिता भूयास्म । कीदृशस्य कुबेरस्य, अन्नमुखीमन्नप्रधानां विराजं विविधं राजमानां श्रियं संपदं विभ्रतो धारयतः ।

अथ चतुर्थीमाह—

सुदर्शने च क्रौञ्चे च । मैनाके[1] च महागिरौ ।
सतद्वाट्टारगमन्ता । सऽहार्यं नगरं तव, इति ।

सुदर्शनादिनामकास्त्रयः पर्वतास्तस्मिन्नेकैकस्मिन्महागिरौ यत्तव नगरं तत्संहार्यम् । तत्परित्यज्यास्मदनुग्रहार्थमत्राऽऽगच्छेत्यर्थः । कीदृशं नगरम्, सतद्वाट्टारगमन्ता । सतं शतं द्वा द्वाराण्यट्टारः (राः) कक्ष्याविशेषा गमन्ता गमनयोग्या रथ्याविशेषाः, शतसंख्याका द्वारविशेषाः कक्ष्याविशेषा रथ्याविशेषाश्च यस्मिन्नगरे तन्नगरं सतद्वाट्टारगमन्ता ।

श्रोतृबुद्धिसमाधानार्थं पूर्वोत्तरग्रन्थौ विभजते—

इति मन्त्राः । कल्पोऽत ऊर्ध्वम्, इति ।

इत्येवमुक्ता अद्भ्यस्तिरोधेत्यादयो नगरं तवेत्यन्ता मन्त्रा द्रष्टव्याः । अत ऊर्ध्वं यदि बलिं हरेदित्यादिग्रन्थः कल्पः, अनुष्ठानविधायकब्राह्मणरूपः ।

तद्विधां दर्शयति—

यदि बलिꣳ हरेत् । हिरण्यनाभये वितुदये कौबेरायायं बलिः (२) ।
सर्वभूताधिपतये नम इति । अथ बलिꣳ हृत्वोपतिष्ठेत, इति ।

---

१ क. मैनाके ।

यदिशब्दप्रयोगाद्बलिहरणं वैकल्पिकमिति गम्यते । तस्मिन्बलिहरणपक्षे **हिरण्ये**-त्यादिमन्त्रेण बलिं हृत्वा वक्ष्यमाणमन्त्रेणोपस्थानं कुर्यात् । कुबेरस्य संबन्धी वैश्रवणः कौबेरः । हिरण्यं नाभौ यस्यासौ हिरण्यनाभिः, सर्वाभरणभूषित इत्यर्थः । हिरण्यं दुर्लभं कुर्वन्सर्वप्राणिनो विशेषेण तुदति व्यथयतीति **वितुदिः** । यथोक्तगुणयुक्ताय वैश्रवणायायं **बलिर्मया** दत्तः, सर्वप्राणिनामधिपतये तस्मै वैश्रवणाय **नमोऽस्तु** । इत्युक्तो बलिहरणमन्त्रः ।

क्षत्रं क्षत्रं वैश्रवणः । ब्राह्मणा वयꣳ स्मः । नमस्ते अस्तु
मा मा हिꣳसीः । अस्मात्प्रविश्यान्नमद्धीति, इति ।

अत्रैकः क्षत्रशब्दः क्षतात्त्रायत इति व्युत्पत्त्या पालकत्वं ब्रूते । द्वितीयः क्षत्रशब्दो जातिवाची । अयं **वैश्रवणः क्षत्रं क्षत्रं** पालकः क्षत्रियत्वजातियुक्तश्च । **वयं** तु यजमाना ब्राह्मणजातियुक्तास्तेन पालनीयाः **स्मः**, अतस्ते वैश्रवणाय **नमोऽस्तु मा मा हिꣳसीः** हिंसितं मा कुरु । यस्माद्वयं ब्राह्मणत्वेन नमस्कर्तृत्वेन च त्वया पालनीया **अस्मात्**कारणादत्र बलिस्थाने **प्रविश्यान्नम**स्माभिर्दत्तं बलिरूपम**द्धि** । भक्षय **इति**, असावुपस्थानमन्त्रः ।

अग्निस्थापनं विधत्ते—

अथ तमग्निमादधीत । यस्मिन्नेतत्कर्म प्रयुञ्जीत, इति,

यस्मिन्नग्नौ वैश्रवणबल्याख्यमेतत्कर्म प्रयुज्यते **तमग्निं** पूर्वोक्तोपस्थानानन्तरं भूमौ स्थापयेत् ।

स्थापनीयं मन्त्रं दर्शयति—

तिरोधा भूः । तिरोधा भुवः (३) ।
तिरोधा स्वः । तिरोधा भूर्भुवः स्वः ।
सर्वेषां लोकानामाधिपत्ये सीदेति, इति ।

हेऽग्ने **भूस्तिरोधा** भूर्लोकं स्वतेजसाऽऽच्छादय, एवं **भुवर्लोकस्वर्लोकावेकैकशः**, समुदायरूपेणापि सर्वान्व्याप्नुहि । व्याप्य च **सर्वेषामेतेषां लोकानामाधिपत्येऽधि**कपालननिमित्तं **सीदात्रोपविश** । इति अयमग्निस्थापनमन्त्रः ।

समिन्धनं विधत्ते—

अथ तमग्निमिन्धीत । यस्मिन्नेतत्कर्म प्रयुञ्जीत, इति ।

---

१ ख. ग. °यं ब्रा° । २ क. °रु । यतोऽस्मा° । ख. ग. °रुतो य° । ३ क. °वं भूर्लोकावे° । ग. °वं भूर्लोकः स्वर्लोको वैकै । ४ क. °र्वेषां लो° ।

पूर्ववद्व्याख्येयम्।

समिन्धनमन्त्रान्दर्शयति—

तिरोधा भूः स्वाहा। तिरोधा भुवः स्वाहा। तिरोधा
स्वः स्वाहा। तिरोधा भूर्भुवः स्वः स्वाहा, इति।

स्वाहा समिदियं स्वाहुतमस्तु। अन्यत्पूर्ववत्।

अस्य वैश्रवणयज्ञस्य कालविशेषं दर्शयति—

यस्मिन्नस्य काले सर्वा आहुतीर्हुता भवेयुः (४)।
अपि ब्राह्मणमुखीनाः। तस्मिन्नह्नः काले
प्रयुञ्जीत। परः सुप्तजनाद्वेपि, इति।

अस्याऽऽरुणकेतुकस्य संबन्धिनो(न्यो) **ब्राह्मणमुखीनाः** "रुद्रो वा एष यदग्निः स एतर्हि जातः" इत्यादिब्राह्मणप्रतिपादिताः शतरुद्रीयादयः **सर्वा** अप्याहुतयो **यस्मिन्काले हुता भवेयुः**, तदहःसंबन्धिनि **तस्मिन्काले** वैश्रवणयज्ञं **प्रयुञ्जीत। वेपि**, अपि वा **सुप्तजनात्परः** सर्वेषु जनेषु सुप्तेषूत्तरस्मिन्काले।

एतदीयग्रन्थाध्ययने नियमं दर्शयति—

मा स्म प्रमाद्यन्तमाध्यापयेत्। सर्वार्थाः
सिध्यन्ते। य एवं वेद। क्षुध्यन्निदम-
जानताम्। सर्वार्था न सिध्यन्ते, इति।

प्रमाद्यन्तं प्रमादयुक्तं दुर्वृत्तं पुरुषम्। इदं वैश्रवणबलिकर्म गुरुमुखादजानतां पुरुषाणां क्षुध्यन्क्षुध्यतामन्नाभावेन दरिद्राणां न केऽपि कामाः सिध्यन्ति, अन्नमपि तैर्न लभ्यते कुतोऽन्यत्का(का)मप्राप्तिरित्यर्थः।

अथ बलिहरणमन्त्रं दर्शयति—

यस्ते विघातुको भ्राता। ममान्तर्हृदये
श्रितः (५)। तस्मा इममग्रपिण्डं जुहोमि।
स मेऽर्थान्मा विबंधीत्। मयि स्वाहा, इति।

हे कुबेर **विघातुकः** सर्वेषां हिरण्यलाभविघ्नकरणशीलस्ते तव **यो भ्राता** वैश्रवणः **सोऽयं ममान्तर्हृदये** ध्येयत्वेनाऽऽश्रितः। **तस्मै** वैश्रवणायेममग्रपिण्डं श्रेष्ठपिण्डं

---

१ ख. ग °बन्धे ब्रा°। २ क. °तां क्षु°। ३ क. °ण्डं जु°।

जुहोमि । स वैश्रवणो मेऽर्थान्मदीयान्हिरण्यलाभादीन्पुरुषार्थान्मा विवधीन्मा विनाशयतु, किंतु मयि संपादयतु तदर्थमिदं स्वाहुतमस्तु ।

अथोपस्थानमन्त्रमाह—

राजाधिराजाय प्रसह्यसाहिने । नमो वयं वैश्रवणाय कुर्महे । स मे कामान्कामकामाय मह्यम् । कामेश्वरो वैश्रवणो ददातु । कुबेराय वैश्रवणाय । महाराजाय नमः । केतवो अरुणासश्च । ऋषयो वातरशनाः । प्रतिष्ठाः शतधा हि । समाहितासो सहस्रधायसम् । शिवा नः शंतमा भवन्तु । दिव्या आप ओषधयः । सुमृडीका सरस्वति । मा ते व्योम संदृशि (६), इति ॥

अश्वान्बलिर्धुवो भवेयुः श्रितश्च सप्त च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके प्रथमप्रपाठक एकत्रिंशोऽनुवाकः ॥ ३१ ॥

राज्ञां सर्वेषामधिकत्वेन यो राज्य(जा) स्वामी सोऽयं **राजाधिराजस्तस्मै**, बलात्कारेण सर्वेषां लाभानां योऽभिभविता प्रतिबन्धकः स· **प्रसह्यसाही तस्मै, वैश्रवणाय वयं** यजमाना **नमस्कुर्महे । कामेश्वरः** सर्वेषां कामानां स्वामी स **वैश्रवणः कामकामाय** बलभोगार्थिने मह्यं मे **कामान्**मदपेक्षितान्सर्वान्भोगान्**ददातु** । कुबेररूपाय **महाराजाय वैश्रवणाय नमोऽस्तु** केतव इत्यादिकं पूर्वमेव (तै० आ० अ० २१) व्याख्यातम् । अस्य च वैश्रवणयज्ञस्याऽऽरुणकेतुकान्तः प्रयोगो बहिश्च स्वातन्त्र्येण प्रयोग इत्युभयप्रकारो विद्यते । तच्च सर्वाहुतिहोमान्ते **बौधायनेन** दर्शितम्—"वैश्रवणयज्ञो ब्राह्मणेन व्याख्यातोऽन्नकामस्य सर्वकामस्य वा पर्वणि पर्वणि वैश्रवणयज्ञः । सोत्तरवेदिषु क्रतुषु चिन्वीतेति यथाब्राह्मणम् " इत्यादि ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये प्रथमप्रपाठक एकत्रिंशोऽनुवाकः ॥ ३१ ॥

अथ प्रथमे द्वात्रिंशोऽनुवाकः ।

अथाऽऽरुणकेतुकचयनाङ्गव्रतं विधत्ते—

संवत्सरमेतद्व्रतं चरेत् । द्वौ वा मासौ, इति ।

यो ह्यारुणकेतुकमग्निं चेतुमिच्छति सोऽधिकारसिद्ध्यर्थमादौ संवत्सरं वा मासद्वयं वा वक्ष्यमाणं व्रतमनुतिष्ठेत्।

व्रतशब्दार्थमाह—

नियमः समासेन, इति।

योऽयं नियमस्वीकारः, तदेव व्रतम्। एतच्च समासेन संक्षेपेण दर्शितम्। अथ विस्तारं प्रतिज्ञापूर्वकं दर्शयति—

तस्मिन्नियमविशेषाः। त्रिषवणमुदकोपस्पर्शी। चतुर्थकालपानभक्तः स्यात्। अहरहर्वा भैक्षमश्नीयात्। औदुम्बरीभिः समिद्भिरग्निं परिचरेत्। पुनर्मा मैत्विन्द्रियमित्येतेनानुवाकेन। उद्धृतपरिपूताभिरद्भिः कार्यं कुर्वीत (१)। असंचयवान्। अग्नये वायवे सूर्याय। ब्रह्मणे प्रजापतये। चन्द्रमसे नक्षत्रेभ्यः। ऋतुभ्यः संवत्सराय। वरुणायारुणायेति व्रतहोमाः। प्रवर्ग्यवदादेशः। अरुणाः काण्ड ऋषयः, इति।

नियमो व्रतमित्येवं सामान्यलक्षणमुक्तं तस्मिन्व्रतेऽनुष्ठेया नियमविशेषाः क्रमेणोच्यन्ते—सूयते सोमोऽत्रेति सवनं तत्त्रिविधं प्रातर्मध्यंदिनसायंकालभेदात्। तस्मिन्सवनत्रय उदकमुपस्पृशेत्, स्नायादित्यर्थः। पानं क्षीरादिविषयं भक्तमन्नं तदुभयमपि प्रतिदिनं कालद्वये स्वी क्रियते। तस्माद्द्विरह्नो मनुष्येभ्य उपहियते। प्रातश्च सायं चेत्याम्नातत्वात्। तथा प्रातर्भुक्तवतः सायं द्वितीयः कालः, परेद्युः प्रातःकालस्तृतीयः, तत्रैव सायं चतुर्थः कालः, मध्यवर्तिनौ द्वितीयतृतीयकालौ परित्यज्य तस्मिंश्चतुर्थकाले पानं भक्तं च यस्यासौ चतुर्थकालपानभक्तः, तथाविधो भवेत्। अथवा प्रतिदिनं भिक्षित्वा तदन्नं भुञ्जीत, सोऽयं पक्षोऽशक्तविषयः। उदुम्बरवृक्षजन्याभिः समिद्भिरग्निपरिचर्यां कुर्यात्। तस्मिन्समिदाधाने मन्त्राः 'पुनर्मा मैत्विन्द्रियम्' इत्येतेनानुवाकेनोक्ताः। स चानुवाकः पूर्वमेव व्याख्यातः। आपो नदीतडागादिभ्यः पात्रेणोद्धृता वस्त्रेण शोधिताश्च ताभिः पादप्रक्षालनाचमनादिकं कुर्यान्न तु नद्यादौ। यत्किंचित्संचयो भिक्षापात्रादन्यत्र भक्ष्यादिवस्तुसंग्रहः, तद्युक्तो न भवेत्। प्रतिदिनमग्न्यादिभ्यो देवताभ्यो होमं कुर्यात्। व्रतहोमनियुक्तत्वात्स्वाहाकारोऽर्थलभ्यः।

---

१ ग. यमः स्वी°। २ ख. ग. त्येव सा। ३ ख. यत्कार्यं सं°। ग. यत्कार्यं सं°।
४ ख. ग. °दित्योऽ(भ्योऽ)रुण(णा)न्ताभ्यो।

ततोऽग्नये स्वाहा वायवे स्वाहेत्यादयो मन्त्राः संपद्यन्ते । आदिश्यते विधीयत इत्यादेशोऽनुष्ठेयोऽर्थः, स च प्रवर्ग्यवदत्रावगन्तव्यः, प्रवर्ग्याध्ययनादौ ये धर्मास्तेऽत्राप्यनुष्ठेयाः । ते च प्रवर्ग्यधर्मा आपस्तम्बेन सूत्रिताः—" संवत्सरमेतद्व्रतं चरेदेतास्मिन्संवत्सरे-ऽधीयीत यद्येतस्मिन्संवत्सरे नाधीयीत यावदध्ययनमेतद्व्रतं चरेत्संवत्सरेऽखिले छदिर्देशेऽग्निमुपसमाधाय संपरिस्तीर्य पूर्ववद्विसृज्य मदन्तीरुपस्पृश्य " इत्यादयः । तानेतान्धर्मानाचरेत् । अरुणाख्या [ये] अत्र काण्ड ऋषयस्तेऽपि होतव्या इत्यर्थः । अथाऽऽरुणकेतुकचयनप्रतिपादकस्य ग्रन्थस्याध्ययने नियमान्विधत्ते—

अरण्येऽधीयीरन् । भद्रं कर्णेभिरिति द्वे जपित्वा (२) । महानाम्नीभिरुदकꣳ संस्पर्श्य । तमाचार्यो दद्यात् । शिवा नः शंतमेत्योषधीरालभते । सुमृडीकेति भूमिम् । एवमपवर्गे । धेनुर्दक्षिणा । कꣳसं वासश्च क्षौमम् । अन्यद्वा शुक्लम् । यथाशक्ति वा । एवꣳ स्वाध्यायधर्मेण । अरण्येऽधीयीत । तपस्वी पुण्यो भवति तपस्वी पुण्यो भवति (३), इति ॥

कुर्वीत जपित्वा स्वाध्यायधर्मेण द्वे च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके प्रथमप्रपाठके द्वात्रिंशोऽनुवाकः ॥ ३२ ॥

सोऽयं ग्रन्थोऽरण्य एवाध्येतव्यः, न तु ग्रामे । अध्ययनोपक्रमे शान्त्यर्थं **भद्रं कर्णेभिरिति** द्वे ऋचौ जपेत् । आपमापामित्येताभिर्**महानाम्नीभिर्**ऋग्भिरध्येतारं माणवकमुदकं स्पर्शयेत् । ततस्तं माणवकमाचार्यो दद्यात्, व्रताय नियुञ्जीत । **शिवा न** इति मन्त्रेणौषधीः स्पृशेत् । **सुमृडीका** सरस्वतीति मन्त्रेण भूमिं स्पृशेत् । यथाऽध्ययनस्योपक्रमे सर्वमेतदनुष्ठितमेवमध्ययनस्यावसानेऽपि सर्वमेतदनुतिष्ठेत् । कृत्स्नाध्ययनस्य समाप्तावाचार्याय **धेनुर्दक्षिणा** देया, भोजनार्थं कांस्यपात्रं देयम्, प्रावरणार्थं **क्षौमं** वस्त्रं देयम्, तदशक्तावन्यत्कार्पासमयं **शुक्लं** वस्त्रं देयम्, अत्यन्तमशक्तेन **यथाशक्ति** किमपि देयम्, **एवमेवमु**क्तेनाध्ययनधर्मेण युक्तः सन्नरण्ये गुरुमुखाद्ग्रन्थमधीयीत । एवमधीयानो व्रतनियमानुष्ठानात्तपोयुक्तो भवति । अभ्यासोऽयं मङ्गलार्थः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये प्रथमप्रपाठके द्वात्रिंशोऽनुवाकः ॥ ३२ ॥

---

१ ख. ग. °रे पर्यवेते छादिर्दर्शेऽग्नि° । २ ख. ग. °र्मान्वा च° । ३ ख. ग. °पादितस्य ।

[+ भद्रꣳ स्मृतिः साकंजानामक्ष्यतिताम्राण्यंत्यूर्ध्वाक्ष आरोगः केदमग्निश्च संहस्रवृत्पवित्रवन्त आतंनुष्वाष्टयोनीं योऽसावथाऽऽदित्यस्याऽऽरोगस्याथ वायोरथाग्नेर्दक्षिणपूर्वस्यामिन्द्रघोषा व आपंमापां योऽपामापो वै चतुष्टय्यो जानुदघ्नीमाग्निं प्रणीयेमा नुकं-विशीर्ष्णी पर्जन्याय पुनरुद्यः संवत्सरं द्वात्रिꣳशत् ॥ ३२ ॥
भद्रं ज्योतिषाऽप्रतिरथेन तस्मिन्राजानं कश्यपात्सहस्रवृदियं नपुꣳसकम*ष्टयोनिमवपतन्तानामायतनवान्त्सतो बन्धुं ता उत्तरतो वज्रमेव भ्रातृव्येभ्यः पुनस्त्रिꣳशदुत्तरशतम् ॥ १३० ॥]

अथ शान्तिः ।

भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिः । व्यशेम देवहितं यदायुः ॥ स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु ॥

ॐ शान्तिः शान्तिः शान्तिः ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके प्रथमः प्रपाठकः समाप्तः ॥ १ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इति श्रीमद्वीरबुक्कणसाम्राज्यधुरंधरश्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये प्रथमः प्रपाठकः समाप्तः ॥ १ ॥

+ एतच्चिह्नान्तर्गत क. ख. पुस्तकयोर्नास्ति । भद्रमित्यारभ्य द्वात्रिंशदित्यन्तं प्रपाठकगतानुवाकानामाद्यप्रतीकदर्शनम् । अग्रे च भद्रमित्यारभ्य शतमित्यन्तं प्रपाठकगतवाक्यशतकाद्यप्रतीकप्रदर्शनम् ।

---

* योनिमथाग्नेर्य एवं वेद ये नखा असौ वै पल्वल्या अमृतं वा अद्भ्यो नवत्रिꣳशोत्तरशतम् ॥ १२९ ॥

अथ कृष्णयजुर्वेदीयतैत्तिरीयारण्यके द्वितीयः प्रपाठकः ।

(तत्र प्रथमोऽनुवाकः ।)

हरिः ॐ ।

नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः ।
नमो वाचे नमो वाचस्पतये नमो विष्णवे बृहते करोमि ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

इति शान्तिः ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥
प्रपाठके हि प्रथमे वह्निरारुणकेतुकः ।
सम्यक्प्रोक्तो द्वितीये स्यात्स्वाध्यायब्राह्मणाभिधा ॥

तत्राऽऽद्येनुवाकेऽध्ययनाङ्गत्वेन यज्ञोपवीतं विधातुं तत्प्रशंसार्थमादावुपाख्यानमाह—

ॐ सह वै देवानां चासुराणां च यज्ञौ प्रततावास्तां वयꣳस्वर्गं लोकमेष्यामो वयमेष्याम इति तेऽसुराः संनह्य सहसैवाऽऽचरन्ब्रह्मचर्येण तपसैव देवास्तेऽसुरा अमुह्यꣳस्ते न प्राजानꣳस्ते पराभवन्ते न स्वर्गं लोकमायन्प्रसृतेन वै यज्ञेन देवाः स्वर्गं लोकमायन्नप्रसृतेनासुरान्पराभावयन्—, इति ।

वयमेवाऽऽधिपत्यनिमित्तं स्वर्गं गमिष्याम इत्येवं देवा यदा यज्ञे प्रवृत्तास्तदानीमेवासुरा अपि तथैवाभिप्रेत्य यज्ञे प्रवृत्ताः, तावुभौ यज्ञौ प्रततौ विस्तीर्णावास्ताम् । तदानीं तथाविधा असुराः संनह्य कृतसंनाहाः सहसैव भुजबलेन शास्त्रेणैवाऽऽचरन्यज्ञमारब्धवन्तः, ते मौर्ख्याद्ब्रह्मचर्यादिनियमं चानादृतवन्तः । देवास्तु ब्रह्मचर्यात्सम-

---

१ क. 'तीयस्या । २ क. 'भिधो । त°. ग 'भिधे. त । ३ ख. °माह° । ४ ग. °बलमात्रेणै° । ५ ग. °मं नाऽऽदृ° ।

स्ततपसा युक्ताः सन्तो यथाशास्त्रमनुष्ठितवन्तः । ते मूर्खा असुरा अमुह्यन्मौर्ख्यपारवश्येन मोहं प्राप्ताः, मूढाः सन्तः कर्तव्याकर्तव्यं किमपि न प्राजानन्। ततो *यथाशास्त्रानुष्ठानाभावात्स्वर्गं न प्राप्ताः। देवास्तु प्रसृतेनैव यज्ञेन स्वर्गं प्राप्ताः, अप्रसृतेन यज्ञेन युक्तानसुरान्पराभावयन्।

अथ प्रसृताप्रसृतयोः स्वरूपं विभजते—

प्रसृतो ह वै यज्ञोपवीतिनो यज्ञोऽप्रसृतोऽनुपवीतिनो यत्किंच ब्राह्मणो यज्ञोपवीत्यधीते यजत एव तत्—, इति ।

यज्ञोपवीतयुक्तस्य यो यज्ञः सोऽयं गुणाधिक्यान्प्रसृतः प्रकर्षेण वृत्त इत्युच्यते। **अनुपवीतिनो** यज्ञोपवीतरहितस्य यज्ञो गुणहीनत्वादप्रसृत इत्युच्यते । **किंच ब्राह्मणो** यज्ञोपवीतयुक्तः सन्यत्किमप्यधीते तत्सर्वं यागानुष्ठानसमं भवति ।

तदेवं यज्ञोपवीतं प्रशस्याध्ययनोपयोगं वदन्यज्ञानामङ्गत्वेन विधत्ते—

तस्माद्यज्ञोपवीत्येवाधीयीत याजयेद्यजेत वा यज्ञस्य प्रसृत्यै, इति ।

प्रसृतिः प्रकृष्टगुणयुक्तत्वम् ।

यज्ञोपवीतसाधनं द्रव्यं विधत्ते—

अजिनं वासो वा दक्षिणत उपवीय—, इति ।

कृष्णाजिनवस्त्रयोरन्यतरद्द्रव्यं दक्षिणभागे लम्बमानं कृत्वाऽधीयीतेत्यर्थः । एवमध्ययनादावनेनैव वाक्येन विहितस्यापि यज्ञोपवीतस्य दर्शपूर्णमासप्रकरणे निवीतं मनुष्याणामित्यत्र पुनर्विधानं तदतिक्रमे तत्रत्याविशेषप्रायश्चित्तार्थम् ।

यज्ञोपवीतप्रसङ्गात्त्रायाणामपि लक्षणं दर्शयति—

दक्षिणं बाहुमुद्धरतेऽवधत्ते सव्यमिति यज्ञोपवीतमेतदेव विपरीतं प्राचीनावीतं संवीतं मानुषम् ॥ १ ॥, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके द्वितीयप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

दक्षिणं बाहुमूर्ध्वं धृत्वा सव्ये बाहौ लम्बमाने सति यद्वेष्टनं तद्यज्ञोपवीतम् ।

---

* ते पराभवन्नित्यस्य व्याख्यानं यथाशास्त्रानुष्ठानाभावादिति ।

---

१ क. ख. °नास्व° । २ क. ख. विवक्ष्यते । ३ ग. योऽयं य° । ४ क. प्रवृत्त । ५ क. ख. °गं जमथम्य° । ६ ख. °नं वि° । ग. उपवीत । ८ क. ख. °मने° । ९ क. वद्यते । क. वद्यत्ते । ग. वधते । १० क. कृत्वा ।

एतदेव विपरीतं सव्यबाहोरूर्ध्वं धारणं दक्षिणबाहोर्लम्बमानं चेद्भवति तदा वेष्टनं **प्राचीनावीतमित्युच्यते** । बाह्वोरुभयोरप्यधो लम्बमानयोरसद्भ्ये[1] [यद्वेष्टनं तत् ;] **संवीतं** तदेतन्मानुषं मनुष्याणामृषीणाम्[2], यज्ञोपवीतं देवानां यथा वा **प्राचीनावीतं** पितॄणां तद्वत् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये द्वितीयप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

अथ द्वितीयप्रपाठके द्वितीयोऽनुवाकः ।

प्रथमे यज्ञोपवीतविधानमुक्तम् । द्वितीये संध्योपासनविधानमुच्यते । तत्प्रशंसार्थमादावाख्यायिकामाह—

रक्षांसि ह वा पुरोनुवाके तपोग्रमतिष्ठन्त तान्प्रजापतिर्वरेणोपामन्त्रयत तानि वरमवृणीताऽऽदित्यो नो योद्धा इति तान्प्रजापतिरब्रवीद्योधयध्वमिति तस्मादुत्तिष्ठन्तꣳ ह वा तानि रक्षाꣳस्यादित्यं योधयन्ति यावदस्तमन्वगात्तानि ह वा एतानि रक्षाꣳसि गायत्रियाऽभिमन्त्रितेनाम्भसा शाम्यन्ति—, इति ।

हवाशब्दः प्रसिद्ध्यर्थः । **पुरोनुवाकः** पूर्वकालः[3], पुर इत्येव पूर्वैरनूच्यते न त्विदानीमिति वा पैङ्ग्यादिति वोच्यते । एतादृशे पूर्वकाले रक्षांसि खलूग्रं श्रेष्ठं तीव्रं **तपोऽतिष्ठन्त** कृतवन्तः । तेन तपसा तुष्टः प्रजापतिस्तान्रक्षोविशेषान्**वरेणोपामन्त्रयतोपच्छन्दितवान्**, वरं वृणीध्वमित्युक्त्वा तान्परितोष्य तपसो निवारितवान् । **तानि** रक्षांस्यादित्यो नोऽस्माकं **योद्धा** भवत्वित्येवं **वरमवृणीत** । प्रजापतिस्तानादित्येन सह युद्धं कुरुतेत्यनुज्ञां दत्तवान् । तस्मात्कारणात्तानि रक्षांसि, **उत्तिष्ठन्तं ह वा उद्यन्तमेवाऽऽदित्यं योधयन्ति** युद्धे प्रवर्तयन्ति । यावदयमादित्योऽस्तमन्वगादस्तं प्राप्नोति उदयमारभ्य तावदादित्येन सह युद्धं कुर्वन्ति । तदा च युद्धे प्रवृत्तानि **तानि** रक्षांसि तत्सवितुर्वरेण्यमित्यनया **गायत्र्याऽभिमन्त्रितेनैव शाम्यन्ति** न त्वन्येन केनापि ।

---

१ ग. °द्वयसमं भ°। २ क. °यं समं निर्व°। ३ ग. °धीनां च. ग° ४ क. °णाम्,स्वं यथोप°। ख. °णाम्, सव्यं यथोप°। ग. °था प्र°। ६ ख °लःपूर्वः पुर इत्येव पूर्वकाल उच्यते। अनुवाकशब्देन निशेति। अवरेणानुवाकशब्देन दिवस उच्यते। ए°। ७ क. परस्तादि°। ८ क. ख. °नि च र°। ९ क. ख. वदादि°। १० क. ख. तथा। ११ क. °यत्रियाऽभि°।

इत्यनेनाऽऽख्यानेन जलं प्रशस्यार्घ्यमभिधत्ते—

तदु ह वा एते ब्रह्मवादिनः पूर्वाभिमुखाः संध्यायां गायत्रि-याऽभिमन्त्रिता आपः ऊर्ध्वं विक्षिपन्ति ता एता आपो वज्री-भूत्वा तानि रक्षाꣳसि मन्देहारुणे द्वीपे प्रक्षिपन्ति—, इति ।

यस्मादनेन जलेन रक्षसां शान्तिः, तदु ह वै तस्मादेव कारणादेते लोके दृश्यमाना **ब्रह्मवादिनो** वेदस्य वक्तारः **संध्यायां** प्रातःसंध्याकाले **पूर्वाभिमुखाः** सन्तो गायत्र्याऽभिमन्त्रितं जलमूर्ध्वं **विक्षिपन्ति** प्रक्षिपेयुरित्यर्थः । ताश्च विक्षिप्ता **आपो** गायत्रीसामर्थ्याद्वज्ररूपं प्राप्य तान्यादित्ययुद्धार्थमागतानि **रक्षांसि मन्देहनामकानां** रक्षसां स्वभूते कस्मिंश्चिदरुणनाम्नि द्वीपे **प्रक्षिपन्ति** ।

अथ प्रदक्षिणावृत्तिं विधत्ते—

यत्प्रदक्षिणं प्रक्रमन्ति तेन पाप्मानमवधून्वन्ति—, इति ।

प्रदक्षिणाप्रारम्भमावर्तनं प्रक्रमेयुः कुर्युः । तेन च पापक्षयो भवति ।

अथ ध्यानं विधत्ते—

उद्यन्तमस्तं यन्तमादित्यमभिध्यायन्कुर्वन्ब्राह्मणो विद्वान्त्सकलं भद्रमश्नुतेऽसावादित्यो ब्रह्मेति—, इति ।

अयं परिदृश्यमान **आदित्यो ब्रह्मेति** शास्त्रतो **विद्वान्पुमानुद्यन्तमस्तं यन्तं वाऽऽदित्यं** तथा ध्यायन्प्रदक्षिणं च कुर्वन्वर्तते स पुमान्**सकलं भद्रमश्नुते** श्रेयः प्राप्नोति ॥

वेदनं प्रशंसति—

ब्रह्मैव सन्ब्रह्माप्येति य एवं वेद ॥ २ ॥, इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके द्वितीयप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

यः पुमानादित्यो ब्रह्मेति वेद स पुमान्पूर्वमजानानोऽपि स्वयं वस्तुतो **ब्रह्मैव** सन्प्रासाद्वेदनादज्ञानापगमे सति स्वानुभवेनापि **ब्रह्माऽऽप्नोति** ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयारण्यकभाष्ये द्वितीयप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

---

१ ख. ग. प्रशंस्या° । २ क. °यत्रियाऽभि° । ३ ग. °क्षिणं प्रा° । ४ क. °नं क्र° ५ ग. °युः । ते° । ६ क. ख. °ति । ब° ।

अथ द्वितीये तृतीयोऽनुवाकः ।

द्वितीये संध्यावन्दनमुक्तम् । तृतीयादिषु चतुर्ष्वनुवाकेषु पापक्षयार्थं कूष्माण्डहोमाङ्गभूता मन्त्रा उच्यन्ते । तत्र तृतीयानुवाकगतास्वृक्षु प्रथमामाह—

यदेवा देवहेळनं देवासश्चकृमा वयम् । आदित्यास्तस्मान्मा मुञ्चतर्तस्यर्तेन मामित, इति ।

देवासो देवनशीला **आदित्या** अदितेः पुत्रा हे **देवा** देवहेडनं देवानां क्रोधकारणं यत्कर्म **वयं चकृम**, तस्मादपराधाद्यूयं **मुञ्चत** । अपि **चर्तस्य** यज्ञस्य संबन्धिना **ऋतेन** सत्येन होमेन **मां** यूयमित प्राप्नुत ।

अथ द्वितीयामाह—

देवा जीवनकाम्या यद्वाचाऽनृतमूदिम ।
तस्मान्न इह मुञ्चत विश्वे देवाः सजोषसः, इति ।

हे **देवा** वयं **जीवनकाम्या** जीवनमात्मन इच्छन्तो **यदनृतं वाचोदिम** राजसेवादौ तत्प्रियार्थमनृतमुक्तवन्तः, **सजोषसः** परस्परमस्माभिश्च समानप्रीतियुक्ता हे **विश्वे देवा इहास्मिन्कर्मण्यनुष्ठिते** सति तस्मात्पापान्नोऽस्मान्**मुञ्चत** ।

अथ तृतीयामाह—

ऋतेन द्यावापृथिवी ऋतेन त्वꣳ सरस्वति ।
कृतान्नः पाह्येनसो यत्किंचानृतमूदिम, इति ।

हे **द्यावापृथिव्यावृतेन** यज्ञेन विगुणेन यत्पापं प्राप्तं तथा हे **सरस्वति, ऋतेन** यत्पापं प्राप्तं **त्वं** द्यावापृथिव्यौ चेत्येता यूयं **कृतात्तस्मादेनसो नोऽस्मान्पाहि** पातेत्यर्थः । किंच **यत्किंचिदनृतमूदिम** वयमुक्तवन्तस्तस्मादप्येनसः पात ।

अथ चतुर्थीमाह—

इन्द्राग्नी मित्रावरुणौ सोमो धाता बृहस्पतिः ।
ते नो मुञ्चन्त्वेनसो यदन्यकृतमारिम, इति ।

यत्पापमन्यकृतमन्येन यज्ञव्यतिरिक्तेन निमित्तेन कृतमारिम वयं प्राप्ताः, तस्मादेनसस्त इन्द्राग्न्यादयो बृहस्पत्यन्ता देवा **नोऽस्मान्मुञ्चन्तु** ।

---

१ क. कूश्माण्ड° । २ क. ख. °कस्थास्वृ° । ३ ख. °हेडनं । ग. °हेलनं । ४ क. ख. °यार्था अनृ° । ५ ग. °थिवी ऋतेन सत्यवचनेन य° । ६ क. ख. यथा । ७ ग °ष्टं त्वमनृतसमानर्तेन वा° । ८ ग °त्येतौ यू° । ९ ग. °हि यूयं पा° ।

अथ पञ्चमीमाह—

सजातश॰सादुत जामिश॰साज्ज्यायसः श॰सा-
दुत वा कनीयसः । अनाधृष्टं देवकृतं
यदेनस्तस्मात्त्वमस्माज्जातवेदो मुमुग्धि, इति ।

सजाताः समानजन्मानो ज्ञातयः समानवयस्काः सखायो वा, तैर्मयि कृतः **शंसः** प्रशंसा स्तुतिः, **उताथवा जामयो** जाया भार्यास्ताभिर्मयि कृतः **शंसः** स्तुतिः, **ज्यायान्** ज्येष्ठो भ्राता तस्य **शंसस्तेन** मयि कृता स्तुतिः, **उत वाऽथवा कनीयान्**कनिष्ठो भ्राता तस्य **शंसस्तेन** मयि कृता स्तुतिः, **तस्मात्**स्तुतिसंघात्प्रमत्तेन मयाऽ**नाधृष्टं** केनापि प्रतीकारेणापरिहार्यं प्रबलं **देवकृतं** देवविषये संपादितं **यदेनः** पापं हे **जातवेदस्त्वं तस्मादस्मात्**पापान्**मुमुग्धि** मां मुक्तं कुरु ।

अथ षष्ठीमाह—

यद्वाचा यन्मनसा बाहुभ्यामूरुभ्यामष्ठीवद्भ्या॰
शिश्नैर्यदनृतं चकृमा वयम् । अग्निर्मा तस्मादेनसो
गार्हपत्यः प्रमुञ्चतु चकृम यानि दुष्कृता, इति ।

वागादिभिर्यदनृतमयुक्तरूपं वयं **चकृम** कृतवन्तः । **वाचा**ऽसत्याभिधानं गुर्वादिषु त्वंकारादि च । **मनसा** परानिष्टचिन्तनम् । **बाहुभ्यां** ब्राह्मणताडनादि । **ऊरुभ्या**मगम्यालिङ्गनादि । **अष्ठीवद्भ्यां** जानुभ्यामगन्तव्यदेशगमनादि । **शिश्नैः** शिश्नेनायोनौ रेतःसेकादि । बहुवचनाच्चक्षुरादीन्द्रियग्रहः । चक्षुषोद्यदर्कदर्शनादि । श्रोत्रेण गुरुदेवादिनिन्दाश्रवणम् । आस्येनाभक्ष्यभक्षणमित्यादि । **तस्मात्**सर्वस्मादेनसोऽ**ग्निर्मा प्रमुञ्चतु । यानि दुष्कृता**न्यान्यप्यन्यानि पापानि **चकृम** तेभ्योऽपि **प्रमुञ्चतु** ।

अथ सप्तमीमाह—

येन त्रितो अर्णवान्निर्बभूव येन सूर्यं तमसो
निर्मुमोच । येनेन्द्रो विश्वा अजहादरातीस्ते-
नाहं ज्योतिषा ज्योतिरानशान आक्षि, इति ।

त्रितो नाम कश्चित्पुरुषः, स च पौरोडाशिककाण्डेऽङ्गारेणोदंकपातनान्निष्पन्न इति श्रुतः । स तृतीयमभ्यपातयत्, ततस्त्रितोऽजायतेति । स च तृती(त्रितो)येन परमेश्वरज्योति-

---

१ ग. प्रका° । २ ख. °षु त्वसत्कारा° । ३ ख. ग. °तानि या° । ४ क. च पुरो° । ५ क. °दकं पा° । ६ ख. ग. °पावना° ।

षाऽर्णवात्समुद्रसमानात्पापान्निर्बभूव निर्मुक्तो बभूव, तथा येन ज्योतिषा परमेश्वरः स्वर्भानुसंज्ञकासुरेणाऽऽपादितात्तमसः सूर्यं निर्मुमोच निर्मुक्तं कृतवान्, इन्द्रः स्वर्गाधिपतिर्येन परमेश्वरज्योतिषा विश्वा अरातीः सर्वानपि शत्रूनजहात्क्षणान्नाशितवान्, तेन ज्योतिषाऽहमानशानः सर्वतो व्याप्नुवञ्ज्योतिराक्षि पारमेश्वरं ज्योतिः प्राप्तवानस्मि ।

अथाष्टमीमाह—

यत्कुसीदमप्रतीत्तं[1] मयेह येन यमस्य निधिना[2] चरामि ।
एतत्तदग्ने अनृणो भवामि जीवन्नेव प्रति तत्ते दधामि, इति।

इहास्मिञ्जन्मनि मया स्वीकृतं यत्कुसीदमृणमप्रतीतं केनाप्यालस्यादिनोत्तमर्णेभ्यो न प्रत्यर्पितम्, यमस्य दुष्टशिक्षाधिकारिणो निधिना[3] निधिस्थानीयेन प्रत्यर्पयितव्येन येनर्णेन युक्तोऽहं चरामि, एतदेतेन होमेन तत्तस्मादृणान्मुक्तोऽहमनृणो भूयासम् । जीवन्नेव ते तव प्रसादा[त्त]त्तादृशं प्रतिदधामि प्रत्यर्पयामि । अनेन होमेन तुष्टस्त्वमस्मिन्नेव जन्मनि मां प्रत्यर्पणसमर्थं कुर्विति भावः ।

अथ नवमीमारभ्यैकविंशतिपर्यन्तानां त्रयोदशानां मन्त्राणां प्रतीकानि दर्शयति—

यन्मयि माता यदा पिपेष यदन्तरिक्षं यदाश-
सातिक्रामामि त्रिते देवा दिवि जाता यदाप ।
इमं मे वरुण तत्त्वा यामि त्वं नो अग्ने सत्वं
नो अग्ने त्वमग्ने अयासि (१), इति ॥
मुमुग्धि सप्त च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके द्वितीयप्रपाठके
तृतीयोऽनुवाकः ॥ ३ ॥

एते मन्त्राः सर्वेऽप्यनेनैवाभिप्रायेणाच्छिद्रकाण्डे यद्देवा देवहेडनमित्यनुवाके व्याख्याताः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयारण्यकभाष्ये द्वितीयप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

---

१ ग. °तीतं म° । २ घ. बलिना । ३ ख. ग. °धिस्था° ।

अथ द्वितीये चतुर्थेऽनुवाकः ।

चतुर्थानुवाकोक्तास्वृक्षु प्रथमामाह—

यददीव्यन्नृणमहं बभूवादित्सन्वा संजगर जनेभ्यः ।
अग्निर्मा तस्मादिन्द्रश्च संविदानौ प्रमुञ्चताम्, इति ।

अहमदीव्यन्पुत्रादिरक्षणरूपं व्यवहारं कर्तुमसमर्थः **सन्यदृणं बभूव** प्राप्तवानस्मि, यद्वा तदृणं **जनेभ्य** उत्तमर्णेभ्योऽदित्सन्प्रत्यर्पयितुमनिच्छन्**संजगर** सम्यग्भक्षितवानस्मि, **अग्निरिन्द्रश्च संविदानौ** परस्परमैक्यं गतौ मां **तस्मादृणान्मुञ्चताम्** ।

अथ द्वितीयामाह—

यद्धस्ताभ्यां चकर किल्बिषाण्यक्षाणां वग्नुमुपजिघ्नमानः ।
उग्रंपश्या च राष्ट्रभृच्च तान्यप्सरसावनुदत्तामृणानि, इति ।

यद्यानि किल्बिषाणि पापानि द्रव्यापहरणादीनि **हस्ताभ्यामहं कृतवानस्मि । अक्षाणां** चक्षुरादीन्द्रियाणां **वग्नुं** वङ्क्तनीयं गन्तव्यं रूपादिविषयमित्यर्थः । तं **विषयमुपजिघ्नमान** उपहतं कुर्वन्नधर्महेतुं कुर्वन्यत्पापं कृतवानस्मि, तानि पापात्मकानि **ऋणान्युग्रंपश्या च राष्ट्रभृच्चेत्येतन्नामधारिण्यावप्सरसावनुदत्तामानुकूल्येन** प्रत्यर्पयताम् । पापरूपमृणं यथाऽस्माकं न भवति तथा कुरुतामित्यर्थः ।

अथ तृतीयामाह—

उग्रंपश्ये राष्ट्रभृत्किल्बिषाणि यदक्षवृत्तपनुदत्तमेतत् । नेन्न
ऋणानृणव इत्समानो यमस्य लोके अधिरज्जुरार्य, इति ।

हे उग्रंपश्ये हे राष्ट्रभृत्किल्बिषाणि ऋणरूपाणि यानि कृतानि, **यदक्षवृत्तं** यद्द्यूते पणादिरूपं प्रतिश्रुतमप्रणीतम् , **एतत्सर्वमनुदत्तमनुकूले** युवामेव दत्तवत्यौ । **ऋणानृणयुक्तान्नोऽस्मान्समानः** सदृश उत्तमर्णोऽधिरज्जुर्बन्धनार्थमधिकरज्जुयुक्तः सन्नायास्मानादाय बद्ध्वा **नेदृणवो** नैर्ऋण्यादृणप्रयुक्तं बन्धनं कुर्यादित्यर्थः । कुत्रेति तदुच्यते—**यमस्य लोके** मरणादूर्ध्वभाविनि गन्तव्ये लोके । द्वितीय **इच्छब्द** एवकारार्थः **सन्नायेत्यनेन** संबध्यते, आदायैव रज्जुभिर्बद्ध्वेत्यर्थः ।

---

१ क. चकार । २ क. °त्तमानुकूल्येन यु° । ३ क. °मानोऽस्मदुत्त° । ख. °मानोऽस्मदधम° । ४ क. °स्मान्नाशाय । ख. °स्मान्नाशनाय । ५ ख. °व नाशयतु ऋण° । ग. °व ऋणयुक ऋण° । ६ क. ख. नाशायैव ।

चतुर्थीमारभ्य नवमीपर्यन्तानां षण्णामृचां प्रतीकानि दर्शयति—

अवते हेळ उदुत्तममिमं मे वरुण तत्त्वा
यामि त्वं नो अग्ने स त्वं नो अग्ने, इति ।

" अवते हेड उदुत्तमम् " इति द्वयं वैश्वानरो न इत्यत्र व्याख्यातम् । "इमं मे वरुण तत्त्वा यामि" इति द्वयमिन्द्रं वो विश्वतस्परीत्यत्र व्याख्यातम् । " त्वं नो अग्ने स त्वं नो अग्ने" इति द्वयमायुष्ट आयुर्दा अग्न इत्यनुवाके व्याख्यातम् ।

अथ दशमीमाह—

संकुसुको विकुसुको निर्ऋथो यश्च निस्वनः ।
तेऽस्मद्यक्ष्ममनागसो दूराद्दूरमचीचतम्, इति ।

संकुसुकः संक्षेपेण परापवादनशीलः, **विकुसुकः** परापवादनस्य विस्तारयिता, **निर्ऋथः** क्लेशस्य प्रापयिता, **यश्च निस्वनः** पिशुनः, ते तादृशा ये वयं स्मोऽस्मत्तेभ्योऽस्मत्तो **यक्ष्मं** रोगनिमित्तं पापम **अनागसः** पापरहिता देवा **दूराद्दूरमतिशयेन** दूरं यथा भवति तथाऽचीचतं चाँतयन्तु, विनाशयन्त्वित्यर्थः ।

अथैकादशीमाह—

निर्यक्ष्ममचीचते कृत्यां निर्ऋतिं च । तेन योऽस्मत्समृच्छातै तमस्मै प्रसुवामसि, इति ।

यक्ष्मं रोगनिमित्तं पापं **निरचीचते** निष्कृष्य निश्चयेन वाँ चातयामि नाशयामि **कृत्यां** पापरोगादिका(कां) [निर्ऋति]मलक्ष्मीं च नाशयामि । **यः** शत्रुरस्मदस्मासु **तेन** कृत्यादिना **समृच्छातै** विनाशमाचरेदस्मै शत्रवे **तं** यक्ष्मादिकं **प्रसुवामसि** प्रेरयामः ।

अथ द्वादशीमाह—

दुःशꣳसानुशꣳसाभ्यां घणेनानुघणेन च ।
तेनान्योऽस्मत्समृच्छातै तमस्मै प्रसुवामसि, इति ।

दुःशंसोऽस्मदीयस्य दुष्कृस्य शंसिता कथयिता, **अनुशंसोऽन्येषामग्रेऽस्मदीयस्य** दुष्कृतस्य पुनः पुनः शंसिता, **घणो** हननशीलः, **अनुघणस्तस्यैवानुविधायकः तेन**

---

१ क. °तीकान्दर्श° । २ ग. हेड । ३ ग. ते येऽस्म° । ४ ग. चीतयन्तु । ५ ग. °ति । तेन य° । ६ ख. ग. वा भक्षया° ।

तैर्दुःशंसादिभिः सहान्योऽपि यः शत्रुरस्मत्समृच्छातै, अस्मासु विनाशमाचरेत्, अस्मै विनाशकाय तं यक्ष्माणमस्माकं प्रसुवामसि प्रेरयामः।

अथ त्रयोदशीमाह—

सं वर्चसा पयसा संतनूभिरगन्महि मनसा
सꣳ शिवेन। त्वष्टा नो अत्र विदधातु
रायोऽनुमार्ष्टु तन्वो १ यद्विलिष्टम् (१),इति।
कृत्यां निर्ऋतिं च पञ्च च॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके द्वितीयप्रपाठके
चतुर्थोऽनुवाकः॥ ४॥

एवमनेन कर्मणा निर्धूतपापा वयं **वर्चसा** बलेन **संपयसा** क्षीरादिना **संतनूभिः** शोभनैः **शरीरैर्मनसा**[3] च **शिवेन** **समगन्महि** संगता भूयास्म। **अत्र** कर्मणि **त्वष्टा** देवो **नो**ऽस्माकं **रायो** धनानि **विदधातु** संपादयतु। यच्च **विलिष्टं** स्वल्पं पापं **तन्वो**ऽस्मच्छरीरस्य संबन्धि विद्यते तदप्यनुमार्ष्टु त्वष्टा शोधयतु॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये द्वितीयप्रपाठके चतुर्थोऽनुवाकः॥ ४॥

अथ द्वितीये पञ्चमोऽनुवाकः।

पञ्चमानुवाकप्रोक्तर्षु प्रथमामाह—

आयुष्टे विश्वतो दधदयमग्निर्वरेण्यः। पुनस्ते
प्राण आयाति परा यक्ष्मꣳ सुवामि ते, इति।

हे यजमान ते तुभ्यं वरेण्यः श्रेष्ठोऽयमग्निर्विश्वत आयुर्दधत्संपूर्णमायुर्दधातु। अपमृत्युना गृहीतोऽपि ते प्राणः पुनरस्यानुग्रहेणाऽऽयाति त्वद्देहे समागच्छतु। ते तव यक्ष्मं व्याधिं परासुवामि[6] विनाशयामि।

अथ द्वितीयामाह—

आयुर्दा अग्ने हविषो जुषाणो घृतप्रतीको घृतयोनिरेधि।
घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभिरक्षतादिमम्, इति।

---

१ ख. यः प्रापितोऽस्म°। २ ग. °न्वो ३अय°। ३ ख. °सा चाऽऽप्यायितेन। ४ क. ख. °प्रोक्तास्वृक्षु प्र°। ५ ख. ग. °त्युनिर्गृ°। ६ क. विनाशयति।

हेऽग्ने त्वमायुर्दाः सन्नेधि यजमानस्याऽऽयुष्प्रदो भव । कीदृशस्त्वम्—**हविषो जुषाण** आज्यं सेवमानः । **घृतप्रतीको** घृतोपक्रमः, आघारादीनां घृतेन हूयमानत्वात् । अवसानेऽपि घृतमेव योनिर्ज्वालोत्पत्तिकारणं यस्यासौ **घृतयोनिः**, तादृशस्त्वम् । **मधु** स्वादुतमं **चारु** शोधितत्वेन निर्मलं **गव्यं** गोसंबन्धि **घृतं पीत्वा पिता पुत्रमिवेमं** यजमानमभितो रक्ष ।

अथ तृतीयामाह—

इमम॑ग्न आयु॒षे वर्च॑से कृधि ति॒ग्ममो॑जो॒ वरु॑ण
स॒ꣳशि॒शाधि । मा॒तेवा॑स्मा अदिते॒ शर्म॑
यच्छ विश्वे॑ देवा॒ जर॑दाष्टि॒र्यथाऽस॑त्, इति ।

हेऽग्ने, इमं यजमानं **कृधि, आयुषे वर्चसे** दीर्घायुषे बलाय च समर्थं कुरु । **हे वरुण तिग्मं** तीक्ष्णमोजो बलं पुनरपि **सꣳशिशाधि** नियमितं कुरु । हेऽदिते पृथिवि **मातेव** मातृवदस्मै सुखं प्रयच्छ । हे **विश्वे देवा** ममायं यजमानो **जरदाष्टिर्यथाऽसत्** तथा कुर्वन्तु (रुत) । जरयाऽष्टिर्व्याप्तिर्यस्यासौ **जरदाष्टिः**, बाल्ये यौवने च मरणरहितः । जरामायुःसंपूर्तिपर्यन्तां यथा व्याप्नोति तथा कुर्वि (रुते) त्यर्थः ।

अथ चतुर्थीमाह—

अग्न॒ आयूꣳ॑षि पवस॒ आसु॑वो॒र्जमि॒षं च
नः । आरे॑ बाधस्व दुच्छु॒नाम्, इति ।

हेऽग्ने, आयूंष्यस्मदीयजीवनानि पवसे यथा वर्धन्ते तथा शोधय । **ऊर्जं** क्षीरादिरसमिषमन्नं **च** नोऽस्माकमासुवाऽऽभिमुख्येन प्रेरय । **दुच्छुनामुपद्रवमारे** दूरे नीत्वा **बाधस्व** विनाशय ।

अथ पञ्चमीमाह—

अग्ने॒ पव॑स्व॒ स्वपा॑ अ॒स्मे वर्चः॑ सु॒वीर्य॑म् ।
दध॒द्रयिं॑ मा॒यि पोष॑म् (१), इति ।

हेऽग्ने शोभनमपः कर्म यस्यासौ **स्वपाः**, तादृशस्त्वमस्मे अस्मदीयं **वर्चो** ब्रह्मवर्चसं **सुवीर्यं** शोभनसामर्थ्यं च **पवस्व** शोधय, वर्धयेत्यर्थः । धनं पुष्टिं च **मयि दधत्** स्थापय ।

---

१ ग. °र्यं घृ° । २ क. ख. °नंदी° । ३ क. ङ. °र्यन्तं य° । ४ ख. ग. शोधयसे । ५ क. ख. °य, अर्पये° ।

अथ षष्ठीमाह—

अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरो-
हितः। तमीमहे महागयम्, इति।

योऽग्निः, ऋषिरतीन्द्रियज्ञानवान्, पवमानः शोधनशीलः, निषादपञ्चमा वर्णाः पञ्चजनास्तेषु भवः पाञ्चजन्यः, पुरोहितः सर्वकर्मसु पुरस्तान्निहितः, तमेवंगुणमग्निं महागयं महागृहमीमहे प्राप्नुमः।

अथ सप्तमीमाह—

अग्ने जातान्प्रणुदा नः सपत्नान्प्रत्यजाताञ्जातवेदो नुदस्व।
अस्मे दीदिहि सुमना अहेळञ्छर्मन्ते स्याम त्रिवरूथ उद्भौ, इति।

हेऽग्ने नोऽस्माकं जातान्सपत्नान्ये पूर्वमुत्पन्नाः शत्रवस्तान्प्रणुद प्रकर्षेण नाशय। हे जातवेदः पूर्वमनुत्पन्ना इतः परमुत्पत्तिप्रसक्तियुक्तास्तानजाताञ्शत्रून्प्र[ति]णु(नु)दस्व, उत्पत्तिप्रतिबन्धेन निराकुरु। सुमना अस्मदनुग्रहचित्तस्त्वमहेडन्नकुध्यन्त्रिवरूथः प्राग्वंशसदोहविर्धानरूपग्रहत्रयोपेत उद्भावुद्भिदनुष्ठेयकर्मोत्पादकः सन्नस्मे दीदिहि, अस्मान्प्रकाशय। ते तव प्रसादाच्छर्मन्स्याम सुखवान्भवेयम्।

अथाष्टमीमाह—

सहसा जातान्प्रणुदा नः सपत्नान्प्रत्यजाताञ्जात-
वेदो नुदस्व। अधि नो ब्रूहि सुमनस्यमानो
वयꣳ स्याम प्रणुदा नः सपत्नान्, इति।

सहसा बलेन जातानित्यादि पूर्ववत्। सुमनस्यमानोऽस्मासु सौमनस्यं प्राप्तः सन्नोऽस्मानधिब्रूहि शत्रुभ्योऽधिकान्ब्रूहि। वयमपि त्वदनुग्रहादधिकाः स्याम, नोऽस्माकं सपत्नाञ्शत्रून्प्रणुद।

अथ नवमीमाह—

अग्ने यो नोऽभितो जनो वृको वारो जिघाꣳसति।
ताꣳस्त्वं वृत्रहञ्जहि वस्वस्मभ्यमाभर, इति।

हेऽग्ने यः शत्रुजनो वृको वृकसदृशः, अरण्यश्वा यथोपद्रवं करोति तथोपद्रवकारीत्यर्थः। अत एव वारोऽस्मद्व्यवहारस्य निवारकः सन्नभितः सर्वतो नोऽस्माञ्जिघां-

---

१ ग. °हेडञ्छ°।

सति हन्तुमिच्छति । हे वृत्रहन्वैरिघातिन्नग्ने त्वं तान्वृकवद्धातुकाञ्जहि मारय । अस्मभ्यं तु वसु धनमाभर संपादय ।

अथ दशमीमाह—

अग्ने यो नोऽभिदासति समानो यश्च निष्ट्यः ।
तं वयꣳ समिधं कृत्वा तुभ्यमग्नेऽपिदध्मसि (२), इति ।

हेऽग्ने यः प्रबलः शत्रुर्नोऽस्मानभिदासति हिनस्ति, यश्चान्यः समानबलः[1] सन्निचष्टो नित्यं शत्रुत्वेनावस्थितो हिनस्ति, वयं तं हिंसकं समिधं समित्सदृशं कृत्वा हेऽग्ने तुभ्यं त्वदर्थमपिदध्मसि प्रक्षिपामः ।

अथैकादशीमाह—

यो नः शपादशपतो यश्च नः शपतः शपात् ।
उषाश्च तस्मै निम्रुक्च सर्वं पापꣳ समूहताम्, इति ।

अशपतोऽनाक्रोशतो यः शत्रुः शपाच्छपति अधिक्षिपति, यश्चान्यः शत्रुः शपतोऽधिक्षिपतो नोऽस्माञ्शपात्प्रत्यधिक्षिपति तस्मै तदर्थं तस्मिन्नवस्थापयितुमुषाश्च निम्रुक्चोदयास्तमयदेवावहोरात्रदेवौ वा सर्वं पापमस्मदीयं समूहतां संगतं कृत्वा तस्मिन्नेवावस्थापयताम् ।

अथ द्वादशीमाह—

यो नः सपत्नो यो रणो मर्तोऽभिदासति देवाः ।
इध्मस्येव प्रक्षायतो मा तस्योच्छेषि किंचन, इति ।

हे देवा यो मर्तो मनुष्योऽस्माकं सपत्नः शत्रुः सन्ननर्थं चिन्तयति यश्चास्माभिः सह रणो युद्धकारी सन्नभिदासत्युपक्षपयति, तस्योभयविधस्य संबन्धि किंचन धनादिकं मोच्छेष्यवशिष्टं मा कुरुत, किंतु सर्वं विनाशयत । यथा प्रक्षायतः प्रकर्षेण क्षीयमाणस्य दह्यमानस्येध्मस्य काष्ठस्य न कोऽप्यंशोऽवशिष्यते तद्वत् ।

अथ त्रयोदशीमाह—

यो मां द्वेष्टि जातवेदो यं चाहं द्वेष्मि यश्च माम् ।
सर्वाꣳस्तानग्ने संदह याꣳश्चाहं द्वेष्मि ये च माम्, इति ।

हे जातवेदो यः शत्रुर्मां द्वेष्टि अहं च यं द्वेष्मि । द्विविधो द्वेषः प्रत्यक्षः परोक्षश्च । तत्र प्रत्यक्ष उभयकर्तृको द्वेष उदाहृतः, परोक्षमुभयकर्तृकं द्वेषं सूचयितुं यश्च

---

१ ख. ग. समानः ।

मामिति पुनरुक्तिः। एवं च द्वेष्यो द्वेष्टा च द्वौ प्रत्यक्षौ द्वौ च परोक्षौ **तांश्चतुर्विधान्सर्वान्, हेऽग्ने संदह** सम्यग्भस्मी कुरु। यौ मुख्यौ द्वेष्यद्वेष्टारौ तद्द्वारा तदीया अन्येऽपि द्वेष्या द्वेष्टारश्च ये सन्ति तान्संग्रहीतुं याश्चाहमिति पुनरुक्तिः। तान्सर्वांश्च **संदहेति** पूर्वत्रान्वयः॥

अथ चतुर्दशीमाह—

यो अस्मभ्यमरातीयाद्यश्च नो द्वेषते जनः। निन्दाद्यो अस्मान्दिप्साच्च सर्वाꣳस्तान्मष्मषा कुरु, इति।

शत्रवस्त्रिविधा अरातयो द्वेषिणो निन्दकाश्चेति। तत्र दातव्यत्वेन प्राप्तं धनं यो न ददाति सोऽयमरातिः। कार्यविघातं यः करोति स द्वेषी। वाग्दौर्जन्यमात्रं यः करोति स निन्दकः। हन्तुकामश्चतुर्थः। तत्र **योऽस्मभ्यमरातीयाद्**रातित्वमिच्छति, **यश्च जनो नोऽस्मान्द्वेषते** कार्यनाशेन बाधते योऽप्यन्योऽस्मान्निन्दति दौर्जन्यान्निन्दति, यश्चापरोऽस्मान्दिप्सादम्भितुं हिंसितुमिच्छेत्। **तान्सर्वाञ्जनान्मष्मषा कुरु** चूर्णनभस्मीकरणादिजन्यस्य शब्दस्यानुकरणं मष्मषेति, चूर्णीकृत्य भस्मी कुर्वित्यर्थः॥

अथ पञ्चदशीमाह—

सꣳशितं मे ब्रह्म सꣳशितं वीर्यं बलम्। सꣳशितं क्षत्रं मे जिष्णु यस्याहमस्मि पुरोहितः, इति।

मे मदीयं **ब्रह्म** ब्राह्मण्यं **संशितं** सम्यक्तीक्ष्णीकृतं शास्त्रीयमार्गेण कृतमित्यर्थः। तथा **वीर्यमिन्द्रियशक्तिर्बलं** शरीरंदर्पस्तदुभयं **संशितं** सम्यक्स्वस्वकार्यक्षमं कृतम्। तथा **यस्य** क्षत्रस्य राज्ञोऽहं **पुरोहितोऽस्मि मे** मदीयं तत्क्षत्रं **जिष्णु** जयनशीलं यथा भवति तथा **संशितम्**, अस्त्विति शेषः।

अथ षोडशीमाह—

उदेषां बाहू अतिरमुद्वर्चो अथो बलम्। क्षिणोमि ब्रह्मणाऽमित्रानुन्नयामि स्वाꣳअहम्, इति।

एषां स्वकीयानां राजब्राह्मणादीनां मध्य एकैकस्य **बाहू** उदतिरमुत्कर्षेण वर्धितवानस्मि। लौकिकोक्तिरियम्, लोके हि योऽन्यस्मादुत्कृष्टो भवति तं जना एवमाहुः

---

१ क. च सति द्वे। २ ग. द्वेष्टारौ। ३ ग. °न्यो जनो निन्दा°। ४ क. °न्दान्नि°। ५ ख. ग. वीर्यं ब°। ६ क. °क्तीक्ष्णं कृ°। ७ क. °रजशक्तिस्त°। ८ ग. °क्स्वस्य का°। ९ ख. ग. °म्। अथ। १० ग. स्वां ३।

स्वकीयं हस्तमुपरितनं कृतवानिति । **वर्चः** कान्तिः, तामप्युदतिरम्[1], **अथो** अपि च **बलं** शरीरशक्तिस्तामप्युदतिरम्[2]मुत्कर्षं प्रापयामि । **ब्रह्मणा** मन्त्रसामर्थ्येनामित्रान्शत्रून्क्षिणोमि क्षीणान्करोमि । **स्वान्**स्वकीयान्पुरुषानहमुन्नयामि, उत्कर्षं प्रापयामि ।

अथ सप्तदशीमाह—

पुनर्मनः पुनरायुर्म आगात्पुनश्चक्षुः पुनः श्रोत्रं म आगात्पुनः प्राणः पुनराकूतं म आगात्पुनश्चित्तं पुनराधीतं म आगात्। वैश्वानरो मेऽदब्धस्तनूपा अवबाधतां दुरितानि विश्वा (३), इति ॥

पोषं दधामसि पुरोहितश्चत्वारिं च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके प्रथमप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

मनःप्राणादीनां पापेन योऽपक्षयः प्राप्तस्तस्य पापस्यानेन कर्मणा विनाशितत्वान्मे **मनः पुनरप्यागादस्मिञ्शरीरे** समागच्छतु । एवमायुरादयोऽपि समागच्छन्तु । **आकूतं** संकल्पितं कार्यम् । **चित्तं** मनोजन्यं ज्ञानम् । **आधीतं** साकल्येन पठितो वेदः । एतेषां सर्वेषामागमनार्थं **वैश्वानरो मे विश्वा** सर्वाणि **दुरितानि अवबाधतां** विनाशयतु । कीदृशो वैश्वानरः । **अदब्धः** केनाप्यहिंसितः । **तनूपा** मदीयशरीरपालकः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये द्वितीयप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

अथ द्वितीये षष्ठोऽनुवाकः ।

अथ षष्ठानुवाकोक्तास्वृक्षु प्रथमामाह—

वैश्वानराय प्रतिवेदयामो यदीनृणꣳ संगरो देवतासु ।

स एतान्पाशान्प्रमुचन्प्रवेद स नो मुञ्चातु दुरितादवद्यात्, इति ।[3]

यदीनृणं यदेव प्रसिद्धमृणं **देवतासु संगरः** प्रतिज्ञारूपेण स्तुत्या संपादितम् । संगरशब्दः प्रतिज्ञावाची । प्रतिज्ञा चैवं श्रूयते— ' त्रिभिर्ऋणवा जायते ब्रह्मचर्येण

---

१ क. ख. °क्तिम° । २ क. ख. °रम् । ब्र° । ३ ख. ग. 'दितः । सं' ।

ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः' इति। तदेतद्दर्णं त्रिविधं **वैश्वानरायास्मत्स्वामिने प्रतिवेदयामो** विज्ञापयामः। तत्र देवताशब्देनर्षयः पितरश्चोपलक्षिताः। **स वैश्वानर एतानृणत्रयरूपान्पाशान्प्रमुचन्प्रमोक्तुं प्रवेद** प्रकर्षेण जानाति। **सोऽग्निर्नो वैश्वानरो नोऽस्मान्दुरितात्परलोकविरोधिनः पापादवद्यादिह लोके निन्दादोषाच्च मुञ्चातु** मुक्तान्करोतु।

अथ द्वितीयामाह--

वैश्वानरः पवयान्नः पवित्रैर्यत्संगरमभिधावाम्याशाम्। अनाजानन्मनसा याचमानो यदत्रैनो अव तत्सुवामि, इति।

वैश्वानरो देवो **नोऽस्मान्पवित्रैः** शुद्धिहेतुभिर्होमादिभिः **पवयाच्छोधयतु। यद्येन** शोधनेन **संगरं** श्रुत्युक्तां प्रतिज्ञामृणत्रयरूपा**माशां** मयाऽपि प्रत्यर्पणीयत्वेनाऽऽशंसनीयामभिधावाम्याभिमुख्येन शीघ्रं प्राप्नोमि, तादृशं पावनं कुर्यादित्यर्थः। **अनाजानन्नृणनिर्मोचनोपायान्सर्वानप्यजानन्मनसा याचमानोऽनृणो भूयासमिति सर्वदा** प्रार्थयमानोऽस्मि। अत्रोपायापरिज्ञाने **यदेनः** पापमस्ति तत्पापम**वसुवामि** वैश्वानरप्रसादेन विनाशयामि।

अथ तृतीयामाह--

अमी ये सुभगे दिवि विचृतौ नाम तारके।
प्रेहामृतस्य यच्छतामेतद्बद्धकमोचनम्, इति।

दिव्याकाशे विचृतौ नाम विचृन्नामयुक्ते द्वे **तारके** लोके मैत्राशब्देन व्यवह्रियमाणे **सुभगे** सौभाग्ययुक्ते **अमी** अमू प्रत्यक्षेणास्माभिर्दृश्यमाने ये विद्येते ते उभे **इह** कर्मण्यमृतस्यर्णापाकरणरूपममृतं सुखं **प्रयच्छताम्। एतत्तारकाभ्यां दत्तममृतं** सुखं बद्धकस्य मम मोचनमृणमोचनसाधनम्। ऋणत्रयेण यो बद्धः स एवं वाऽ(चा)त्यन्तकुत्सितत्वाद्बद्धक इत्युच्यते। पितृदेवताकाभ्यामाभ्यां तारकाभ्यां नामवृत्त्यादिप्रकाशनेन तस्मादृणत्रयान्मुक्तो भवामीत्यभिप्रायः।

अथ चतुर्थीमाह—

*विजिहीर्ष्व लोकान्क्रोधि बन्धान्मुञ्चासि बद्धकम्।
योनेरिव प्रच्युतो गर्भः सर्वान्पथो अनुष्व, इति।

---

* विजिहीर्ष्वेत्यपि वैदिकानां क्वचित्कः पाठः।

---

१ ग. त्वेन शास°। २ ग. प्रपातनं। ३ क. मूलपदेन। ४ क. °व लोके कु°। ५ ख. °काभ्यां ता°। ग. °काभ्यां मत्ताभ्यां।

अत्र मन्त्रद्रष्टा कश्चिदृषिरधमर्णं संबोध्य ब्रूते—हेऽधमर्ण **विजिहीर्ष्व** विहर्तुमिच्छ पारतन्त्र्यराहित्येन सुखसंचारो विहारस्तत्सिद्ध्यर्थं **लोकान्कृधि** पुण्यानुष्ठानेनोत्तमलोकान्संपादय। **बद्धकमृणेन** कुत्सितेन बद्धमात्मानं **बन्धादृणत्रयरूपान्मुञ्चासि मुक्तं कुरु**। बन्धाद्विमोके दृष्टान्तः—**योनेः प्रच्युतो गर्भ इव**, उदरमध्ये सर्वावयवसंकोचेन निर्बध्यमानो गर्भो योनेर्बहिः पतितो यथा निर्बन्धान्मुक्तो भवति तद्वत्। तदृणत्रयान्मुक्तस्त्वं **सर्वान्पथः** पुण्यलोकमार्गान**नुष्व** सेवस्वेत्यर्थः।

अथ पञ्चमीमाह—

स प्रजानन्प्रतिगृण्भीत विद्वान्प्रजापतिः प्रथमजा ऋतस्य।
अस्माभिर्दत्तं जरसः परस्तादच्छिन्नं तन्तुमनुसंचरेम (१), इति।

स प्रजापतिरस्माभिर्दत्तं हविः **प्रतिगृभ्णीत** प्रतिगृह्णीत स्वीकरोतु। कीदृशः प्रजापतिः—**ऋतस्य प्रथमजाः** सत्यस्य परब्रह्मणः प्रथमः पुत्रः। किं कुर्वन्, **प्रजानन्न**स्मत्प्रार्थनां प्रकर्षेण निरूपयन्। **विद्वान्**सर्वार्थसाधनाभिज्ञः। तस्य प्रजापतेः प्रसादेन **जरसः परस्ताद्**वयोहानेरूर्ध्वमच्छिन्नं **तन्तुं** विच्छेदरहितं पुत्रपौत्रादिसंतान**मनुसंचरेम**, अनुप्रविश्य सम्यगृणनिर्मुक्तो विश्रम्भेण चरेम।

अथ षष्ठीमाह—

ततं तन्तुमन्वेके अनुसंचरन्ति येषां दत्तं पित्र्यमायनवत्। अबन्ध्वेके ददतः प्रयच्छाद्दातुं चेच्छक्वाँस्व स्वर्ग एषाम्, इति।

एके पुरुषाः केचित्**ततं** पुत्रपौत्रादिरूपेण विस्तीर्णं **तन्तुमनु** स्वकीयं संतानमनुप्रविश्यानुसंचरन्ति पुण्यलोकाननुक्रमेण प्राप्नुवन्ति। द्विविधो हि विग्रहः पुत्ररूपश्चाऽऽत्मरूपश्चेति। तयोर्मध्ये पुत्ररूपेणेह लोके पुण्यं कुर्वन्नेवाऽऽस्ते। पितृरूपेण लोकान्तरेषु संचरति। एतदेवाभिप्रेत्यैतरेयोपनिषद्युक्तम्—"सोऽस्यायमात्मा पुण्येभ्यः कर्मभ्यः प्रतिधीयते। अथास्यायमितर आत्मा कृतकृत्यो वयोगतः प्रैति" इति। अत आकारभेदेन तन्तुमनुप्रविश्येति पुण्यलोकाननुसंचरतीत्युभयमप्युपपद्यते। **येषां** पुरुषाणां **पित्र्यमृणमायनवद्दत्तम्**, आयनमागमः शास्त्रं तदस्यास्तीत्यायनवद्यथाशास्त्रं दत्तमित्यर्थः। पित्र्यमित्येतदन्ययोरपि द्वयोर्ऋणयोरुपलक्षणम्। तदृणत्रयं यैर्दत्तं तादृशाः केचिदनुसंचरन्तीति पूर्वत्रान्वयः। **एके**ऽपरे केचित्पुरुषा **अबन्धु** पुत्रपौत्रादिबन्धुरहिताः सन्तः पित्र्यमृणमपाकर्तुमशक्ता अपि **ददतो** धनदायिन उत्तम-

---

१ ग. °च्छक्नुवा°। २ क. ग °वाꣳसः स्व°। ३ ग. हि पितुर्विग्र°। ४ °रूपः स्वात्म°।

र्णस्य प्रयच्छात्प्रयच्छन्ति तद्धनं प्रत्यर्पयन्ति, ते पुरुषा दातुं शक्नवाञ्शक्तवन्तश्चेत्, एषां पुरुषाणां स स्वर्गो भवत्येव । पुत्रोत्पत्तेर्दैवाधीनत्वेऽपि गृहीतं धनमवश्यं प्रत्यर्पणीयमेवेत्यर्थः ।

अथ सप्तमीमाह--

आरभेथामनुसंरभेथां समानं पन्थामवथो घृतेन । यद्वां पूर्तं परिविष्टं यदग्नौ तस्मै गोत्रायेह जायापती संरभेथाम्, इति ।

हे जायापती कर्माधिकारिणाविह जन्मनि घृतेन द्रव्येणाऽऽरभेथां कर्मारम्भं कुरुतम् । अनुसंरभेथां परस्परमनुकूलौ संगतौ कदाचिदप्यवियुक्तावेव भवतम् । तयोरुभयोः समानं साधारणं पन्थां पुण्यलोकमार्गमवथो रक्षतम् । वां युवयोर्यत्पूर्तं पितृभ्यो दत्तमन्नादि, यदग्नौ परिविष्टं पारिप्रापितं हविः, तस्मै तदविच्छेदनं यथा क्रियेतेत्येवमर्थं संरभेथां त्वरेथां न तु तूष्णीमासाथाम् । तच्च गोत्रायोपयुज्यते, गोत्रसंभवाः पूर्वे परे च ये सन्ति तेषां सर्वेषामिदमनुष्ठानमुपयुक्तम् ।

अथाष्टमीमाह—

यदन्तरिक्षं पृथिवीमुत द्यां यन्मातरं पितरं वा जिहिंसिम । अग्निर्मा तस्मादेनसो गार्हपत्य उन्नो नेषदुरिता यानि चकृम, इति ।

वयमन्तरिक्षं जिहिंसिम हिंसितवन्त इति यत्पापमस्ति, तथा पृथिवीं जिहिंसिमेति यदस्ति, उतापि च द्यां जिहिंसिमेति यदस्ति । लोकत्रयवर्तिनां प्राणिनामपकारस्तद्धिंसा । तथा मातरं पितरं वा जिहिंसिमेति यदस्ति, तस्मात्सर्वस्मादेनसो नोऽस्मान्गार्हपत्योऽग्निर्गृहपतेर्यजमानस्य संबन्धी वह्निरुन्नेषदुन्नयतु, पापादुद्गतान्करोतु । यानि चान्यानि दुरितानि चकृम तेभ्योऽप्युन्नयतु ।

अथ नवमीमाह—

भूमिर्माताऽदितिर्नो जनित्रं भ्राताऽन्तरिक्षमभिशस्त एनः । द्यौर्नः पिता पितृयाच्छं भवासि जामिमित्वा मा विवित्सि लोकात्, इति ।

येयं भूमिः सेयं नोऽस्माकं माता लोकानां सर्वेषां निर्मात्री । अदितिर्देवी

---

१ ग. शक्नुवांसः शक्नुव° । २ ग. °च्छेदेन य° । ३ ग. °युक्ते । अ° । ४ ग. वयं येऽस्त° । ५ ग. °कारो हिंसा । ६ ग. लोकान् ।

जनित्रं जननीस्थानीया । भूमिरचेतना निवासाधिकरणभूता, तदभिमानिनी देवताऽदितिः । यदिदमन्तरिक्षं तदस्माकं **भ्राता** भातृस्थानीयम् । **यदेनोऽस्माभिः** कृतं तद्**भिशस्तः** शत्रुस्थानीयम् । येयं **द्यौः** सेयं **नः पिता** पितृस्थानीया । यथा परमेश्वरेण संपादितः सर्वसाधारणोऽयं बन्धुवर्गः, तथा हे यजमान बन्धुवर्गसंपादनार्थं त्वं **पितृयात्पितृत्वमिच्छञ्छं भवासि** सुखं प्राप्नोषि । ऐहिकामुष्मिकसुखसिद्धये पुत्रानुत्पादयेत्यर्थः , **जामि मित्वाऽऽलस्येन** पुत्रोत्पत्तिरहित एव सन्मृत्वा **लोकादृणत्रयरहितानां** योग्यं लोकं **मा विविक्षिस** नैव लप्स्यसि (से) ।

अथ दशमीमाह—

यत्र सुहार्दः सुकृतो मदन्ते विहाय रोगं तन्वः स्वायाम् । अश्लोणाङ्गैरहृताः स्वर्गे तत्र पश्येम पितरं च पुत्रम् , इति ।

यत्र यस्मिन्पुण्यलोके स्थिताः **सुहार्दः** शोभनहृदयोपेताः **सुकृतः** पुण्यकर्माणः **स्वायां तन्वां** स्वकीये शरीरे **रोगं विहाय** परित्यज्य **मदन्ते** हृष्यन्ति, **अश्लोणाङ्गैः** श्लोणो रोगविशेषस्तद्रहितैरङ्गैर्युक्ता **अहृताः** कौटिल्यरहिताः केनचिदप्यवञ्चिताः सर्वे वयं **तत्र स्वर्गे** स्थित्वा **पितरं पुत्रं च पश्येम** । तादृशं जन्म भूयादित्यर्थः ।

अथैकादशीमाह—

यदन्नमद्म्यनृतेन देवा दास्यन्नदास्यन्नुत वाऽकरिष्यन् । यद्देवानां चक्षुष्यागो अस्ति यदेव किंच प्रतिजग्राहमग्निर्मा तस्मादनृणं कृणोतु , इति ।

हे **देवा** अहं **दास्यन्नदास्यन्**प्रत्यर्पणं चिकीर्षुरचिकीर्षुर्वा, तात्कालिकेन सर्वथा प्रत्यर्पयिष्यामीत्येतादृशेनानृतवचनेन धनमादाय **यदन्नमद्मि** भक्षयामि, अथवा किंचित्कार्यं परकीयं करिष्यामीत्यनेनानृतेन वचनेन धनमादाय तत्कार्यमकरिष्यन्**यदन्नमद्मि, यदपि देवानां चक्षुषि** दृष्टिविषये मया कृतमागः पापमस्ति, आदित्याभिमुख्येन मूत्रविसर्गादि ।

तथा च **स्मर्यते**—

" प्रत्यादित्यं प्रत्यनिलं प्रति गां च प्रति द्विजम् ।
मेहन्ति ये च पापिष्ठास्ते भवन्ति गतायुषः " इति ॥

---

१ क. ख. लभ्यते । २ ग. °न्वा इ । ग. °रहता स्व° ४ ख. °हृता स्व° । ५ ग. अहताः ।

किंच यदेव किंचिच्छूद्रादिधनं **प्रतिजग्राहं** प्रतिगृहीतवानस्मि, **तस्मात्सर्वस्मादेनसो** विमुच्यायमग्निरनृणमृणरहितं करोतु।

अथ द्वादशीमाह—

यदन्नमग्नि बहुधा विरूपं वासो हिरण्यमुत गाम-
जामविम्। यद्देवानां चक्षुष्यागो अस्ति यदेव किंच
प्रतिजग्राहमग्निर्मा तस्मादनृणं कृणोतु, इति।

बहुधा विरूपं द्रव्यदोषोत्कर्तृदोषादेशकालदोषादिना वा बहुप्रकारेण शास्त्रनिषिद्धं **यदन्नमाग्नि** तथा वस्त्रादीनपि निषिद्धान्स्वी करोमि। यद्देवानामित्यादि पूर्ववत्।

अथ त्रयोदशीमाह—

यन्मया मनसा वाचा कृतमेनः कदाचन। सर्वस्मात्तस्मा-
न्मेळितो मोग्धि त्वꣳ हि वेत्थ यथातथम् (२), इति।

चरेम पुत्रꣳ षट् च॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके द्वितीयप्रपाठके
षष्ठोऽनुवाकः॥ ६॥

मया कर्त्रा **कदाचनेह** जन्मनि जन्मान्तरे वा यदा कदाचिदपि **मनसा वाचा** वा **यदेनः** कृतम्, हेऽग्नेस्माभिरीडितः स्तुतस्त्वं मां **तस्मात्सर्वस्मादेनसो मोग्धि** मुञ्च **हि** यस्मात्कारणाद्धेऽग्ने त्वं **यथातथं वेत्थ** वस्तुनस्तथात्वमनतिक्रम्य यथातथं यस्य पापस्य यः प्रतीकारस्तस्य तत्सर्वं जानासि, तस्मान्मां पापान्मुञ्च॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये द्वितीयप्रपाठके षष्ठोऽनुवाकः॥ ६॥

अथ द्वितीये सप्तमोऽनुवाकः।

षष्ठेऽनुवाके कूष्माण्डहोमाङ्गमन्त्राः समापिताः। सप्तमे स होमो विधीयते। तदर्थमाख्यायिकामाह—

वातरशना ह वा ऋषयः श्रमणा ऊर्ध्वमन्थिनो बभूवु-
स्तानृषयोऽर्थमायꣳस्ते निलायमचरꣳस्तेऽनुप्राविशुः कूश्मा-

---

१ क. °षाद्दे°। २ ग. °न्मेडितो। ३ क. ख. च। ४ क. ख. °स्माद्धे°। ५ ग. कूश्माण्ड°। ६ ख. °मे हो°।

ण्डानि ताऽस्तेष्वन्वविन्दञ्छ्रद्धया च तपसा च—, इति ।

पूर्वप्रपाठके ततोऽरुणाः केतवो वातरशना ऋषय उदतिष्ठन्निति त्रिविधा ऋषय आख्याताः । तन्मध्ये ये वातरशनाख्या ऋषयः श्रमणास्तपस्विन ऊर्ध्वमन्थिन ऊर्ध्वरेतसो बभूवुः, तान्वातरशनाख्यानृषीन्प्रत्यन्ये केचिदृषयोऽर्थमायन्नर्थयितुमागताः । तं वृत्तान्तमादावेवावगत्य किमशक्यमेते करिष्यन्तीतिनिश्चयरहितास्ते वातरशना निलायं कुत्रचिदन्तर्हिता अचरन् । अन्तर्धानस्थानं विचार्य योगसामर्थ्यात्सूक्ष्मशरीरा भूत्वा कूश्माण्डाख्यानि मन्त्रवाक्यान्यनुप्रविष्टाः । इतरे तु महर्षयः श्रद्धापूर्वकेण तपसा शुद्धचित्ताः सन्तो ध्यानेनान्विष्य तेषु कूष्माण्डमन्त्रेष्ववस्थितान्वातरशनाख्यांस्तानृषीन्प्रत्यक्षेणापश्यन् ।

अथ तेषामुभयेषां परस्परसंवादं दर्शयति—

तानृषयोऽब्रुवन्कथा निलायं चरथेति त ऋषीनब्रुवन्नमो वोऽस्तु भगवन्तोऽस्मिन्धाम्नि केन वः सपर्यामेति तानृषयोऽब्रुवन्पवित्रं नो ब्रूत येनारेपसः स्यामेति त एतानि सूक्तान्यपश्यन्—, इति ।

तान्वातरशनानृषय इतरेऽब्रुवन् , हे वातरशनाः कथा केन हेतुना निलायं निलीय चरथेति । ते च वातरशनास्तैः पृष्टाः सन्तस्तानुपचरितुमिदमब्रुवन्, हे भगवन्त ऐश्वर्यादिषड्गुणयुक्ता वो युष्मभ्यं नमस्कारोऽस्तु महात्मानो यूयमस्मदीये स्थाने समागता अतोऽत्र केन साधनेन युष्मान्परिचरेमेति । ततस्तान्वातरशनानितरेऽब्रुवन्, येन साधनेन वयमरेपसः पापरहिताः स्याम तादृशं पवित्रं शुद्धिकारणमस्मभ्यं ब्रूतेति । ते वातरशना अप्रयासेन सहसा शुद्धिप्रदं विचार्यैतानि वक्ष्यमाणानि सूक्तानि तेषां कथनयोग्यानीति निश्चितवन्तः ॥

अथ तदुक्तं प्रयोगक्रमं दर्शयति—

यदेवा देव हेळनं यददीव्यन्नृणमहं बभूवाऽऽयुष्टे विश्वतो दधदित्येतैराज्यं जुहुत वैश्वानराय प्रतिवेदयाम इत्युपतिष्ठत यदर्वाचीनमेनो भ्रूणहत्यायास्तस्मान्मोक्ष्यध्व इति—, इति ।

---

१ ग. °षयो य आ° । २ क. ख. °वान° । ३ ग °ना अनि° । ४ ग. °नान्वीक्ष्य ते° । ५ ख. ग. कूश्माण्ड° । ६ ग. °क्षेण किलाय° ७ ग. धाम्नि । ८ ग °नेनारे° । ९ क. ख. न्तः । °त । १० ग. हेडनं ।

अनुवाकत्रयेण होमः। चतुर्थानुवाकेनोपस्थानम्। वेदत्रयविद्ब्राह्मणो भ्रूणस्तदीयहत्याया अर्वाचीनं यत्पापं तस्मात्सर्वस्मान्मुक्ता भविष्यथेति॥

तदुत्तरं महर्षिवृत्तान्तमाह—

त एतैरजुहवुस्तेऽरेपसोऽभवन्—, इति।

अरेपसः पापरहिताः॥

इदानीं विधत्ते—

कर्मादिष्वेतैर्जुहुयात्पूतो देवलोकान्समश्नुते (१), इति॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके द्वितीयप्रपाठके सप्तमोऽनुवाकः॥ ७॥

प्रारप्स्यमानकर्मारम्भेषु कूष्माण्डहोमेन पूतस्य देवलोकप्राप्तिर्भवति॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये द्वितीयप्रपाठके सप्तमोऽनुवाकः॥ ७॥

अथ द्वितीयेऽष्टमोऽनुवाकः।

सप्तमे कूष्माण्डहोमः कर्मादिषु विहितः। अष्टमे दीक्षादिकं विधीयते। तत्राऽऽदौ कर्मादिव्यतिरिक्तस्थले होमं विधत्ते—

कूष्माण्डैर्जुहुयाद्योऽपूत इव मन्येत—, इति।

यः पुमान्संदिग्धेन पापेन स्वस्य पूतत्वं नास्तीति मनसि शङ्कते स पुमान्कूष्माण्डहोमेन पूतो भवति।

अथ महापातकसमस्य पापस्य निवृत्त्यर्थं होमं विधत्ते—

यथा स्तेनो यथा भ्रूणहैवमेष भवति
योऽयोनौ रेतः सिञ्चति—, इति।

अयोनौ प्रतिषिद्धयोनौ यो रेतः सिञ्चति एष सुवर्णस्तेयकारिणा भ्रूणहत्याकारिणा च समो भवति, सोऽपि कूष्माण्डैर्जुहुयात्।

तेनोक्तेन होमेन यथोक्तपापनिवृत्तिं दर्शयति—

यदर्वाचीनमेनो भ्रूणहत्यायास्तस्मान्मुच्यते—, इति।

---

१ ग. °ति। इतरम°। २ ख. °त्तमम°। ३ ग. प्रारप्स्यमाणकर्मार°। ४ क. ग. कूश्माण्ड°। ५ ख. ग कूश्माण्ड°। ६ क. ख. °श्माण्डेन जुहु°।

भ्रूणहत्यासमस्यापि मुख्यभ्रूणहत्याया अर्वाचीनत्वात्तेन होमेन निवृत्तिर्युज्यते ।

भ्रूणहत्याया अर्वाचीनमपि तारतम्यतो भवति. तस्मात्कथमेकेन होमेन निवृत्तिरित्याशङ्क्य दीक्षातारतम्येनेत्युत्तरं दर्शयति—

यावदेनो दीक्षामुपैति दीक्षित एतैः सतति जुहोति—, इति ।

अल्पं महद्वा **यावदेनो** भवति तदनुसारेणाल्पां महतीं वा **दीक्षां** कृत्वा तस्यैनस उचिते काले **सतति** प्रतिदिनं **जुहोति** तत्र तारतम्येन षड्दीक्षाभेदाः ।

तत्र प्रथमं दीक्षाभेदं दर्शयति—

संवत्सरं दीक्षितो भवति संवत्सरादेवाऽऽत्मानं पुनीते—, इति ।

न मांसमश्नीयादितिनियमाचरणं दीक्षा पापाधिक्ये सति **संवत्सरं दीक्षितो** भूत्वा तस्मिन्संवत्सरे प्रतिदिनं जुहुयात् । तया संवत्सरदीक्षया स्वात्मानं शोधयति ।

पापानुसारेण दीक्षायाः पक्षान्तराणि विधत्ते—

मासं दीक्षितो भवति यो मासः स संवत्सरः संवत्सरादेवाऽऽत्मानं पुनीते चतुर्विंशति रात्रीर्दीक्षितो भवति चतुर्विंशतिरर्धमासाः संवत्सरः संवत्सरादेवाऽऽत्मानं पुनीते द्वादश रात्रीर्दीक्षितो भवति द्वादश मासाः संवत्सरः संवत्सरादेवाऽऽत्मानं पुनीते षड्रात्रीर्दीक्षितो भवति षड्वा ऋतवः संवत्सरः संवत्सरादेवाऽऽत्मानं पुनीते तिस्रो रात्रीर्दीक्षितो भवति त्रिपदा गायत्री गायत्रिया एवाऽऽत्मानं पुनीते—,इति ।

पापबाहुल्ये सति संवत्सरानियमेन या शुद्धिः पापाल्पत्वे सा शुद्धिर्मासमात्रेण संभवाप्यते । एवमुत्तरेष्वपि । अतः सर्वेषां संवत्सरसाम्यम् । गायत्रीपादानां त्रित्वसाम्येन त्रिरात्रदीक्षाया गायत्रीत्वात्तयैव शुद्धिर्भवति ।

अथ नियमान्विधत्ते—

न मांसमश्नीयान्न स्त्रियमुपेयान्नो-
पर्यासीत जुगुप्सेतानृतात्—,इति ।

---

१ ग. 'ते । तेन भ्रू' । २ ग. °चीनानाप° । ३ ग. 'तम्योपेतत्वात्क° । ४ क. तदेन° । ५ ग. उपाचिते । ६ ग. 'ले प्र' । ७. षड्भेदा दीक्षाः । त° । ८ ग. षड्भेदाः । ८ ख. 'दित्यादिनि° । ९ ख. ग. दीक्षायाः । १० ग. पापह्रासानु । ११ ग. गायत्र्या । १२ ख. संपाद्यते । ग. समाप्यते १३ क. °त्तरैरपि ।

उपरि खट्वादौ। स्पष्टमन्यत्।

अथ वर्णभेदेन दीक्षादिनेषु भोजनद्रव्यविशेषं विधत्ते—

पयो ब्राह्मणस्य व्रतं यवागू राजन्यस्याऽऽमिक्षा वैश्यस्य—इति।

व्रतं भोजनमित्यर्थः।

तदेतद्व्रतं प्रशंसति—

अथो सौम्येऽप्यध्वर एतद्व्रतं ब्रूयात्—,इति।

अपि च न केवलं कूष्माण्डहोमकर्मण्येवैतद्व्रतं किंतु सोमयागेऽप्येतदेव दीक्षा-**व्रतं** कर्तव्यमित्येव **ब्रूयात्**। यस्मान्महत्यपि यज्ञे व्रतमिदमपेक्षितं तस्मादिदं प्रशस्तम्।

अशक्तं प्रति कंचिद्विशेषं विधत्ते—

यदि मन्येतोपदस्यामीत्योदनं धानाः सक्तून्घृ-
तमित्यनुव्रतयेदात्मनोऽनुपदासाय (१), इति॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके द्वितीयप्रपाठकेऽ-
ष्टमोऽनुवाकः॥ ८॥

दीक्षितो यथोक्तव्रतेनोपदस्याम्युपक्षीणो भवामीति **यदि मन्येत**, तदानीं यथोक्त-दीक्षादिव्रतमनु शरीरस्योपक्षयपरिहारार्थमोदनादिकं यत्किंचिदनुव्रतयेद्भुञ्जीत। **धाना** भृष्टयवतण्डुलाः। **सक्तवस्तत्पिष्टानि**। इतिशब्देनेदृशमन्यदपि विवक्ष्यते॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयारण्यकभाष्ये द्वितीयप्रपाठकेऽष्टमोऽनुवाकः॥ ८॥

अथ द्वितीये नवमोऽनुवाकः।

अस्य प्रपाठकस्य स्वाध्यायब्राह्मणमिति समाख्यातेः स्वाध्याय एवात्र प्राधान्येन विधेयः। तस्मिंश्च शुद्धः पुमानधिकारी। अतः शुद्धिहेतून्यज्ञोपवीतसंध्यावन्दनकूष्मा-ण्डहोमानभिधाय स्वाध्यायं विधातुमुपाख्यानमाह—

अजान्ह वै पृश्नीꣳस्तपस्यमानान्ब्रह्म स्वयंभ्वभ्यानर्षत्त
ऋषयोऽभवन्तदृषीणामृषित्वं तां देवतामुपातिष्ठन्त यज्ञ-
कामास्त एतं ब्रह्मयज्ञमपश्यन्तमाहरन्तेनायजन्त—, इति।

---

१ ख. ग. ख्यानात्स्वाध्या°। २ क. तस्मिञ्शुद्धः।

कल्पादावेव ब्राह्मणाः सृष्टा न ह्यस्मदादिवत्कल्पमध्ये पुनः पुनर्जायन्ते तस्मादजाः। ते च पृश्नयः शुक्राः स्वरूपेणैव निर्मलाः सन्तोऽपि पुनस्तप आचरन्। तदीयेन तपसा तुष्टं स्वयंभु ब्रह्म जगत्कारणत्वेन स्वतः सिद्धं परब्रह्मवस्तु कांचिन्मूर्तिं धृत्वा तपस्यमानांस्तानृषीननुग्रहीतुमभ्यानर्षदाभिमुख्येन प्रत्यक्षमागच्छत्। ततस्ते मुनय ऋषिधात्वर्थविषयत्वाद्दृषयोऽभवन्। तस्मादन्येषामपि ऋषीणामनयैव व्युत्पत्त्यर्षित्वं संपन्नम्। ततस्ते मुनयः सर्वकामप्रदं कंचिद्यज्ञं कामयमानाः स्वयंभुब्रह्मरूपां तां देवतामुपासितवन्तः। तद्देवतानुग्रहात्ते मुनय एतं वक्ष्यमाणं ब्रह्मयज्ञं सर्वकामहेतुमपश्यन्। दृष्ट्वा च तं यज्ञमाहरन्ननुष्ठितवन्तः। तेन यज्ञेन देवानपूजयन्त।

ब्रह्म वेदस्तस्याध्ययनमेव संपादितं न तु यज्ञत्वमिति मतिं वारयितुं तत्राऽऽहुतीः संपादयति—

> यदृचोऽध्यगीषत ताः पयआहुतयो देवानामभवन्यद्यजूꣳषि घृताहुतयो यत्सामानि सोमाहुतयो यदथर्वाङ्गिरसो मध्वाहुतयो यद्ब्राह्मणानीतिहासान्पुराणानि कल्पान्गाथा नाराशꣳसीर्मेदाहुतयो देवानामभवन्ताभिः क्षुधं पाप्मानमपाघ्नन्नपहतपाप्मानो देवाः स्वर्गं लोकमायन्ब्रह्मणः सायुज्यमृषयोऽगच्छन् (१), इति॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके द्वितीयप्रपाठके नवमोऽनुवाकः॥ ९॥

पादबद्धमन्त्रा ऋचस्ता अध्यगीषत त ऋषयोऽधीतवन्त इति यदस्ति ता अध्ययनक्रिया देवानां क्षीरद्रव्याहुतयोऽभवन्, तदाहुत्या या तुष्टिः सा तेषामृगध्ययनेन संपन्ना। एतदन्यत्रापि योज्यम्। अथर्वभिरङ्गिरोभिश्च दृष्टा मन्त्रा अथर्वाङ्गिरसः। ब्राह्मणानि कर्मचोदनाः 'वायव्यꣳ श्वेतमालभेत" इत्यादयः। इतिहासा महाभारतादयः। पुराणानि। ब्रह्माण्डादीनि। यद्वा 'देवसुराः संयत्ता आसन्' इत्यादय इतिहासाः। 'आत्मा वा इदमेक एवाग्र आसीन्नान्यत्किंचन मिषत्' इत्यादीनि सृष्ट्यादिप्रतिपादकानि पुराणानि। कल्पाः कल्पसूत्राणि प्रयोगप्रतिपादकानि। गाथा गायतिचोदिता मन्त्रविशेषा योऽस्य कौष्ठचेत्यादयः। यमगाथाभिः पारिगा-

---

१ ग. ब्रह्मणा°। २ ग. °त. ये त। ३ क. ख. 'ने सं°। ४ ख. संयता। ५ ख° °दमग्र। ६ ख. °सीन्नैव किंच°। ग. °सीन्नैवेह किंचनाग्र इ°।

यतीति विधानात्। **नराशंसपदोपेता** नाराशंस्यो होता यक्षन्नराशंसमित्याद्याः। **मन्त्रब्राह्मणान्तः**पठितानामपि पुनरुक्तिः फलातिशयद्योतनार्थम्। **मेदाहुतयो मांसाहुतयः**। **ताभिराहुतिभिर्देवाः** क्षुद्रूपं **पाप्मानं** विनाशितवन्तः। स्वाध्यायजन्यतृप्त्या क्षुधं विस्मृतवन्तः। ततः क्षुद्रूपपापरहिता **देवाः** सुखमनुभवितुं **स्वर्गं** गताः। **ऋषयश्च** पूर्वोक्ताँ अध्ययनेन ब्रह्मयज्ञेन जगत्कारणस्य **ब्रह्मणः सायुज्यं** प्राप्ताः। ब्रह्मज्ञानोत्पादनद्वारा मुक्तिहेतुत्वं ब्रह्मयज्ञस्य युक्तम्। अत एव ज्ञानसाधनेषु प्राथम्येन वेदानुवचनं **वाजसनेयिनः** समामनन्ति—"तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन" इति॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये द्वितीयप्रपाठके नवमोऽनुवाकः॥ ९॥

अथ द्वितीये दशमोऽनुवाकः।

नवमे ब्रह्मयज्ञविधिप्रस्तावार्थमुपाख्यानमुक्तम्। इदानीं तद्विधिप्रसङ्गेन **पञ्च महायज्ञान्विधत्ते**—

पञ्च वा एते महायज्ञाः सं॒तति प्रता॒यन्ते सतति संतिष्ठन्ते देवयज्ञः पितृयज्ञो भूतयज्ञो मनुष्ययज्ञो ब्रह्मयज्ञ इति—,इति।

एवं यज्ञानां पाठतः पञ्चत्वं न तु स्वरूपविस्तारेण। **सतति** सततं दिने दिने **प्रतायन्ते**ऽनुष्ठीयन्ते। सतति प्रतिदिनं **संतिष्ठन्ते** समाप्यन्ते। यस्मिन्दिन उपक्रमस्तस्मिन्नेव दिने तत्समाप्तिः, न तु यज्ञान्तरवद्दिनान्तरापेक्षा। देवयज्ञ इत्यादीनि तेषां नामानि।

तत्र देवयज्ञस्य लक्षणमाह—

यदग्नौ जुहोत्यपि समिधं तद्देवयज्ञः संतिष्ठते—,इति।

पुरोडाशादिहविर्मुख्यं तदलाभे समिधमप्यग्नौ देवानुद्दिश्य जुहोतीति **यस्सोऽयं देवयज्ञः**। स च सकृद्धोममात्रेण समाप्यते।

पितृयज्ञस्य लक्षणमाह—

यत्पितृभ्यः स्वधा करोत्यप्यपस्तत्पितृयज्ञः संतिष्ठते—,इति।

---

१ ग. °याः। ब्रा°। २ ख. ग. °णान्तप°। ३ क. °क्ताध्य°। ४ ख. अध्यासते°। ५ ख. °ति। यत्पुरो°। ६ क °शल°।

तत्र पिण्डदानासंभवे जलमात्रमपि पितृभ्यः स्वधाऽस्त्विति स्वधाशब्देन **यद्ददाति** सोऽयं **पितृयज्ञः**, । तावतैव समाप्यते ।

भूतयज्ञस्य लक्षणमाह—

यद्भूतेभ्यो बलिꣳ हरति तद्भूतयज्ञः संतिष्ठते—,इति ।

वैश्वदेवानुष्ठानादूर्ध्वं बहिर्देशे वायसादिभ्यो भूतेभ्यो यद्बलिप्रदानं सोऽयं **भूतयज्ञः**, तावतैव समाप्यते ।

मनुष्ययज्ञस्य लक्षणमाह—

यद्ब्राह्मणेभ्योऽन्नं ददाति तन्मनुष्ययज्ञः संतिष्ठते—,इति ।

वैश्वदेवादूर्ध्वं हन्तकारार्थान्नव्यतिरिक्तमन्नमतिथिभ्यैस्त्रचवरेभ्यो **ब्राह्मणेभ्यो यद्दीयते स मनुष्ययज्ञः**, तावतैव समाप्यते ।

ब्रह्मयज्ञस्य लक्षणमाह—

यत्स्वाध्यायमधीयीतैकामप्यृचं यजुः सामं
वा तद्ब्रह्मयज्ञः संतिष्ठते—, इति ।

स्वस्यासाधारणत्वेन पितृपितामहादिपरम्परया प्राप्ता वेदशाखा **स्वाध्यायः** । तत्र विद्यमानमृगादीनामन्यतममेकमपि वाक्यमधीयीतेति यत्सोऽयं **ब्रह्मयज्ञः**, तावतैव समाप्यते ।

तत्र विशेषाकारेणाध्ययनं पृथक्पृथक्प्रशंसति—

यदृचोऽधीते पयसः कूल्या अस्य पितॄꣳस्वधा अभिवहन्ति यद्यजूꣳषि घृतस्य कूल्या यत्सामानि सोम एभ्यः पवते यदथर्वाङ्गिरसो मधोः कूल्या यद्ब्राह्मणानीतिहासान्पुराणानि कल्पान्गाथा नाराशꣳसीर्मेदसः कूल्या अस्य पितॄꣳस्वधा अभिवहन्ति—,इति ।

कूलमर्हन्तीति कूल्या महानद्यः । ऋगध्ययनेन क्षीरपूर्णा महानद्यः स्वधाकारेण दत्तं हविर्भूत्वा पितॄनभिलक्ष्य प्रवहन्ति । तथा यजुरध्ययनेन घृतपूर्णो महानदीप्रवाहः । सामाध्ययनादेभ्यः पितृभ्यः सोमो धारया युक्तः पवते प्रवहति । एवमथर्वाङ्गिरसामध्ययनेन मधुपूर्णा नद्यः प्रवहन्ति । ब्राह्मणाद्यध्ययनेन मांससंबन्धी प्रवाहः ।

पितृतृप्त्या ब्रह्मयज्ञं प्रशस्य देवतृप्त्याऽपि प्रशंसति—

यदृचोऽधीते पयआहुतिभिरेव तद्देवाꣳस्तर्पयति

---

१ ख. °शे श्ववा°। २ ग. °भ्यस्त्वव°। ३ क. रवस्य सा°। ४ क. °धीते° । ५ ग. प्रशंस्य ।

यद्यजूंषि घृताहुतिभिर्यत्सामानि सोमाहुतिभिर्यदथर्वाङ्गिरसो मध्वाहुतिभिर्यद्ब्राह्मणानीतिहासान्पुराणानि कल्पान्गाथा नाराशंसीर्मेदाहुतिभिरेव तदेवास्तर्पयति त एनं तृप्ता आयुषा तेजसा वर्चसा श्रिया यशसा ब्रह्मवर्चसेनान्नाद्येन च तर्पयन्ति (१), इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके द्वितीयप्रपाठके दशमोऽनुवाकः ॥ १० ॥

ऋगध्ययनं यदस्ति तेन क्षीराहुतिसमाना देवानां तृप्तिर्भवति । एवमुत्तरत्रापि योज्यम् । ते देवास्तृप्ताः सन्त एनं यजमानमायुरादिभिस्तर्पयन्ति । तेजः शरीरकान्तिः, वर्चो बलम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये द्वितीयप्रपाठके दशमोऽनुवाकः ॥ १० ॥

अथ द्वितीय एकादशोऽनुवाकः ।

दशमे ब्रह्मयज्ञोऽभिहितः । एकादशे तत्प्रयोगोऽभिधीयते—

ब्रह्मयज्ञेन यक्ष्यमाणः प्राच्यां दिशि ग्रामादच्छदिर्दर्श उदीच्यां प्रागुदीच्यां वोदितं आदित्ये दक्षिणत उपवीयोपविश्य हस्ताववनिज्य त्रिराचामेद्द्विः परिमृज्य सकृदुपस्पृश्य शिरश्चक्षुषी नासिके श्रोत्रे हृदयमालभ्य—, इति ।

यः पुमान्ब्रह्मयज्ञं करिष्यति सोऽयं ग्रामात्प्राचीमुदीचीमैशानीं वा दिशं गच्छेत् । गृहस्योपर्याच्छादनार्थानि तृणकटादीनि च्छदींषि, यावति दूरे तानि न दृश्यन्ते तावद्दूरमच्छदिर्दर्श तत्र गत्वा सूर्येऽभ्युदिते सति प्रथमानुवाकोक्तप्रकारेण यज्ञोपवीतं कृत्वा शुद्धप्रदेश उपविश्य हस्तद्वयं पूर्वं शुद्धमप्येतदङ्गत्वेन पुनः प्रक्षाल्योदकं त्रिः पिबेत् । द्विः परिमृज्य शुद्धयर्थमुदकेन तदा हस्तं प्रक्षालयेत्, तत ओष्ठौ सकृदुपस्पृश्य

---

१ क. ख. यक्ष्यमाणमा° । २ ग °र्दर्शस्तत्र । ३ ख. °दा तदा ह° ।

शिरःप्रभृतीन्हृदयपर्यन्तानवयवान्क्रमेण स्पृष्ट्वा दर्भाणां महदित्यादिना वक्ष्यमाणेन सहान्वयः ।

अथाऽऽचमनादीन्प्रशंसति—

यन्निराचामति तेन ऋचः प्रीणाति यद्द्विः परिमृजति तेन यजूंषि यत्सकृदुपस्पृशति तेन सामानि यत्सव्यं पाणिं पादौ प्रोक्षति यच्छिरश्चक्षुषी नासिके श्रोत्रे हृदयमालभते तेनाथर्वाङ्गिरसो ब्राह्मणानीतिहासान्पुराणानि कल्पान्गाथा नाराशꣳसीः प्रीणाति—, इति ।

अत्र सव्यपाणिपादयोः प्रोक्षणानुवादादेव प्रोक्षणविधिरुन्नेतव्यः ।

हृदयस्पर्शनोत्तरभाविकर्तव्यं विधत्ते—

दर्भाणां महदुपस्तीर्योपस्थं कृत्वा प्राङासीनः स्वाध्यायमधीयीतापां वा एष ओषधीनाꣳ रसो यद्दर्भाः सरसमेव ब्रह्म कुरुते—, इति ।

दर्भाणां संबन्धि महत्प्रभूतं यथा भवति तथाऽऽसनमास्तीर्य तस्योपर्युपस्थं **कृत्वा** । उपस्थशब्द आसनविशेषं ब्रूते । आकुञ्चितस्य सव्यजानुन उपरि दक्षिणपादप्रक्षेपे सति यत्सुखावस्थानं भवति तत्कृत्वा । प्राङ्मुख **आसीनः** स्वकीयां शाखामधीयीत । दर्भाणामप्सारत्वमन्यत्राऽऽम्नातम्,—"तासां यन्मेध्यं यज्ञियꣳ सदेवमासीत्तदपोदक्रामत्ते दर्भा अभवन्" इति । **ओषधीनां** मध्ये दर्भाणां शुद्धिहेतुत्वौत्तत्सारत्वं ततो दर्भासनवताऽधीयमानं **ब्रह्म सरसं** भवति—

तत्रोपक्रमे कंचिद्विशेषं विधत्ते—

दक्षिणोत्तरौ पाणी पादौ कृत्वा सपवित्रावोमिति प्रतिपद्यत एतद्वै यजुस्त्रयीं विद्यां प्रत्येषा वागेतत्परममक्षरम्—, इति ।

दक्षिणः पाणिरुत्तरो ययोस्तौ **दक्षिणोत्तरौ** । वामं पाणिं दक्षिणजानुन ऊर्ध्वमुत्तानं कृत्वा तस्योपरि दक्षिणहस्तमवाञ्चं कुर्यात् । तादृशौ च **पाणी पवित्रयुक्तौ** कार्यौ । तथा दक्षिणपादोऽपि वामपादस्योपरि स्थापनीयः । एवं कृत्वो**मिति प्रणवो**-

१ ख. ग. °क्षणकथनादे । २ ख. ग °धीयानः । द° । ३ ग. °मपां रसत्व° । ४ ख. ग. °ध्ये शु° । ५ क. °त्वात्सरसत्वं । ६ ख. °नत्वाद्धीयानां ब्र° । ग. °नत्वाद्धीयानं ब्र° । ७ ग. अत्रोपक्रमे ।

चारणेनोपक्रमं कुर्यात्। योऽयमोमित्येवंरूपो यजुर्मन्त्रः स त्रयीं विद्यां प्रति वेदत्रयस्य प्रतिनिधिरूपः। अत एव प्रणवगतानामकारोकारमकारमात्राणां वेदत्रयरूपेणाध्ययनमाथर्वणिका आमनन्ति—" तस्य ह वै प्रणवस्य पूर्वा मात्रा पृथिव्यकारः स ऋग्भिर्ऋग्वेदोऽथ द्वितीयाऽन्तरिक्षं स उकारः स यजुर्भिर्यजुर्वेदस्तृतीया द्यौः स मकारः स सामभिः सामवेदः " इति। किंचैषा प्रणवरूपा सर्वा वागपि। अत एव च्छन्दोगा आमनन्ति—" तद्यथा शङ्कुना सर्वाणि पर्णानि संतृण्णान्येवमोंकारेण सर्वा वाक्संतृण्णा " इति। अश्वत्थपत्रे दृश्यमानास्तन्तुसदृशा अवयवाः शङ्कवः, तैर्यथा कृत्स्नानि पर्णानि व्याप्तानि तद्वदोंकारेण सर्वाऽपि वाग्व्याप्ता। ऐतरेयेऽपि प्रणवादेरकारस्यैव सर्ववाग्व्याप्तिमामनन्ति—" अकारो वै सर्वा वाक्सैषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवति " इति। अत एव मातृकामन्त्रे सर्वानपि ककारादीन्वर्णानकारशिरस्कानेव पठन्ति। य(त)स्माद्युक्तं प्रणवस्य सर्वात्मकत्वम्। किंचैतत्प्रणवस्वरूपमुत्कृष्टमक्षरमविनश्वरं सर्ववेदान्तवेद्यं परब्रह्म वस्तु। अत एव पिप्पलादशाखायामधीयते—" एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकारः " इति। कठाश्च पठन्ति—" एतदेवाक्षरं ब्रह्म एतदेवाक्षरं परम् " इति। तस्मात्प्रणवेनैव स्वाध्यायप्रारम्भो युक्तः।

प्रणवप्रशंसापरामृचमवतारयति—

तदेतदृचाऽभ्युक्तम्—, इति।

तदेतत्परब्रह्मस्वरूपं प्रणवाक्षरं कयाचिदृचा स्पष्टमुक्तम्।

तामृचं दर्शयति—

ऋचो अक्षरे परमे व्योमन्यस्मिन्देवा अधि विश्वे निषेदुर्यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासत इति—, इति।

या एता ऋचस्ताः सर्वाः परम उत्कृष्टे व्योमन्विशेषेण रक्षकेऽक्षरे प्रणवे निषेदुराश्रिताः। अत एव कठशाखायामधीयते—

" सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत् " इति।

न केवलमृच एव तस्मिन्प्रणवे समाश्रिताः किंतु विश्वे सर्वे देवा अपि यस्मिन्प्रणवाक्षरेऽधिनिषेदुः, अधिकत्वेन निषण्णाः। अत एवोत्तरतापनीये देवानां परमात्मध्यानार्थं प्रणवपर्यवसानमुक्तम्—" आत्मानमनुष्टुभाऽन्विष्य प्रणवेनैव तस्मिन्नवस्थिताः "

---

१ क. ख. पूर्वमा°। २ ग. °रेयास्तु प्र°। ३ क. ख. °वेन स्वा°। ४ ग. °णवं प्र°। ५ ग. °शंस्याप°। ६ क °ष्टुभमन्वि°।

इति । अनेनैव प्रकारेणर्चो देवाश्च यस्मिन्प्रणवे निषेदुस्तत्प्रणवाक्षरं यो न वेद स पुमानधीयानोऽपि ऋचा किं करिष्यति, न खलु फलरहितां केवलां कृषिं केचित्प्रार्थयन्ते । य इद्धे पुनर्महात्मानस्तत्प्रणवाक्षरं विदुस्ते महर्षय इमे परिदृश्यमानाः परमहंसाः समासते सम्यगवतिष्ठन्ते । ऐहिकामुष्मिकविषयक्लेशरहिताः सुखिनो वर्तन्ते । तांश्च परमहंसाञ्जाबालशाखाध्यायिन उदाहरन्ति—" तत्र परमहंसा नाम संवर्तकारुणिश्वेतकेतुदुर्वासऋभुनिदाघजडभरतदत्तात्रेयरैवतकप्रभृतयः " इति । इत्यनेन मन्त्रेण प्रशस्तत्वात्प्रणवस्य वेदत्रयप्रतिनिधित्वं युक्तम् ।

तेन प्रणवेन प्रारभ्य पश्चात्पठनीयान्मन्त्रान्दर्शयति—

त्रीनेव प्रायुङ्क्त भूर्भुवः स्वरित्याहैतद्वै वाचः
सत्यं यदेव वाचः सत्यं तत्प्रायुङ्क्त—,इति ।

भूर्भुवः स्वरिति यद्व्याहृतित्रयं तल्लोकत्रयात्मकब्रह्मप्रतिपादकं तदाह पठेत् । तेन त्रीनेव वेदान्प्रयुक्तवान्भवति । व्याहृतीनां वेदत्रयसारत्वेन प्रोक्तत्वात् । एतच्च च्छन्दोगा अधीयते—"स एतां त्रयीं विद्यामभ्यतपत्तस्यास्तप्यमानाया रसान्प्रावृहद्भूरित्यृग्भ्यो भुव इति यजुर्भ्यः स्वरिति सामभ्यः" इति । [एतद्व्याहृतित्रयं] वेदत्रयसारत्वेनैं प्रोक्तत्वाद्वाचः संबन्धि सत्य(त्यं) स्वरूपामित्युच्यते । अतस्तत्सत्यमेव प्रयुक्तवान्भवति ।

व्याहृतित्रयादूर्ध्वं पठनीयं दर्शयति—

अथ सावित्रीं गायत्रीं त्रिरन्वाह पच्छोऽर्धर्चशोऽनवानꣳ
सविता श्रियः प्रसविता श्रियमेवाऽऽप्नोत्यथो प्रज्ञातयैव
प्रतिपदा छन्दाꣳसि प्रतिपद्यते (१), इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके द्वितीयप्रपाठक
एकादशोऽनुवाकः ॥ ११ ॥

अथ व्याहृत्यनन्तरं सावित्रीं सवितृदेवताकां गायत्रीछन्दस्कां तत्सवितुरित्यादिकामृचं च त्रिः पठेत् । तत्रायं प्रकारः । प्रथमं पादशः पादे पादे विरम्य पठेत् । ततोऽर्धर्चश एकैकस्मिन्नर्धे विरम्य पठेत् । ततोऽनवानं विरामरहितं यथा भवति तथा पठेत् । तस्यामृचि प्रतिपाद्यो यः सविता सोऽयं श्रियः प्रेरकः, अतो ब्रह्मयज्ञानुष्ठायी श्रियं प्राप्नोत्येव । एवमेकस्मिन्नहनि विधानमुक्तम् । अथो अनन्तरम् ।

---

१ क. पलरहितां । ग. वृषरहितां । २ क. ख. °रतात्रे° । ३ ग. इत्यङ्गिरसम° । ४ ख. °न वाचः ।

तदादिदिवसेषु, प्रज्ञातयैव प्रतिपदा पूर्वस्मिन्दिवसे किंचित्पठित्वा परेद्युरनुष्ठानायायमुपक्रम इति या प्रतिपत्प्रज्ञाता यः प्रारम्भप्रदेशो बुद्धौ स्थापितस्तयैव प्रतिपदा प्रारम्भप्रदेशेन च्छन्दांसि वेदावयवान्परेद्युः प्रतिपद्यते प्रारभते। पूर्वेद्युर्यावद्व्यवसितं तत एवाऽऽरभ्योत्तरेद्युरधीयीत न तु विप्रयुक्तं कंचिद्वेदभागम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयारण्यकभाष्ये द्वितीयप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

अथ द्वितीयप्रपाठके द्वादशोऽनुवाकः ।

यत्पूर्वमुक्तं प्राच्यां दिशि ग्रामाद्बहिरित्यादि । तत्राशक्तस्यानुकल्पं विधत्ते—

ग्रामे मनसा स्वाध्यायमधीयीत दिवा नक्तं वा—इति ।

यदा बहिर्गन्तुमशक्तो ग्रामेऽधीयते तदा मनसैवाधीयीत । उदित आदित्ये प्रारब्धुमशक्तश्चेद्दिवा नक्तं वाऽधीयीत ।

कस्यचिन्महर्षेर्मते मुख्य एवायं पक्षोऽपीति दर्शयितुं तमृषिमुदाहरति—

इति ह स्माऽऽह शौच आह्वेयः—, इति ।

शुचिनामकस्य महर्षेः पुत्रः शौचेयः, अहिसंज्ञिताया मातुः पुत्र आह्वेयो महर्षिरिति ह स्माऽऽह ग्रामे मनसेत्यादिकमपि मुख्यपक्षमे(ए) वेत्याह ।

नियमान्तरेष्वप्यशक्तस्यानुकल्पान्विधत्ते—

उतारण्येऽबलं उत वाचोत तिष्ठन्नुत व्रजन्नुताऽऽसीन उत शयानोऽधीयीतैव स्वाध्यायं तपस्वी पुण्यो भवति य एवं विद्वान्त्स्वाध्यायमधीते—, इति ।

ग्रामे मनसाऽध्ययनमुक्तम्, अरण्येऽप्यबलोऽशक्तश्चेन्मनसाऽधीयीत । तमेवाबलं प्रत्युत वाचेति पक्षान्तरमुच्यते । उच्चैरध्येतुमशक्तः केवलेन मनसा, यदा निद्रालस्यचिन्तादिकं भवति तदानीं वाचा जिह्वास्पन्दनमात्रेणाधीयीत । दर्भेष्वासीन इति यदुक्तं तत्राऽऽसननिर्बन्धे शक्तिरहितस्योत व्रजन्नित्यादयः पक्षाः । आलस्यपरिहारायेत-

---

१ ख. ग. °दिव° । २ क °ष्ठायो यत उपक्रामते सा प्रतिपत्प्रज्ञातया प्रारम्भप्रदेशेषु स्थापितया तयैव । ३ क. ख. तु यं कं° । ४ क. ख. °नसाऽधी° । ५ ख. ग. नक्तमधी° । ६ ग. °यितुमेत° । ७ क. ख. °र्षेः शौ° । ८ ग °चः, इति । अ° । ९ ख. ग. °व्यश° । १० घ. °चोदति° । ११ ख. °त । बलवन्तं प्र° । १२ क. ख. °सा नि° । १३ क. °ह्वादिरप° । ख. °ह्वाक्ष्यादिस्प° ।

ततः शनैर्व्रजन्वा क्वचिदेव तिष्ठन्वा नियममन्तरेण स्वेच्छयैवोपविश्य वा **शयानो वा शक्त्यनुसारेण स्वाध्यायमधीयीतैव** । न त्वङ्गलोपानुसारेण प्रधानस्य लोपो न्याय्यः। **तादृशस्वाध्याययुक्तोऽपि तपस्वी भवति**, अध्ययनफलं प्राप्नोति । **पुण्यः पङ्क्तिपावनश्च भवति** ।

एतस्य ब्रह्मयज्ञस्याङ्गभूतं कंचिन्मन्त्रं प्रदर्शयति—

नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः । नमो वाचे नमो वाचस्पतये नमो विष्णवे बृहते करोमि (१), इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके द्वितीयप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

ब्रह्मशब्देन वेदः प्रजापतिर्वोच्यते । **वाक्**शब्देन सरस्वती । **वाचस्पतिर्बृहस्पतिः** । प्रशस्तत्वाद्विष्णुर्बृहत् । अस्य मन्त्रस्य विनियोग उपरिष्टाद्वक्ष्यति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये द्वितीयप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

अथ द्वितीये त्रयोदशोऽनुवाकः ।

तत्रैव ब्रह्मयज्ञे कंचिदन्यं विशेषं विधत्ते—

मध्यंदिने प्रबलमधीयीतासौ खलु वावैष आदित्यो यद्ब्राह्मणस्तस्मात्तर्हि तेक्ष्णिष्ठं तपति तदेषाऽभ्युक्ता—इति ।

मध्यंदिनकाले **प्रबलमुच्चतरं** यथा भवति तथाऽधीयीत । योऽयं ब्रह्मयज्ञानुष्ठाता **ब्राह्मणोऽस्ति** स **एषोऽसौ** दिवि दृश्यमान **आदित्य** एव तत्प्राप्तियोग्यत्वात् । यस्मादादित्यरूपो **ब्राह्मणो मध्यंदिने प्रबलमधीयीत** तस्मात्तदात्मक आदित्योऽपि **तर्हि** मध्यंदिने काले **तेक्ष्णिष्ठमतिशयेन** तीक्ष्णं यथा भवति तथा **तपति** । **तदेतदादित्यमाहात्म्यं प्रति काचिदृगभ्युक्ता** ।

तामेतामृचं दर्शयति—

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः । आप्रा द्यावापृथिवी अन्तरिक्षꣳ सूर्य आत्मा जगतस्तस्थुषश्चेति,—इति ।

---

१ क. ख. °धीयते त° ।

देवानां दीप्यमानानां रश्मीनामनीकं समूहावष्टम्भनरूपमादित्यमण्डलं चित्रं काल-भेदेनारुणशुक्लादिवर्णोपेतत्वाच्चित्रं तादृशं मण्डलमुदगात्पूर्वस्यां दिश्युदयं प्राप्नोत्[2]। तच्च मण्डलमन्धकारनिवारणोपयुक्तत्वान्मित्रादीनां चक्षुःस्थानीयम्[3] । तदर्थमेवायं लोक-त्रयमाप्रा रश्मिभिरापूर्य वर्तते[4] । तन्मण्डलवर्ती सूर्यरूपः परमात्मा जगतो जङ्गमस्य तस्थुषः स्थावरस्याऽऽत्मा जीवरूपेण शरीरेष्ववस्थितः । इत्यनेन मन्त्रेणाऽऽदित्य-माहात्म्यमवगन्तव्यम् ।

ब्रह्मयज्ञस्येतरयज्ञवैलक्षण्यं दर्शयति—

स वा एष यज्ञः सद्यः प्रतायते सद्यः
संतिष्ठते तस्य प्राक्सायमवभृथः—,इति ।

अयं ब्रह्मयज्ञो यस्मिन्नहनि प्रारभ्यानुष्ठीयते तस्मिन्नेवाहनि समाप्यते नतु यज्ञा-न्तरवदितरदिनेष्वनुगच्छति तस्मात्प्राक्प्रातःकाले प्रारब्धस्य तस्य यज्ञस्य सायमव-भृथः समाप्तिः ।

समाप्तिकाले मन्त्रविशेषं विधत्ते—

नमो ब्रह्मण इति परिधानीयां त्रिरन्वाह—,इति ।

परिधीयते समाप्यते यया सेयमृक्परिधानीया । सा चात्र पूर्वानुवाक आम्नाता, ॐ नमो ब्रह्मण इत्येषा, तां त्रिः पठेत् ।

तैत्पाठादूर्ध्वं कर्तव्यतां दर्शयति—

अप उपस्पृश्य गृहानेति ततो यत्किंच
ददाति सा दक्षिणा (१), इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके द्वितीयप्रपाठके
त्रयोदशोऽनुवाकः ॥ १३ ॥

सेयं दक्षिणा गृह एव न चारण्य इत्यर्थः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्ति-रीयारण्यकभाष्ये द्वितीयप्रपाठके त्रयोदशोऽनुवाकः ॥ १३ ॥

---

१ ग. °मूहनानारू° । २ ग. °मेव लो° । ३ ख. °वाह लो° । ४ क. ख. °र्ती प° । ५ क. तदू° ।

अथ द्वितीये चतुर्दशोऽनुवाकः ।

ग्रहणाध्ययने यान्यनध्यायकारणानि[1] तानि ब्रह्मयज्ञाध्ययने स्वाध्यायं न निवारयन्तीति वक्तुं तेषामनध्यायकारणानां यज्ञाङ्गतामुपचरति—

तस्य वा एतस्य यज्ञस्य मेघो हविर्धानं विद्युदग्निर्वर्षꣳ हविस्तनयित्नुर्वषट्कारो यदवस्फूर्जति सोऽनुवषट्कारो वायुरात्माऽमावास्या[2] स्विष्टकृत्—, इति ।

अनध्यायहेतूनापस्तम्बो दर्शयति—विद्युत्स्तनयित्नुवृष्टिश्चापतौ यत्र संनिपतेयुस्तच्चहमनध्याय इति । सोऽयमकालमेघो ग्रहणाध्ययने निषिद्धोऽपि ब्रह्मयज्ञाध्ययने स्वीकार्य एव[3] । यथा सोमयागे हविर्धानं न यागविरोधि तथा तत्र मेघोऽपि । एवं विद्युदादौ द्रष्टव्यम् । अग्निर्ग्रामगृहादिदाहकः । अकाले महानुत्पातरूपो वायुरात्मा यजमानस्थानीयः । स्पष्टमन्यत् ।

अनध्यायहेतूनां वर्जनीयत्वं निवार्योपादेयत्वं दर्शयति—

य एवं विद्वान्मेघे वर्षति विद्योतमाने स्तनयत्यवस्फूर्जति पवमाने वायावमावास्यायाꣳ स्वाध्यायमधीते तप एव तत्तप्यते तपो हि स्वाध्याय इति—,इति ।

मेघादयो विरोधिनो न भवन्तीति यो विद्वान्सोऽयं सत्स्वपि मेघादिनिमित्तेषु स्वाध्यायमधीते तदा तपस्तप्तं भवति । यस्मादयं ब्रह्मयज्ञः स्वाध्यायः कृच्छ्रचान्द्रायणादिवत्तपोरूपस्तस्मान्न सन्त्यनध्यायाः । न हि चान्द्रायणादिकं मेघादिषु वर्ज्यते ।

कदाचिदप्यवर्जनेनानुष्ठितस्य ब्रह्मयज्ञस्य फलं दर्शयति—

उत्तमं नाकꣳ रोहत्युत्तमः समानानां भवति यावन्तꣳ ह वा इमां वित्तस्य पूर्णां ददत्स्वर्गं लोकं जयति तावन्तं लोकं जयति भूयाꣳसं चाक्षय्यं चाप पुनर्मृत्युं जयति ब्रह्मणः सायुज्यं गच्छति (१), इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके द्वितीयप्रपाठके चतुर्दशोऽनुवाकः ॥ १४ ॥

---

१ क. ख. 'नि ब्र° । २ ख. घ. °वास्याः स्वि° । ३ ख. 'व । सो° । ४ ख. तद्वद्ब्र ।

अनेन ब्रह्मयज्ञेन मरणादूर्ध्वमुत्तमं स्वर्गमारोहति, जीवनवेलायां पङ्क्तिपावनत्वात्समानानां मध्य उत्तमो भवति। उत्तमः स्वर्ग एव प्रपञ्च्यते। वित्तेन पूर्णां पृथिवीं ब्राह्मणेभ्यो ददत्पुरुषो यावन्तं स्वर्गमनेकभोगोपेतं प्राप्नोति तावन्तमसौ प्राप्नोति। ततो भूयांसमधिकमपि प्राप्नोति। अक्षय्यं पुनरावृत्तिरहितं च लोकं प्राप्नोति। तत्प्राप्तेरूर्ध्वं पुनर्मृत्युं न प्राप्नोति। किंतु परब्रह्मणः सायुज्यं मोक्षं गच्छति॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये द्वितीयप्रपाठके चतुर्दशोऽनुवाकः॥ १४॥

अथ द्वितीये पञ्चदशोऽनुवाकः।

ग्रहणस्वाध्याये यानि कारणान्यनध्यायस्य तान्यत्रापोह्य कारणान्तरमनध्यायस्य दर्शयति—

तस्य वा एतस्य यज्ञस्य द्वावनध्यायौ यदात्माऽशुचिर्यदा देशः—, इति।

उक्तस्य ब्रह्मयज्ञस्य द्वावनध्यायौ विद्येते। आत्मा ब्रह्मयज्ञस्य कर्ता स्वयमशुचिर्यदा भवति तदानीमेकोऽनध्यायः। देशो वा मूत्रपुरीषादिभिरशुचिर्भवति स द्वितीयोऽनध्यायः। न तु काश्चित्तृतीयोऽनध्यायहेतुरस्ति।

अथ तस्य यज्ञस्य सुलभत्वं दर्शयति—

समृद्धिर्दैवतानि—, इति।

समृद्धिः सामग्री। सा च यज्ञान्तरेषु द्रव्यार्जनादिना संपाद्यते। इह तु दैवतान्येव सामग्री न तु बाह्यसाधनं किंचिदपेक्षितमस्ति।

ब्रह्मयज्ञेन तुष्टेषु दैवतेषु फलं भवत्येव तस्मादेवंभूते कालादिवैकल्यशङ्कां परित्यज्य यज्ञानुष्ठाने फलसिद्धिं दर्शयति—

य एवं विद्वान्महारात्र उषस्युदिते व्रजन्नस्तिष्ठन्नासीनः शयानोऽरण्ये ग्रामे वा यावत्तरसन्स्वाध्यायमधीते सर्वाँल्लोकाञ्जयति सर्वाँल्लोकानानृणोऽनुसंचरति तदेषाऽभ्युक्ता—, इति।

अस्य यज्ञ[स्य]निमित्तद्वयव्यतिरेकेणानध्यायकारणं नास्ति सामग्री च न प्रयाससं-

१ क. °हणाध्ययने या°। २ क. ख. °ह दै°। ३ ग. °कल्प्यश°।

पाद्या विद्यत इत्येवं[1] विद्वान्पुमान्कालविषय आसनादिनियमविषये देशविषये च श्रद्धाजाड्यं परित्यज्य यावत्तरसं यावद्बलं यथाशक्ति स्वाध्यायमधीयानः स्वापेक्षितान्सर्वाल्लोकान्प्राप्नोति । तत्र तत्र लोके पुरुषान्तरवदृणयुक्तो न भवति, किंत्वनृण एवानुसंचरति, तत्तस्मिन्ननृणस्यानुसंचारे काचिद्[3]दृक्चोक्ता विद्यते ।

तामेतामृचं दर्शयति—

अनृणा अस्मिन्ननृणाः परस्मिꣳस्तृतीये लोके
अनृणाः स्याम । ये देवयानाः उत पितृयाणाः
सर्वान्पथो अनृणा आक्षीयेमेति—, इति ।

अस्मिन्भूलोके परस्मिन्नन्तरिक्षे तृतीये द्युलोके च, ब्रह्मयज्ञबलादनृणाः स्याम । ऋणेऽपाकृते सति देवयानाः पन्थान उत्तरमार्गविशेषाः पितृयाणाः पन्थानो दक्षिणमार्गविशेषा ऋणाभावेन प्रतिबन्धाभावात्सर्वानपि मार्गान्सर्वतः प्राप्नुयाम । ऋषीणामृणं ब्रह्मयज्ञेनापोद्यत इति तावत्सर्वेषां संमतम् । देवपितृकार्ययोरसमर्थस्य तदुभयविषयमप्यृणमनेनैवापोद्यते ।

अत एव स्मर्यते—

"जप्येनैव तु संसिध्येद्ब्राह्मणो नात्र संशयः ।
कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते" इति ॥

ततः सर्वान्पथो अनृणा आक्षीयेमेत्येतदुपपन्नम् ।

तदेतदनृणत्वं संभावयितुं पापस्पर्शराहित्येन स्वाध्यायं प्रशंसति—

अग्निं वै जातं पाप्मा जग्राह तं देवा आहुतीभिः[4] पाप्मानमपाघ्नन्नाहुतीनां यज्ञेन यज्ञस्य दक्षिणाभिर्दक्षिणानां ब्राह्मणेन ब्राह्मणस्य छन्दोभिश्छन्दसाꣳ स्वाध्यायेनापहतपाप्मा स्वाध्यायो देवपवित्रं वा एतत्तं योऽनूत्सृजत्यभागो वाचि भवत्यभागो नाके तदेषाऽभ्युक्ता—, इति ।

योऽयमग्निः[5] सृष्ट्यादावुत्पन्नस्तमुत्पन्नमात्रमेव सर्वः पाप्मा जग्राह, अग्निर्हि पापिनां पापशोधनाय समुत्पन्नः । अत एव स्मृतिकारा भाण्डादीनां पुनःपाकेन शुद्धिं ब्रुवते । यथा लोकेऽत्यन्तमलिनं वस्त्रमल्पजलेन यदा प्रक्षाल्यते तदानीं वस्त्रमालिन्यं सर्वं जले

---

१ क. ख. °वं पुमान्विद्वान्का° । २ क. ख. तस्मि° । ३ क. °दृक्प्रोक्ता । ४ ग. °हुतिभिः । ५ क. ख. अग्निः पा° ।

प्रविशति, तथा शोधनीयवस्तुगतः पाप्मा शोधकेऽग्नौ प्रविष्टः। तमाग्निगतं पापं(प्मानं) देवा आहुतिभिर्विनाशितवन्तः। तदाहुतिगतं पापं कृत्स्नं यज्ञेन, यज्ञगतं च पापं दक्षिणाभिः, दक्षिणागतं च पापं प्रतिग्रहीत्रा ब्राह्मणेन, ब्राह्मणगतं च पापं तत्तन्मन्त्रगतैर्गायत्र्यादिच्छन्दोभिः, छन्दोगतं च पापं स्वकीयशाखारूपेण स्वाध्यायेन। न चात्र स्वाध्यायगतस्य पाप्मनो निवर्तकान्तरमन्वेष्टव्यम्। यस्मादपहतपाप्मा स्वाध्यायः, न खलु कश्चिदपि पाप्मा स्वाध्यायं स्प्रष्टुमीष्टे। यस्मादेतत्स्वाध्यायस्वरूपं देवानामपि शोधकम्, देवा हि पूर्वस्मिञ्जन्मनि मनुष्या भूत्वा स्वाध्यायमधीत्य तदर्थं चानुष्ठाय शुद्धाः सन्तो देवत्वं प्राप्ताः, [तस्मात्] तमीदृशं स्वाध्यायं योऽनूत्सृजाति यः पुरुषः प्रारभ्य पश्चात्त्यजति स पुमानभागो वाचि भवति। वाङ्मात्रनिष्पाद्यत्वेनाप्रयासंसाध्यं स्वाध्यायाध्ययनं तथाविधायां प्रयासरहितायां मेधाफलहेतुभूतायां वाच्यपि भाग्यं तस्य परित्यक्तुर्नास्ति। महाप्रयासनिष्पाद्ये ज्योतिष्टोमादिसाध्ये स्वर्गे भाग्यं नास्तीति किमु वक्तव्यम्। यो हि पाणिलब्धं चिन्तामणिमग्निमध्ये प्रक्षिपति स भाग्यहीन इत्यस्मिन्नर्थे न कोऽपि विप्रतिपद्यते। तत्तस्मिंश्चिन्तामणिपरित्यागसदृशोऽयं स्वाध्यायपरित्याग इत्यस्मिन्नर्थे काचिद्दृगभ्युक्ता।

तामेतामृचं दर्शयति—

यस्तित्याज सखिविदꣳ सखायं न तस्य वाच्यपि
भागो अस्ति। यदीꣳ शृणोत्यलकꣳ शृणोति
न हि प्रवेद सुकृतस्य पन्थामिति—, इति।

यः पुमान्वेदस्य वाङ्मात्रनिष्पाद्यमध्ययनं करोति तं पुमांसं वेदः समस्तपापक्षयद्वारेण मोक्षपर्यन्तोत्तमगतिप्रदानेन प्रियं सखायमिवातिस्नेहेन पालयति, तस्मादध्येतारं सखायं वेत्तीति सखिवित्स्वाध्यायः स्वयं च तस्य पुरुषस्य सखाऽत्यन्तस्नेहेन कदाचिदप्यनपायात्। नहि निरन्तराध्यायिनं स्वाध्यायः कदाचिदपि परित्यजति, किंतु दिने दिनेऽतिशयेन तस्याधीनो भवति। तादृशं सखिविदं स्वयमपि सखायं यस्तित्याज परित्यक्तवान्, तस्य परित्यक्तुर्वाच्यपि भागो नास्ति आयासरहिते महाफले पाठेऽपि भाग्यं नास्ति। किमु वक्तव्यं महाप्रयाससाध्येऽनुष्ठाने तत्फले वा। यदीं यद्यपि स्वाध्यायत्यागी कदाचिद्विद्वत्सभायामुपविश्य बहूनि शास्त्राणि शृणोति तदानीमलकमलीकमनृतमेव शृणोति पुरुषार्थपर्यवसानाभावात्। नहि काव्यनाटकालं-

---

१ ग. °यत्रादि°। २ ग. चास्य स्वा°। ३ क. ख. °देवं स्वाध्या°। ४ ख. ग. °सिद्धं स्वा°। ५ क. ख. महा°फल°। ६ क. ख. °दृगुक्ता। ७ ग. °विदमापे।

कारादिश्रवणेन वृथायुःक्षयमन्तरेण कंचित्पुरुषार्थं पश्यामः । अत एव **वाजसनेयिनः समामनन्ति**—" नानुध्यायाद्बहूञ्शब्दान्वाचो विग्लापनं हि तत् " इति । वेदव्यतिरिक्तस्य शब्दजालस्य कण्ठशोषमात्रपर्यवसायित्वमेवोपपद्यते । यस्मादयं वेदत्यागी **सुकृतस्य पन्थां** पुण्यानुष्ठानमार्गं न जानाति तस्मात्कण्ठशोषमात्रपर्यवसानम् । द्विविधं हि पुरुषेणार्थ्यते, ऐहिकजीवनमामुष्मिकौ च भोगमोक्षौ । तत्र जीवनस्य कौब्यादेरपि कृषिवाणिज्यादिकँमि(देरि)वै भवेत्साधनँत्वम् । आमुष्मिकमार्गं तु वेदमन्तरेण सर्वतो न जानाति । अतः शास्त्रान्तराणि शृण्वतः कण्ठशौष एव परिशिष्यँते न केवलं सुकृतज्ञानमात्राभावः प्रत्युत दुरितं च महत्संपद्यते ।

अत एव **मनुना** स्मर्यते—

"योऽनधीत्य द्विजो वेदानन्यत्र कुरुते मतिम् ।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः" इति ।

इत्थं स्वाध्ययपरित्यागे बाधं दर्शयित्वा तदनुष्ठाने श्रेयो दर्शयति—

तस्मात्स्वाध्यायोऽध्येतव्यो यं यं क्रतुमधीते तेन तेनास्येष्टं भवत्यग्नेर्वायोरादित्यस्य सायुज्यं गच्छति तदेषाऽभ्युक्ता—,इति ।

यस्मात्स्वाध्यायव्यतिरेकेण सुकृतमार्गो न ज्ञायते **तस्मात्स्वाध्यायोऽध्येतव्यः**, ग्रहणाध्ययनं ब्रह्मयज्ञाध्ययनं च कर्तव्यमँ् । तच्चोभयं परमपुरुषार्थसाधनमित्युपनिषदि बहूनामृषीणां मतभेदोपन्यासप्रसङ्गेन विस्पष्टमाम्नातम्—स्वाध्यायप्रवचने एवेति नाको **मौद्गल्यः**, तद्धि तपस्तद्धि तप इति । सत्यवदनमेव परमपुरुषार्थसाधनमिति **रांथीतरस्य** मतम् । कृच्छ्रचान्द्रायणादिरूपं तप एव तत्साधनमिति **पौरिशिष्टेर्मतम्** । **मौद्गल्यस्त्वत्यन्तरहस्यदर्शी** रहस्यार्थत्वात्तदेतदुभयमुवाच । तत्र ग्रहणार्थमध्ययनं[स्वाध्यायः] गृहीतस्य वेदस्य प्रकर्षेण प्रतिदिनं ब्रह्मयज्ञरूपेण वचनं प्रवचनम् । उभे एवोत्तमे पुरुषार्थसाधने सत्यादीनामत्रार्थसिद्धत्वात् । यो हि निरन्तरं स्वाध्यायं पठति तस्यानृतवदने कः प्रसङ्गः । तपोऽप्यत्रार्थसिद्धं निषिद्धविषयप्रवणानामिन्द्रियाणां बलक्षयद्वारेणोद्धतत्वं वारयितुं कृच्छ्रचान्द्रायणादिना शरीरशोषँरूपं तपः क्रियते । स्वाध्यायपरस्य तु विषयमात्रचिन्तैव नास्ति कुतो दुष्टविषयेषु प्रवृत्तिः ।

---

१ क. ख. °र्धं पु° । २ ख. कार्य्यादे° । ग कार्ष्यादे° । ३ क. °पि वा° । ४ ग. °कमेव । ५ ख. ग. °व महत्सा° । ६ ख. ग. °नम् । ७ °शोषा ए° । ८ ख. °ष्यन्ते । न । ९ ख. ब्रह्मध्याय° । ग. ब्रह्माध्य° । १० ग. °म् । एत° । ११ ग. °र्थत्वेन सा° । १२ ग. राथान्तर° । १३ क. ख. °र्शी तदे° । १४ क. °षणरू° । १५ क. °ये पुरुषद्व° । ख. °ये पुरुषप्र° ।

तच्चिन्तापूर्वकत्वं प्रवृत्तेर्भगवतोक्तम्—

"ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते।
सङ्गात्संजायते कामः कामात्क्रोधोऽभिजायते॥
क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः।
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति" इति॥

विषयध्याननिवृत्त्यर्थमेव चित्तवृत्तिनिरोधरूपं योगं वक्तुं कृत्स्नं योगशास्त्रं प्रवृत्तम्। सा च विषयध्याननिवृत्तिः स्वाध्यायनिरतस्याप्रयासेनैव सिद्धा। तत्र किमनेन योगशास्त्रेण कृच्छ्रचान्द्रायणादिना तपसा वा।

अत एवाभिज्ञा आहुः—

"अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत्।
इष्टस्यार्थस्य संसिद्धौ को विद्वान्यत्नमाचरेत्" इति॥

एतत्सर्वमभिप्रेत्य मौद्गल्यस्तद्धि तपस्तद्धि तप इति प्रसिद्धिवाचकेन हिशब्देन वीप्सया च स्वाध्यायप्रवचनयोरत्यादरं दर्शयति। न च स्वाध्यायपाठमात्रेण यागानुष्ठानाभावान्न पुरुषार्थ इति शङ्कनीयम्। अयमध्येताऽग्निष्टोमेन वाजपेयराजसूयाश्वमेधादीनां मध्ये यं यं क्रतुं साङ्गमधीते, अस्याध्येतुः पुरुषस्य तेन तेन क्रतुनेष्टं भवति। त्रिविधो हि यागः। कायिको वाचिको मानसश्चेति, तत्राध्येतुर्वाचिकस्य निष्पत्तौ नास्त्येव विवादः। यद्यध्येताऽर्थमपि जानाति तदाऽध्ययनकाले तदनुसंधानान्मानसोऽपि निष्पद्यते। कायिकश्चेन्नास्ति माऽस्तु नाम द्रव्यार्जनरहितस्याधिकाराभावात्। यस्य त्वधिकारः कायिकमप्यसौ करोत्वितरस्य तु वाचिकेनैव तत्फलं लभ्यते। तस्मादयमध्येताऽन्यादीनां सायुज्यं गच्छति। तत्तस्मिन्वेदविदो माहात्म्ये काचिदभ्युक्ता।

तामेतामृचं दर्शयति—

ये अर्वाङुत वा पुराणे वेदं विद्वाꣳसमभितो वदन्त्यादित्यमेव ते
परिवदन्ति सर्वे अग्निं द्वितीयं तृतीयं च हꣳसमिति—, इति।

अर्वाङ्वाञ्चमिदानींतनमनुष्यमध्येतॄरूपम्, उत वा पुराणेऽथवा पुरातनं व्यासवसिष्ठादिरूपम्। वेदं विद्वांसं पाठादर्थाच्च वेदतत्त्वाभिज्ञं महात्मानम्। ये मूर्खा अभितो वदन्ति तत्र तत्र निन्दन्ति ते मूर्खाः सर्वेऽप्यादित्यमेव निन्दन्ति। ततो द्वितीयमग्निं निन्दन्ति। ततस्तृतीयं हंसं गमनशीलं वायुं निन्दन्ति। अस्य वेद-

---

१ क. ख. प्रकृतेर्भ°। २ ख. ग. °ण योगा°। ३ क. ख. °मरा°। ४ ग. क्रतुभागम°। ५ क. °नसिकश्चे° । ६ ग. °कस्य नास्ति । ७ ख. त्वस्त्यधि°। ८ ग. °रोतीत°। ९ ग. °वशिष्ठा°।

विदोऽग्निवाय्वादित्यसायुज्ययोग्यत्वादेतन्निन्दैव तेषां निन्दा, इत्यनेनैव मन्त्रेणोम्यादिरूपत्वलक्षणं वेदविन्माहात्म्यं दर्शितम् ।

अस्य मन्त्रस्य तात्पर्यं दर्शयति—

यावतीर्वै देवतास्ताः सर्वा वेदविदि ब्राह्मणे वसन्ति तस्माद्ब्राह्मणेभ्यो वेदविद्भ्यो दिवे दिवे नमस्कुर्यान्नाश्लीलं कीर्तयेदेता एव देवताः प्रीणाति (१), इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके द्वितीयप्रपाठके पञ्चदशोऽनुवाकः ॥ १५ ॥

अग्निरवमो देवतानां विष्णुः परम इत्युक्तत्वादग्निप्रभृतयो विष्णुपर्यन्ता यावत्यो देवताः सन्ति ताः सर्वाः पाठतोऽर्थतश्च वेदविदि ब्राह्मणे[3] वसन्ति । एकैकस्मिन्मन्त्र एकैको[2] देवः प्रतिपाद्यते । ते च मन्त्राः सर्वेऽध्येतुर्वाचि वेदितुर्मनसि च वर्तन्ते, अतो वेदविदां ब्राह्मणानां सर्वदेवतात्मकत्वात्तेभ्यः प्रतिदिनं नमस्कुर्यात् । अश्लीलं तदीयमशुभं किमपि विद्यमानमविद्यमानं वा न कीर्तयेत् । एतेन वेदविदो ब्राह्मणस्य सत्कारेण सर्वा अप्येता देवताः परितोषयति ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये द्वितीयप्रपाठके पञ्चदशोऽनुवाकः ॥ १५ ॥

अथ द्वितीये षोडशोऽनुवाकः ।

अथ कस्यचिदयाज्यस्य याजने तथा कस्यचिदयोग्यस्य पुरुषस्य द्रव्यप्रतिग्रहे च प्रायश्चित्तत्वेन स्वाध्यायं विधत्ते—

रिच्यत इव वा एष एव रिच्यते यो याजयति प्रति वा गृह्णाति याजयित्वा प्रतिगृह्य वाऽनश्नन्स्वाध्यायं वेदमधीयीत—, इति ।

यः पुमान्स्वयमापद्रहितोऽपि द्रव्यलोभादयाज्यं याजयति निषिद्धं द्रव्यं वा प्रतिगृह्णाति सं पुमानिह लोके रिच्यत इव कीर्तिशून्य इव भवति । अहो दुरात्माऽयमेवं धनिकोऽपि सन्द्रव्यलोभादन्यायं करोतीति सर्वे जनास्तं निन्दन्ति तदिदमिह

---

१ ग. °णाऽऽदित्यादि° । २ ग. एको । ३ ग. °र्वाच्यध्येतु° ।

लोके रिक्तत्वम्। तथा प्रेव रिच्यते परलोकेऽपि प्रकर्षेण रिक्त इव भवति, पुण्यलोकाभाव एव रिक्तत्वम्। याजनप्रतिग्रहयोर्जीविकारूपेण शास्त्रेऽभ्युपगतत्वान्निषिद्धयाजनप्रतिग्रहविषयमिदं द्रष्टव्यम्। अतो द्रव्यलोभाद्याजयित्वा प्रतिगृह्य वा भोजनरहितस्त्रिवारं[2] स्वशाखाध्ययनरूपं वेदं जपेत्।

तत्राशक्तस्य पक्षान्तरमाह—

त्रिरात्रं वा सावित्रीं गायत्रीमन्वातिरेचयति[3]—, इति।

गायत्रीच्छन्दस्कां सवितृदेवताकां तत्सवितुर्वरेण्यमित्येतामृचं भोजनरहितो दिनत्रयमनुष्ठाय रेचयति, पूर्वोक्तप्रकारेण रिक्तं स्वात्मानमरिक्तं करोति। अपकीर्तिं पुण्यक्षयं च निवर्तयेदित्यर्थः।

पक्षद्वयेऽपि दक्षिणां विधत्ते—

वरो दक्षिणा वरेणैव वरꣳ[4] स्पृणोत्यात्मा हि वरः (१), इति॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके द्वितीयप्रपाठके षोडशोऽनुवाकः॥ १६॥

गौर्वै वर इति सूत्रकारेणोक्तत्वाद्गौरेव दक्षिणा, वरेण श्रेष्ठेन गोद्रव्येण वरं श्रेष्ठं ब्राह्मणं स्पृणोति प्रीणयति। यस्माद्वरो गौरात्मैव तस्मात्स्वेन समानत्वात्तया दक्षिणया स्वात्मानमेव दत्तवानिति कृत्वा तत्पापनिवृत्तिर्युक्ता॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये द्वितीयप्रपाठके षोडशोऽनुवाकः॥ १६॥

अथ द्वितीये सप्तदशोऽनुवाकः।

पूर्वमनापदि दुष्टयाजनस्य प्रायश्चित्तमुक्तम्। इदानीमापदि तद्याजनस्य पूर्वस्मादल्पं प्रायश्चित्तं विधत्ते—

दुहे ह वा एष छन्दाꣳसि यो याजयति
स येन यज्ञक्रतुना याजयेत्सोऽरण्यं परेत्य[5]
शुचौ देशे स्वाध्यायमेवैनमधीयन्नासीत—, इति।

यः पुमॉन्धनाभावे जीवनाभावात्प्राणरक्षणायायाज्यमपि पुरुषं याजयेत्। एतच्च

---

१ ग. वाऽनश्नन्भोज°। २ ग. °हितः स्वाध्यायं त्रिवा°। ३ ग. °ति। ४ ग. परीत्य। ५ क. ख. °मान्प्राण°।

वाजसनेयके दर्शितम्—"प्राणस्य वै सम्राट्कामायायाज्यं याजयत्यप्रतिगृह्यस्य प्रतिगृह्णाति" इति । ईदृशः पुमांश्छन्दांसि दुहे स्वकीयान्मन्त्रान्रिक्तीं करोति फलरहितान्करोति । तत्परिहारार्थं येन यज्ञक्रतुना याजितवानेनमेव क्रतुभागं स्वाध्यायं स पुमानरण्ये गत्वा पठन्नासीत, तेन प्रायश्चित्तं संपाद्यते ।

तत्संभावनार्थं ध्यानार्थं वा तत्र यज्ञावयवान्संपादयति—

तस्यानशनं दीक्षा स्थानमुपसद आसनꣳ सुत्या वाग्जुहूर्मनं उपभृद्धृतिर्ध्रुवा प्राणो हविः सामाध्वर्युः स वा एष यज्ञः प्राणदक्षिणोऽनन्तदक्षिणः समृद्धतरः (१), इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके द्वितीयप्रपाठके सप्तदशोऽनुवाकः ॥ १७ ॥

तस्य प्रायश्चित्तार्थं वेदभागमध्येतुः पुरुषस्य तावत कीले यो भोजनपरित्यागः सैव दीक्षा । यदेतच्छुद्धदेशरूपं स्थानं ता एवोपसदः, यत्तत्रोपवेशनं सैव सुत्या सोमाभिषवः, येयमस्य वाक्सेयं जुहूः, यन्मनः सैवोपभृत्, या धृतिरनुष्ठेयार्थावधारणा सैव ध्रुवा, यः प्राणस्तदेव हविः, यत्साम गीयमानं स एवाध्वर्युः । सोऽयं भावनारूपो यज्ञः प्राणदक्षिणः, देहान्ते प्राणपरित्याग एव दक्षिणास्थानीयः, अतोऽनन्तदक्षिणत्वादयं यज्ञोऽतिशयेन समृद्धः । उक्तयज्ञसमाप्तौ प्रभूतमन्नं देयमिति तात्पर्यार्थः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये द्वितीयप्रपाठके सप्तदशोऽनुवाकः ॥ १७ ॥

अथ द्वितीयेऽष्टादशोऽनुवाकः ।

प्रायश्चित्तार्थस्वाध्यायप्रसङ्गादवकीर्णिप्रायश्चित्तमुच्यते । तद्विधानार्थमादौ प्रस्तौति—

कतिधाऽवकीर्णी प्रविशति चतुर्धेत्याहुर्ब्रह्मवादिनो मरुतः प्राणैरिन्द्रं बलेन बृहस्पतिं ब्रह्मवर्चसेनाग्निमेवंतरेण सर्वेण तस्यैतां प्रायश्चित्तिं विदांचकार सुदेवः काश्यपः—, इति ।

---

१ ग. °कामेभ्य अयाज्यं । २ क. °हे तदीया° । ३ क. ग. गायनं ।

अवकीर्णं भग्नव्रतं ब्रह्मचारिणो रेतःस्कन्दनादिकं तद्यस्यास्ति सोऽवकीर्णी, तादृशः पुमान्स्वकीयैरेवावयवैर्देवान्प्रविशति देवास्तदीयानवयवान्विनाशयन्ति, तत्र कतिभिः प्रकारैर्देवान्प्रविशतीत्येवमनभिज्ञस्य प्रश्नः । तत्राभिज्ञा ब्रह्मवादिनश्चतुर्भिः प्रकारैरित्युत्तरमाहुः । त एव प्रकाराः स्पष्टी क्रियन्ते—स्वकीयैः प्राणैर्मरुतो देवान्प्रविशति । बलेनेन्द्रं प्रविशति । ब्रह्मवर्चसेन बृहस्पतिं प्रविशति । इतरेण सर्वेण वागादिनाऽग्निमेव प्रविशति । मरुदादयोऽस्य प्राणानपहरन्तीत्यर्थः । कश्यपस्य पुत्रः सुदेवाख्यः कश्चिदृषिस्तस्यैतस्य दोषस्य प्रायश्चित्तं निश्चितवान् ।

तदिदं प्रायश्चित्तं विधत्ते—

यो ब्रह्मचार्यवकिरेदमावास्यायां रात्र्यामग्निं प्रणीयोपसमाधाय द्विराज्यस्योपघातं जुहोति कामावकीर्णोऽस्म्यवकीर्णोऽस्मि काम कामाय स्वाहा कामाभिद्रुग्धोऽस्म्यभिद्रुग्धोऽस्मि काम कामाय स्वाहेत्यमृतं वा आज्यममृतमेवाऽऽत्मन्धत्ते,—इति ।

आज्यस्योपघातमाज्यमुद्धरन्वोपहत्य सकृत्सकृदादाय **द्विर्जुहोति** । तत्र प्रथममन्त्रस्यार्थः । हे **कामदेवावकीर्णोऽस्मि** त्वत्प्रेरणया व्रतभ्रंशलक्षणमवकरं प्राप्तोऽस्मि । पुनरुक्तिरनुतापप्रकटनार्था । अवकरपरिहारार्थं **कामाय** देवाय स्वाहुतमिदमस्तु । **अभिद्रुग्धो** व्रतभ्रंशलक्षणाभिद्रोहं कृतवानस्मि । अन्यत्प्रथममन्त्रवत् । आज्यप्रशंसनमन्त्राऽऽज्यस्य देवप्रियत्वेनामृतत्वात्तद्धोमेनावकरपरिहाररूपममृतं स्वात्मनि संपादयति ।

उत्तरं कर्तव्यं विधत्ते—

हुत्वा प्रयताञ्जलिः कवातिर्यङ्ङग्निमभिमन्त्रयेत,—इति ।

करयोः संपुटीकरणमञ्जलिः । तस्य प्रयतत्वं निश्छिद्रत्वम् । कवातिर्यगी(ङी)षत्तिरश्चीनशरीरो नात्यन्तमभिमुखो नापि पराङ्मुखोऽपि तु पार्श्वे स्थितः ।

अभिमन्त्रणे मन्त्रं दर्शयति—

सं मांऽऽसिञ्चन्तु मरुतः समिन्द्रः सं बृहस्पतिः । सं माऽयमग्निः सिञ्चत्वायुषा च बलेन चाऽऽयुष्मन्तं करोत मेनि—, इति ।

मरुतो देवाः प्राणैर्विशीर्णं **मामासिञ्चन्तु**, पुनः संभूय सिक्तमाप्यायितं कुर्वन्तु । **एवमिन्द्रादिषु** योज्यम् । किंचाऽऽयुषा **बलेन** च संयोज्य संपूर्णायुर्युक्तं कुर्वन्तु ।

---

१ क. ग °माभि° । २ क. °हुः . ते च प्र° । ३ क. °श्चिनि ना° । ४ ख °मुपहर° । ग °मुपहत्योप° । ५ ख. °कृद्भ्रुवादा° । ६ क ख. °नरप्युक्ति° । ७ क. अ[व]कीर्णी(र्णि)[त्व]प्रकटनार्थं । ८ ग. °त्तरक° । ९ ग. °न वयः संयो° ।

अनेनोपस्थानेन पूर्वोक्तदोषसमाधानं दर्शयति—

प्रति हास्मै मरुतः प्राणान्दधति प्रतीन्द्रो बलं प्रति बृहस्पतिर्ब्रह्मवर्चसं प्रत्यग्निरितरः सर्वꣳ सर्वतनुर्भूत्वा सर्वमायुरेति,—इति।

अस्मै यजमानार्थं मरुतो देवाः **प्राणान्प्रतिदधति** प्रतिष्ठापयन्ति। एवमिन्द्रादयोऽपि। ततोऽयं **सर्वतनुः** संपूर्णसर्वावयवो **भूत्वा** संपूर्णमायुः प्राप्नोति।

अभिमन्त्रणस्याऽऽवृत्तिं विधत्ते—

त्रिरभिमन्त्रयेत त्रिषत्या हि देवाः,—इति।

त्रिवारानुष्ठाने सत्यमिदं न तु कपटरूपमिति विश्वासो येषां देवानां ते **त्रिषत्याः**।

उक्तं प्रायश्चित्तं पापान्तरेऽप्यतिदिशति—

योऽपूत इव मन्येत स इत्थं जुहुयादित्थमभिमन्त्रयेत पुनीत एवाऽऽत्मानमायुरेवाऽऽत्मन्धत्ते,— इति।

निश्चितस्यावकरस्याभावे कस्यापि पापस्य संभावनयाऽहमपूत इति **यः शङ्कते** सोऽपि पूर्वोक्तहोमाभिमन्त्रणे कुर्यात्। स पुमान्स्वात्मानं शोधयित्वा स्वात्मनि **सर्वमायुः** संपादयति।

तत्रोभयत्र दक्षिणां विधत्ते—

वरो दक्षिणा वरेणैव वरꣳ स्पृणोत्यात्मा हि वरः (१), इति॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके द्वितीयप्रपाठकेऽष्टादशोऽनुवाकः॥ १८॥

पूर्ववद्व्याख्येयम्॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये द्वितीयप्रपाठकेऽष्टादशोऽनुवाकः॥ १८॥

अथ द्वितीय एकोनविंशोऽनुवाकः।

इदानीं सर्वयागारम्भेष्वायुष्करं ब्रह्मोपस्थानं विधित्सुस्तन्मन्त्रमाह। अथवा सायंकालीनसंध्यावन्दनादूर्ध्वं ध्रुवमण्डले परब्रह्मोपस्थानार्थं मन्त्रमाह—

भूः प्रपद्ये भुवः प्रपद्ये स्वः प्रपद्ये भूर्भुवः स्वः

---

१ क. 'यितुं स्वा°'।

प्रपद्ये ब्रह्म प्रपद्ये ब्रह्मकोशं प्रपद्येऽमृतं प्रपद्येऽमृतकोशं प्रपद्ये चतुर्जालं ब्रह्मकोशं यं मृत्युर्नावपश्यति तं प्रपद्ये देवान्प्रपद्ये देवपुरं प्रपद्ये परीवृतो वरीवृतो ब्रह्मणा वर्मणाऽहं तेजसा कश्यपस्य,—इति ।

य एते पृथिव्यादयस्त्रयो लोका यश्चैषां **लोकानां** संघस्तत्सर्वं **प्रपद्ये** प्राप्नोमि[1] **ब्रह्मशब्देन** चतुर्मुखस्य शरीरमुच्यते। तस्य कोशस्थानीयो ब्रह्मलोकः। अमृतशब्देन विराट्कारणभूतः सूत्रात्मोच्यते[2], तस्य कोशस्थानीयमव्यक्तम्[3]। एतच्चतुर्विधं **प्रपद्ये**[4] भजामीत्यर्थः। **चतुर्जालं** चतुर्विधा अन्नमयप्राणमयमनोमयविज्ञानमयाः कोशा जालवदावरका यस्य पञ्चमकोशस्य तं चतुर्जालं परब्रह्मणः कोशं यमानन्दमयं **मृत्युर्नावपश्यति** नहि तस्य कारणरूपस्य कार्यवद्विनाशोऽस्ति, तादृशं कोशमहं **प्रपद्ये**। **देवान्**[5] इन्द्रादीन्, तेषां पुरं **देवपुरं** च **प्रपद्ये**। अहं तेन **ब्रह्मणा वर्मणा** कवचरूपेण परमात्मना **परीवृतः** परितो वेष्टितो वरीवृतः पुनः पुनर्वेष्टितस्तथा **कश्यपस्य तेजसा** कश्यपस्य प्रेक्षकस्य कश्यपः पश्यको भवतीति न्यायेन सर्वसाक्षिण ईश्वरस्य तेजसा परिवृतः। अहमीदृशो रक्षकोऽयं ब्रह्मा तदुपस्थानेन मृत्युं तरामीत्यर्थः।

ब्रह्मोपस्थानकाले सर्वात्मकस्य परमेश्वरस्य शिशुमाराख्यजलग्र (ग्रा ?) हरूपत्वं ध्यानार्थं दर्शयति—

यस्मै नमस्तच्छिरो धर्मो मूर्धानं ब्रह्मोत्तरा हनुर्यज्ञोऽधरा विष्णुर्हृदयꣳ संवत्सरः प्रजननमश्विनौ पूर्वपादावत्रिर्मध्यं मित्रावरुणावपरपादावग्निः पुच्छस्य प्रथमं काण्डं तत इन्द्रस्ततः प्रजापतिरभयं चतुर्थꣳ—, इति।

यस्मै परब्रह्मणे **नमः** सर्वैर्नमस्कारः क्रियते तत्परं ब्रह्मात्र शिशुमाराख्यध्यातव्यस्य जलग्राहस्य **शिर** उत्तमाङ्गस्थानम्। योऽयमनुष्ठेयो **धर्मः** स **मूर्धानं** मूर्धस्थानीयः, शिरसो मूर्ध्नश्चैकस्मिन्नेवाऽऽयतन ऊर्ध्वाधोभागभेदेन भिदा। योऽयं चतुर्मुखो **ब्रह्मा** सोऽयं तस्य ग्र (ग्रा ?) हस्योत्तरा **हनुः**। यो **यज्ञः** सोऽधरा **हनुः**। यो **विष्णुः** सोऽयं हृदयस्थानीयः। यः **संवत्सरः** सोऽयं **प्रजननेन्द्रियस्थानीयः**। याव-

---

१ ग. °मि। ब्रह्म प्रपद्ये ब्रह्मकोशं प्रपद्येऽमृतं प्रपद्येऽमृतकोशं प्रपद्ये। ब्र° । २ ख. ग. कोशः स्थानं जनलो° । ३ ग. °भूतं सू° । ४ ग. °त्रात्मरूपमुच्य° । ५ ख. ग. कोशः स्थानम° । ६ क. °द्ये प्राप्नोमी° । ७ क. ग. जलग्रहस्य ।

श्विनौ तौ तस्य ग्र (ग्रा ?) हस्य पूर्वपादौ । योऽयमत्रिमुनिः सोऽयं मध्यशरीरम् । यौ चित्राबरणौ देवौ तावपरपादौ । शिशुमारस्य पुच्छे बहवो भागाः । तत्राग्निः पुच्छस्य प्रथमं काण्डं प्रथमो भागः, ततस्तदूर्ध्वमिन्द्रो द्वितीयो भागः, ततोऽप्यूर्ध्वं प्रजापतिस्तृतीयो भागः, ततोऽपि परतोऽभयं भयरहितं परं ब्रह्म चतुर्थो भागः ।

एवं ध्यातव्यानवयवान्संपाद्यावयविनं दर्शयति—

स वा एष दिव्यः शाकरः शिशुमारस्तꣳ ह,—इति ।

यस्मै नमस्ताच्छिर इत्यादिनाऽभयं चतुर्थमित्यन्तेन वाक्येन योऽयं निरूपितः **स एष दिव्यो** दिवि भवः, **शाकरो**ऽत्यन्तशक्तिमान् शिशून्मारयति मुखेन निगिरतीति **शिशुमारो** जलग्र(ग्रा)हविशेषः, स हि जलमध्येऽत्यन्तविवृतेन मुखेन मनुष्यान्गृह्णातीति ।

एवं ध्यातव्यो ग्र(ग्रा?)हो निरूपितः, तद्ध्यानं तत्फलं च दर्शयति—

य एवं वेदाप पुनर्मृत्युं जयति जयति स्वर्गं लोकं नाध्वनि प्रमीयते नाग्नौ प्रमीयते नाप्सु प्रमीयते नानपत्यः प्रमीयते लघ्वान्नो भवति,—इति ।

यः पुमान्दिव्यं शिशुमारं वेद मनसा ध्यायति स **पुनरपमृत्युं जयति** मार्गादिमरणरूपोऽपमृत्युविशेषश्च न भवति, दुर्मरणं तस्य न भवतीत्यर्थः । [**लघ्वान्नो**] लघ्वान्नः सर्वत्र सुलभान्नो भवति ।

अथ ध्यानानन्तरमनुमन्त्रणमाह—

ध्रुवस्त्वमसि ध्रुवस्य क्षितमसि त्वं भूतानामधिपतिरासि त्वं भूतानाꣳ श्रेष्ठोऽसि त्वां भूतान्युपपर्यावर्तन्ते नमस्ते नमः सर्वं ते नमो नमः *शिशुकुमाराय नमः(१) इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके द्वितीयप्रपाठक एकोनविंशोऽनुवाकः ॥ १९ ॥

अनेन मन्त्रेणोदङ्मुखो भूत्वा ध्रुवमण्डलं पश्यन्शिशुमाररूपेण तमुपतिष्ठेत्(त) । हे शिशुमार त्वं **ध्रुवोऽसि** विनाशरहितोऽसि । तथा ध्रुवस्य जगत आकाशादेः **क्षितं**

---

* ग पुस्तके टिप्पण्यां शिशुमारकुमारायेति पाठोऽन्यपुस्तकस्थो दत्तः ।

---

१ क. ख. °त उर्ध्व° । २ ग. संदर्शयति । ३ ख. ग. °ति । यदेवं । ४ क. °मात्मित्यं शि° । ५ क. पुमानप° ६ ग. °णमन्त्रमा° ।

निवासस्थानमसि। भूतानां सर्वेषां प्राणिनां त्वमधिपतिरसि। अत एव भूतानां मध्ये श्रेष्ठोऽसि। भूतानि सर्वाणि त्वामुपेत्य परितः सेवन्ते। तस्मात्ते तुभ्यं नमोऽस्तु यत्सर्वं जगत्तवाधीनं तथा सति नमः सर्वं त्वदीयाय सर्वस्मै नमः। तथा ते नमः सर्वस्य स्वामिने तुभ्यमपि नमः। किं बहुना नमः शिशुकुमाराय नमः शिशुकुमारस्य जलग्र(ग्रा?) हविशेषस्य कुमारो बालकस्तदाकारो यो ध्रुवस्तस्मै नमस्कारोऽस्तु। उभयतो नमस्कारोऽयं मन्त्रः, तच्च नमस्कारद्वयमादरार्थम्॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयारण्यकभाष्ये द्वितीयप्रपाठक एकोनविंशोऽनुवाकः॥ १९॥

अथ द्वितीयप्रपाठके विंशोऽनुवाकः।

संध्यावन्दनाङ्गत्वेन शिशुमारोपस्थानमुक्तम्, अथ दिगुपस्थानमुच्यते। तत्र प्रथमं मन्त्रमाह—

नमः प्राच्यै दिशे याश्च देवता एतस्यां
प्रतिवसन्त्येताभ्यश्च नमः,—इति।

प्राच्यै पूर्वस्यै दिशे तदधिष्ठात्र्यै देवतायै नमोऽस्तु। **याश्चैतस्यां** प्राच्यां दिशि **देवताः प्रतिवसन्त्येताभ्यो** देवताभ्यश्च नमोऽस्तु।

अथ द्वितीयादिमन्त्रानाह—

नमो दक्षिणायै दिशे याश्च देवता एतस्यां प्रतिवसन्त्येताभ्यश्च नमो नमः प्रतीच्यै दिशे याश्च देवता एतस्यां प्रतिवसन्त्येताभ्यश्च नमो नम उदीच्यै दिशे याश्च देवता एतस्यां प्रतिवसन्त्येताभ्यश्च नमो नम ऊर्ध्वायै दिशे याश्च देवता एतस्यां प्रतिवसन्त्येताभ्यश्च नमो नमोऽवरायै दिशे याश्च देवता एतस्यां प्रतिवसन्त्येताभ्यश्च नमो नमोऽवान्तरायै दिशे याश्च देवता एतस्यां प्रतिवसन्त्येताभ्यश्च नमः,—इति।

एते मन्त्राः प्रथममन्त्रवद्व्याख्येयाः।

---

१ ग. °गत्ते तवा°। २ ग. °स्कार°। ३ क. 'शुकुमा°।

अथ मुन्युपस्थामन्त्रं दर्शयति—

नमो गङ्गायमुनयोर्मध्ये ये वसन्ति ते मे प्रसन्नात्मानश्चिरं जीवितं वर्धयन्ति नमो गङ्गायमुनयोर्मुनिभ्यश्च नमो नमो गङ्गायमुनयोर्मुनिभ्यश्च नमः (१), इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके द्वितीयप्रपाठके विंशोऽनुवाकः ॥ २० ॥

नमस्कारादिक एको मन्त्र उभयतोनमस्कारौ द्वौ मन्त्रौ । गङ्गायमुनयोर्मध्ये पुण्यप्रदेशेषु तपोधिका ये केचन मुनयो वसन्ति ते सर्वेऽपि प्रसन्नचित्ता भूत्वा मम चिरमायुर्वृद्धिं कुर्वन्तु तेभ्यो नमः । उत्तरौ द्वौ मन्त्रौ भक्त्यतिशयद्योतनार्थौ । तत्रापि नमःशब्दद्वयोपेतत्वमेत्यादरार्थम् । तदेवमस्मिन्प्रपाठके स्वाध्यायविधिः प्राधान्येन प्रतिपादितः, तत्प्रसङ्गाच्छुद्धिकारणं संध्यावन्दनादिकं सर्वं प्रतिपादितम् ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये द्वितीयप्रपाठके विंशोऽनुवाकः ॥ २० ॥

सह रक्षाꣳसि यदेवाः सप्तदश यददीव्यन्पञ्चदशाऽऽयुष्टे चतुस्त्रिशꣳशद्वैश्वानराय षड्विꣳशतिर्वातरशना ह कृष्माण्डैरजान्ह पञ्च ब्रह्मयज्ञेन ग्रामे मध्यंदिने तस्य वै मेघस्तस्य वै द्वौ रिच्यते दुहे ह कतिधाऽवकीर्णी भूनमः प्राच्यै विꣳशतिः * सह वातरशना ह दुहे ह चतुर्विꣳशतिः ॥

अथ शान्तिः ।

नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः । नमो वाचे नमो वाचस्पतये

---

* ग. सह ब्रह्मयज्ञेन विꣳश[1] ।

---

[1] १ क. °दिरेको । २ ष. ग. °मभ्यासार्थ° । ३ ग. °तुर्विꣳश° ।

नमो विष्णवे बृहते करोमि ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके द्वितीयः प्रपाठकः समाप्तः ॥ २ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इति श्रीमद्वीरबुक्कणसाम्राज्यधुरंधरश्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये द्वितीयः प्रपाठकः समाप्तः ॥ २ ॥

अथ कृष्णयजुर्वेदीयतैत्तिरीयारण्यके तृतीयप्रपाठकस्याऽऽरम्भः।

(तत्र प्रथमोऽनुवाकः ।)

हरिः ॐ ।

तच्छं योरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये । दैवी स्वस्तिरस्तु नः । स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शं नो अस्तु द्विपदे । शं चतुष्पदे ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

इति शान्तिः ।

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥
स्वाध्यायब्राह्मणं प्रोक्तं द्वितीये हि प्रपाठके ।
चातुर्होत्रचितेर्मन्त्रा वक्ष्यन्तेऽस्मिन्प्रपाठके ॥ २ ॥

---

१ ख. °न्तेऽस्मिंस्तृतीयके । ब्रा° ।

ब्राह्मणग्रन्थस्य तृतीयकाण्डे द्वादशप्रपाठके ब्रह्म वै चतुर्होतार इत्यस्मिन्ननुवाके चातुर्होत्रचितेर्ब्राह्मणमुक्तं न तु तन्मन्त्रास्तत्रोक्ताः । तेषामरण्येऽध्येतव्यत्वात् । अतोऽस्मिन्प्रपाठके तन्मन्त्रा उच्यन्तेः । तत्र प्रथमानुवाकोक्तमन्त्राणां विनियोगो ब्राह्मण एवं समाम्नातः पुरस्ताद्दशहोतारमुदञ्चमुपदधाति यावत्पदमिति । तत्पाठस्तु—

ॐ चित्तिः स्रुक् । चित्तमाज्यम् । वाग्वेदिः । आधीतं
बर्हिः । केतो अग्निः । विज्ञातमग्निः । वाक्पतिर्होता ।
मन उपवक्ता । प्राणो हविः । सामाध्वर्युः, इति ।

आदौ सिसृक्षुः प्रजापतिः सृष्टचर्थं केनचिद्यागेनाऽऽध्यात्मिकेनेष्टवान् । तद्यागवर्तिनः स्रुगादय एतेषु मन्त्रेषु प्रतिपाद्यन्ते । अत्र **चित्तिचित्तशब्दाभ्यां** निर्विकल्पकसविकल्पकभेदजनकावन्तःकरणवृत्तिभेदौ विवक्षितौ । **वाक्** प्रसिद्धा । **आधीतमुच्चार्यमाणम्** । **केतविज्ञातशब्दाभ्यां** निर्विकल्पकसविकल्पकज्ञानविषयावभिधीयेते । **वाक्पतिशब्देन** वाचः प्रवर्तकः कण्ठतालवादिस्थानेषु संयुज्यमानो वायुरुच्यते । **मनःप्राणौ** प्रसिद्धौ । **सामशब्देनाध्येतुर्वर्णोच्चारणशक्तिरुच्यते** । एवं चित्त्यादयो दश शरीरगताः पदार्थविशेषाः स्रुगादयो दश पदार्था होमनिष्पादकाः । **अग्निशब्दद्वयेन** चाऽऽहवनीयगार्हपत्यौ विवक्षितौ । उपवक्तृशब्देनानुवचनकर्तुर्होतुः पुरा प्रैषवक्ता मैत्रावरुणो विवक्षितः । यद्वा प्रोक्षणादिष्वनुज्ञायां पृष्टायां ब्रह्मा समीपे स्थित ॐ प्रोक्षेत्यादिना तदनुज्ञां वक्ति तस्मादयमुपवक्ता । चित्त्यादयः शरीरगतपदार्थाः स्रुगादिरूपा इति वाक्यार्थः । अस्मिन्मन्त्रे स्रुगादीनां होमसाधनानां दशानामभिहितत्वादयं मन्त्रो दशहोतेत्युच्यते । सोऽयं मन्त्रस्य पूर्वभागः । तस्य चावयवाः पृथगिष्टकामन्त्राः । तत्र चित्तिः स्रुक्तया देवतयाऽङ्गिरस्वद्ध्रुवा सीदेत्येवमुपधानप्रकारो द्रष्टव्यः । एवमेता दशेष्टका उपधेयाः ।

मन्त्रस्य योऽयमुत्तरो भागो ग्रहाख्यस्तेन ग्रहेष्टकामुपदध्यात् । तथा च ब्राह्मणमाम्नातम्—यथावकाशं ग्रहानिति । तं च ग्रहभागमाह—

वाचस्पते विधे नामन् । विधेम ते नाम ।
विधेस्त्वमस्माकं नाम । वाचस्पतिः सोमं पिबतु ।
आऽस्मासु नृम्णं धात्स्वाहा (१), इति ।

---

१ ख. तु मन्त्रा° । २ क. °वाकम° । ३ ग. °न विधानेनाऽऽ° । ४ ख. ग. °ऽद्येन तदेतुः स्वरोच्चा° । ५ क. ख. °येनाऽऽह° । ६ ख. ग. °र्तुर्ज्ञातुः । ७ क. स्थित्वो प्रो° । ८ क. ग. एता । ९ ग. °दधाति । त° । १० ख. °ह्मणे समा° । ११ ख. °हमा° ।

अध्वर्युः पञ्च च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके तृतीयप्रपाठके
प्रथमोऽनुवाकः ॥ १ ॥

हे **वाचस्पते** वाचः पालक हे विधे जगद्विधातः, हे नामन्सर्वस्य वशीकर्तः, **ते** तव **नाम विधेम**। अस्मदनुग्रहकारी देवोऽयमित्येवं प्रसिद्धिं कुर्मः। यद्वा नमनं प्रह्वीभावं संपादयामः। त्वमप्यस्माकं **नाम विधेः**, देवानां मध्ये यजमानोऽयं यथाशास्त्रं हुतवानिति प्रसिद्धिं कुरु। अयं **वाचस्पतिर्मदीयेषु** यागेषु **सोमं** सोमसदृशमाज्यं **पिबतु**। **अस्मासु** होमकर्तृषु नृम्णमपेक्षितं धनमाधात्संपादयतु। इमं वृत्तान्तमुद्दिश्य जुहुधीति स्वकीया वागाह। अत्र वाचस्पत इत्यादि नृम्णं धादित्यन्तो ग्रहभागः। एतेषां मन्त्राणामुपधाने विनियोगः प्रकरणसिद्धः, चातुर्होत्रब्राह्मणे वाचनिकश्च। इतरे तु विनियोगास्तत्र तत्र वाचनिकाः। ते च ब्राह्मणे द्वितीयकाण्डे द्वितीयतृतीयप्रपाठकयोः प्रपञ्चिताः। तेषु होमाहोमविषयभेदेन कश्चिद्विषय आपस्तम्बेन दर्शितः— "यत्र होमार्थाः संग्रहाः[1] सस्वाहाकाराः, यत्राहोमार्था अग्रहा[2] अस्वाहाकाराः" इति। सोऽयं न्याय उत्तरेष्वपि मन्त्रेष्वनुसंधेयः। तदेवमस्मिन्ननुवाके दशहोतृमन्त्रोऽभिहितः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयारण्यकभाष्ये तृतीयप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

अथ तृतीये द्वितीयोऽनुवाकः।

अथ चतुर्होतृमन्त्र उच्यते। तस्य च विनियोगो ब्राह्मणेनैवाभिहितः—दक्षिणतः प्राञ्चं चतुर्होतारमिति। तत्पाठस्तु—

पृथिवी होता। द्यौरध्वर्युः। रुद्रोऽग्नीत्। बृहस्पतिरुपवक्ता, इति।

सोऽयं होतृभागः। तत्र पृथिव्यादयः प्रसिद्धाः, तथा होत्रादयश्च। उपवक्तृशब्देन समीपे स्थित्वा तत्तत्कर्मस्वनुजानानो ब्रह्मा विवक्षितः।

अथ ग्रहभागमाह—

वाचस्पते वाचो वीर्येण। संभृततमेनाऽऽयक्ष्यसे। यजमा-

---

१ ख. ग. सोम°। २ ख. नृ°णं ध°। ३ ग. °मपिजितं धनमधा°। ४ ग. °ग्रहः। तत्र। ५ क. ब्राह्मणस्य। ६ ग. संग्रहाः। ७ ग. °हाः स्वा°। ८ ग. °हाश्चास्वा°। ९ क. तत्क°।

नाय वार्यम् । आ सुवस्करस्मै । वाचस्पतिः सोमं पिबति । जजनदिन्द्रमिन्द्रियाय स्वाहा (१), इति । पृथिवी होता दश ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके तृतीयप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

हे वाचस्पतेऽत्यन्तसंपादितेन मन्त्रात्मिकाया वाचः सामर्थ्येन त्वमा समन्ताद्यक्ष्यसे । अस्मै यजमानाय वार्यं वरणीयं सुवः स्वर्गमाकरा समन्तात्कुरु । अयं वाचस्पतिरस्मदीयेषु यागेषु सोमं पिबति । इन्द्रं देवमिन्द्रियसमृद्ध्यर्थं जजनज्जनयतु प्रेरयत्वित्यर्थः । तदेतदुद्दिश्य जुहुधीति स्वकीया वागाह ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये तृतीयप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

अथ तृतीये तृतीयोऽनुवाकः ।

अथ पञ्चहोतृमंन्त्र उच्यते । तद्विनियोगो ब्राह्मण एवमाम्नातः—पश्चादुदञ्चं पञ्चहोतारमिति । तत्पाठस्तु—

अग्निर्होता । अश्विनाऽध्वर्यू । त्वष्टाऽग्नीत् । मित्र उपवक्ता, इति ।

अग्न्यादयः प्रसिद्धाः । अध्वर्युः प्रतिप्रस्थाता चेत्येवमध्वर्युद्वित्वेन होतृपञ्चकं पूरणीयम् ।

अथ ग्रहभागमाह—

सोमः सोमस्य पुरोगाः । शुक्रः शुक्रस्य पुरोगाः । श्रातास्त इन्द्र सोमाः । वातापेर्हवनश्रुतः स्वाहा (१), इति ॥ अग्निर्होताऽष्टौ ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके तृतीयप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

---

१ ग. °भाकः स° । २ क. °मन्त्रा उच्यन्ते । त° ।

योऽयं देवतात्मकः **सोमः** सोऽयं लतात्मकस्य यागदेशं प्रत्यागमने पुरतो गच्छति। **शुक्रो** भासको देवतादिप्रकाशको मन्त्रः **शुक्रस्य** गृह्यमाणतया भासमानस्य सोमस्य पुरतो गच्छति। आदौ मन्त्रं पठित्वा पश्चात्सोमो गृह्यते। हे इन्द्र ते त्वदर्थमेते **सोमाः श्राताः** पक्वाः, आश्रिता वा। **कीदृशस्य** ते। **वातवदाप्नोति** रंहसा गच्छतीति **वातापिस्तस्य**। हवनमाह्वानं **शृणोतीति** हवनश्रुत्तस्य। एतदर्थं **जुहुधीति** स्वकीया वागाह॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये तृतीयप्रपाठके तृतीयोऽनुवाकः॥ ३॥

अथ तृतीये चतुर्थोऽनुवाकः।

अथ षड्होतृमन्त्र उच्यते। द्विविधस्तन्मन्त्रः। अस्मिंश्चतुर्थानुवाके प्रोक्तः **सूर्यं ते चक्षुरित्येकः**। षष्ठानुवाके प्रोक्तो **वाग्घोतेत्यपरः**। स एव चातुर्होत्रचयने प्रयोक्तव्यः। वाग्घोता षड्होतृणामित्येवं तद्ब्राह्मणे निर्देशात्। **सूर्यं त** इत्यस्य तु पशुबन्धादौ विनियोगः। स च होतृब्राह्मणकाण्डे पठ्यते। पशुबन्धेन यक्ष्यमाणः षड्होतारं मनसाऽनुद्रुत्याऽऽहवनीये जुहुयादिति। तन्मन्त्रपाठस्तु—

सूर्यं ते चक्षुः। वातं प्राणः। द्यां पृष्ठम्। अन्तरिक्षमात्मा। अङ्गैर्यज्ञम्। पृथिवीꣳ शरीरैः, इति।

हे पशो योऽयं **सूर्यः** स **ते चक्षुः**, यो वायुः स ते **प्राणः**। तथा च पशुविषयेऽग्निगुप्रैषे समाम्नायते—सूर्यं चक्षुर्गमयतात्। वातं प्राणमन्ववसृजतादिति। या द्यौः स पृष्ठभागः, उपरिवर्तित्वसाम्यात्। यदिदमन्तरिक्षं तत्त्वदीयो जीवात्मा, मध्यवर्तित्वसाम्यात्। यानि हृदयादीन्यङ्गानि **तैर्यज्ञं** संपादयेसीति शेषः। यान्यन्यान्यस्थ्यादीनि शरीरगतानि **तैः पृथिवीं** प्राप्नुहीति शेषः। सूर्यं ते चक्षुरित्यादावपि त्वदीयं चक्षुः सूर्यं प्राप्नोत्विति वा योजनीयम्। अथ वा वक्ष्यमाणं वाचस्पतिसंबोधनमनूद्य ते चक्षुः सूर्यं प्राप्नोत्विति वा योजनीयम्। अथ वा वक्ष्यमाणं वाचस्पतिसंबोधनमनूद्य ते चक्षुः सूर्यं रूपं जानीयादित्येवं वाचस्पतिपरतया मन्त्रे योज्यम्। होमनिष्पादकस्य पशोश्चक्षुरादीनि षडङ्गान्यत्रोक्तानीत्यस्य मन्त्रस्य षड्होतृत्वम्।

अथ ग्रहभागमाह—

वाचस्पतेऽच्छिद्रया वाचा। अच्छिद्रया जुह्वा।

---

१ ख. ग. वायुर्°। क. °मन्त्रा उच्यन्ते। द्वि°। ३ ग. °था प°। ४ ग °ये द्विगु°। ५ क. °यत्त्विति। ग. °यतीति। ६ क. °न्यस्थ्या°। ७ ग. सूर्यरू°। ८ क. मन्त्रो। ९ क. योज्यः।

दिवि देवावृधꣳ होत्रामेरयस्व स्वाहा (१), इति ॥
सूर्यं ते नवं ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके तृतीयप्रपाठके
चतुर्थोऽनुवाकः ॥ ४ ॥

हे **वाचस्पतेऽच्छिद्रया वाचा** स्वराक्षरसंपूर्णेन मन्त्रेण, **अच्छिद्रया जुह्वा** घृतसंपूर्णया स्रुचा, **देवावृधं** देवानां वर्धयित्रीं **होत्रां** होमक्रियां **दिवि** द्युलोक **एरयस्व** सर्वतः प्रेरय । एतमर्थमुद्दिश्य जुहुधीति स्वकीया वागाह ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये तृतीयप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

अथ तृतीये पञ्चमोऽनुवाकः ।

अथ सप्तहोतृमन्त्र उच्यते । तस्य च विनियोगश्चातुर्होत्रब्राह्मण एवमाम्नातः— "उपरिष्टात्प्राञ्चꣳ सप्तहोतारम्" इति । तत्पाठस्तु—

महाहविर्होता । सत्यहविरध्वर्युः । अच्युतपाजा
अग्नीत् । अच्युतमना उपवक्ता । अनाधृष्यश्चाप्र-
तिधृष्यश्च यज्ञस्याभिगरौ । अयास्यं उद्गाता, इति ।

महाहविः सत्यहविरित्याद्या अगस्त्यान्ताः सप्तसंख्याका महर्षयः । तन्महर्षिस्वरूपा अत्रत्या होत्रादयः । यज्ञस्य सोमयागस्य । अभिगरौ, अभित उद्गातुः पुरस्तात्पश्चाच्च गृहीतप्रस्तारप्रतिहारभागौ गायेते इति प्रस्तोतृप्रतिहर्तारावभिगरौ । होताऽध्वर्युराग्नीध्रो ब्रह्मा प्रस्तोता प्रतिहर्तोद्गातेति सप्तसंख्याका होमनिष्पादका अत्रोक्ता इत्ययं मन्त्रः सप्तहोतेत्युच्यते ।

अथ ग्रहभागमाह—

वाचस्पते हृद्विधे नामन् । विधेम ते नाम । विधेस्त्वमस्माकं
नाम । वाचस्पतिः सोममपात् । मा दैव्यस्तन्तुश्छेदि मा
मनुष्यः । नमो दिवे । नमः पृथिव्यै स्वाहा (१), इति ।

---

१ क. एवम° । २ क. °मन्त्रा उच्यन्ते । त° ।

अपात्रीणि च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके तृतीयप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

हे **वाचस्पते** हे **हृद्विधे** हृदयस्य विधातः चित्तप्रेरकेत्यर्थः। हे **नामन्**सर्वजगत्संबन्धिप्रणामयुक्त ते तुभ्यं **नाम** नामनं प्रणतिं **विधेम** कुर्मः। **त्वं चास्माकं नाम विधेः**, देवानां मध्ये अस्मान्यष्टवानिति प्रसिद्धं नामधेयं कुरु। अयं **वाचस्पतिः सोममपात्पीतवान्**। दैव्यस्तन्तुर्मद्गृहे हविःस्वीकारार्थमागतो देवसंबन्धी संतानो **मा च्छेदि** कदाचिदपि विच्छिन्नो मा भूत्। तथा **मनुष्यस्तन्तुर्ऋत्विक्प्रवाहोऽपि विच्छिन्नो मा भूत्**। द्यावापृथिवीभ्यां **नमोऽस्तु**। तमिममर्थमुद्दिश्य जुहुधीति स्वकीया वागाह ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयारण्यकभाष्ये तृतीयप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

अथ तृतीये षष्ठोऽनुवाकः।

अथ द्वितीयः षड्होतृमन्त्र उच्यते। तस्य च विनियोगश्चातुर्होत्रब्राह्मणे समाम्नातः—"उत्तरतः प्राञ्चं षड्होतारम्" इति। तत्पाठस्तु—

वाग्घोता। दीक्षा पत्नी। वातोऽध्वर्युः। आपोऽभिगरः। मनो हविः। तपांसि जुहोमि, इति।

येयं यजमानस्य **वाक्**सेयं होतृस्थानीया। येयं **दीक्षा** सा पत्नीस्थानीया। **योऽयं वातः** प्राणरूपः सोऽध्वर्युस्थानीयः। याः प्रोक्षणाद्यर्था **आपस्ता अभिगरो ब्रह्मस्थानीयाः**। अभितो गिरति कर्तव्यमनुजानातीत्यभिगरः। **यन्मनस्तद्धविःस्थानीयम्**। **तपस्यग्निस्थानीये** तन्मनोहविर्जुहोमि स्थापयामि। अत्र वागादीनां षण्णां होत्रादिरूपेण होमनिष्पादकानामभिधानात्षड्होतृत्वम्।

अथ ग्रहभागमाह—

भूर्भुवः सुवः। ब्रह्म स्वयंभु।
ब्रह्मणे स्वयंभुवे स्वाहा (१), इति।

---

१ ग °बन्धप्रमाणयु°। २ क. अथापरे ष°। ३ क. °मन्त्रा उच्यन्ते। त°। ४ क. °ह्मग एवमा°। ख. ह्मग एव स°।

वाग्घोता नवं ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके तृतीयप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

ये एते भूरादयस्त्रयो लोकास्तेषां यत्कारणं स्वयंभु स्वतः सिद्धं परं ब्रह्म तस्मै स्वयंभुवे परब्रह्मणे जुहुधीति स्वकीया वागाह ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये तृतीयप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

अथ तृतीये सप्तमोऽनुवाकः ।

अनन्तरभाविनोऽनुवाकस्य चातुर्मास्येषु केशनिवर्तनेषु तदृतं तत्सत्यमिति जपित्वा पश्चौज्जपमापस्तम्ब आह—"ब्राह्मण एकहोतेति चानुवाकम्" इति । तथा ब्रह्ममेधेऽनुपद्रवतोऽजस्यानुमन्त्रणे विनियोगं भरद्वाज आह—ब्राह्मण एकहोतेति चेति । एतदनुवाकगतेषु दशसु पर्यायेषु प्रथमं पर्यायमाह—

ब्राह्मण एकहोता । स यज्ञः । स मे ददातु
प्रजां पशून्पुष्टिं यशः । यज्ञश्च मे भूयात्, इति ।

योऽयं वेदविद्ब्राह्मणः सोऽयमेकेन स्वकीयेन तपसा जुहोति सर्वस्य जगत उपकरोतीत्येकहोता । स एव ज्योतिष्टोमादिनिष्पादकत्वाद्यज्ञस्वरूपश्च । स ईदृशो ब्राह्मणो मह्यं प्रजादिचतुष्टयं ददातु । तत्प्रसादाद्यज्ञोऽपि मे सर्वदा भूयात् ।

अथ द्वितीयं पर्यायमाह—

अग्निर्द्विहोता । स भर्ता । स मे ददातु प्रजां
पशून्पुष्टिं यशः । भर्ता च मे भूयात्, इति ।

द्वाभ्यां पाकहविर्वहनाभ्यामुपकरोतीति द्विहोता । अत एव पोषकत्वाद्भर्ता । अन्यत्पूर्ववद्व्याख्येयम् ।

अथ तृतीयमाह—

पृथिवी त्रिहोता । स प्रतिष्ठा (१) । स मे ददातु
प्रजां पशून्पुष्टिं यशः । प्रतिष्ठा च मे भूयात्, इति ।

---

१ क. यतो भू° । २ ख. °श्वाद्यपनमा° । ३ क. °मेधेऽनु° । ४ ख. °तो मे क्षणस्या° ।

त्रिभिरन्नयागैरुपकरोतीति त्रिहोतृत्वं सर्वप्राण्याधारत्वेन प्रतिष्ठात्वं च ।

अथ चतुर्थमाह—

अन्तरिक्षं चतुर्होता । स विष्ठाः । स मे ददातु
प्रजां पशून्पुष्टिं यशः । विष्ठाश्च मे भूयात्, इति ।

चतुर्भिर्वाग्वृष्ट्यवकाशस्थानैरुपकाराच्चतुर्होतृत्वं यक्षगन्धर्वादिनामाश्रयत्वाद्विविधस्थितिहेतुत्वं च ।

अथ पञ्चममाह—

वायुः पञ्चहोता । स प्राणः । स मे ददातु प्रजां पशून्पुष्टिं यशः । प्राणश्च मे भूयात् (२), इति ।

पञ्चभिः प्राणवृत्तिभिरुपकरोतीति पञ्चहोतृत्वम् । वायोः प्राणरूपत्वं प्रसिद्धम् ।

अथ षष्ठमाह—

चन्द्रमाः षड्ढोता । स ऋतून्कल्पयाति । स मे ददातु प्रजां
पशून्पुष्टिं यशः । ऋतवश्च मे कल्पन्ताम्, इति ।

षण्णामृतूनां निष्पादकत्वेन षड्ढोतृत्वम् । चन्द्रमा हि वृद्धिक्षयाभ्यां[1] शुक्लकृष्णपक्षद्वारर्तून्कल्पयति[2] । अत एवान्यत्राऽऽम्नातम्—" ऋतूनन्यो विदधज्जायते पुनः " इति ।

अथ सप्तममाह—

अन्नꣳसप्तहोता । स प्राणस्य प्राणः । स मे ददातु प्रजां
पशून्पुष्टिं यशः । प्राणस्य च मे प्राणो भूयात्, इति ।

सप्तानां शीर्षण्यानां प्राणवृत्तीनां पोषकत्वेन सप्तहोतृत्वम् । अत एव प्राणपोषकत्वात्प्राणस्य प्राण इत्युच्यते ।

अथाष्टममाह—

द्यौरष्टहोता । सोऽनाधृष्यः (३) । स मे ददातु प्रजां
पशून्पुष्टिं यशः । अनाधृष्यश्च भूयासम्, इति ।

आरोगादिभिः कश्यपान्तैरष्टभिः सूर्यैरुपकरोतीत्यष्टहोतृत्वम् । द्युलोकस्य केनापि निराकर्तुमशक्यत्वादनाधृष्यत्वम् ।

---

१ ख. ग. °भा अपि वृ° । २ ख. वृद्धचपक्ष° । ग. वृद्धचपक्षयकराभ्यां । ३ क. °ति । एतदेवा° ।

अथ नवममाह—

आदित्यो नवहोता । स तेजस्वी । स मे ददातु प्रजां
पशून्पुष्टिं यशः । तेजस्वी च भूयासम् , इति ।

पूर्वोक्तैरष्टभिर्भूर्तिभिस्तत्रानुगतेन सामान्यरूपेण[1] च नवधोपकारान्नवहोतृत्वम् । तेजस्वित्वं चाऽऽदित्यस्य प्रसिद्धम् ।

अथ दशममाह—

प्रजापतिर्दशहोता । स इदꣳ सर्वम् । स मे ददातु प्रजां
पशून्पुष्टिं यशः । सर्वं च मे भूयात् (४) , इति ।
प्रतिष्ठा प्राणश्च मे भूयादनाधृष्यः सर्वं च मे भूयात् ॥

ब्राह्मणो यज्ञोऽग्निर्भर्ता पृथिवी प्रतिष्ठाऽन्तरिक्षं विष्ठा वायुः प्राणश्चन्द्रमाः[2] स ऋतूनन्नꣳ स प्राणस्य प्राणो द्यौरनाधृष्य आदित्यः स तेजस्वी प्रजापतिः स इदꣳ सर्वं च मे भूयात् ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके तृतीयप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

नव वै पुरुषे प्राणा नाभिर्दशमीति श्रुतानि शरीरगतानि दश च्छिद्राण्युत्पाद्योपकारित्वाद्दशहोतृत्वम् । सर्वजगत्कारणत्वेन सर्वात्मकत्वं प्रजापतेः प्रसिद्धम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये तृतीयप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

अथ तृतीयेऽष्टमोऽनुवाकः ।

अथ संभारयजूंष्युच्यन्ते । तेषां चेष्टकोपधाने विनियोगश्चातुर्होत्रीयब्राह्मणेऽभिहितः—" हृदयं यजूꣳषि पत्न्यश्च " इति । तेषामेकविंशतिसंख्याकानां यजुषां पाठस्तु—

अग्निर्यजुर्भिः । सविता स्तोमैः । इन्द्र उक्थामदैः । मित्रावरुणा-
वाशिषा । अङ्गिरसो धिष्ण्यैरग्निभिः मरुतः सदोहविर्धाना-

---

१ ख. °भिर्गतिभि° । ग. °भिर्हेतुभि° । २ ख ग. °ण न° । ३ ग. °मा ऋ° । ४ ख. °पकरोतीति दश° । " क. °णत्वं स° ।

भ्याम् । आपः प्रोक्षणीभिः । ओषधयो बर्हिषा । अदितिर्वेद्या । सोमो दीक्षया (१) । त्वष्टेध्मेन । विष्णुर्यज्ञेन । वसव आज्येन । आदित्या दक्षिणाभिः । विश्वे देवा ऊर्जा । पूषा स्वगाकारेण । बृहस्पतिः पुरोधया । प्रजापतिरुद्गीथेन । अन्तरिक्षं पवित्रेण । वायुः पात्रैः । अहꣳ श्रद्धया (२), इति।

दीक्षया पात्रैरेकं च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके तृतीयप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

अत्राग्निसवित्रादयो देवा यजुःस्तोमादीनि यज्ञे संभरणीयान्यङ्गानि। एते देवास्तैः संभरणीयैः सहास्मिन्कर्मण्यागच्छन्त्विति वाक्यार्थः । उक्थामदशब्दः शस्त्रवाची । यज्ञशब्दो हविष्प्रक्षेपवाची । स्वगाकारः शंयुवाकमन्त्रः । पुरोधा ग्रहणकाले पठनीया ऋक्पुरोवाक् । पवित्रशब्दो दशापवित्रवाची । अहं यजमानः श्रद्धया सहाऽऽगच्छामि । स्पष्टमन्यत् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये तृतीयप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

अथ तृतीयप्रपाठके नवमोऽनुवाकः ।

अथ देवपत्न्याख्या मन्त्रा उच्यन्ते । तेषां च विनियोगः पूर्ववद्द्रष्टव्यः । पत्न्यश्चेत्येवं तत्र पत्नीष्टकानामभिधानात् । पाठस्तु—

सेनेन्द्रस्य । धेना बृहस्पतेः । पथ्या पूष्णः । वाग्वायोः । दीक्षा सोमस्य । पृथिव्यग्नेः । वसूनां गायत्री । रुद्राणां त्रिष्टुक्* । आदित्यानां जगती । विष्णोरनुष्टुक्* (१) । वरुणस्य विराट् । यज्ञस्य पङ्क्तिः । प्रजापतेरनुमतिः ।

* अत्राग्ने चानुष्टुगित्यत्र ग. पुस्तके त्रिष्टुबनुष्टुबित्यनुक्रमेण शोधितः पाठः । स च न वेदि. केषु प्रसिद्धः ।

१ ख. ग. संवर° । २ ख. ग. एतैर्देवा° । ३ क. °वास्तैर्भर° ४ ग °च्छन्तीति । ५ ख. ग. °मदः श° । ६ क. °त् । तत्पाठ° ।

मित्रस्य श्रद्धा । सवितुः प्रसूतिः । सूर्यस्य मरीचिः ।
चन्द्रमसो रोहिणी । ऋषीणामरुन्धती । पर्जन्यस्य विद्युत् ।
चतस्रो दिशः । चतस्रोऽवान्तरदिशाः । अहश्च रात्रिश्च ।
कृषिश्च वृष्टिश्च । त्विषिश्चापचितिश्च । आपश्चौषधयश्च ।
ऊर्क् च सूनृता च देवानां पत्नयः (२), इति ।

अनुष्टुग् दिशः षट् च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके तृतीयप्रपाठके
नवमोऽनुवाकः ॥ ९ ॥

देवजातावित्यादयः पतयः, सेनादयः पत्न्यः । दिग्विदिगादयोऽपि केषांचिद्देवानां पत्न्यः । एताः सर्वा आगत्य यज्ञमविकलं कुर्वन्त्विति वाक्यार्थः । अत्राऽऽम्नातैः षड्विंशतिवाक्यैः षड्विंशतिसंख्याकाः पत्नीष्टका उपदध्यात् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये तृतीयप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

अथ तृतीये दशमोऽनुवाकः ।

अथ प्रतिग्रहमन्त्रा उच्यन्ते[1] । तैश्च प्रतिग्रहेष्टकोपधानं चातुर्होत्रीयब्राह्मण एवमाम्नातम्—"यथावकाशं प्रतिग्रहाल्लोकं पृणाश्च" इति । तत्र प्रथमं[3] मन्त्रमाह—

देवस्य त्वा सवितुः प्रसवे । अश्विनोर्बाहुभ्याम् । पूष्णो हस्ताभ्यां प्रतिगृह्णामि । राजा त्वा वरुणो नयतु । दोषि दक्षिणेऽग्रये हिरण्यम् । तेनामृतत्वमशीय[4]म् । वयो दात्रे । मयो मह्यमस्तु प्रतिग्रहीत्रे । क इदं कस्मा अदात् । कामः कामाय । कामो दाता (१) । कामः प्रतिग्रहीता । काम[5] समुद्रमाविश । कामेन त्वा प्रतिगृह्णामि । कामैतत्ते । एषा ते काम दक्षिणा । उत्तानस्त्वाऽऽङ्गिरसः प्रतिगृह्णातु, इति ।

हे प्रतिगृह्यमाणद्रव्य सवितुर्देवस्य प्रेरणे सत्यश्विसंबन्धिभ्यां बाहुभ्यां पूषसंब-

---

१ क. °न्ते । तत्र प्र° । २ ग. °ग्रहैष्टि° । ३ ग. °थमम्रा° । ४ ग. °मस्याम् । ५ घ. °ग्रहित्रे ।

न्धिभ्यां हस्ताभ्यां त्वां प्रतिगृह्णामि। हे दक्षिणे देवि वरुणो राजा हिरण्यरूपां त्वामग्नये प्रापयतु। तेनाग्निप्रापणेन प्रतिग्रहदोषाभावादहममृतत्वं नरकाभावरूपं प्राप्नुयाम्। इयं च दक्षिणा दात्रे वयोऽस्तु पक्षिरूपिणी भूत्वा दातारं स्वर्गं नयत्वित्यर्थः। प्रतिग्रहीत्रे मह्यं मयः सुखमस्तु। इदं द्रव्यं कः प्रजापतिः कस्मै प्रजापतयेऽदाद्दत्तवान्, अन्तर्यामिरूपेण दातृप्रतिग्रहीत्रोः प्रेरकत्वात्। तथा कामः कामाय दत्तवान्। यथा प्रजापतिरदृष्टप्रेरकस्तथा कामस्य दृष्टप्रेरकत्वात्। तस्मात्काम एव दाता प्रतिग्रहीता च। स्वर्गादिफलविषयः कामो दाता, ऐहिकसुखविषयः कामः प्रतिग्रहीता। ततो हे दक्षिणे समुद्रसमं कामं प्रविश। कामेन निमित्तेन त्वां प्रतिगृह्णामि। हे मद्धृदयवर्तिकाम तदेतद्द्रव्यं तुभ्यं भवति। हे काम ते त्वत्प्रीतय एवैषा दक्षिणा प्रवृत्ता। अङ्गिरोगोत्रे समुत्पन्न उत्तानाख्यो महर्षिस्त्वां प्रतिगृह्णातु।

अथ वस्त्रादिद्रव्यविषयान्षोडश मन्त्रानाह—

सोमाय वासः। रुद्राय गाम्। वरुणायाश्वम्। प्रजापतये पुरुषम् (२)। मनवे तल्पम्। त्वष्ट्रेऽजाम्। पूष्णेऽविम्। निर्ऋत्या अश्वतरगर्दभौ। हिमवते हस्तिनम्। गन्धर्वाप्सराभ्यः स्रगलंकरणे। विश्वेभ्यो देवेभ्यो धान्यम्। वाचेऽन्नम्। ब्रह्मण ओदनम्। समुद्रायापः (३)। उत्तानायाऽऽङ्गीरसायानः। वैश्वानराय रथम्, इति।

एतेषु सर्वेषु मन्त्रेषु देवि दक्षिण इत्यन्तः पूर्वानुषङ्गः। तेनामृतत्वादिकमित्युत्तरानुषङ्गः।

तस्य रथप्रतिग्रहमन्त्रस्य शेषभूतामुत्तरानुषङ्गात्पूर्वभाविनीं कांचिदृचमाह—

वैश्वानरः प्रत्नथा नाकमारुहत्। दिवः पृष्ठं भन्दमानः सुमन्मभिः। स पूर्ववज्जनयज्जन्तवे धनम्। समानमज्मा पर्यायति जागृविः, इति।

वैश्वानराख्यो देवः प्रत्नथा पुरातनशरीरधारी सन्नर्कमारुहत्। स च दिवः पृष्ठं द्युलोकस्योपरिभागे मन्मभिर्मननविशेषैर्भन्दमानः कल्याणं कुर्वन्वर्तते। अयं यजमान इमां दक्षिणां दत्तवानित्येवं वदन्देवानामग्रे स्मारयतीत्यर्थः। स वैश्वानरो

---

१ क. पक्षी भू°। २ ग. स्वर्गे। ३ ख. ग. °व्यं प्र°। ४ ख. ग. °तिः प्र°। ५ ग. °ये दत्त°। ६ क. ख. त्वदर्थमेवै°। ७ क. ग. °भागं म°।

जन्तवे प्राणिरूपाय यजमानाय धनं पूर्ववज्**जनयत्**, यजमानः पूर्वं यथा दक्षिणां दत्तवांस्तथैव तदनुरूपं फलं जनयति। स वैश्वानरो **जागृविः** सावधानः **सन्नज्मा** स्वर्गगमनशीलः **समानं परियाति**, यावद्दक्षिणार्थं द्रव्यं तेन सदृशं तद्योग्यं फलं परिप्रापयति।

अस्या ऋच उपरितनं रथप्रतिग्रहमन्त्रशेषमाह—

राजा त्वा वरुणो नयतु देवि दक्षिणे वैश्वानराय रथम्। तेनामृतत्वमश्याम्। वयो दात्रे। मयो मह्यमस्तु प्रतिग्रहीत्रे (४)। **क इदं कस्मा अदात्। कामः कामाय। कामो दाता। कामः प्रतिग्रहीता। कामꣳ समुद्रमाविश। कामेन त्वा प्रतिगृह्णामि। कामैतत्ते। एषा ते काम दक्षिणा। उत्तानस्त्वाऽऽङ्गीरसः प्रतिगृह्णातु** (५), इति॥

दाता पुरुषमापः प्रतिग्रहीत्रे नव च॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके तृतीयप्रपाठके दशमोऽनुवाकः॥ १०॥

अत्र तेनामृतत्वमश्यामित्यादिरुत्तरानुषङ्गः सर्वमन्त्रसाधारण इति दर्शयितुं प्रथममन्त्रे पठितोऽपि पुनराम्नातो राजा त्वेत्यादिर्वैश्वराय रथमित्यन्तः पूर्वोक्तायां ऋच उपरि रथमन्त्रे पुनः पठनीयः, इत्येतावान्विशेषः। एतैर्मन्त्रैः प्रतिग्रहेष्टका उपदध्यात्॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये तृतीयप्रपाठके दशमोऽनुवाकः॥ १०॥

अथ तृतीय एकादशोऽनुवाकः।

अथ होतृहृदयाख्या मन्त्रा अभिधीयन्ते। तेषां त्विष्टकोपधाने विनियोगश्चातुर्होत्रीयब्राह्मण एवमाम्नायते—'हृदयं यजूꣳषि पत्न्यश्च' इति। तत्र दशहोतृहृदयाख्यं मन्त्रमाह—

सुवर्णं घर्मं परिवेद वेनम्। इन्द्रस्याऽऽत्मानं दशधा चरन्तम्।

---

१ ध °ग्रहित्रे (४)। २ ग. °त्रे। क°। ३ ग (४)। ४ ख °र्वमन्त्रे सा°। ग. °र्वत्र सा°। ५ ख. ग. दर्शयति। ६ ख. ग. °क्ता या ऋ°। ७ क. ख. नेषाण्डि°। ८ ख. °व स्मा°। ९ क. ख. °म्नातः। ह°।

अन्तः समुद्रे मनसा चरन्तम्। ब्रह्माऽन्वविन्ददृशहोतारमर्णे।
अन्तः प्रविष्टः शास्ता जनानाम्। एकः सन्बहुधा विचारः।
शतꣳ शुक्राणि यत्रैकं भवन्ति। सर्वे वेदा यत्रैकं भवन्ति।
सर्वे होतारो यत्रैकं भवन्ति। स मानसीन आत्मा जनानाम्(१)। अन्तः प्रविष्टः शास्ता जनानाꣳ सर्वात्मा।
सर्वाः प्रजा यत्रैकं भवन्ति। चतुर्होतारो यत्र संपदं
गच्छन्ति देवैः। स मानसीन आत्मा जनानाम्, इति।

चित्तिः स्रुगित्यादीनां होतृमन्त्राणां हृदयं रहस्यं तत्त्वं परमात्मस्वरूपं प्रतिपादयतीत्ययमनुवाको हृदयमित्युच्यते। तत्रानेन मन्त्रेण दशहोतृहृदयं परमात्मतत्त्वमुच्यते[२]। अहं मन्त्रद्रष्टा, **इन्द्रस्य** परमेश्वरस्याऽऽत्मानं निजस्वरूपं **परिवेद** परितः सर्वत्रावस्थितं जानामि। कीदृशमात्मानम्। **सुवर्णं** सुवर्णसदृशं यथा सुवर्णं स्वत एव प्रकाशमानं भवति तथा स्वयंप्रकाशम्। घर्ममन्यस्य वस्तुनो दीपकम्, 'तस्य भासा सर्वमिदं विभाति' इति श्रुतेः। **वेनं** कान्तं सर्वदुःखराहित्येन तस्य कमनीयत्वम्। **दशधा** चित्तिः स्रुगित्यादिदशहोतृमन्त्रे प्रतिपादितैराकारैः। **चरन्तं** लोके व्यवहरन्तम्। **अन्तः समुद्रे** ब्रह्माण्डसृष्टेः पुरा सर्वत्र व्याप्यावस्थितो योऽयं जलसंघः सोऽयं समुद्रस्तस्य मध्ये **मनसा चरन्तम्**, इदं सर्वं जगत्सृजेयेत्येवंरूपेण मनोवृत्तिविशेषेण सह प्रवर्तमानम्। अत एवान्यत्रोक्तम्— "आपो वा इदमासन्सलिलमेव। स प्रजापतिरेकः पुष्करपर्णे समभवत्। तस्यान्तर्मनसि कामः समवर्तत। इदꣳ सृजेयमिति" इति। **ब्रह्मा** चतुर्मुखः प्रजापतिरर्णेऽर्णवे यथोक्तसमुद्रे **दशहोतारं** दशहोतृमन्त्रं तत्प्रतिपाद्यरूपेणाऽऽविर्भूतं परमात्मानमन्वविन्दत्। सृष्टिसाधनत्वेनान्विष्य लब्धवान्। तथा च ब्राह्मणे समाम्नातम्—"प्रजापतिरकामयत प्रजाः सृजेयेति। स एतं दशहोतारमपश्यत्" इति[३]। सोऽयमेवंविधः परमात्मा **जनानां** सर्वेषां **शास्ताऽन्तर्यामिरूपेण** नियामकः सन्हृदये प्रविश्यावस्थितः। तथा च **स्मर्यते**।

"ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।
भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया" इति।

---

१ ख. °नां दशहो°। २ क. °ते। अस्मिन्मन्त्रे द्वितीया द्विपदेतरास्त्रिंदा इत्यृचां विवेकः। तत्र प्रथमामृचमाह—सुवर्णं घर्मं परिवेद वेनम्। इन्द्रस्याऽऽत्मानं दशधा चरन्तम्। अन्तः समुद्रे मनसा चरन्तम्। ब्रह्माऽन्वविन्ददृशहोतारमर्णे, इति। ३ ङ। ३ क ख. भासमानं। ४ क. प्रकाशकम्। ५ ग. °ह्मणमा°। ६ क. °ति। द्वितीयामाह—अन्तः प्रविष्टः शास्ता जनानाम्। एकः सन्बहुधा विचारः, इति। सोऽ°।

स चान्तर्यामी स्वकीयेनेश्वररूपेणैक एव **सन्पुनर्जीवरूपेण बहुधा** भूत्वा **विचारो** विविधचरणवान्भवति । अत एवान्यत्रोपनिषदि श्रूयते—

" एक एव हि भूतात्मा भूते भूते व्यवस्थितः ।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥ " इति[1] ।

शतं शुक्राणि शतसंख्योपलक्षितान्यनन्तानि सूर्यचन्द्रनक्षत्ररूपाणि ज्योतींषि **यत्र** यस्मिन्परमात्मन्येकं भवन्ति, एकत्वं प्राप्नुवन्ति । तथा **सर्वे वेदा** ऋग्वेदप्रभृतयश्चत्वारो वेदा नानाविधशाखोपेताः विलीय यस्मिन्नेकी भवन्ति[2] । होतारश्च होमकर्तारः **सर्वे** यजमाना दशहोत्रादिमन्त्रा वा यस्मिन्परमात्मन्येकत्वं प्राप्नुवन्ति । यथा बुद्बुदा जलमध्ये समुत्पद्य कंचित्कालमवस्थाय विलीयमाना जल एवैक्यं प्राप्नुवन्ति । तथा सर्वे भावाः परब्रह्मण एवोत्पद्य तत्रैव स्थित्वा विलीयमाना एकतां गच्छन्ति । अत एवोपनिषदि श्रूयते—" यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व । तद्ब्रह्मेति " इति । **स** तादृश ईश्वरः सर्वेषां **जनानामात्मा** स्वरूपभूतः **सन्मानसीनो** योगयुक्तेन मनसोपलभ्यो भवति । तथाच **कठा** अधीयते—"मनसैवेदमाप्तव्यं नेह नानाऽस्ति किंचन" इति । ततो योगिनां मानसप्रत्यक्षगम्यत्वात्[3] । अन्तः प्रविष्टः शास्ता जनानामिति योऽयमुक्तः सोऽयं **सर्वात्मा** सर्वेषां प्राणिनामात्मा स्वरूपभूतः । तं हि जना योगेन निरुद्धचित्ताः सन्तो जगदीश्वरं स्वस्वरूपत्वेनैव साक्षात्कुर्वन्ति न तु भेदेन पश्यन्ति, अतः पूर्वोक्तः सर्वोऽप्यर्थ उपपन्न इत्युपसंहियते । **सर्वाः प्रजा** देवमनुष्यादयो **यत्र** यस्मिन्योगिप्रत्यक्षगम्ये चैतन्यैकरसे परमात्मन्येकी **भवन्ति**, चतुर्होतृमन्त्राश्च सर्वे यस्मिन्स्वप्रतिपाद्यैर्देवैः सह यस्मिन्ब्रह्मणि **संपदं** सम्यगेकीभावं प्राप्नुवन्ति । **स** तादृशो ब्रह्मस्वरूपो **मानसीनो** मानसप्रत्यक्षः **सर्वेषां जनानामात्मा** । ऋचां भेदादपुनरुक्तिर्द्रष्टव्या[4] । द्वितीया द्विपदेतरास्तिस्रश्चतुष्पदा इत्यृचां विवेकः । अत्र चतुर्होतृशब्देन दशहोत्रादयः सर्वेऽपि मन्त्रा विवक्ष्यन्ते । तथा च ब्राह्मणे चतुर्होतृदेवं प्रति प्रजापतिर्वरं दत्तवान्—" त्वं वै मे नेदिष्ठ[5]

---

१ क.°ति । अथ तृतीयामाह—शतꣳ शुक्राणि यत्रैकं भवन्ति । सर्वे वेदा यत्रैकं भवन्ति । सर्वे होतारो यत्रैकं भवन्ति । स मानसीन आत्मा जनानाम्, इति । शतं । २ क. ग. °क्षत्राणि । ३ ख. ग °न्येकी भ° । ४ क. °ता य° । ५ क. °न्ति । तथा हो° । ६ क. °त् । अथ चतुर्थीमाह—अन्तः प्रविष्टः शास्ता जनानाꣳ सर्वात्मा । सर्वाः प्रजा यत्रैकं भवन्ति । चतुर्होतारो यत्र संपदं गच्छन्ति देवैः । स मानसीन आत्मा जनानाम्, इति । अ° । ७ क. ख. सर्वे । ८ क. °र्वोक्त एवार्थ । ९ क. व्या । अ° ।

हूतः प्रत्यश्रौषीः । त्वयैनानाख्यातार इति । तस्मान्नु हैनाꣳश्चतुर्होतार इत्याचक्षते " इति ।

तदेवं दशहोतृहृदयाख्यो मन्त्रोऽभिहितः । अथ चतुर्होतृहृदयाख्यो मन्त्रोऽभिधीयते । तत्र तिस्र ऋचस्तासु प्रथमामाह—

ब्रह्मेन्द्रमग्निं जगतः प्रतिष्ठाम् । दिव आत्मानꣳ
सवितारं बृहस्पतिम् । चतुर्होतारं प्रदिशोऽनुक्लृप्तम् ।
वाचो वीर्यं तपसाऽन्वविन्दत् , इति ।

ब्रह्मा चतुर्मुख **इन्द्रं** परमैश्वर्ययुक्तं परमात्मानं **तपसाऽन्वविन्दत्**, अन्विष्य लब्धवान् । दर्शपूर्णमाससृष्टिसाधनं किमिति विचार्य चतुर्होतृमन्त्ररूपेणावस्थितं परमात्मानं निश्चितवानित्यर्थः । तथा च ब्राह्मण आम्नायते—" प्रजापतिरकामयत दर्शपूर्णमासौ सृजेयेति । स एतं चतुर्होतारमपश्यत् " इति । कीदृशमिन्द्रम् । **जगतः प्रतिष्ठाम्, अग्निं** सर्वस्य जगत आधाररूपो योऽयं चातुर्होत्रीयचितिरूपोऽग्निस्तत्स्वरूपम्, **दिव आत्मानं सवितारं** द्युलोकस्य प्रकाशकत्वेनाऽऽत्मेवदवस्थितो **यः** सविता तद्रूपम्, तथा **बृहस्पतिं** योऽयं देवगुरुस्तद्रूपेणावस्थितम्, **प्रदिशः** सर्वान्प्रदेशानुक्लृप्तं सर्वेषु प्रदेशेष्ववस्थितम्, **चतुर्होतारं** पृथिवी होतेत्यादिमन्त्रस्वरूपम्, **वाचो वीर्यं** सर्वस्वं देवरूपाया वाचः सारभूतम् ॥

अथ द्वितीयामृचमाह—

अन्तः प्रविष्टं कर्तारमेतम् । त्वष्टारꣳ रूपाणि विकुर्वन्तं
विपश्चिम् (२) । अमृतस्य प्राणं यज्ञमेतम् । चतु-
र्होतृणामात्मानं कवयो निचिक्युः , इति ।

कवयो विद्वांसो वेदशास्त्रपारंगताश्चतुर्होतृणां चतुर्होतृशब्देनाभिधीयमानानां सर्वेषां होतृमन्त्राणामात्मानं स्वरूपभूतं परमेश्वरं **निचिक्युः**, निश्चितवन्तः । कीदृशमात्मानम्—**अन्तः प्रविष्टं** जीवरूपेण शरीरेषु प्रविश्यावस्थितम् । अत एवाऽऽम्नायते—" **अनेन** जीवेनाऽऽत्मनाऽनुप्रविश्य " इति । **कर्तारमेतं**मित्येनेन मानसप्रत्यक्षेण प्रतीयमानं लौकिकवैदिकसर्वक्रियानिष्पादकम् । एतच्चान्यत्राऽऽम्नातम्—"एष हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः " इति । **रूपाणि** विकुर्वन्तं **त्वष्टारं** गर्भेषु देवतिर्यङ्मनुष्यादिरूपाणि विविधं निष्पादयन्तं त्वष्टृदेवस्वरू-

१ क. ख. 'णमाम्ना' । २ क. 'त्मप्रायो योऽयमवस्थि' । ३ ग. 'तमहमि' । ४ क. 'च्चाऽऽम्नायते । ए' । ५ ग. 'ष्टा श्रोता घ्राता घ्रा' । ६ ग. 'न्तं विपश्चितं त्व' । ७ ग. 'दिरूपेण रू' ।

पम् । एतदप्याम्नातम्—"यावच्छो वै रेतसः सिक्तस्य त्वष्टा रूपाणि विकरोति तावच्छो वै तत्प्रजायते" इति । **विपश्चिं** विपश्चितं तत्तद्रूपनिर्माणप्रकाराभिज्ञम्, **अमृतस्य प्राणं** मरणरहितस्य परमात्मनो व्यवहारहेतुभूतप्राणोपाधिस्वरूपम् । एतदप्यथर्वणिका आमनन्ति—"कस्मिन्वहमुत्क्रान्त उत्क्रान्तो भविष्यामि कस्मिन्वा प्रतिष्ठिते प्रतिष्ठास्यामीति स प्राणमसृजत" इति । यज्ञं सर्वैरनुष्ठीयमानत्वेन दृश्यमानमेतं दर्शपूर्णमासयज्ञस्वरूपं चतुर्होतृमन्त्रस्य तद्यज्ञसृष्टिसाधनत्वात्तद्रूपत्वं युक्तम् । तद्यज्ञसाधनत्वं ब्राह्मणे समाम्नातम्—'स एतं चतुर्होतारमपश्यत् । तं मनसाऽनुद्रुत्याऽऽहवनीयेऽजुहोत् । ततो वै स दर्शपूर्णमासावसृजत" इति ॥

अथ तृतीयामाह—

अन्तः प्रविष्टं कर्तारमेतम् । देवानां बन्धु
निहितं गुहासु । अमृतेन कल्पं यज्ञमेतम् ।
चतुर्होतृणामात्मानं कवयो निचिक्युः, इति ।

योऽयं परमात्मा सोऽयं **देवानां** बन्धुवत्प्रियस्तादृशम् । तेषु देवेषु पक्षपातेन विजयहेतुत्वं **तलवकारा** आमनन्ति—" ब्रह्म ह देवेभ्यो विजिग्ये " इति । **गुहासु** बुद्धिषु **निहितं** साक्षित्वेनावास्थितम् । " यो वेद निहितं गुहायाम् " इत्यादिश्रुतेः । **अमृतेन** स्वर्गफलनिमित्तेन **कल्पं** संपादितम् । **एतं यज्ञमित्यादि** पूर्ववत् ।

तदेवंमृक्त्रयरूपं चतुर्होतृहृदयमुक्तम् । अथ पञ्चहोतृहृदयाख्यो मन्त्रोऽभिधीयते । तत्रेमं तिस्र ऋचस्तासु प्रथमामाह—

शतं नियुतः परिवेद विश्वा विश्ववारः । विश्वमिदं वृणाति ।
इन्द्रस्याऽऽत्मा निहितः पञ्चहोता । अमृतं देवानामायुः प्रजानाम्(३), इति ।

पञ्चहोताऽग्निर्होतेत्यादिपञ्चहोतृमन्त्ररूप आत्मा सर्वं च **विश्ववारः** सर्वैर्वरणीयो वायुरूपः सञ्**शतं नियुतः** शतसंख्याकान्स्वकीयान्स्वा (?) न्**परिवेद** परितः संचारित्वेन जानाति । अत एवेदं **विश्वं** जगद्**वृणाति** व्याप्नोति । **सोऽयमिन्द्रस्याऽऽत्मा** परमेश्वरस्य स्वरूपभूतः **सन्निहितः** सर्वत्रावस्थितः । स च **देवानाममृतं प्रजानां चाऽऽयुः** प्रयच्छतीति शेषः ।

---

१ ख. ग यज्ञमेव स° । २ ख. ग. °षु प° । ३ ख. ग °पातत्वेन । ४ क. °वमुक्तरू° । ५ क. ख. °त्र प्र° । ६ ख. ग. स वि° । ७ क. °यानश्चान्प° । ख. °यान्विश्वा परि° । ८ क. ग. °तं प्रयच्छति । प्र° ।

अथ द्वितीयामाह—

इन्द्र॰ राजान॰ सवितारमेतम् । वायोरात्मानं
कवयो निचिक्युः । रश्मि॰ रश्मीनां मध्ये
तपन्तम् । ऋतस्य पदे कवयो निपान्ति, इति ।

एवं पञ्चहोतृदेवं **कवयः** पण्डिता **निचिक्युः**, विनिश्चितवन्तः । कीदृशम् । **इन्द्रं** परमैश्वर्ययुक्तम् । **राजानं** दीप्यमानम् । **सवितारं** प्रेरकम् । **वायोरात्मानं** स्वरूपभूतम् । ते कवय एतं पञ्चहोतृदेवमृतस्य **पदे** ब्रह्मणः स्थाने **निपान्ति** नितरां पालयन्ति, तद्रूपत्वेन पश्यन्तीत्यर्थः । कीदृशम् । **रश्मीनां** दृश्यमानानां किरणानां **मध्ये** स्थित्वा **तपन्तं** जगतस्तापं कुर्वन्तम् । **रश्मिं** प्रौढरश्मिरूपम् । आदित्यमित्यर्थः ।

अथ तृतीयामाह—

य आण्डकोशे भुवनं बिभर्ति । अनिर्भिण्णः सन्नेथ
लोकान्विचष्टे । यस्याऽऽण्डकोश॰ शुष्ममाहुः
प्राणमुल्बम् । तेन क्लृप्तोऽमृतेनाहमस्मि, इति ।

यः पञ्चहोतृदेव **आण्डकोशे** ब्रह्माण्डमध्येऽनिर्भिण्णः सन्नभेदेनावस्थितः **सन्भुवनं** कृत्स्नं भूतजातं **बिभर्ति** धारयति । **अथ** ब्रह्माण्डभेदानन्तरं तदन्तःस्थितान्भूरादिलोकान्विचष्टे विशेषेण प्ररूपयति । **यस्य** पञ्चहोतृरूपस्य परमात्मनः **शुष्ममाण्डकोशं** प्रबलं ब्रह्माण्डावकाशाँस्थं **प्राणं** वायुविशेषमुल्बमाहुः, गर्भवेष्टनस्थानीयमाहुः । यथा लोके गर्भ उल्बेन वेष्टचते तथा सूत्रात्मशरीरं प्राणवायुना ब्रह्माण्डस्थेन वेष्टितं भवति । **तेनामृतेन** पञ्चहोतृरूपेण परमात्मनाऽहं क्लृप्तो व्यवहारसमर्थत्वेनोत्पादितोऽस्मि ।

अथ षड्ढोतृहृदयमन्त्रः । तत्र प्रथमामृचमाह—

सुवर्णं कोश॰ राजसा परीवृतम् । देवानां वसुधानीं
विराजम् (४) । अमृतस्य पूर्णां तामुं कलां
विचक्षते । पाद॰ षड्ढोतुर्न किलाऽऽविवित्से, इति ।

वाग्घोतेति मन्त्रोऽत्र षड्ढोता, स च ब्रह्माण्डकोशमध्ये चन्द्ररूपेणावस्थितः । तं

---

१ ख. ग. °वं चतुर्होतृ° । २ ख. ग. °तं चतुर्होतृ° । ३ ग °ऋथो लो° । ४ क. °स्थितो भुव° । ५ ख. ग. °स्य चतुर्होतृ° । ६ क. °तृदेवस्याऽऽण्डकोशं शुष्मं प्र° । ७ क °ऋस्थप्रा° । ८ ग. सूक्ष्मशरीरेण प्रा° । ९ ख. °रीरेग प्रा° । १० ख. ग. °ह्माण्डं वे° । ११ ग. °मन्त्राः । त° ।

न्द्ररूपं षड्ढोतृदेवं[1] कवयोऽभिज्ञाः सुवर्णत्वादिगुणयुक्तमाचक्षते । **सुवर्णं** शोभनवर्णो-पेतं चन्द्रमण्डलं हिरण्मयवर्णोपेतं[2] भासते । **कोशं** ब्रह्माण्डकोशमध्यगम् । **रजसा** रञ्जनात्मकेनामृतेन **परीवृतं** सर्वतो व्याप्तम् । तथाविधं चन्द्रम् । **तामु कलां** तादृ-शीमेव भागरूपां[3] **विचक्षत** आचक्षते । कीदृशीमिति तदुच्यते—**देवानां वसुधानीं** वह्निरव्यादीनां देवतानामपेक्षितं यद्वस्वमृतरूतं तस्य धारयित्रीम् । अत एव **स्मर्यते**— "प्रथमां पिबते वह्निर्द्वितीयां पिबते रविः" इत्यादि । **विराजं** विशेषेशेण राजमानाम् । **अमृतस्य पूर्णां** पीयूषेण पूरिताम् । एवंरूपं षड्ढोतृदेवमभिज्ञा आचक्षते । प्राकृतस्तु जनः **षड्ढोतुः पादं** षड्ढोतृदेवस्यांशभूतं चन्द्रं **न किलाऽऽविवित्से** नैव जानाति ।

अथ द्वितीयामाह—

येनर्तवः पञ्चधोत कल्पाः[4] । उत वा षड्धा मन-
सोत कल्पाः । तꣳ षड्ढोतारमृतुभिः कल्पमा-
नम् । ऋतस्य पदे कवयो निपान्ति, इति ।

येन चन्द्ररूपेण षड्ढोतृदेवेन वसन्ताद्यृतवः पञ्चप्रकाराः **कल्पाः** संपादिताः । हेम-न्तशिशिरयोः समासेन पञ्चत्वम् । **उत वा** षड्ढाऽ(धाऽ)थवा हेमन्तशिशिरयोर्वि-भागेन षट्प्रकाराः **कल्पाः** । **उतापि च मनसा कल्पाः**, संकल्पमात्रेण संपादिताः । **तं** चन्द्ररूपं षड्ढोतृदेवमृतुभिः **कल्पमानं** पञ्चधा षोढा वा भिन्नैर्वसन्तादिभिः सर्वव्यव-हारसमर्थमृतस्य पदे सत्यस्य परब्रह्मणः स्थाने **कवयो** वेदरहस्याभिज्ञा **निपान्ति** नितरां पालयन्ति, परब्रह्मैवायं चन्द्ररूपः षड्ढोतेत्येवमुपासत इत्यर्थः ।

अथ तृतीयामाह—

अन्तः प्रविष्टं कर्तारमेतम् । अन्तश्चन्द्रमसि मनसा
चरन्तम् । सहैव सन्तं न विजानन्ति देवाः ।
इन्द्रस्याऽऽत्मानꣳ शतधा चरन्तम् (५), इति ।

देवाः सर्वे **सहैव सन्तं** स्वकीयहृदये स्वेन जीवात्मना सहैवावस्थितमेतं षड्ढोतृ-देवं परमात्मानं **न विजानन्ति**, वेदान्ताभ्यासमन्तरेण हृदयेऽवस्थियोऽयं परमात्मै-वेति विशेषेण न जानन्ति । कीदृशं परमात्मानम् । **अन्तःप्रविष्टम्**अन्तर्यामिरूपेण सर्वेषां पृथिव्यादिपदार्थानां मध्येऽवस्थितम् । एतच्च **वाजसनेयिनोऽन्तर्यामिब्राह्मणे**—"यः पृथिव्यां तिष्ठन्" इत्यादिना बहुप्रपञ्चेनाऽऽमनन्ति । **कर्तारं** नियामकत्वेन सर्वस्य निष्पा-

---

१ ग. °वं विराजमभि° । २ ग. °वर्णमेतं । ३ ग. °पेतम् । को° । ४ ख. °रूपामाचक्षते । ५ ग. षड्ढा । ६ ग. धाऽथ । ७ क. °पञ्चमाम° ।

दकम्। अन्तश्चन्द्रमसि चन्द्रमण्डलमध्ये मनसा संकल्पमात्रेण चरन्तम्। एतच्चोपलक्षणं सर्वेष्वपि वस्तुषु चरन्तमित्यर्थः। एतदेव स्पष्टीकर्तुं शतधा चरन्तमित्युक्तम्। इन्द्रस्य परमैश्वर्ययुक्तस्य देवादेरात्मानं स्वरूपभूतम्।

अथ सप्तहोतृहृदयाख्यो मन्त्रः। तत्र प्रथमामृचमाह—

इन्द्रो राजा जगतो य ईशे।
सप्तहोता सप्तधा विकल्पः, इति।

महाहविर्होतेत्ययं मन्त्रः सप्तहोता। स च सप्तधा विकल्पः, होत्रध्वर्युप्रमुखैः सप्तभिः प्रकारैः संपादितः। स किंरूप इति तदुच्यते—इन्द्रः परमैश्वर्ययुक्तः। राजा दीप्यमानः। यः परमात्मा जगत ईशे स्वामी भवति। स एवायं सप्तहोतृरूप इत्यर्थः।

अथ—द्वितीयामाह—

परेण तन्तुं परिषिच्यमानम्। अन्तरादित्ये मनसा
चरन्तम्। देवानाꣳ हृदयं ब्रह्माऽन्वविन्दत्, इति।

ब्रह्मा प्रजापतिर्देवानामिन्द्रादीनां हृदयं हृदयस्थितं परमात्मानमन्वविन्दत्। अन्विष्य लब्धवान्। कीदृशम्। तन्तुं परेणाविच्छिन्नस्य यज्ञस्य परस्तात्फलदशायां परिषिच्यमानं वृष्टिरूपेण पारितः सिच्यमानम्। अन्तरादित्य आदित्यमण्डलमध्ये मनसा संकल्पमात्रेण चरन्तम्।

अथ तृतीयामाह—

ब्रह्मैतद्ब्रह्मण उज्जभार। अर्कꣳ श्रोतन्तꣳ सरिरस्य मध्ये, इति।

ब्रह्मा चतुर्मुखः प्रजापतिर्ब्रह्मणो वेदस्य सकाशादेतत्सप्तहोतृस्वरूपमुज्जभार सारत्वेनोद्धृतवान्। कीदृशम्। अर्कं सूर्यरूपेणावस्थितं, सरिरस्य मेघस्थजलस्य मध्ये रश्मिद्वारा प्रविश्य श्रोतन्तं वर्षयन्तम्।

अथ चतुर्थीमाह—

आ यस्मिन्त्सप्त पेरवः। मेहान्ति बहुलाꣳ
श्रियम्। बह्वश्वामिन्द्र गोमतीम् (६), इति।

यस्मिन्सप्तहोतृरूपे आदित्ये पेरवो वृष्टिप्रदानेन लोकस्य पालितारः सप्तसंख्याका रश्मय आश्रिताः। रश्मिसप्तकं च साकंजानां सप्तथमाहुरेकजमित्यत्र प्रपञ्चितम्।

---

१ क. °कस्याऽऽत्मा°। २ ख. ग. °रात्मभूतं स्वरूपम्। ३ क. °तृस्वरू°। ४ क. पालकाः। ५ ग. °इमयः प्रापिताः।

ते च सप्त रश्मयो बहुलां श्रियं प्रभूतां सस्यादिसंपदं मेहन्ति वृष्टिसेचनद्वारेण संपादयन्ति । हे इन्द्र सप्तहोतृदेवरूप परमेश्वर बह्वश्वां बहुभिरश्वैरुपेतां गोमतीं बहुभिर्गोभिरुपेतां तां श्रियं प्रयच्छेति शेषः ।

अथ पञ्चमीमाह—

अच्युतां बहुलाꣳ श्रियम् । स हरिर्वसु-
वित्तमः । पेरुरिन्द्राय पिन्वते, इति ।

स देवः सप्तहोत्राख्य इन्द्राय कर्मस्वामिने यजमानाय श्रियं पिन्वते सिञ्चति, प्रयच्छतीत्यर्थः । कीदृशः स देवः, हरिः पापहरणशीलः, वसुवित्तमोऽतिशयेन धनस्य लब्धा, पेरुः पालकः । कीदृशीं श्रियम्, अच्युतां विनाशरहितां, बहुलां गवाश्वादिभिः प्रभूताम् ।

अथ षष्ठीमाह—

बह्वश्वामिन्द्र गोमतीम् । अच्युतां बहुलाꣳ
श्रियम् । मह्यमिन्द्रो नियच्छतु, इति ।

इन्द्रः परमैश्वर्ययुक्तः सप्तहोतृदेवः । स्पष्टमन्यत् ।

अथ सप्तमीमाह—

शतꣳ शता अस्य युक्ता हरीणाम् । अर्वाङायातु
वसुभी रश्मिरिन्द्रः । प्रमꣳहमाणो बहुलाꣳ श्रियम् ।
रश्मिरिन्द्रः सविता मे नियच्छतु (७), इति ।

अस्याऽऽदित्यरूपस्य सप्तहोतृदेवस्य हरीणामन्धकारहरणशीलानां रश्मीनां शतꣳ शता शतसंख्याकानि शतानि, अयुतसंख्याकानीत्यर्थः । युक्ता युक्तानि संपादितानि । इन्द्रः परमैश्वर्ययुक्तो रश्मिर्बहुविधरश्मियुक्त आदित्यो वसुभिर्धनैः सहार्वाङायातु आभिमुख्येनाऽऽगच्छतु । आगतश्च सविता बहुलां श्रियं प्रभूतां धनादिसंपदं मे मह्यं नियच्छतु नितरां ददातु । कीदृशः सविता, प्रमꣳहमाणोऽस्मदीयस्तुतिभिः प्रकर्षेण वर्धमानः रश्मिर्बहुविधरश्मियुक्तः इन्द्रः परमैश्वर्ययुक्तः ।

अथाष्टमीमाह—

घृतं तेजो मधुमदिन्द्रियम् । मय्ययमग्निर्दधातु, इति ।

---

१ ख. प्रधानभू° । २ ज ग °तां धनादि° ।

अयं सप्तहोतृदेवोऽग्न्यात्मकः सन्मायि यजमाने **मधुमद्घृतं** मधुररसोपेतं घृतादि-द्रव्यं **तेजः** कान्तिमिन्द्रियं चक्षुरादिसामर्थ्यं च **दधातु** संपादयतु।

अथ नवमीमाह—

हरिः पतङ्गः पटरी सुपर्णः। दिविक्षयो नभसा य
एति। स न इन्द्रः कामवरं ददातु, इति।

हरिरन्धकारहरणशीलः पतङ्गः सूर्यरूपः **पटरी** तेजःपटलवान्**सुपर्णः** पक्षिस-**दृशो दिविक्षयः** स्वर्गनिवासी **यः** सप्तहोतृदेवो **नभसाऽऽकाशमार्गेणैति** गच्छति। **स** देवो **नोऽस्माकं कामवरं** कामानां मध्ये श्रेष्ठं **ददातु**।

अथ दशमीमाह—

पञ्चारं चक्रं परिवर्तते पृथु। हिरण्यज्योतिः
सरिरस्य मध्ये। अजस्रं ज्योतिर्नभसा सर्प-
देति। स न इन्द्रः कामवरं ददातु, इति।

ऋतुपञ्चकात्मका अरा यस्य कालचक्रस्य तत्**पञ्चारं पृथु** विस्तृतं **चक्रं** संवत्स-रात्मकं कालचक्रं **परिवर्तते** परितः प्रवर्तते। **सरिरस्य मध्ये** मेघवर्तिजलस्य मध्ये **हिरण्यज्योती** रश्मिसंचारेण विद्युद्रूपपरिणामे सति सुवर्णसमानं ज्योतिर्यस्य मण्डलस्य तद्धिरण्यज्योतिस्तादृशं ज्योतिरादित्यमण्डलं संवत्सरचक्रनिष्पादक**मजस्रं** निरन्तरं **नभसाऽऽकाशमार्गेण सर्पदेति** शनैः संचरन्ग (माणं ग) च्छति। **स** ज्योतिर्मण्डलात्मा **नोऽस्माकं कामवरं ददातु**।

अथैकादशीमाह—

सप्त युञ्जन्ति रथमेकचक्रम् (८)। एको अश्वो
वहति सप्तनामा। त्रिनाभि चक्रमजरमनर्वम्।
येनेमा विश्वा भुवनानि तस्थुः, इति।

सप्तसंख्याकाः साकंजानामित्यत्रोक्ता मुख्यरश्मिविशेषा अश्वसदृशा **एकचक्र-मेकप्रकारपरिवर्तं** कालचक्रं **युञ्जन्ति** प्रवर्तयन्ति। तदेव स्पष्टी क्रियते—**सप्तनामा** सप्तसंख्यानि नामानि नमनयोग्यानि वश्यानि रश्मिरूपाणि यस्यासौ सप्तनामा। **अश्वो** व्यापक **एकः** सूर्यस्तत्कालचक्रं **वहति**। कीदृशं चक्रम्—**त्रिनाभि** तिस्रः सत्त्वरज-स्तमोगुणरूपा भूतभविष्यद्वर्तमानरूपा वा नाभयो यस्य तत्त्रिनाभि। **अजरं** विनाशरहि-

१ क. °वोऽग्न्यात्मकः सन्मायि। ग. °वो द्रव्यात्म°। २ ग. °नर्वाम्। ये°।

तम्, न हि कालः संसारमध्ये कदाचिद्विनश्यति । अनर्वम्, अर्वा विरोधी विनाशको भ्रातृव्यो वा अर्वेति श्रुतेः, तद्रहितम्, न हि कालचक्रस्य कश्चिद्विनाशकोऽस्ति । येन कालचक्रेणेमा विश्वा भुवनानि दृश्यमानानि सर्वाणि भूतजातानि तस्थुस्तिष्ठन्ति सुखेन वर्तन्ते, तस्य कालचक्रस्य निर्वाहकोऽयं सप्तहोतृदेव आदित्यः ।

अथ द्वादशीमाह—

भद्रं पश्यन्त उपसेदुरग्रे । तपो दीक्षामृ-
षयः सुवर्विदः । ततः क्षत्रं बलमोजश्च
जातम् । तदस्मै देवा अभिसंनमन्तु, इति ।

सुवर्विदः स्वर्गमार्गाभिज्ञा ऋषयो भद्रं कल्याणं सप्तहोतृरूपमादित्यं पश्यन्तः प्राप्यत्वेन निश्चिन्वानास्तपोऽनशनादिरूपं दीक्षां नियमविशेषं चोपसेदुरनुष्ठितवन्तः । तत आदित्यसकाशात्क्षत्रं क्षतात्त्राणमनिष्टनिवारणं बलं शरीरशक्तिरोजः कान्तिश्चेत्येतत्सर्वं जातं संपन्नम् । तत्क्षत्रादित्रयमस्मै यजमानाय देवा अभिसंनमन्तु । अभितः संपादयन्तु ।

अथ त्रयोदशीमाह—

श्वेतꣳ रश्मिं बोभुज्यमानम् । अपां नेतारं भुवनस्य
गोपाम् । इन्द्रं निचिक्युः परमे व्योमन् (९), इति ।

परमे व्योमन्नुत्कृष्टे हृदयाकाश इन्द्रं परमैश्वर्ययुक्तं सप्तहोतृदेवमादित्यं निचिक्युर्निश्चितवन्तः, ध्यातवन्त इत्यर्थः । कीदृशमिन्द्रम्—श्वेतं प्रकाशरूपत्वेन शुक्लवर्णम् । रश्मिं रश्मियुक्तम् । बोभुज्यमानं सर्वैः प्राणिभिर्वृष्टिद्वारेण पुनः पुनर्भुज्यमानम् । एतदेव स्पष्टी क्रियते—अपां नेतारम्, आदित्याज्जायते वृष्टिरिति स्मृत्या सूर्यो जलस्य नेता तादृशम्, भुवनस्य गोपां भुवनस्य पालकम् ।

अथ चतुर्दशीमाह—

रोहिणीः पिङ्गला एकरूपाः । क्षरन्तीः पिङ्गला एक-
रूपाः । शतꣳ सहस्राणि प्रयुतानि नाव्यानाम्, इति ।

रोहिणी रोहितवर्णाः पिङ्गलाः पिङ्गलवर्णाश्च या आपस्तत्तद्भूमिसंबन्धेन बहुविधा दृश्यन्ते, ताः सर्वा अपि सप्तहोतृरूपस्याऽऽदित्यस्य रश्मिसंबन्धे सति मेघेषु

---

१ ग. अनर्वाम् । २ ग. °श्चिनाश° । ३ क. यस्य । ४ क. °गैलोक्मा° । ५ ग. °न्तिरित्ये° । ६ ख. ग. तच्च क्षत्रा° । ७ क. °तृरूपस्य° । ८ क °पां गोप्तारं भूतजातस्य । ९ ग. °हिणी° । १० क. °तृदेवस्यऽऽ° ।

नानारूपत्वं परित्यज्यैकरूपा भवन्ति । तथा क्षरन्तीर्वृष्टिरूपेण भूमौ पतन्त्यस्ताः पिङ्गलादिवर्णा आप एकरूपा भवन्ति । वृष्टिबाहुल्येन भूमौ नाव्यानां नावा तरणीयानामपां शतं सहस्राणि प्रयुतानि शतसंख्या बहुविधसहस्रसंख्या बहुविधलक्षसंख्याँ च संपद्यते । वृष्टिकाले तत्र तत्रानेकप्रवाहा भवन्ति । तदेतत्सर्वं सप्तहोतृमाहात्म्यम् ।

अथ पञ्चदशीमाह—

अयं यः श्वेतो रश्मिः । परि सर्वमिदं जगत् ।
प्रजां पशून्धनानि । अस्माकं ददातु, इति ।

अयमादित्यः श्वेतः श्वेतवर्णो रश्मी रश्मियुक्तोऽस्ति । सोऽयं सर्वमिदं जगत्परिव्याप्य वर्तमानोऽस्माकं प्रजादिकं ददातु ।

अथ षोडशीमाह—

श्वेतो रश्मिः परि सर्वं बभूव । सुवन्मह्यं पशून्विश्वरूपान्, इति ।

श्वेतः शुक्लवर्णो रश्मी रश्मियुक्त आदित्यः सर्वं जगत्परिबभूव परितो व्याप्तवान्, तादृश आदित्यो मह्यं विश्वरूपान्गोमहिष्यादिरूपेण बहुविधान्पशून्सुवँस्सौतु, प्रेरयत्वित्यर्थः ।

अथ सप्तदशीमाह—

पतङ्गमक्तमसुरस्य मायया (१०) । हृदा पश्यन्ति
मनसा मनीषिणः । समुद्रे अन्तः कवयो विचे-
क्षते । मरीचीनां पदमिच्छन्ति वेधसः, इति ।

असून्प्राणान्राति ददातीत्यसुरः परमात्मा, तस्य मायया ऽचिन्त्यशक्त्याऽक्तमभिव्यक्तं पतङ्गमादित्यं हृदा मनसा हृत्पुण्डरीकगतेन नियमितेनान्तःकरणेन मनीषिणो वेदशास्त्राभिज्ञा महर्षयः पश्यन्ति ध्यात्वा साक्षात्कुर्वन्ति । कवयो लौकिकैर्वार्ताभिज्ञाः पुरुषाः समुद्रे अन्तः समुद्रसमानेऽन्तरिक्षमध्ये विचक्षते विशेषेण कथयन्ति, अयमादित्य उदितो मध्याह्ने समागत इत्यादिव्यवहारं कुर्वन्ति । वेधसो विधातारोऽनुष्ठानकुशलाः केचिद्यजमाना मरीचीनां पदं रश्मीनां स्थानमादित्यमिच्छन्ति । आदित्यसायुज्यप्रप्त्यर्थमनुतिष्ठन्तीत्यर्थः ।

---

१ ख. °न नाव्या°। २ क. °मौ नानारूपे(पा)णामेकरूपाणां च नावा । ३ ग. °स्रल°। ४ °ल्याकाश्च सं° । ५ क. °हात्म्यमित्यर्थः । अ° । ६ क. ख. °वन्सौतु। ७ क. °कवृत्तान्ताभि° ।

अथाष्टादशीमाह—

पतङ्गो वाचं मनसा बिभर्ति । तां गन्धर्वोऽव-
दद्गर्भे अन्तः । तां द्योतमानाꣳ स्वर्यं मनी-
षाम् । ऋतस्य पदे कवयो निपान्ति, इति ।

पतङ्ग आदित्यो **मनसा** स्वकीयेन प्राणिनां **वाचं बिभर्ति** धारयति, अन्तर्यामिरूपेण वाचं प्रेरयतीत्यर्थः । तथाच **पौराणिका** आहुः—"योऽन्तः प्रविश्य मम वाचमिमां प्रसुप्तां संजीवयत्यखिलशक्तिधरः स्वधाम्ना" इति । **तामादित्यप्रेरितां** वाचं **गर्भे अन्तः** शरीरस्य मध्ये गन्धर्वनामको वायुरवददुच्चारयति । गन्धान्वहतीति व्युत्पत्त्या **गन्धर्व**शब्दो वायुमाचष्टे । वायुर्हि तालवादिसंयुक्तो वाचमुच्चारयति । **तां** वायुनोच्चारितां **द्योतमानां** प्रकाशमानां स्वर्यं स्वर्गस्य हेतुभूतां **मनीषां** मनस ईशित्रीमाह्लादकरीमित्यर्थः । तादृशीं वाचं **कवयः** शास्त्राभिज्ञा **ऋतस्य पदे** सत्यस्य परब्रह्मणः स्थाने **निपान्ति** नितरां पालयन्ति । परब्रह्मविषयाणि वेदवाक्यानि सर्वदा पठन्तीत्यर्थः । तदेतत्सर्वं वाचः प्रेरकस्याऽऽदित्यस्य माहात्म्यम् ।

अथैकोनविंशीमाह—

ये ग्राम्याः पशवो विश्वरूपाः । विरूपाः सन्तो
बहुधैकरूपाः । अग्निस्ताꣳ अग्रे प्रमुमोक्तु
देवः (११) । प्रजापतिः प्रजया संविदानः, इति ।

ये पशवो **ग्राम्या** ग्रामे भवा गवाश्वादयो **विश्वरूपा** जातिभेदैर्बहुविधा **विरूपा** वर्णादिभेदेन विविधाकारा एवं बहुधा दृश्यमानाः **सन्तोऽपि** पुनः पशुत्वाकारेणैकरूपास्तान्सर्वानग्निरूपः सप्तहोतृदेवोऽग्रे **प्रमुमोक्तु** प्रथमं तत्तस्थानात्प्रमुञ्चतु, प्रमुच्यास्मभ्यं ददात्वित्यर्थः । **प्रजापतिश्च** स्वकीयया **प्रजया संविदान** ऐकमत्यं गतोऽस्मभ्यं पशून्ददात्विति शेषः ।

अथ विंशीमाह—

वीतꣳ स्तुके स्तुके । युवमस्मासु नियं-
च्छतम् । प्र प्र यज्ञपतिं तिर, इति ।

हेऽग्निप्रजापती **युवमुभौ** युवां **स्तुके स्तुके** तत्तद्वाद्यपत्ये **वीतं** प्रजननमुत्पत्ति-

---

१ क. °न्धर्वो वायुस्ताल्वा° । २ ख. ग. °दिस्थानेषु सं° । ३ ख. ब्रह्मणः । ४ क. ख. °वाद् । ५ क. ग. तिरः ।

मस्मासु नियच्छतं नियमेन संपादयतम्। यज्ञपतिं यजमानं प्रप्रतिरात्यन्तं प्रकर्षेण वर्धयतम्।

अथैकविंशीमाह —

ये ग्राम्याः पशवो विश्वरूपाः। विरूपाः सन्तो
बहुधैकरूपाः। तेषाꣳ सप्तानामिह रन्तिरस्तु।
रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय, इति।

ग्राम्यादिशब्दाः पूर्ववद्योज्याः। तेषां ग्राम्यपशूनां सप्तानां गोश्वाजाविपुरुषगर्दभोष्ट्ररूपाणां सप्तसंख्याकानामिहास्मद्गृहे रन्तिः क्रीडाऽस्तु। तच्च धनपुष्टिशोभनापत्यशोभनवीर्यार्थं संपद्यते।

अथ द्वाविंशीमाह—

य आरण्याः पशवो विश्वरूपाः। विरूपाः
सन्तो बहुधैकरूपाः। वायुस्ताꣳ अग्रे प्रमुमोक्तु
देवः। प्रजापतिः प्रजया संविदानः, इति।

अरण्ये भवा आरण्या द्विखुराः श्वापदादयस्तानरण्याधिपतिर्वायुः प्रमुमोक्तु। अन्यत्पूर्ववत्।

अथ त्रयोविंशीमाह—

इडायै सप्तं घृतवच्चराचरम्। देवा अन्वविन्दन्गुहाहितम्, इति।

इडायै गोसंपादनार्थं सप्तं प्राप्तं घृतवद्घृतयुक्तं घृताकारमित्यर्थः। तादृशं चराचरं स्थावरजङ्गमरूपं जगदनुग्रहीतुं गुहाहितं प्राणिनां बुद्धावस्थितं सप्तहोतृदेवं देवा अन्वविन्दन्नन्विष्य लब्धवन्तः।

अथ चतुर्विंशीमाह—

य आरण्याः पशवो विश्वरूपाः। विरूपाः सन्तो
बहुधैकरूपाः। तेषाꣳ सप्तानामिह रन्तिरस्तु।
रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय (१२), इति।

आत्मा जनानां विकुर्वन्तं विपश्चिं प्रजानां वसुधानीं विराजं चरन्तं गोमतीं मे नियच्छत्वेकचक्रं व्योमन्मायया देव एकरूपा अष्टौ च॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके तृतीयप्रपाठक
एकादशोऽनुवाकः॥ ११॥

---

१ ग. °तिरोऽत्य°। २ ख. °श्वाषि°। ३ ख. °ष्टूमाहिषरू°। ४ क. °पुष्टयर्थं शोभनप्रजार्थं शोभन°।

सप्तानां द्विखुरश्वापदपक्षिसरीसृपहस्तिमर्कटनादेयानाम् । अन्यत्पूर्ववत् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये तृतीयप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

अथ तृतीये द्वादशोऽनुवाकः ।

एतैरेकादशभिरनुवाकैश्चातुर्होत्रीयचयनमन्त्रा[1] उक्ताः । नारायणनाम्ना पुरुषसूक्तनाम्ना च व्यवह्रियमाणोऽनुवाक उच्यते । तस्य विनियोगं महाज्ञावापस्तम्ब आह—"पुरस्तात्प्रतीचीं पुरुषाकृतिं चिनोति पुरुषशिरोऽस्याः[2] शिरो भवति, सहस्रशीर्षा पुरुष इत्युपहितां पुरुषेण नारायणेन यजमान उपतिष्ठते[3]" इति । ब्रह्ममेधेऽपि प्रेतदाहोपस्थाने विनियोगं[4] भरद्वाज आह—"नारायणाभ्यामुपस्थानम् " इति । अयं चोत्तरश्चेत्युभावनुवाकौ[5] नारायणसंज्ञौ नारायणाख्येन केनचिदृषिणा दृष्टत्वात्, जगत्कारणस्य नारायणाख्यस्य पुरुषस्य प्रतिपादकत्वाच्च । तत्रास्मिन्द्वादशेऽनुवाके प्रथमामृचमाह—

सहस्रशीर्षा पुरुषः । सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वा। अत्यतिष्ठद्दशाङ्गुलम्, इति ।

सर्वप्राणिसमष्टिरूपो ब्रह्माण्डदेहो विराडाख्यो यः **पुरुषः** सोऽयं **सहस्रशीर्षा**, सहस्रशब्दस्योपलक्षणत्वादनन्तैः[6] शिरोभिर्युक्त इत्यर्थः । यानि सर्वप्राणिनां शिरांसि तानि सर्वाणि तद्देहान्तःपातित्वात्तदीयान्येवेति सहस्रशीर्षत्वम् । एवमक्षिषु[7] पादेष्वपि योजनीयम् । स पुरुषो भूमिं ब्रह्माण्डगोलकरूपां **विश्वतो वृत्वा** सर्वतः परिवेष्ट्य दशाङ्गुलपरिमितं देशमत्यतिष्ठदतिक्रम्य स्थितः । दशाङ्गुलमित्युपलक्षणं ब्रह्माण्डाद्बहिरपि सर्वतो व्याप्यावस्थित इत्यर्थः ।

अथ द्वितीयामाह—

पुरुष एवेदꣳ सर्वम् । यद्भूतं यच्च भव्यम् ।
उतामृतत्वस्येशानः । यदन्नेनातिरोहति, इति ।

यद्भूतमतीतं जगत्, **यच्च भव्यं** भविष्यज्जगत् । यदपीदं वर्तमानं जगत्, तत्सर्वं **पुरुष एव** । यथाऽस्मिन्कल्पे वर्तमानाः प्राणिदेहाः सर्वेऽपि विराट्पुरुषस्यावयवाः,

---

१ क. °होत्रिय° । २ क. ख. अभिहिताः । ३ घ. ग. °शिरो भ° । ४ ग. °तिष्ठेत' इ° । ५ क. °गं भार° । ६ क. रश्चैतावुभा । ७ क. °ख्यो योऽयं पु° । ८ क. °क्षिपा° ।

तथैवातीतागामिनोरपि कल्पयोर्द्रष्टव्यम् । उतापि चामृतत्वस्य देवत्वस्यायमीशानः स्वामी । यद्यस्मात्कारणादन्नेन प्राणिनां भोग्येनान्नेन निमित्तभूतेनातिरोहति स्वकीयकारणावस्थामातिक्रम्य परिदृश्यमानां जगदवस्थां प्राप्नोति । तस्मात्प्राणिनां कर्मफलभोगाय जगदवस्थास्वीकारान्नेदं तस्य वस्तुतत्त्वमित्यर्थः ।

अथ तृतीयामाह—

एतावानस्य महिमा । अतो ज्यायाꣳश्च पूरुषः (१) । पादोऽस्य विश्वा भूतानि । त्रिपादस्यामृतं दिवि, इति ।

अतीतानागतवर्तमानरूपं जगद्यावदस्त्येतावान्सर्वोऽप्यस्य पुरुषस्य महिमा स्वकीयसामर्थ्यविशेषो न तु तस्य वास्तवं स्वरूपम्, वास्तवंवस्तु पुरुषः, अतो महिम्नोऽपि ज्यायानतिशयेनाधिकः । एतच्च स्पष्टी क्रियते । विश्वा भूतानि कालत्रयवर्तीनि प्राणिजातानि अस्य पुरुषस्य पादश्चतुर्थोंऽशः । अस्यावशिष्टं त्रिपात्स्वरूपममृतं विनाशरहितं सद्दिवि द्योतनात्मके स्वप्रकाशरूपेऽवतिष्ठते । यद्यपि सत्यं ज्ञानमनन्तं ब्रह्मेत्यास्नातस्य परब्रह्मण इयत्तया अभावादंशचतुष्टयं न निरूपयितुं शक्यं तथाऽपि जगदिदं ब्रह्मस्वरूपापेक्षयाऽत्यल्पमिति विवक्षित्वा पादत्वोपन्यासः ।

अथ चतुर्थीमाह—

त्रिपादूर्ध्व उदैत्पुरुषः । पादोऽस्येहाऽभवात्पुनः ।
ततो विष्वङ्व्यक्रामत् । साशनानशने अभि, इति ।

योऽयं त्रिपात्पुरुषः संसारस्पर्शरहितब्रह्मस्वरूपः सोऽयमूर्ध्व उदैदस्मादज्ञानकार्यात्संसाराद्बहिर्भूतः सन्नत्रत्यैर्गुणदोषैरस्पृष्ट उत्कर्षेण स्थितवान् । तस्य योऽयं पादो लेशः सोऽयमिह मायायां पुनराभवत् । सृष्टिसंहाराभ्यां पुनः पुनरागच्छति । अस्य सर्वस्य जगतः परमात्मांशत्वं भगवताऽप्युक्तम्—" विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् " इति । ततो मायायामागत्यानन्तरं विष्वङ्देवतिर्यगादिरूपेण विविधः सन्व्यक्रामाद्व्याप्तवान् । किं कृत्वा साशनानशने अभिलक्ष्य साशनं भोज-

---

१ ग. पुरुषः । २ ख. °स्त्वं वस्तु । ग °स्त्ववस्तु । ३ क. ख. °तच्चोभयं स्प° । ४ क. °ते । सर्वभू° । ख. °ते । सर्वाणि भू° । ५ ख. °तं तच्च दिवि । ६ क. °त्ताभा° । ७ ग. °क्षित त्वात्पाद° । ८ ग. तबहुलस्व° । ९ क. °र्षेगावस्थे° । १० क. °मात्मऽशे° । ११ ग. मायायाऽऽग° । १२ ख. °यामा° ।

नादिव्यवहारोपेतं चेतनं प्राणिजातमनशनं तद्रहितमचेतनं गिरिनद्यादिकं तदुभयं यथा स्यात्तथा स्वयमेवंविधो भूत्वा व्याप्तवानित्यर्थः ।

अथ पञ्चमीमाह—

तस्माद्विराडजायत । विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत । पश्चाद्भूमिमथो पुरः(२), इति ।

विष्वङ्व्यक्रामदिति यदुक्तं तदेव प्रपञ्च्यते—**तस्मा**दादिपुरुषाद्विराडजायत ब्रह्माण्डदेह उत्पन्नः । विविधं राजन्ते वस्तून्यत्रेति विराट् । **विराजो अधि** विराड्देहस्योपरि स्थितमेव देहमधिकरणं कृत्वा **पुरुष**स्तद्देहाभिमानी काश्चित्पुमानजायत । योऽयं सर्ववेदान्तवेद्यः परमात्मा स एव स्वकीयया मायया विराड्देहं ब्रह्माण्डं सृष्ट्वा तत्र जीवरूपेण[1] प्रविश्य ब्रह्माण्डाभिमानी देवतात्मा जीवोऽभवत् । एतच्चाऽऽथर्वणिका उत्तरतापनीये[2] स्पष्टमामनन्ति —"स वा एष भूतानीन्द्रियाणि विराजं देवताः कोशांश्च सृष्ट्वा प्रविश्यामूढो मूढ इव व्यवहरन्नास्ते माययैव" इति । स **जातो** विराट्पुरुषोऽत्यरिच्यतातिरिक्तोऽभूत्, विराड्व्यतिरिक्तो देवतिर्यङ्मनुष्यादिरूपोऽभूत् । **पश्चा**द्देवादिजीवभावादूर्ध्वं **भूमिं** ससर्जेति शेषः । **अथो** भूमिसृष्टेरनन्तरं तेषां जीवानां **पुरः ससर्ज** । पूर्यन्ते सप्तभिर्धातुभिरिति पुरः शरीराणि ।

अथ षष्ठीमाह—

यत्पुरुषेण हविषा । देवा यज्ञमतन्वत । वसन्तो
अस्याऽऽसीदाज्यम् । ग्रीष्म इध्मः शरद्धविः, इति ।

पूर्वोक्तक्रमेण देवशरीरेषूत्पन्नेषु ते **देवा** उत्तरसृष्टिसिद्ध्यर्थं तत्साधनत्वेन **यज्ञम**तन्वत कंचिद्यज्ञमन्वतिष्ठन् । बाह्यद्रव्यस्याद्याप्यनिष्पन्नत्वेन हविरन्तरासंभवात्पुरुषस्वरूपमेव मनसा हविष्ट्वेन संकल्प्य तेन **पुरुषा**ख्येन(ण)**हविषा** यद्यदा मानसं **यज्ञ**मकुर्वत तदानीम**स्य** यज्ञस्य वसन्तर्तुरेवाऽऽज्यमभूत्, तमेवाऽऽज्यत्वेन संकल्पितवन्तः । एवं **ग्रीष्म** इध्मत्वेन संकल्पितः । **शर**त्पुरोडाशादिहविष्ट्वेन संकल्पिता । पूर्वं पुरुषस्य हविःसामान्यरूपत्वेन संकल्पो वसन्तादीनां त्वाज्यादिविशेषरूपत्वेनेति द्रष्टव्यम् ।

अथ सप्तमीमाह—

सप्तास्याऽऽसन्परिधयः । त्रिःसप्त समिधः कृताः । देवा
यद्यज्ञं तन्वानाः । अबध्नन्पुरुषं पशुम्, इति ।

---

१ क. °यमा° । २ ग जीवोऽ° । ३ ख. °ण व्र° । ४ क. °मानो दे° । ५ ख. °ये साधु समा° । ग. °ये समा° । ६ ख. °राडति° ।

अस्य सांकल्पिकयज्ञस्य गायत्र्यादीनि **सप्त** च्छन्दांसि **परिधय आसन्,** ऐष्टिकस्याऽऽहवनीयस्य त्रयः परिधय औत्तरवेदिकास्त्रय आदित्यश्च सप्तमः परिधिप्रतिनिधिरूपः । अत एवाऽऽम्नायते—"न पुरस्तात्परिदधात्यादित्यो ह्येवोद्यन्पुरस्ताद्रक्षाꣳस्यपहन्ति" इति[1] । त एत आदित्यसहिताः सप्त परिधयोऽत्र सप्तच्छन्दोरूपाः । तथा **समिधस्त्रिःसप्त** त्रिगुणितसप्तसंख्याका एकविंशतिः **कृताः** । "द्वादश मासाः पञ्चर्तवस्त्रय इमे लोका असावादित्य एकविꣳशः" इति श्रुताः पदार्था एकविंशतिदारुयुक्तेध्मत्वेन भाविताः । **यैद्यः** पुरुषो वैराजोऽस्ति तं **पुरुषं देवाः** प्रजापतिप्राणेन्द्रियरूपा **यज्ञं तन्वाना** मानसयज्ञं कुर्वाणाः **पशुमबध्नन्विराट्पुरुषमेव** पशुत्वेन भावितवन्तः । एतदेवाभिप्रेत्य पूर्वत्र—"पुरुषेण हविषा" इत्युक्तम् ।

अथाष्टमीमाह—

तं यज्ञं बर्हिषि प्रौक्षन् । पुरुषं जातमग्रतः (३) ।
तेन देवा अयजन्त । साध्या ऋषयश्च ये, इति ।

यज्ञं यज्ञसाधनभूतं तं पुरुषं पशुत्वभावनया यूपे बद्धं **बर्हिषि** मानसे यज्ञे **प्रौक्षन्**प्रोक्षितवन्तः । कीदृशम्, **अग्रतः** सर्वसृष्टेः पूर्वं **पुरुषं जातं** पुरुषत्वेनोत्पन्नम् । एतच्च पूर्वमेवोक्तम्—'तस्माद्विराडजायत विराजो अधि पुरुषः' इति । **तेन** पुरुषरूपेण **पशुना देवा अयजन्त** मानसयागं निष्पादितवन्तः[2] । के ते देवा इति त एवोच्यन्ते **साध्याः** सृष्टिसाधनयोग्याः प्रजापतिप्राणरूपास्तदनुकूला **ऋषयो मन्त्रद्रष्टारश्च ये** सन्ति ते सर्वेऽप्ययजन्त ।

अथ नवमीमाह—

तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम् । पशूꣳ
स्ताꣳश्चक्रे वायव्यान् । आरण्यान्ग्राम्याश्च ये, इति ।

सर्वहुतः सर्वात्मकः पुरुषो यस्मिन्यज्ञे हूयते सोऽयं सर्वहुतस्तादृशात्पूर्वोक्तान्मानसाद्यज्ञात्**पृषदाज्यं संभृतं** संपादितम् । दधि चाऽऽज्यं चेत्येवमादिभोग्यजातं संपादितमित्यर्थः । तथा **वायव्यान्**वायुदेवताकाँल्लोकप्रसिद्धानारण्यान्पशूꣳश्चक्र उत्पादितवान् । आरण्या द्विखुरादयस्तथा ये **ग्राम्या** गवाश्वादयस्तानप्युत्पादितवान् । पशूनामन्तरिक्षद्वारा वायुदेवत्यत्वं मन्त्रान्तरव्याख्याने समाम्नातम्—'वायवस्थेत्याह वायुर्वा अन्तरिक्षस्याध्यक्षः । अन्तरिक्षदेवत्याः खलु वै पशवः । वायव एवैनान्परिददाति' इति ।

---

१ क. ख. 'ति । ते ह्यादि° । २ ग. यः । ३ क. ख. °नसं यज्ञं नि' ।

अथ दशमीमाह—

तस्माद्यज्ञात्सर्वहुतः । ऋचः सामानि जज्ञिरे ।
छन्दाꣳसि जज्ञिरे तस्मात् । यजुस्तस्मादजायत (४), इति ।

छन्दांसि गायत्र्यादीनि । स्पष्टमन्यत् ।

अथैकादशीमाह—

तस्मादश्वा अजायन्त । ये के चोभयादतः । गावो
ह जज्ञिरे तस्मात् । तस्माज्जाता अजावयः, इति ।

अश्वव्यतिरिक्ता गर्दभा अश्वतराश्च ये केचिदूर्ध्वाधोभागयोरुभयोर्दन्तयुक्ताः सन्ति तेऽप्यश्ववदजायन्त । तथा गावोऽजाश्चावयश्च ते सर्वेऽप्युत्पन्नाः ।

अथ द्वादशीमाह—

यत्पुरुषं व्यदधुः । कतिधा व्यकल्पयन् । मुखं
किमस्य कौ बाहू । कावूरू पादावुच्येते, इति ।

प्रश्नोत्तररूपेण ब्राह्मणादिसृष्टिं वक्तुमत्र ब्रह्मवादिनां प्रश्ना उच्यन्ते—प्रजापतेः प्राणरूपा देवा यद्यदा पुरुषं विराड्रूपं व्यदधुः संकल्पेनोत्पादितवन्तः । तदानीं कतिधा कतिभिः प्रकारैर्व्यकल्पयन्विविधं कल्पितवन्तः । एष सामान्यरूपः प्रश्नः । मुखं किमित्यादयो विशेषप्रश्नाः । अन्यत्स्पष्टम् ।

अथ त्रयोदशीमाह—

ब्राह्मणोऽस्य मुखमासीत् । बाहू राजन्यः कृतः (५)
ऊरू तदस्य यद्वैश्यः । पद्भ्याꣳशूद्रो अजायत, इति ।

योऽयं ब्राह्मणत्वजातिविशिष्टः पुरुषः सोऽयमस्य प्रजापतेर्मुखमासीत्, मुखादुत्पन्न इत्यर्थः । योऽयं राजन्यः क्षत्रियजातिः स बाहुत्वेन निष्पादितः बाहुभ्यामुत्पादित इत्यर्थः । तत्तदानीं यौ प्रजापतेरूरू तद्रूपो वैश्यः संपन्नः, ऊरुभ्यामुत्पन्न इत्यर्थः । तथा पद्भ्यां शूद्र उत्पन्नः । इयं च मुखादिभ्यो ब्राह्मणादीनामुत्पत्तिः सप्तमकाण्डे " स मुखतस्त्रिवृतं निरमिमीत " इत्यादौ विस्पष्टमाम्नाता । अतः प्रश्नोत्तरे उभे अपि तत्परत्वेनैव योजनीये ।

अथ चतुर्दशीमाह—

चन्द्रमा मनसो जातः । चक्षोः सूर्यो अजायत ।

---

१ क. ख, °कारैः क° । २ ख. °न्तः । अ° । ३ ग. °श्चाः । अथ । ४ क. ख. पाद्भ्यां ।

मुखादिन्द्रश्चाग्निश्च । प्राणाद्वायुरजायत, इति ।

यथा दध्याज्यादिद्रव्याणि गवादिपशव ऋगादिवेदा ब्राह्मणादिमनुष्याश्च तस्मादुत्पन्नाः, एवं चन्द्रादयो देवा अपि तस्मादेवोत्पन्नाः । चक्षोश्चक्षुषः ।

अथ पञ्चदशीमाह --

नाभ्या आसीदन्तरिक्षम् । शीर्ष्णो द्यौः समवर्तत । पद्भ्यां भूमिर्दिशः श्रोत्रात् । तथा लोकाꣳ अकल्पयन् (६), इति ।

यथा देवास्तस्मादुत्पन्नास्तथा लोकानप्यन्तरिक्षादीन्प्रजापतेर्नाभ्याद्यवयवेभ्योऽकल्पयन्नुत्पादितवन्तः ।

अथ षोडशीमाह—

वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं तमसस्तु पारे । सर्वाणि रूपाणि विचित्य धीरः । नामानि कृत्वाऽभिवदन्यदास्ते, इति ।

यथोक्तविराट्पुरुषध्यानमत्र प्रतिपाद्यते । तत्र मन्त्रद्रष्टा स्वकीयं ध्यानानुभवं प्रकटयति—यद्यः पुरुषः सर्वाणि रूपाणि देवमनुष्यशरीराणि विचित्य विशेषेण निष्पाद्य नामानि च देवोऽयं मनुष्योऽयं पशुरयमित्यादीनि कृत्वाऽभिवदंस्तैर्नामभिरभितो व्यवहरन्नास्ते, एतं पुरुषं विराजं महान्तं सर्वगुणैरधिकमादित्यवर्णमादित्यवत्प्रकाशमानं वेदाहं जानामि, ध्यानेन सर्वदाऽनुभवामीत्यर्थः । स च पुरुषस्तमसः पारेऽज्ञानात्परस्ताद्वर्तते । अतो गुरुशास्त्रोपदेशरहितैर्मूढैरनुभवितुमशक्य इत्यर्थः ।

अथ सप्तदशीमाह—

धाता पुरस्ताद्यमुदाजहार । शक्रः प्रविद्वान्प्रदिशश्चतस्रः । तमेवं विद्वानमृत इह भवति । नान्यः पन्था अयनाय विद्यते, इति ।

धाता प्रजापतिर्यं विराट्पुरुषमुदाजहार ध्यातृणामुपकारार्थं प्रख्यापितवान् । चतस्रः प्रदिशश्चतुर्दिक्षु वर्तिनः सर्वान्प्राणिनः प्रविद्वान्प्रकर्षेण जानञ्शक्र इन्द्रस्तदनुग्रहार्थं प्रख्यापितवान् । धातुरिन्द्रस्योपदेशात्तं विराट्पुरुषमेवमुक्तप्रकारेण विद्वान्साक्षात्कुर्वन्निहारिमन्नेव जन्मन्यमृतो मरणरहितो भवति । यदा विराट्पुरुषोऽहमिति साक्षात्करोति तदानीं वर्तमानदेहस्यैव तत्त्वरूपत्वाभावोत्तन्मरणेनायमुपासको न

---

१ ग. 'मं प°। २ क. 'कथमित्य°। ३ ख. 'स्य रूपस्य रू°। ४ ख. तत्प्रत्यक्षरू°। ५ ख. 'वादन्यम°।

म्रियते । अयनायामृतत्वप्राप्तयेऽन्यः पन्था यथोक्तविराट्पुरुषसाक्षात्कारमन्तरेणान्यो मार्गो न विद्यते । न हि कर्मसहस्रैरप्यमृतत्वं संपादयितुं शक्यते । ' न कर्मणा न प्रजया धनेन ' इत्यादिशास्त्रात् ।

त्रयोदशीमाह—

यज्ञेन यज्ञमयजन्त देवाः । तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानः सचन्ते । यत्र पूर्वे साध्याः सन्ति देवाः (७) , इति । पूरुषः पुरोऽग्रतोऽजायत कृतोऽकल्पयन्नासन्द्रे च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके तृतीयप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

अत्र कृत्स्नानुवाकतात्पर्यं संक्षिप्योपन्यस्यति—देवाः प्रजापतिप्राणरूपा यज्ञेन यथोक्तेन मानसेन संकल्पेन यज्ञं यथोक्तयज्ञस्वरूपं प्रजापतिमयजन्त पूजितवन्तः । तस्मात्पूजनात्तानि प्रसिद्धानि धर्माणि जगद्रूपविकाराणां धारकाणि प्रथमानि मुख्यभूतान्यासन् । एतावता सृष्टिप्रतिपादकोऽनुवाकभागार्थः संगृहीतः । अथोपासनतत्फलरूपोऽनुवाकभागार्थः संगृह्यते—यत्र यस्मिन्विराट्प्राप्तिरूपे नाके पूर्वे साध्याः पुरातना विराडुपास्तिसाधका देवाः सन्ति तिष्ठन्ति तं नाकं विराट्प्राप्तिरूपं स्वर्गं ते महिमानस्तदुपासका महात्मानः सचन्ते समवयन्ति प्राप्नुवन्ति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये तृतीयप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

अथ तृतीये त्रयोदशोऽनुवाकः ।

अथोत्तरनारायणाख्यः कश्चिदनुवाकस्तस्य च विनियोगं पुरुषमेध आपस्तम्ब आह—"उत्तरनारायणेनाऽऽदित्यमुपस्थाय" इति । तत्र प्रथमामृचमाह—

अद्भ्यः संभूतः पृथिव्यै रसाच्च । विश्वकर्मणः समवर्ततााधि । तस्य त्वष्टा विदधद्रूपमेति । तत्पुरुषस्य विश्वमाजानमग्रे, इति ।

---

१ क. ख. °राडूपोपा° । २ ख. ग. समयन्ति ।

योऽयं विराड्रूपो नारायणाख्यः पुरुषः सोऽप्यद्भ्यः संभूतः सर्वत्र व्याप्तेषु जलेषु क्षीरमध्ये मण्डवद्ब्रह्माण्डगोलकमुत्पन्नम्। न केवलमद्भ्य एव किंतु पृथिव्यै रसाच्च भूम्याः संबन्धी योऽयं रसः सारस्तस्मादप्युत्पन्नः। "मण्डस्य योऽयं घनीभावः स पार्थिवः, ये च तन्मध्ये द्रवांशास्त आप्याः, यत्कठिनं सा पृथिवी, यद्द्रवं तदापः" इत्यादिश्रुतेः। विश्वकर्मणो जगत्कर्तुः परमेश्वरादधिसमवर्ततााऽऽधिक्येन निष्पन्नो योऽयं ब्रह्माण्डाभिमानी चेतनः पुमान्सोऽयमीश्वरांशस्तस्य विराट्पुरुषस्य रूपं चतुर्दश-लोकरूपावयवसंस्थानं विदधन्निष्पादयंस्त्वष्टा विश्वकर्मा जगदीश्वरः। एति प्रवर्तते। पुरुषस्य विराडाख्यस्य संबन्धि तद्विश्वं प्रसिद्धं देवमनुष्यादिरूपं सर्वं जगदग्रे सृष्ट्वादावाजानं सर्वत उत्पन्नम्।

अथ द्वितीयामाह—

वेदाहमेतं पुरुषं महान्तम्। आदित्यवर्णं
तमसः परस्तात्। तमेवं विद्वानमृत इह
भवति। नान्यः पन्था विद्यतेऽयनाय, इति।

पूर्ववद्व्याख्येयम्।

अथ तृतीयामाह—

प्रजापतिश्चरति गर्भे अन्तः। अजायमानो बहुधा
विजायते (१)। तस्य धीराः परिजानन्ति
योनिम्। मरीचीनां पदमिच्छन्ति वेधसः, इति।

ब्रह्माण्डरूपे गर्भेऽन्तर्मध्ये प्रजापतिर्विग्रहवान्भूत्वा चरति। स च वास्तवेन रूपेण सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिश्रुत्या प्रतिपादनादजायमान एव तथाऽपि मायिकेन रूपेण बहुधा स्थावरजङ्गमादिबहुप्रकारो विशेषेण जायते। तस्य प्रजापतेर्योनिं जगत्कारणं रूपं वास्तवं स्वरूपं धीरा धैर्यवन्तो योगेन निरुद्धेन्द्रिया महात्मानो जानन्ति। वेधसो विधातारः सृष्टिकर्तारस्तमेवोपास्य मरीचीनां मरीच्यत्रिप्रमुखानां(णां)महर्षीणां पदं जगदुत्पादकत्वलक्षणमिच्छन्ति।

अथ चतुर्थीमाह—

यो देवेभ्य आतपति। यो देवानां पुरोहितः। पूर्वो यो

---

१ क. ख. सर्वतो। २ क. °हमम्। म°। ३ ख. °लोका°। ४ क. °र्मा सर्वं ज°। ५ ख. ग. °ह्मेत्येतादृशत्वादजा°। ६ ख °तारस्त्रयीक°।

देवेभ्यो जातः । नमो रुचाय ब्राह्मये , इति ।

यः परमेश्वरो देवेभ्यो देवार्थमातपति सर्वत्र प्रकाशते, देवानां देवत्वसिद्धये तत्तद्धृदयेषु चैतन्यरूपेण प्रविश्याऽऽविर्भवति । यश्च देवानां पुरोहितो बृहस्पतिर्बभूव "बृहस्पतिर्देवानां पुरोहितः" इति श्रुतेः । यश्च देवेभ्यः पूर्वो जातः प्रथमभावी हिरण्यगर्भरूपेणोत्पन्नः "हिरण्यगर्भः समवर्तताग्रे" इति श्रुतेः । तादृशाय रुचाय रोचमानाय स्वयंप्रकाशाय ब्राह्मये परब्रह्मस्वरूपाय ब्रह्मणा वेदेन प्रतिपाद्याय वा नमो नमस्कारोऽस्तु ।

अथ पञ्चमीमाह—

रुचं ब्राह्मं जनयन्तः । देवा अग्रे
तदब्रुवन् । यस्त्वैवं ब्राह्मणो
विद्यात् । तस्य देवा असन्वशे, इति ।

देवाः सर्वेऽग्रे सृष्ट्यादौ ब्रह्मविद्यासंप्रदायप्रवर्तनकाले[1] ब्राह्मं रुचं परब्रह्मसंबन्धि चैतन्यं जनयन्तो विद्यया प्रादुर्भावयन्तस्तद्ब्रह्मतत्त्वं संबोध्याब्रुवन्वक्ष्यमाणं वाक्यमुक्तवन्तः । किं तद्वाक्यमिति तदुच्यते—हे परमात्मन्यः कश्चिद् ब्राह्मणः पुमांस्त्वामेवं यथोक्तप्रकारेण विद्यात्तस्य ब्रह्मविदः सर्वे देवा वशेऽसन्नधीना भवन्ति, स्वयं हि तेषां देवानामन्तर्यामी परमात्मा भवति, तस्माद्देवा एतदधीना न त्वस्य देवा ईश्वराः । एतमेवार्थं वाजसनेयिनो विस्पष्टमामनन्ति—" य एवं वेदाहं ब्रह्मास्मीति स इदꣳ सर्वं भवति तस्य देवाश्च नाभूत्या ईशते, आत्मा ह्येषाꣳ स भवति " इति ।

अथ यजुरात्मानं कंचिन्मन्त्रमाह—

ह्रीश्च ते लक्ष्मीश्च पत्न्यौ । अहोरात्रे पार्श्वे । नक्षत्राणि रूपम् । अश्विनौ व्यात्तम् । इष्टं मनिषाण ।
अमुं मनिषाण । सर्वं मनिषाण (२), इति ॥
जायते वशे सन्न च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके तृतीयप्रपाठके
त्रयोदशोऽनुवाकः ॥ १३ ॥

ह्रीर्लज्जाभिमानिनी देवता । लक्ष्मीरैश्वर्याभिमानिनी देवता । हे परमात्मन् ह्रीश्च लक्ष्मीश्च ते तव पत्न्यौ भार्यास्थानीये । ये चाहोरात्रे ते पार्श्वे पार्श्वद्वयस्थानीये ।

---

१ ख. °र्तका आ° ।

नक्षत्राण्याकाशे दृश्यमानानि[1] **रूपं** तव शरीरस्थानीयम्। **आश्विनौ** यौ देवौ तौ तव **व्यात्तं** विवृतमुखस्थानीयम्। तथाविध हे विराट्पुरुषेष्टमस्मदपेक्षितमात्मबोधं **मनिषाणानुमन्यस्व** देहीत्यर्थः। **अमुं** लोके दृश्यमानं गवाश्वादिकं **मनिषाण** प्रयच्छ। किं बहुना **सर्वं मनिषाणैहिकमामुष्मिकं** वा सर्वमिष्टं देहि॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये तृतीयप्रपाठके त्रयोदशोऽनुवाकः॥ १३॥

अथ तृतीयप्रपाठके चतुर्दशोऽनुवाकः।

अथ भर्तृसूक्तारूयः काश्चिदनुवाकोऽभिधीयते। तस्य च मृत्यवे वेहतामित्यस्मिन्पशौ नारिष्टहोमानन्तरमुपहोमार्थत्वेन विनियोगो द्रष्टव्यः। तथा चाऽऽपस्तम्ब आह—"मृत्यवे वेहतं तत्र भर्तारमुपजुहुयात्" इति। तत्र प्रथमामाह—

भर्ता सन्भ्रियमाणो बिभर्ति। एको देवो
बहुधा निविष्टः। यदा भारं तन्द्रयते स
भर्तुम्। निधाय भारं पुनरस्तमेति, इति।

योऽयं प्राणाभिमानी देवः सोऽयं **भर्ता** पोषकः **सन्भ्रियमाणो**ऽन्तर्यामिणा परमेश्वरेण स्वयं धार्यमाणः सन्**बिभर्ति** देहान्धारयति। स च सूत्रात्मरूपेण स्वयमेक एव देवस्तत्तच्छरीरेषु **बहुधा** शरीरानुसारेण बहुप्रकारो **निविष्टो**ऽवस्थितः। अत एव प्राणविद्याप्रकरणे तत्तच्छरीरानुसारेण प्राणस्यावस्थितिं **काण्वा** आमनन्ति—"समः प्लुषिणा समो मशकेन समो नागेन सम एभिस्त्रिभिर्लोकैः" इत्यादि। **स** प्राणो **यदा भारं** देहरूपं **भर्तुं** धारयितुं तन्द्रयते तन्द्रीमालस्यं **प्राप्नोति**, आयुषोऽवसाने हि तस्याऽऽलस्यं भवति। तदानीं **भारं** देहरूपं **निधाय** क्वचिदुत्सृज्य **पुनरस्तमेति**, अदर्शनं गच्छति। यथा देहोत्पत्तेः पूर्वमदर्शनं गतस्तथा देहपातादूर्ध्वमपीत्यभिप्रेत्य पुनरित्युक्तम्।

अथ द्वितीयामाह—

तमेव मृत्युममृतं तमाहुः। तं भर्तारं तमु
गोप्तारमाहुः। स भूतो भ्रियमाणो
बिभर्ति। य एनं वेद सत्येन भर्तुम्, इति।

---

१ ख. °नि तव रूपस्थानीयानि. अ°। २ ख. °त्मकत्वेन स्व°।

वेदरहस्याभिज्ञाः पुरुषास्तमेव प्राणं मृत्युमाहुः, यदा प्राणो देहान्निर्गच्छति तदैव देहो म्रियतेऽतो मृत्युहेतुत्वान्मृत्युत्वम्[1]। यदा प्राणो देहेऽवस्थितस्तदाऽमृतो देह इत्यमृतत्वहेतुत्वात्तं प्राणममृतमाहुः। शरीरस्थापनहेतुत्वात्तमेव प्राणं भर्तारं देहस्य धारयितारमाहुः। तथा च कौषीतकिनः समामनन्ति—" अथ खलु प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयति " इति। तथा तमेव प्राणमन्नपानादिस्वीकारहेतुत्वाद्भोक्तारं पोषकमाहुः। तथा च च्छन्दोगा अन्नपानस्वीकारसाधनत्वं प्राणस्याऽऽमनन्ति—" यदश्नाति यत्पिबति तेनेतरान्प्राणानवति" इति। यः पुमानेनं प्राणं सत्येन श्रुतिस्मृत्युदितेन सम्यङ्मार्गेण भर्तुं ध्यानकाले चित्ते धारयितुं वेद जानाति स उपासकः पुमान्भृतः परमेश्वरेणाऽऽदौ पोषितो म्रियमाणोऽनेन प्राणवायुना धार्यमाणः सन्बिभर्ति स्वयमितरान्प्राणिनश्च पोषयितुं समर्थो भवति।

अथ तृतीयामाह—

सद्योजातमुत जहात्येषः। उतो जरन्तं न जहात्येकम्[2] (१)। उतो बहूनेकपहर्जहार।
अतन्द्रो देवः सदमेव पार्थः, इति।

एष प्राणदेवः स्वतन्त्रः सन्सद्योजातमुत तदानीमेवोत्पन्नमपि पुरुषमल्पायुषं जहाति परित्यजति। एकमन्यं वा कंचित्पुरुषमुतो जरन्तं[3] दीर्घेणाऽऽयुषा जरां प्राप्तमपि न जहाति। एकमहरेकस्मिन्नेव दिन उतो बहूननेकानपि पुरुषाञ्जहार संहरति। सोऽयं प्राणदेवः सदमेव सर्वदैवातन्द्र उच्छ्वासनिश्वासमरणामरणबहुमरणविषयव्यापारेष्वालस्यरहितोऽतोऽयं पार्थोऽस्माभिः प्रार्थनीयः, उपास्य इत्यर्थः।

अथ चतुर्थीमाह—

यस्तद्वेद यत आबभूव। संधां च यां संदधे ब्रह्मणैषः।
रमते तस्मिन्नुत जीर्णे शयाने। नैनं जहात्यहस्सु पूर्व्येषु, इति।

यतो यस्मात्करणादयं प्राण आबभूवाऽऽविर्बभूव। तत्कारणं यः पुमान्वेद जानाति। तथा संधां च संबन्धमपि यो वेद। कीदृशी संधेति सैव विशेष्यते। एष प्राणो ब्रह्मणाऽऽत्मना सह यां संधां संदधे यं संबन्धं प्राप्तवान्। इत्थमिह देहे वस्तव्यमियन्तं कालमिह वस्तव्यमित्येतादृशी संधा तां यो वेद तस्मिन्पुरुषे प्राणाकारं प्राणात्मसंबन्धं वाऽभिजानान उत जीर्णे शयाने तादृशे पुरुषे जरां प्राप्य

---

१ ख. ग. °म् तथा देहेऽवस्थितेऽमृ°। २ ग. °दानीं चोत्प°। ३ ग. °न्तं यतो दीर्घायु°।

शयाने सत्यपि तत्रायं प्राणो रमते क्रीडते(ति)। पूर्व्येषु पूर्वकृतैः कर्मभिः संवादितेष्वहस्सु बहुष्वपि दिवसेषु नैनं जहाति, एनं जीर्णं पुरुषं स प्राणो न परित्यजति।

अथ पञ्चमीमाह—

त्वामापो अनु सर्वाश्चरन्ति जानतीः। वत्सं पयसा पुनानाः। त्वमग्निꣳ हव्यवाहꣳ समिन्त्से त्वं भर्ता मातरिश्वा प्रजानाम् (२), इति।

हे प्राण त्वां वायुरूपं सर्वा आपोऽनुसंचरन्ति, यत्र वायुः प्रबलं वाति तत्रैवाधिकं सद्वृष्टिजलं प्रवर्तते। तत्र दृष्टान्तः—यथा जानतीः स्वस्ववत्साभिज्ञा मावः पयसा पुनानाः स्वकीयेन क्षीरेण स्रवन्त्यः पोषयन्त्यो वत्समनुसंचरन्ति तद्वदिति द्रष्टव्यम्। हे प्राण त्वं हव्यवाहं हविषां वोढारमग्निं समिन्त्से सम्यग्दीपयसि। वायुना ह्यग्निर्दीप्यते। तथा त्वमेव मातरिश्वा वायुरूपः सन्प्रजानां भर्ता धारयिताऽसि।

अथ षष्ठीमाह—

त्वं यज्ञस्त्वमु वेवासि सोमः। तवं देवा हवमायन्ति सर्वे। त्वमेकोऽसि बहूननुप्रविष्टः। नमस्ते अस्तु सुहवो म एधि, इति।

हे प्राण त्वं यज्ञप्रवर्तकत्वेन यज्ञरूपोऽसि। प्राणस्य वायुरूपत्वाद्यज्ञप्रवर्तकत्वम्। एतच्चान्यत्राऽऽम्नातम्—'वाताद्वा अध्वर्युर्यज्ञं प्रयुङ्क्ते' इति। सोमं उ सोमयागोऽपि त्वमेव सर्वक्रियाणां वायुप्रेरितत्वात्। किंच सर्वे देवास्तव हवं त्वंदीयमाह्वानं प्रत्यायन्त्यागच्छन्ति। वायुना यागक्रियायां प्रवर्तितायां हविरर्थं देवा आगच्छन्ति। किंच देवतारूपेण त्वमेकोऽसि तथाऽपि बहून्देहाननुप्रविष्टः, तत्तदानुकूल्येन पृथग्रूपाणि धृत्वा तत्र तत्र स्थितः। हे प्राण ते तुभ्यं नमोऽस्तु। मे मम सुहव एधि, आह्वातुं सुलभो भव।

अथ सप्तमीमाह—

नमो वामस्तु शृणुतꣳ हवं मे। प्राणापानावजिरꣳ संचरन्तौ। ह्वयामि वां ब्रह्मणा तूतमेतम्। यो मां द्वेष्टि तं जहितं युवाना, इति।

---

१ ख. ग. °त्रैव वाय्वधीनं स°। २ क. ख. °मया°। ३ क. हविरर्थं।

अजिरमजनशीलं गमनस्वभावं शरीरं संचरन्तौ सम्यक्प्रवर्तयन्तौ हे **प्राणापानौ वां युवाभ्यां नमोऽस्तु** नमस्कारोऽस्तु । **मे हवं** मदीयमाह्वानं **शृणुतम्** । **ब्रह्मणा** मन्त्रेण **वां ह्वयामि** युवामाह्वयामि । **तूर्तं** तूर्णं शीघ्रमेतमागच्छतम् । **युवानौ** तरुणौ **युवां यः** शत्रुर्मां द्वेष्टि **तं जहितं** विनाशयतम् ।

अथाष्टमीमाह—

प्राणापानौ संविदानौ जहितम् । अमुष्यासुना
मा संगसाथाम् (३) । तं मे देवा ब्रह्मणा
संविदानौ । वधाय दत्तं तमहꣳ हनामि, इति ।

हे **प्राणापानौ** वायू **संविदानौ** परस्परमैकमत्यं गतौ **जहितमस्मच्छत्रुं** परित्यजतम् । **अमुष्य** मदीयशत्रोरसुना प्राणेन **मा संगसाथां** संगतौ मा भूताम् । ये **ब्रह्मणा** मदीयेन मन्त्रेण **संविदाना** वैकमत्यं गतौ **देवा** प्राणापानदेवौ युवां **तं** मदीयं **शत्रुं वधाय** वधार्थं **दत्तं** मह्यं प्रयच्छतं तं शत्रुमहं हनामि विनाशयामि ।

अथ नवमीमाह—

असज्जजान सत आबभूव । यं यं जजान
स उ गोपो अस्य । यदा भारं तन्द्रयते
स भर्तुम् । परास्यं भारं पुनरस्तमेति, इति ।

असदव्यक्तं जगत्कारणं **जजान** प्रथममाकाशात्मनाऽव्यक्तरूपेणोत्पन्नं तस्मात्सतोऽव्यक्तत्वेन सद्रूपादाकाशाद्वायुरूपोऽयं प्राण **आबभूवाऽऽभिमुख्येनोत्पन्नः** । स च **वायुरूपः प्राणो यं यं** देवमनुष्यादिदेहं **जजानोत्पादितवान्स उ** स सर्वोऽपि देहोऽस्य **प्राणस्य गोपो** रक्षैकोऽभवत् । प्राणो हि शरीरे प्रविश्य गुप्तो वर्तते, [स] यावदायुस्तावन्तं कालं तत्रावस्थाय **यदा** देहरूपं **भारं भर्तुं तन्द्रयते** धारयितुमलसो भवति तदानीमेव तं **भारं परास्य** परित्यज्य पुनरपि देहोत्पत्तेः प्रागवस्थायामस्तमेत्यदर्शनं गच्छति ।

अथ दशमीमाह—

तद्वै त्वं प्राणो अभवः । महान्भोगः प्रजापतेः ।
भुजः करिष्यमाणः । यद्देवान्प्राणयो नव (६) इति ।

---

१ ग. °ना नित्यं त° । २ क. देवा देवौ प्राणापानवायू यु° । ३ क. °णं बीजं सत्यथ° । ४ क. °णोत्पादितवान् । त° । ५ क. °क्षको भवेत् । ६ म. (३) ।

एकं प्रजानां गसाथां नवं ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके तृतीयप्रपाठके चतुर्दशोऽनुवाकः ॥ १४ ॥

यद्यदा त्वं भुजो भोगान्कारिष्यमाणः सन्नवदेवान्नवच्छिद्रवर्तिनश्चक्षुरादीन्द्रीप्यमानान्पदार्थान्प्राणयः प्रकर्षेण चेष्टितवानसि तद्वै तदानीमेव त्वं प्राणोऽभवः प्राणयति प्रकर्षेण चेष्टयतीति व्युत्पत्त्या प्राणनामकोऽभूः। कीदृशस्त्वम्—प्रजापतेर्महान्भोगोऽत्यन्तभोगहेतुः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये तृतीयप्रपाठके चतुर्दशोऽनुवाकः ॥ १४ ॥

अथ तृतीये पञ्चदशोऽनुवाकः।

अथ मृत्युसूक्ताख्योऽनुवाकोऽभिधीयते। इत आरभ्य सप्तानामनुवाकानां ब्रह्मभेधे विनियोगं भरद्वाज[1] आह—"मृत्युसूक्तेनानुशंसन[2] सौर्येणाऽऽदित्योपस्थानं सौम्या संगहनमीयुष्ट[3] इत्यवगाहनं ज्योतिष्मतीभिरुपोषणं चित्तꣳ संतानेनेति हविराहुतीः प्रयासा[4] स्वाहेति स्रुवाहुतीः" इति। तत्र मृत्युसूक्ते प्रथममृचमाह—

हरिꣳ हरन्तमनुयन्ति देवाः। विश्वस्येशानं वृषभं मतीनाम्। ब्रह्म सरूपमनु मेदमागात्। अयनं मा विवधीर्विक्रमस्व, इति।

हरिं हरणशीलं प्राणापहर्तारं मृत्युदेवं सर्वे देवा अनुयन्ति, आनुकूल्येन गच्छन्ति। न कोऽपि देवो मृत्युमुल्लङ्घयितुं क्षमते। कीदृशं हरिम्—हरन्तमायुषोऽवसाने प्राणानपहरन्तम्, अत एव विश्वस्येशानं सर्वस्य जगतः स्वामिनम्, मतीनां मननीयानां देवानां मध्ये वृषभं श्रेष्ठम्। अस्मिंस्तु कर्मणि सरूपं समानरूपमनुकूलमिदं ब्रह्म मन्त्रजातं मामनु यजमानमनुलक्ष्याऽऽगात्, आभिमुख्येन प्राप्नोत्। अतो हे मृत्यो ब्रह्मणा तुष्टः सन्नयनं मा विवधीर्मदीयं मार्गं मा विनाशय, किंतु विक्रमस्व मच्छत्रुविनाशार्थं पराक्रमं कुरु।

अथ द्वितीयामाह—

मा छिदो मृत्यो मा वधीः। मा मे बलं

---

१ ग. भारद्वाज। २ ग. °नुशास° ३ ग. °नं सौम्यासंगाहनं सौ°। ४ ग °नं हापुष्णाव° ५ ख. °युष्टचाऽव°। ६ ख ग °णाधक्रमप°।

विवृहो मा प्रमोषीः । प्रजां मा मे रीरिष आयु-
रुग्र । नृचक्षसं त्वा हविषा विधेम, इति ।

हे मृत्यो त्वं मा छिदो मदीयस्य कस्याप्यवयवस्य च्छेदं मा कार्षीः । मावधीर्मम वधमपि मा कार्षीः । मे मदीयं बलं मा विवृहो मा विनाशय । मा प्रमोषीः अन्यदपि मदीयं वस्तु चौर्येण माऽपहर । मे मदीयां प्रजां पुत्रपौत्रादिकां मा रीरिषो हिंसितां मा कुरु । हे उग्र देव मदीयमायुश्च मा रीरिषो मा विनाशय । नृचक्षसं मनुष्येषु प्रख्यातं त्वां हविषा विधेम परिचरेम ।

अथ तृतीयामाह—

सद्यश्चक्मानायं । प्रवेपानायं मृत्यवे (१)। प्रास्मा
आशा अशृण्वन् । कामेनाजनयन्पुनः, इति ।

सद्यस्तास्मिन्नेव क्षणे, चकमानाय भयहेतवे प्रवेपानाय तेन भयेन प्राणिनां कम्पयित्रे, प्राणिनो हि मृत्योर्नामग्रहणेनैव भीताः कम्पन्ते । अस्मा ईदृशाय मृत्यवे आशाः सर्वा दिशः प्राशृण्वञ्शृण्वन्ति । सर्वदिग्वर्तिनः प्राणिनो मृत्युदेवस्य महिमानं शास्त्रेभ्यः प्रकर्षेण शृण्वन्ति । कामेन मृत्योरिच्छया पुनरजनयन्पुनः पुनरपत्यानि जनयन्ति । मृत्यौ प्रतिकूले सँत्युत्पादितान्यैपत्यानि तदानीमेव म्रियन्तेऽतो मृत्युमाराध्य तदिच्छानुवर्तिनोऽपत्यान्युत्पादयन्ति ।

अथ चतुर्थीमाह—

कामेन मे काम आगात् । हृदयाद्धृदयं मृत्योः ।
यदमीषामदः प्रियम् । तदैतूप मामभि, इति ।

कामेन मृत्योरिच्छया मे काम आगान्मदीयमभीष्टं वस्त्वागच्छतु । मदीयं हृदयं मृत्योर्हृदयान्मृत्युचित्तानुकूल्येन वर्तताममिति शेषः । अतो मृत्योरनुग्रहे सत्यमीषां मदीयानामिन्द्रियाणां यददः प्रियं यदिदं वस्त्वभीष्टं तद्वस्तु मामभिलक्ष्योप समीप ए(ऐ)त्वागच्छतु ।

अथ पञ्चमीमाह—

परं मृत्यो अनुपरेहि पन्थाम् । यस्ते स्व इतरो
देवयानात् । चक्षुष्मते शृण्वते ते ब्रवीमि ।
मा नः प्रजाꣳ रीरिषो मोत वीरान्, इति ।

---

१ क. पुत्रा° । २ क. °त्युम° । ३ क. °ले ह्युत्पा° । ४ क. समुत्पा° । ५ ग. °न्यप्यप° ।

हे मृत्यो देवयानादितरो यः पन्थास्ते स्वस्तव स्वभूतः, तं परं पन्थां देवयानादितरं तं मार्गमनुपरेहि, अनुक्रमेण प्राप्नुहि। चक्षुष्मते साधुदर्शिने शृण्वतेऽस्मद्विज्ञप्तीनां श्रोत्रे, ते तुभ्यमेकं वचनं ब्रवीमि। नोऽस्मदीयां प्रजां पुत्रादिरूपां, मा रीरिषो मा विनाशय। उतापि च वीराञ्शूरान्भृत्यानपि मा रीरिषः।

अथ षष्ठीमाह—

प्र पूर्व्यं मनसा वन्दमानः। नाधमानो वृषभं
चर्षणीनाम्। यः प्रजानामेकराण्मानुषीणाम्।
मृत्युं यजे प्रथमजामृतस्य (२) इति॥
मृत्यवे वीराँश्चत्वारिं च॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके तृतीयप्रपाठके
पञ्चदशोऽनुवाकः॥ १५॥

यो मृत्युर्मानुषीणां मनुष्यजातियुक्तानां प्रजानामेकराडेक एव राजा तादृशं मृत्युमहं यजे पूजयामि। कीदृशोऽहम्—मनसा [प्र]वन्दमानः प्रकर्षेण नमस्कुर्वाणः, नाधमानोऽपेक्षितं फलं याचमानः। कीदृशं मृत्युम्। प्रपूर्व्यं (पूर्व्यं) प्राणिभ्यः पूर्वस्मिन्कल्पे भवम्। चर्षणीनां मनुष्याणां वृषभं कामादिवर्षणक्षमम्। ऋतस्य प्रथमजां सत्यस्य परब्रह्मणः प्रथमोत्पन्नकार्यम्॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये तृतीयप्रपाठके पञ्चदशोऽनुवाकः॥ १५॥

अथ तृतीये षोडशोऽनुवाकः।

अथ सूर्योपस्थाने विनियुक्तं मन्त्रमाह—

तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य। विश्वमाभासि
रोचनम्। उपयामगृहीतोऽसि सूर्याय त्वा भ्राजस्वत एष ते योनिः सूर्याय त्वा भ्राजस्वते, इति।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके तृतीयप्रपाठके
षोडशोऽनुवाकः॥ १६॥

---

१ क. °नम्।

हे सूर्य त्वं तरणिरन्धकारोत्तरणहेतुः, विश्वदर्शतो विश्वैः सर्वैः प्राणिभिर्दर्शनीयः ज्योतिष्कृत्सर्वस्मिँल्लोके प्रकाशकृच्चासि । विश्वं सर्वं जगद्रोचनं दीप्यमानं यथा भवति तथाऽऽभासि सर्वतः प्रकाशयसि । अग्निष्टोमे योऽयमतिग्राह्यरूपो ग्रहोऽस्ति तादृशं हे ग्रह भ्राजस्वते दीप्तियुक्ताय यथोक्तमहिमोपेताय सूर्याय त्वां गृह्णामि, अतस्त्वं तदर्थमुपयामगृहीत उपयामेन पृथिवीकार्येण पात्रेण गृहीतोऽसि । एष हविर्धानमण्डपस्थः खरप्रदेशस्ते तव योनिः स्थानम्, अतो भ्राजस्वते दीप्तिमते सूर्याय, त्वां तत्र प्रदेशे सादयामि, ईदृशोऽयमतिग्राह्यो यस्मै सूर्याय गृह्यते किमु वक्तव्यं तस्य माहात्म्यीमत्यवेमुपस्थानकाले स्तुतौ योऽयं ग्रहोपन्यासो लिङ्गबलात्तस्यातिग्राह्यस्य ग्रहणेऽप्ययं मन्त्रो विनियुज्यते ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये तृतीयप्रपाठके षोडशोऽनुवाकः ॥ १६ ॥

अथ तृतीये सप्तदशोऽनुवाकः ।

प्रेतदाहस्थानसमीपेऽवटं खात्वा जलं प्रक्षिप्य तेन सेचनं संगाहनं तत्र विनियुक्तां सौमीमृचमाह—

आप्यायस्व मदिन्तम सोम विश्वाभिरूतिभिः । भवा नः सप्रथस्तमः, इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके तृतीयप्रपाठके सप्तदशोऽनुवाकः ॥ १७ ॥

हे मदिन्तमातिशयेन हर्षयुक्त सोम विश्वाभिरूतिभिः सर्वप्रकारैरस्मदीयरक्षणैराप्यायस्व सर्वतो वर्धस्व । नोऽस्मान्प्रति सप्रथस्तमोऽतिशयेन प्रथायुक्तो भव ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये तृतीयप्रपाठके सप्तदशोऽनुवाकः ॥ १७ ॥

---

१ क. यो नियमेनावि° । २ ग. °दृशं ग्रहं भ्रा° ३ क. °कः । अथ प्रे° । ४ क. वर्धयस्व ।

अथ तृतीयेऽष्टादशोऽनुवाकः।

अथावगाहने[2] विनियुक्तौ[3]मृचमाह—

ईयुष्टे[4] ये पूर्वतरामपश्यन्व्युच्छन्तीमुषसं मर्त्यासः। अस्माभिरू नु प्रतिचक्ष्याऽभूदो ते यन्ति ये अपरीषु पश्यान्, इति॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके तृतीयप्रपाठकेऽष्टादशोऽनुवाकः॥ १॥

ये मर्त्यासो मनुष्या व्युच्छन्तीं प्रभातं कुर्वतीमुषरमुषःकालदेवतां पूर्वतरामितरेभ्योऽत्यन्तं पूर्वामपश्यन्पश्यन्ति, ते मनुष्यां ईयुस्तां देवतां प्राप्नुवन्ति। [सा] अस्माभिरू नु अस्माभिरपि नु क्षिप्रं प्रतिचक्ष्याऽभूत्प्रत्यक्षं दर्शनीयाऽभूत्। येऽन्येऽप्यपरीष्वपररात्रिषु रात्रीणामवसानेषु पश्यान्पश्यन्ति ते ओ यन्ति तेऽपि तां देवतां सर्वथा प्राप्नुवन्ति॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये तृतीयप्रपाठकेऽष्टादशोऽनुवाकः॥ १८॥

अथ तृतीय एकोनविंशोऽनुवाकः।

अथोपोषणे[9] दाहे विनियुक्तानि यजूंष्याह—

ज्योतिष्मतीं त्वा सादयामि ज्योतिष्कृतं त्वा सादयामि ज्योतिर्विदं[1] त्वा सादयामि भास्वतीं त्वा सादयामि ज्वलन्तीं त्वा सादयामि मल्मला भवन्तीं त्वा सादयामि दीप्यमानां त्वा सादयामि रोचमानां त्वा सादयाम्यजस्रां त्वा सादयामि बृहज्ज्योतिषं त्वा सादयामि बोधयन्तीं त्वा सादयामि जाग्रतीं त्वा सादयामि, इति॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके तृतीयप्रपाठक एकोनविंशोऽनुवाकः॥ १९॥

---

१ ख. ग. अव°। २ ग. °नेऽष्टादशीमा°। ३ ख. °क्तामौषसीं द्वितीयामृ°। ४ घ. इयुष्टे। ५ ग. °ष्या इयु°। ६ ख. °स्माभिः साऽनुक्षपं प्र°। ७ ग. °भिरु नु। ८ क. सर्वदा। ९ क. °णे वि°।

प्रेतं दग्धुं या समित्प्रक्षिप्यते तां संबोध्योच्यते—हे समित्त्वामस्य प्रेतस्योपरि **सादयामि** स्थापयामि । ज्योतिष्मतीमित्यादिभिर्विशेषणैस्तत्समिन्निष्ठाया ज्वालाया उत्तरोत्तराभिवृद्ध्याऽवस्थाविशेषा उच्यन्ते । अत्यल्पप्रकाशोपेता **ज्योतिष्मती** । ईषदधिकप्रकाशोपेता **ज्योतिष्कृत्** । ततोऽप्यधिकप्रकाशोपेता **ज्योतिर्वित्** । एवं भास्वत्यादिषु योजनीयम् । मल्मलेति दह्यमानकाष्ठध्वनेरनुकरणम् । लिङ्गानुसारेणायं मन्त्र इष्टकोपधानेऽपि विनियोक्तव्यः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये तृतीयप्रपाठक एकोनविंशोऽनुवाकः ॥ १९ ॥

अथ तृतीये विंशोऽनुवाकः ।

अथ स्रुवाहुतिमन्त्रान् उच्यन्ते । तत्र द्वादश मन्त्रानाह—

प्रयासाय स्वाहाऽऽयासाय स्वाहा वियासाय स्वाहा संयासाय स्वाहोद्यासाय स्वाहाऽवयासाय स्वाहा शुचे स्वाहा शोकाय स्वाहा तप्यत्यै स्वाहा तपते स्वाहा ब्रह्महत्यायै स्वाहा सर्वस्मै स्वाहा, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके तृतीयप्रपाठके विंशोऽनुवाकः ॥ २० ॥

प्रेतस्य यमलोके बाधका देवताविशेषाः प्रयासादिशब्दवाच्याः, तन्निर्वचनानि तु यथायोगमुन्नेयानि । तस्यै तस्यै देवतायै स्रुवेण गृहीतमिदमाज्यं स्वाहुतमस्तु ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये तृतीयप्रपाठके विंशोऽनुवाकः ॥ २० ॥

अथ तृतीय एकविंशोऽनुवाकः ।

अथ राजगवीहविषो होमार्थोऽयमनुवाक उच्यते । तत्र नव मन्त्रानाह—

चित्तꣳ संतानेन भवं यक्ता रुद्रं तनिम्ना पशुपतिꣳ स्थूलहृदयेनाग्निꣳ हृदयेन रुद्रं लोहि-

---

१ क. °षणैः समि° । २ क. अल्प° । ३ क. ख. °ने वि° । ४ क. °न्त्रानुवाक उच्यते । त° । ५ ग. तपत्यै ६ क. °गवि ह° । ७ क. °वीयो हो° । ८ क. °मार्थमन्त्रानु° ।

तेन शर्व मतस्नाभ्यां महादेवमन्तःपार्श्वेनौषि-
ष्ठहनꣳ शिङ्गीनिकोश्याभ्याम् (१), इति ॥
चित्तमेकम् ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके तृतीयप्रपाठक
एकविंशोऽनुवाकः ॥ २१ ॥

अत्र द्वितीयान्ताश्चित्तादिशब्दा देवताविशेषवाचिनः । तृतीयान्ताः संतानादिशब्दाः पशोर्मांसविशेषवाचिनः । संतानाख्येन मांसविशेषेण चित्ताख्यं देवताविशेषं परितोषयाम इति वाक्यशेषः । एवं सर्वत्र योजनीयम् । तदेवमस्मिन्प्रपाठके ब्रह्मचितिब्रह्ममेधयोरङ्गभूता मन्त्रा उक्ताः । चातुर्होत्रियचितिर्ब्रह्मचितिः । ब्रह्म वै चतुर्होतार इत्यान्नातत्वात् । तस्यां ब्रह्मचितौ चित्तिः स्रुगित्यादयः सुवर्णं घर्ममित्येवमन्ता अनुवाका विनियुक्ताः । ब्रह्ममेधे तु कृत्स्नोऽपि प्रपाठको विनियुक्तः । आहिताग्नेर्यो दहनादिसंस्कारः सोऽयं पितृमेधः । आहिताग्नित्वे सति यो ब्रह्मतत्त्वं जानाति तस्य दहनादिसंस्कारो ब्रह्ममेध इत्युच्यते । तस्मिन्ब्रह्ममेधेऽस्य प्रपाठकस्य विनियोगं भरद्वाज आह— " अथात उत्तरं पितृमेधं व्याख्यास्यामो ब्रह्ममेध इत्याचक्षते । तथाऽप्युदाहरन्ति द्विजातीनामपवर्गार्थस्तत्त्वदर्शिभिः(?) । ऋषिभिस्तपसो योगाद्द्रष्टुं पुरुषोत्तमम् । होतृंश्च पितृमेधं च संसृज्य विधिरुत्तरः । विहितस्तु समासेन क्रतूनामुत्तमः क्रतुः " इति । तस्य सग्रहैर्होतृभिर्होमो भर्तृसूक्तेन भरणं पत्नीभिरुर्पसादनं दक्षिणाप्रतिग्रहैर्निर्मार्गो हृदयैर्हिरण्यशकलान्संभारयजुर्भिः पात्रचयनं ज्योतिष्मतीभिरुपोषणं नारायणाभ्यामुपस्थानं ब्राह्मण एकहोतेति चानुमन्त्रणं चित्तꣳ संतानेनेति हविराहुतीः प्रयासाय स्वाहेति स्रुवाहुतीर्मृत्युसूक्तेनानुशंसनं सौम्या संगाहनं सौर्येणाऽऽदित्योपस्थानमीर्युष्ट इत्यवगाहनं समानमंत ऊर्ध्वं पैतृमेधिकमार्थवौदनप्राशनात्परं ब्रह्मेत्याचक्षते तानसाधारणे श्मशाने प्रयुञ्जाते *नानाचार्याय द्विजातीनामेव संतिष्ठते ब्रह्ममेधः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये तृतीयप्रपाठक एकविंशोऽनुवाकः ॥ २१ ॥

---

* ग. पुस्तके टिप्पण्यां तानाचार्यो य इति पाठः ।

---

१ ग. °तस्याभ्यां । २ ख. ग. °होत्रीयचि° । ३ क. °वर्गोऽर्थ° । ४ ख. ग. °ष्टिं पु° । ५ क. °मꣳ होः । ६ ग. °दोह्यश्व । ७ क. सꣳसृ° । ग. संसृत्य । ८ क. °पसंवेशनं । ९ ग. °मार्गोर्हृद° । १० क. °ब्रह्मपनं । ११ ख. °युष्टचाऽऽ° । ग. °युष्णाव° । १२ ख. °नमेतवूर्ध्वं । १३ ख. °यवेद° । १४ क. °ते तां नः । १५ ग. तानाचा° । १६ ख. °चार्योऽयं द्वि° । १७ ग. °मेवं सं° । १८ क. पितृमेधः ।

चित्तिः पृथिव्याग्निः सूर्ये ते चक्षुर्महाहविर्होता वाग्घोता ब्राह्मण एकहोताऽग्निर्यजुर्भिः सेनेन्द्रस्य देवस्य सुवर्णं घर्मꣳ सहस्रशीर्षाऽद्भ्यो भर्ता हरिं तरणिराप्यायस्वेयुष्टे ये ज्योतिष्मतीं प्रयासाय चित्तमेकाविꣳशतिः ॥ २१ ॥

चित्तिरग्निर्यजुर्भिरन्तःप्रविष्टः प्रजापतिः प्रजया संविदानस्तस्य धीरा ज्योतिष्मतीं त्रिपश्चाशत् ॥ ५३ ॥

अथ शान्तिः ।

तच्छं योरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये । दैवी स्वस्तिरस्तु नः । स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शं नो अस्तु द्विपदे । शं चतुष्पदे ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

इति शान्तिः ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके तृतीयः प्रपाठकः समाप्तः ॥ ३ ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ १ ॥

इति श्रीमद्वीरबुक्कणसाम्राज्यधुरंधरश्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये तृतीयः प्रपाठकः समाप्तः ॥ ३ ।

---

१ ग. °या भर्ता प्रयासाय द्विपं° ।

अथ कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठकस्याऽऽरम्भः ।

(तत्र प्रथमोऽनुवाकः ।)

यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥
तृतीये कथिता मन्त्रा ब्रह्माग्निब्रह्ममेधयोः ।
प्रवर्ग्यमन्त्राः प्रोच्यन्ते चतुर्थेऽस्मिन्प्रपाठके ॥ २ ॥
तद्ब्राह्मणं पञ्चमे स्यात्तावन्योन्याभिकाङ्क्षिणौ ।
तेन प्रपाठकावेतौ व्याख्यास्ये सह सर्वशः ॥ ३ ॥

तत्र चतुर्थस्य प्रथमेऽनुवाके शान्तिपाठार्थो मन्त्रोऽभिधीयते, तस्य च प्रवर्ग्यकर्मादौ महावीरनिष्पत्तेः पूर्वं पाठं बौधायन[1] आह—"अँ(आ)मावास्येन[2] वा हविषेष्ट्वा नक्षत्रे वा पूर्वा शान्तिमुपयन्ति नमो वाचे" इति । आपस्तम्बस्तु प्रवर्ग्यप्रचारादौ महावीरनिष्पत्तेरूर्ध्वं शान्तिपाठमाह—"प्रवर्ग्येण प्रचरिष्यन्तः संवृण्वन्ति[3] द्वाराणि परिश्रयन्ति पत्न्याः पश्चाद्धोतोपविशति पुरस्तादध्वर्युर्दक्षिणतो ब्रह्मा यजमानः प्रस्तोता चोत्तरतः प्रतिप्रस्थाताऽऽग्नीध्रश्च मदन्तीरुपस्पृश्य प्रथमेनानुवाकेन शान्तिं[4] कृत्वा" इति । तस्यानुवाकस्य प्रथमभागे स्वाभीष्टानां देवतानामृषीणां च नमस्कारमाह—

हरिः ॐ ।

नमो वाचे या चोदिता या चानुदिता[5] तस्यै वाचे
नमो नमो वाचे नमो वाचस्पतये नम ऋषिभ्यो मन्त्र-
कृद्भ्यो मन्त्रपतिभ्यो मा मामृषयो मन्त्रकृतो मन्त्रपतयः ।
परादुर्माऽहमृषीन्मन्त्रकृतो[6] मन्त्रपतीन्परादाम्, इति ।

अनुष्ठेयस्य कर्मणो मन्त्राधीनत्वान्मन्त्राणां च वाग्देवताशरीरस्वरूपत्वात्तस्यै देवतायै प्रथमं नमस्कारः क्रियते । वाक्च द्विविधा, काचित्पूर्वमुदिता व्यवहृता काचिदनुदिता व्यवहरिष्यमाणा । तयोर्मध्ये **या च वागुदिता** तस्या अपि **नमोऽस्तु** । **या च पूर्वमनुदिता** तस्यै वाचेऽपि **नमोऽस्तु** । विभज्य नमस्कृत्य पुनः समुदायाकारेण नमस्क्रियते । **वाचे** भागद्वयेऽप्यनुगुदितायै वाग्देवतायै **नमोऽस्तु** । सेयं वाग्देवता येन बृहस्पतिरूपेण पाल्यते तस्मै **वाचस्पतये नमोऽस्तु** । यथा देवतानमस्कारस्तद्वदृषि-

---

१ ख. ग. बोधायन । २ ग. अथामा° । ३ ग. °न वो हविर्ज्येष्ठान° । ४ ग. प्रवर्णन्ति । ५ ग. °स्कारः क्रियन्ते । वा° । ६ क गता° ।

भ्योऽपि नमस्कारोऽस्तु । कीदृशेभ्यः—मन्त्रकृद्भ्यः, मन्त्रं कुर्वन्तीति मन्त्रकृतः, यद्यप्यपौरुषेये वेदे कर्तारो न सन्ति तथाऽपि कल्पादावीश्वरानुग्रहेण मन्त्राणां लब्धारो मन्त्रकृत इत्युच्यन्ते । तल्लाभश्च स्मर्यते—

"युगान्तेऽन्तर्हितान्वेदान्सेतिहासान्महर्षयः ।
लेभिरे तपसा पूर्वमनुज्ञाताः स्वयंभुवा" इति ।

त एव महर्षयः संप्रदायप्रवृत्त्या मन्त्राणां पालनान्मन्त्रपतय इत्युच्यन्ते । तथाविधा महर्षयो मां यजमानं मा परादुः परादानमवज्ञां मा कुर्वन्तु, किंत्वनुगृह्णन्तु । अहमपि तान्महर्षीन्मा परादामवज्ञां न करोमि, किंत्वादरेण भजामि ।

द्वितीयभागेन नमस्कारप्रयोजनं दर्शयति—

वैश्वदेवीं वाचमुद्यासꣳ शिवामदस्तां जुष्टां देवेभ्यः, इति ।

अहं वाचमुद्यासं *तत्त्वरूपया वाचा वदिता भूयासम् । कीदृशीं वाचम् । वैश्वदेवीं सर्वदेवविषयाम् । शिवां स्तुतिरूपेण देवेभ्यः सुखप्रदाम् । अदस्तामनुपक्षीणां संपूर्णाम्, देवेभ्यो जुष्टां देवानां प्रियाम् ।

तृतीयभागे देवतानुग्रहप्रार्थनारूपामृचं दर्शयति—

शर्म मे द्यौः शर्म पृथिवी शर्म विश्वमिदं जगत् ।
शर्म चन्द्रश्च सूर्यश्च शर्म ब्रह्मप्रजापती, इति ।

द्यौर्लो(द्यौर्लो)कात्मको देवो मे मम शर्म सुखरूपो भवतु । अनुष्ठेये कर्मणि विघ्नपरिहारेणानुगृह्णात्वित्यर्थः । एवं पृथिव्यादिषु योज्यम् । ब्रह्म जगत्कारणं वस्तु । प्रजापतिश्चतुर्मुखः ।

यदुक्तं पूर्वत्र वैश्वदेवीं वाचमुद्यासमिति तस्या वाचो विषयभूतानर्थानस्य चतुर्थभागेन दर्शयति—

भूतं वदिष्ये भुवनं वदिष्ये तेजो वदिष्ये यशो वदिष्ये
तपो वदिष्ये ब्रह्म वदिष्ये सत्यं वदिष्ये, इति ।

भूतमाकाशादिपञ्चमहाभूतरूपम् । भुवनं पृथिव्यादिलोकस्वरूपम् । तेजः शरीरकान्तिः । यशः कीर्तिः । तपो व्रतादिनियमविशेषः । ब्रह्म स्वाध्यायः । सत्यं यथार्थकथनम् । एतत्सर्वं वदिष्ये ममानुकूलं भवत्वित्येतत्प्रार्थयिष्ये ।

* मन्त्ररूपाया वाच इति पाठ इति ग. पुस्तकटिप्पणी ।

१ ग. °रूपाया वाचो व° । २ ग °नर्थांस्तस्य । ३ ग. °गे व्° ।

यथोक्तमन्त्राभिवदनसिद्ध्यर्थं तदाधारभूतं कर्म पञ्चमभागेन प्रार्थयते—

तस्मा अहमिदमुपस्तरणमुपस्तृण उप-
स्तरणं मे प्रजायै पशूनां भूयादुपस्तरण-
महं प्रजायै पशूनां भूयासम्, इति।

तस्मै पूर्वोक्तभूतादिवदनसिद्ध्यर्थमहमिदं प्रवर्ग्यरूप्यं कर्मोपस्तरणं मदाधारभूतमुपस्तृणे संपादयामि। मे मदीयानां प्रजानां पशूनां चोपस्तरणमाधारभूतं वस्तु भूयात्। अन्याधारासंभवेऽप्यहमेव प्रजानां पशूनां चोपस्तरणमाधारो भूयासम्।

यथोक्तकर्मसिद्ध्यर्थं विघ्नरूपान्मृत्योः परिपालनं षष्ठभागेन प्रार्थते—

प्राणापानौ मृत्योर्मा पातं प्राणा-
पानौ मा मां हासिष्टम्, इति।

हे प्राणापानावुभौ वायू मृत्योः सकाशान्मां पालयतम्। तस्मिन्पालनेऽप्यमुपायः। हे प्राणापानौ मां यजमानं मा हासिष्टं मा परित्यजतम्।

अपमृत्युपरिहारे सति प्रयोजनं सप्तमभागेन दर्शयति—

मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि
मधुमतीं देवेभ्यो वाचमुद्यासꣳ शुश्रूषेण्यां मनुष्येभ्यस्तं
मा देवा अवन्तु शोभायै पितरोऽनुमदन्तु, इति।

अपमृत्युपरिहारेण लब्धायुरहं मधु मधुरं समीचीनफलसाधनं प्रवर्ग्यरूप्यं कर्म मनिष्ये मनसि संकल्पयिष्ये। संकल्पादूर्ध्वं मधु तन्मधुरं कर्म जनिष्ये प्रादुर्भावयिष्ये, अनुष्ठातुं प्रारप्स्ये। प्रारम्भादूर्ध्वं तन्मधु मधुरं कर्म वक्ष्यामि, वहनं करिष्यामि, समाप्तिपर्यन्तं निर्वहिष्यामि। तत्सिद्ध्यर्थं मधु मधुरं मन्त्रजातं वदिष्यामि कथयिष्यामि। न केवलं मन्त्रपाठं किंतु वाचमप्युद्देशत्यागरूपामुद्यासं वाचो वदिता भूयासम्। कीदृशीं वाचम्। देवेभ्यो मधुमतीं देवानामतिप्रियाम्, मनुष्येभ्यः शुश्रूषेण्यां मनुष्योपलक्षितानां पितॄणां श्रोतुमत्यन्तमधुराम्। तमेतादृशं मां यजमानं शोभायै शोभनफलप्राप्त्यर्थं देवाः सर्वेऽवन्तु रक्षन्तु। पितरोऽप्यनुमदन्तु, अनुजानन्तु॥

---

१ ग. °थोक्तं म°। २ क. ख. °भिवाद°। ३ ग. महदा°। ४ ग. °थ मु°। ५ क. मधुरं।

अथाष्टमभागेन स्वाभीष्टसिद्धिहेतुं परमात्मानं प्रणवेनानुस्मृत्य विघ्नत्रयपरिहारार्थं त्रिः शान्तिं पठति—

ॐ शान्तिः शान्तिः शान्तिः ॥

*** इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥**

आध्यात्मिकानां विघ्नानां ज्वरादिरूपाणां **शान्तिरस्तु** । आधिभौतिकानां रोगोपद्रवादीनां **शान्तिरस्तु** । आधिदैविकानां यक्षराक्षसोपद्रवादीनां शान्तिरस्तु ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये चतुर्थप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

अथ चतुर्थे द्वितीयोऽनुवाकः ।

प्रथमानुवाके शान्त्यर्थं मन्त्रमुक्त्वा द्वितीयानुवाके महावीरनिर्माणार्था मन्त्रा उच्यन्ते । कल्पः—"प्रवर्ग्यं संभरिष्यन्नमावास्यायां पौर्णमास्यामापूर्यमाणपक्षस्य वा पुण्ये नक्षत्रे तूष्णीं काण्टकीं समिधमाधाय युञ्जते मन इति चतुर्गृहीतं जुहोत्यथ यदि दीक्षितः काण्टकीमेवैतया समिधमादध्याद्यजुरेव वदेदित्येके" इति । पाठस्तु—

युञ्जते मन उत युञ्जते धियः । विप्रा विप्रस्य बृहतो विपश्चितः । वि होत्रा दधे वयुनाविदेक इत् । मही देवस्य सवितुः परिष्टुतिः, इति ।

विप्रस्य ब्राह्मणस्य यजमानस्य संबन्धिनो **विप्रा** ऋत्विजो **मनो युञ्जते**, प्रथमं स्वकीयं मनो विषयेभ्यो निवर्त्य समाहितं कुर्वन्ति । **उतापि** च **धियः** प्रवर्ग्यविषयाणि ज्ञानानि **युञ्जते** संपादयन्ति । कीदृशस्य विप्रस्य—**बृहतः** प्रभूताग्निचयनोद्योगेन प्रवृद्धप्रवर्ग्योद्योगेनाभिवृद्धस्य । **विपश्चितो** विदुषः प्रयोगाभिज्ञस्य । कीदृशा विप्राः । **होत्रा** होमशीलाः, कर्मण्यालस्यरहिता इत्यर्थः । **एक इदेक** एव सविता **विदधे** सर्वमिदं निर्मितवान् । कीदृशः—**वयुनावित्**, ऋत्विग्यजमानाभिप्रायाभिज्ञः । कथमेक एव सर्वमिदं कृतवानिति न विस्मेतव्यम् । त (य) तः **सवितुर्देवस्य परिष्टुतिर्मही** परितः सर्वेषु देवेषु श्रूयमाणा स्तुतिर्महती ।

---

* ग. पुस्तके ऽत्रानुवाकसमाप्तिर्नास्ति । किंचाग्रे द्वितीयानुवाकसमाप्तिस्थले प्रथमानुवाकसमाप्तिर्वर्तते । एवं तृतीयाद्यनुवाकसमाप्तिस्थले द्वितीयाद्यनुवाकसमाप्तिः कृताऽस्ति

---

१ ग. °न प्रव° । २ ग. °नात्रिषु° । ३ क. ख °भिज्ञः । ४ ग वेदेषु ।

अथ ब्राह्मणप्रपाठकस्य द्वितीयानुवाके सोऽयं मन्त्रो विनियुज्यते । तस्योपोद्घातत्वेन प्रथमानुवाके प्रवर्ग्यनिष्पत्तिर्निरूप्यते । तत्राऽऽदौ स्तुत्यर्थमुपाख्यानमाह—

देवा वै सत्रमासत । ऋद्धिपरिमितं यशस्कामाः । तेऽब्रुवन् । यन्नः प्रथमं यश ऋच्छात् । सर्वेषां नस्तत्सहासदिति । तेषां कुरुक्षेत्रं वेदिरासीत् । तस्यै खाण्डवो दक्षिणार्ध आसीत् । तूर्घ्नमुत्तरार्धः । परीणज्जघनार्धः । मरव उत्करः (१) । तेषां मखं वैष्णवं यश आर्च्छत्, इति ।

(प्र० ५ । अ० १ । * वि० १)

पुरा कदाचिद्देवा **यशस्कामाः** सन्त **ऋद्धिपरिमितं** साधनद्रव्यसमृद्ध्या परितो निर्मितं प्रौढं **सत्रमनुष्ठितवन्तः** । अनुष्ठातुं प्रवर्तमानास्ते देवाः परस्परं समयरूपमिदं वाक्यमब्रुवन् । **प्रथमं** यज्ञफलस्योपक्रमे **यद्यशः** कीर्तिरूपं **नोऽस्मानृच्छात्प्राप्नुयात्तद्यशो नोऽस्माकं** सर्वेषां सहासत्साधारणमेवास्तु, न त्वेकस्यैव साधारणमिति । एवं परस्परं भाषां कृत्वा प्रवृत्तानां **तेषां** देवानां यत्**कुरुक्षेत्रं** पुराणप्रसिद्धं सैव **वेदिरासीत् । तस्यै** कुरुक्षेत्ररूपायास्तस्या वेदेः **खाण्डवतूर्घ्नपरीणच्छब्दवाच्याः** पुण्यदेशविशेषा दक्षिणादिदिग्भागा अभवन् । **मरवो** जलरहिता भूप्रदेशा उत्कररूपा अभवन् । वेदेरुत्तरभागे पांशुतृणादयो यत्र प्रक्षिप्यन्ते सोऽयमुत्करः । तस्यां वेद्यामुपतिष्ठतां **तेषां** देवानां मध्ये **वैष्णवं मखं** विष्णुरधिकं सत्रं **यशः** प्राप्नोत् । तस्मिन्सत्रे विष्णुशब्दवाच्यो यज्ञाभिमानी देवो गृहपतित्वेन दीक्षितः, अतो विष्णुः सत्रं कृतवानित्येवं विष्णुनाम्ना यश आसीत् ।

तस्मिन्सत्रे विष्णुनामकस्य पुरुषस्येतरदेवैः सह यशोनिमित्तं कलहं दर्शयति—

तन्न्यकामयत । तेनाप्राक्रामत् । तं देवा अन्वायन् । यशोऽवरुरुत्समानाः । तस्यान्वागतस्य । सव्याद्धनुरजायत । दक्षिणादिषवः । तस्मादिषुधन्वं पुण्यजन्म । यज्ञजन्मा हि(२)।तमेकꣳ सन्तम् । बहवो नाभ्यधृष्णुवन् । तस्मादेकमिषुधन्विनम् । बहवोऽनिषुधन्वा नाभिधृष्णुवन्ति, इति ।

(प्र० ५ । अ० १ । वि० २)

विष्णुः सत्रं कृतवानित्येतादृशं **यद्यशस्तस्मिन्सत्र** आसीत्, **तद्यशो** ममैवास्तु नान्येषामित्येवं विष्णुर्नितरां**मकामयत** । कामयित्वा च **तेन** यशसा सहेतरदेवसकाशात्स्वयं**मपाक्रामत्** । तदानीमन्ये **देवास्तद्यशोऽवरोद्धुमिच्छन्तस्तं** विष्णुमन्वगच्छन् । **तैर्देवैरन्वागतस्य** विष्णोः सव्यहस्तादेकं **धनुरुत्पन्नम्** । दक्षिणहस्ताद्बहवो बाणा उत्पन्नाः । विष्णोः संकल्पमात्रेण तदुत्पत्तिः । **यस्मात्कारणाद्यज्ञजन्मा** यज्ञा-

* वि० इति चिह्नेन भाष्यकृत्कृतानुवाकविभागो ज्ञातव्यः ।

१ क. ख. रुसारं ।

ज्जन्मोत्पत्तिर्यस्येषुधन्वसमूहस्य सोऽयं **यज्ञजन्मा**। यज्ञो वै विष्णुरिति श्रुतेर्यज्ञस्यैव विष्णुरूपत्वाद्विष्णोरुत्पन्नं यज्ञादेवोत्पन्नं भवति। **तस्माद्यज्ञजन्मत्वादिषुधन्वस्वरूपं पुण्यजन्मेत्युच्यते** यज्ञस्य पुण्यरूपत्वात्। * वामहस्ते धनुर्दक्षिणहस्ते बाणान्धृत्वाऽवस्थितं **तं यज्ञपुरुषमेकमेव सन्तमितरे इषुधन्वरहिता देवा बहवः सन्तोऽपि नाभ्यधृष्णुवन्**, अभिभवितुं नाशक्नुवन्। यस्मादेवमत्र **तस्माल्लोकेऽपीषुभिर्धनुषा चोपेतमेकं पुरुषं तद्रहिता बहवः पुरुषा अभिभवितुं न शक्नुवन्ति**।

अथ यज्ञपुरुषस्य गर्वप्रसङ्गेन दीक्षितनियमं विधत्ते—

> सोऽस्मयत। एकं मा सन्तं बहवो नाभ्यधर्षिषुरिति। तस्य सिष्मियाणस्य तेजोऽपाक्रामत्। तद्देवा ओषधीषु न्यमृजुः। ते श्यामाका अभवन्। स्मयाका वै नामैते (३)। तत्स्मयाकानाꣳ स्मयाकत्वम्। तस्माद्दीक्षितेनापिगृह्य स्मेतव्यम्। तेजसो धृत्यै, इति।
>
> (प्र० । ५ । अ० १ । वि० ३)

स धन्वी यज्ञपुरुषोऽस्मयत स्मयं[2] हास्यं कृतवान्। हास्याभिप्रायश्च तेनैवोच्यते— अहमेक एवैते तु देवाः शतसहस्रसंख्याकास्तथाऽपि मामभिभवितुं न शक्ताः, इत्येवं **सिष्मियाणस्य** गर्वेण स्मयं कृतवतस्तस्य यज्ञपुरुषस्य सकाशात्तदीयं **तेजोऽपाक्रामत्**, गर्वेण प्रयत्ने शिथिले सति सामर्थ्यमपगतम्। पुनरपि कथंचित्तत्स्वी करिष्यतीति मत्वा ते **देवास्तत्तेजोऽन्यत्र** नीत्वा तेन यथा न ज्ञायते तथा गूढं कर्तुं **कासुचिदोषधीषु निमृष्टवन्तः**। ते चौषधिविशेषा यज्ञसंबन्धिना तेजसा युक्ताः [श्यामाका अभवन्। ते च] **श्यामकाभिधा** धान्यविशेषाः **स्मयाका** इत्येतादृशं **नामार्हन्ति**। यस्मादेतस्य नाम्नो योग्यास्तस्मात्स्मयाकानां[3] स्मयादुत्पन्नानां[4] धान्यानां **स्मयाकत्वम्**। स्मयाकनामाभिज्ञव्यवहारे[5] प्रसिद्धम्। यस्मादत्र स्मयं कुर्वतो यज्ञपुरुषात्तेजोऽपक्रान्तं **तस्मात्कारणात्तेजसः** स्वस्मिन्[6]नेवावधारणार्थं मुखमपिधाय दीक्षितेन **स्मेतव्यम्**. यद्यपि दीक्षाप्रकरणे कृष्णविषाणया कण्डूयतेऽपि**गृह्य** स्मयत इति विधिरस्ति तथाऽपि प्रसङ्गादत्र स एवानूद्यत इत्यवगन्तव्यम्।

अथ प्रवर्ग्यधर्ममहावीरसम्राट्शब्दानां निर्वचनानि प्रस्तोष्यमाणहविष्प्रशंसार्थं दर्शयति—

> स धनुः प्रतिष्कम्यातिष्ठत्। ता उपदीका अब्रुवन्वरं वृणामहै। अथ वꣳ इमꣳ रन्धयाम। यत्र क्व च खनाम। तदपोऽभितृणदामेति। तस्मा-

* अत्र सटलादर्शपुस्तकेषु वामहस्ते दधद्धनुरित्येव पाठः।

१ क. ख. °तरे दे°। २ क. ख. °यं कृ°। ३ क. °याक°। ४ ख. नां स्म°। ५ ग. °रेण प्र°। ६ क. ख. °स्मिन्नव°।

दुपदीका यत्र क्व च खनन्ति। तदपोऽभितृन्दन्ति (४)। वारे वृतꣳ ह्यासाम्। तस्य ज्यामप्यादन्। तस्य धनुर्विप्रवमाणꣳ शिर उदवर्तयत्। तद्द्यावापृथिवी अनुप्रावर्तत। यत्प्रावर्तत। तत्प्रवर्म्यस्य प्रवर्म्यत्वम्। यद्घ्राꣳ३ इत्यपतत्। तद्घर्मस्य घर्मत्वम्। महतो वीर्यमपसदिति। तन्महावीरस्य महावीरत्वम् (५)। यदस्याः समभरन्। तत्सम्राज्ञः सम्राट्त्वम्, इति।

(प्र० ९। अ० १। वि० ४)

स यज्ञपुरुषो युयुत्सून्देवानितस्ततः प्रतीक्षमाणो धनुः प्रतिष्कम्भ्य स्वकीयस्य धनुष ऊर्ध्वकोटिं चिबुकस्याधस्तात्कण्ठसमीपे दृढमवकृष्य तथैव स्थितवान्। तदानीमेतस्य प्रतीकारमन्विष्यतो देवान्प्रति ताः प्रसिद्धाः उपदीकाः पिपीलिकासमानाः क्षुद्रजन्तवो वल्मीकस्य निर्मातार इदमब्रुवन्। हे देवाः प्रथमं तावद्वयमिममेकं वरं प्रार्थयामहे। अथानन्तरं वो युष्मदर्थमिमं यज्ञपुरुषं रन्धयामः साधयामः। कोऽसौ वर इति सोऽभिधीयते—भूमौ यत्र क्वापि वयं मुखेन खनाम तत्रापोऽभिप्राप्य तृणदाम द्रवी करवामेति। तस्मात्कारणादुपदीका वल्मीकनिष्पादका जीवा यत्र क्वापि खनन्ति तत्क्षेत्रमपोऽभिप्राप्य तृन्दन्ति द्रवी कुर्वन्ति। हि यस्मात्कारणादासामुपदीकानां तद्द्रवीकरणसामर्थ्यं वारे वृतं वरेण संपादितं तस्मात्तद्युक्तम्। ततो लब्धवरा उपदीकाः शनैर्भूमौ तत्समीपे समागत्य तस्य धनुषोऽधः क्वापि लग्नां ज्यामपि[3] गुणं चाऽऽदन्भक्षितवत्यः। ततस्तद्धनुर्विप्रवमाणं विस्तारेणोर्ध्वं प्रवर्तमानं धनुस्तस्य यज्ञपुरुषस्य शिर उदवर्तयत्, छित्त्वोर्ध्वं प्रावर्तयत्। तच्च शिर ऊर्ध्वं द्युलोकपर्यन्तं गत्वा ततो भारेण भूमावधः पतितं, तस्मादिदं शिरो द्यावापृथिवी उभे अप्यनुक्रमेण प्रावर्तत। तस्मादनयैव व्युत्पत्त्या तस्य यज्ञशिरसः प्रवर्म्यनाम संपन्नम्। भूमौ पतनवेलायामुत्पन्नस्य ध्वनेरनुकरणे यो 'घ्राँ' इति शब्दस्तथाविधशब्दोपेतत्वादस्य शिरसो घर्मनाम संपन्नम्। महतो यज्ञपुरुषस्य सकाशाद्वीर्यमपसत्सारभूतं शिरः पतितं ततोऽनयैव व्युत्पत्त्या महावीरनाम संपन्नम्। यद्यस्मात्कारणादस्याः पृथिव्याः सकाशात्समभरन्देवास्तच्छिरः समादाय प्रोषितवन्तस्तस्मात्सम्यग्राजमानत्वात्सम्राडिति नाम संपन्नम्।

एवं यज्ञशिरसो नामचतुष्टयनिर्वचनमुक्त्वाऽवशिष्टस्य यज्ञशरीरस्य फलं प्रत्यप्रयोजन(क)त्वकथनेन तच्छिरः प्रशंसति—

तꣳ स्तृतं देवतास्त्रेधा व्यगृह्णत। अग्निः प्रातःसवनम्। इन्द्रो माध्यंदिनꣳ सवनम्। विश्वे देवास्तृतीयसवनम्। तेनापशीर्ष्णा यज्ञेन

ग. °वष्टम्भ त। २ क. ख. °षो ज्या°। ३ क. ख. °पि चाऽऽद्°। ४ क. तच्छिर°, ग. तच्चापि शि°। ५ क. ग. °रणो यो। ६ ग. फलप्रयो°। ७ क. °न्द्रो मध्यं°।

यजमानाः नाऽऽशिषोऽवारुन्धत । न सुवर्गं लोकमभ्यजयन्, इति ।
(प्र० ५ । अ० १ । वि० ५)

तं स्तृतं शिरोराहित्येन हिंसितं तं यज्ञपुरुषदेहमग्न्यादयो देवास्त्रेधा गृहीतवन्तः । तत्राग्निः प्रातःसवनं जग्राह । इन्द्रस्तु माध्यंदिनं सवनं गृहीतवान् । विश्वे देवास्तु तृतीयसवनं जगृहुः । अपशीर्ष्णा प्रवर्ग्याख्यशिरोरहितेन पूर्वोक्तसवनत्रययुक्तेन **तेन यज्ञेन यजमाना** अग्न्यादयो देवा **आशिषः** स्वापेक्षितानि कर्मफलानि **नावारुन्धत न** प्राप्तवन्तः **स्वर्गलोकमपि नाभ्यजयन् ।**

अथ प्रवर्ग्यसहितस्य यज्ञस्य फलहेतुत्वं दर्शयति—

> **ते** देवा अश्विनावब्रुवन् (६) । भिषजौ वै स्थः । इदं यज्ञस्य **शिरः** प्रतिधत्तमिति । तावब्रूतां वरं वृणावहै । अह एव नावत्रापि गृह्यतामिति । ताभ्यामेतमाश्विनमगृह्णन् । तावेतद्यज्ञस्य **शिरः** प्रत्यधत्ताम् । यत्प्रवर्ग्यः । तेन सशीर्ष्णा यज्ञेन यजमानाः । अवाऽऽशिषोऽरुन्धत । अभि सुवर्गं लोकमजयन्, इति ।
> (प्र० ५ । अ० १ । वि० ६)

प्रवर्ग्यरहितेन यज्ञेन फलमलभमानास्ते **देवा अश्विनौ** प्रत्येतदब्रुवन् । हेऽश्विनौ युवामस्माकं मध्ये चिकित्सकौ **स्थः**, तस्मादिदं **यज्ञस्य शिरः प्रतिधत्तं** पुनरपि यज्ञशरीरे । **प्रवर्त्त**(त्यर्प)यतमिति । तावश्विनौ प्रत्यर्पणार्थं **वरमुत्कोचरूपं** लाभविशेषं **वृणावहै,** इत्युक्त्वा कोऽसौ वर इत्याशङ्क्य तं वरमुक्तवन्तौ । अत्रास्मिन्सोमयागे **नावपि** चिकित्सकयोरावयोरपि युष्मत्साम्येन **ग्रह एव गृह्यताम्,** न तु यत्किंचित्तुच्छं[3] लेपादिकमिति । ततस्ताभ्यामश्विभ्यामेतमाश्विनं ग्रहमगृह्णन्, तौ चाश्विनौ चिकित्सया **यज्ञस्य शिरः** प्रत्यर्पयता(धत्ता)म् । प्रतिधानं नाम शरीरे पुनः संधानम् । प्रवर्ग्य इ(र्ग्ये)त्येतन्नामकं यत्कर्म तदेव यज्ञशरीरे प्रतिहितं शिरः, तेन तादृशेन [स]शीर्ष्णा प्रवर्ग्याख्यशिरोयुक्तेन यज्ञेन यजमाना देवाः स्वापेक्षितान्यन्यफलानि स्वर्गं च प्राप्नुवन् ।

देवा वै सत्रमासतेत्यारभ्यैतावता महता प्रबन्धेन प्रवर्ग्याख्यं कर्म +प्रसाध्य तदेव कर्म विधत्ते—

> यत्प्रवर्ग्यं प्रवृणक्ति । यज्ञस्यैव तच्छिरः प्रतिदधाति । तेन सशीर्ष्णा यज्ञेन यजमानः अवाऽऽशिषो रुन्धे । अभि सुवर्गं लोकं जयति ।

+ प्रशंस्येति तै० पाठ इति ग. पुस्तकटिप्पणी ।

---

१ क. °स्तु मध्यं . २ ग. °वास्तौ° । ३ ग लेशादि° ।

तस्मादेष आश्विनप्रवया इव । यत्प्रवर्म्यः (७), इति ।

(प्र० ५ । अ० १ । वि० ७)

उत्करो ह्येते तृन्दन्ति महावीरत्वमब्रुवन्नजयन्सप्त च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके पञ्चमप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

यदि प्रवर्म्याख्यं कर्मानुतिष्ठेत् । तत्तार्हि यज्ञस्य शिर एव प्रतिसमाहितवान्भवति । ततः **सशीर्ष्णा** शिरःसहितेन **यज्ञेन यजमानः** पुमानाशासनीयान्यन्यफलानि प्राप्नोति स्वर्गं चाभिजयति । यस्मादश्विभ्यां समाधानं कृतं **तस्मात्कारणाद्यः प्रवर्म्याख्यः** कर्मविशेषोऽस्ति स **एष** आश्विनप्रवया इति । आश्विनमन्त्राः प्रवयसः प्रवृद्धा अस्मिन्प्रवर्म्ये सोऽयमा**श्विनप्रवयाः** । **इव**शब्द एवकारार्थः ।

एतदेव ब्राह्मणरूपे प्रपाठके प्रथमानुवाके प्रवर्म्याख्यं कर्म विधाय द्वितीयानुवाकादौ युञ्जते मन इत्येतन्मन्त्रसाध्यं होमं विधत्ते—

सावित्रं जुहोति प्रसूत्यै, इति ।

(प्र० ५ । अ० २ वि० १)

मन्त्रे देवस्य सवितुः परिष्टुतिरित्युक्तत्वादयं मन्त्रः **सावित्रः**, तद्धोमः **प्रसूत्यै** प्रसवाय संपद्यते ।

तत्र द्रव्यं विधत्ते—

चतुर्गृहीतेन जुहोति । चतुष्पादः **पशवः** । **पशूने**वावरुन्धे । चतस्रो दिशः । दिक्ष्वेव प्रतितिष्ठति, इति ।

(प्र० ५ । अ० २ । वि० २)

स्रुवेण जुह्वां चतुर्वारं गृहीतं यदाज्यं तेन जुहुयात् । चतुःसंख्यासाम्यात्पशुप्राप्तिर्दिक्षु प्रतिष्ठा च ।

पुनरपि चतुःसंख्यां प्रकारान्तरेण प्रशंसति—

छन्दाꣳसि देवेभ्योऽपाक्रामन् । न वो भागानि हव्यं वक्ष्याम इति । तेभ्य एतच्चतुर्गृहीतमधारयन् । पुरोनुवाक्यायै याज्यायै (१) । देवतायै वषट्काराय । यच्चतुर्गृहीतं जुहोति । छन्दाꣳस्येव तत्प्रीणाति । तान्यस्य प्रीतानि देवेभ्यो हव्यं वहन्ति, इति ।

(प्र० ५ । अ० २ । वि० ३)

नानाविधच्छन्दोयुक्तपुरोनुवाक्याद्यभिमानिनो देवा हविर्भाग्भ्यो **देवेभ्योऽपरक्ताः** सन्तोऽन्यत्रागच्छन् । किं ब्रुवन्तो गता इति तदुच्यते—हे देवा भागरहितानि वयं **छन्दांसि वो** युष्मदीयानि हवींषि **न वक्ष्यामो** हविर्वहनं न करिष्याम **इति ब्रुवन्तः** । तदानीं देवा विचार्य होमकाले यच्चतुर्ग्रहणं तच्छन्दसां प्रीतिकरं भवतीति तेषां

भागमकल्पयन्। तत्र प्रथमग्रहणं पुरोनुवाक्याख्याया गायत्रीदेवतायास्तुष्टिकरम्। द्वितीयग्रहणं याज्याख्यायास्त्रिष्टुब्देवतायास्तुष्टिकरम्। तृतीयग्रहणं देवताख्याया जगतीदेवतायास्तुष्टिकरम्। चतुर्थग्रहणं वषट्काराख्याया अनुष्टुब्देवतायास्तुष्टिकरम्। अतश्चतुर्गृहीतेन होमे सति छन्दोदेवताः प्रीणन्ति। ताश्च प्रीताः सत्यो हव्यं वहन्ति।

तत्र द्वौ पक्षौ। सोमयागसंकल्पादिकं कृत्वा दीक्षणीयेष्टेः प्रागेव प्रवर्ग्यसाधनं महावीरादिकं संपादनीयमित्येकः पक्षः। दीक्षायां समाप्तायां प्रवर्ग्यानुष्ठानकाल एव संपादनीयमित्यपरः पक्षः। तत्र प्रथमपक्षे सावित्रहोमो विहितः। द्वितीयपक्षे मीमांसया होमं निवार्य केवलमन्त्रपाठं विधत्ते—

ब्रह्मवादिनो वदन्ति। होतव्यं दीक्षितस्य गृहा३ इ न होतव्या३मिति। हविर्वै दीक्षितः। यज्जुहुयात्। हविष्कृतं यजमानमग्नौ प्रदध्यात्। यन्न जुहुयात्। (२), इति।

(प्र० ५। अ० २। वि० ४)

तत्र होमपक्षो न युज्यते। दीक्षितो हविःसंपादकत्वाद्धविरेव। तथा सति यदि हविर्जुहुयात्तदानीं हविःसंपादकं यजमानमेवाग्नौ प्रक्षिपेत्। अहोमपक्षे तु—

यज्ञपरुरन्तरियात् यजुरेव वदेत्। न हविष्कृतं यजमानमग्नौ प्रदधाति। न यज्ञपरुरन्तरेति, इति।

(प्र० ५। अ० २। वि० ५)

यज्ञस्य होमलक्षणमङ्गमन्तरितं भवेत्। ततो दोषद्वयपरिहारायाऽऽहुतिप्रक्षेपं परित्यज्य यजुरेव पठेत्। यद्यपि युज्यते मन इत्येषर्गेव तथाऽपि यजुर्वेदपठितत्वात्, यज्यतेऽनुष्ठान इति व्युत्पत्त्या वा यजुरित्युच्यते। अत्र होमाभावाद्यजमानस्य प्रक्षेपो न भवति। मन्त्रस्य पठितत्वाद्यज्ञाङ्गमपि नान्तरितं भवति।

कल्पः—"देवस्य त्वा सवितुः प्रसव इत्याभिमादत्ते" इति। पाठस्तु—

देवस्य त्वा सवितुः प्रसवे। अश्विनोर्बाहुभ्याम्। पूष्णो हस्ताभ्यामाददे, इति।

हेऽग्ने प्रेरकस्यान्तर्यामिणो देवस्य प्रेरणे सत्यश्विनोः संबन्धिभ्यां बाहुदण्डाभ्यां पूष्णः संबन्धिभ्यां हस्ताभ्यां च त्वामाददे स्वीकरोमि।

---

१ क. ख. °क्याया। २ ग. °म्। दे°। ३ क. ख. °णं ज°। ४ ग. °यागे सं°। ५ ग. °ति। यन्न जुहुयात्पुनस्तत्र। ६ क. °त्। य°। ७ क. ख. इति ऋगेषा त°। ८ ख. °त्, युज्ये°।

तस्या अग्नेः खादिरत्वं विधत्ते—

गायत्री छन्दाꣳस्यत्यमन्यत । तस्यै वषट्कारोऽभ्यय्य शिरोऽच्छिनत् । तस्यै द्वेधा रसः परापतत् । पृथिवीमर्धः प्राविशत् । पशूनर्धः । यः पृथिवीं प्राविशत् (३) । स खदिरोऽभवत् । यः पशून् । सोऽजाम् । यत्खादिर्यभ्रिर्भवति । छन्दसामेव रसेन यज्ञस्य शिरः संभरति, इति ।

(प्र० ५ । अ० २ । वि० ६)

गायत्रीदेवता सोमाहरणगर्वेणेतराणि **च्छदांसि** त्रिष्टुबादीन्यहमतिलङ्घितवतीत्यमन्यत । तदा वषट्काराभिमानी देवः क्रुद्धः सन्नभ्यय्याऽऽभिमुख्येन प्राप्य तस्या गायत्र्याः **शिरोऽच्छिनत्** । तस्माच्छिन्नप्रदेशान्निर्गतो रसो द्वेधा भूत्वा **पृथिवीं पशूꣳश्च प्राविशत्** । पृथिव्यां प्रविष्टः **स** भागः खदिरवृक्षोऽभूत् । पशुषु प्रवेष्टुं गतो भागोऽजां **प्राविशत्** । अतोऽभ्रिः **खादिरी** कर्तव्या । तथा सति **च्छन्दसां** संबन्धिना **रसेन यज्ञस्य शिरः** प्रवर्ग्यरूपं संपादितं भवति । गायत्र्यां हि त्रिष्टुप्संबद्धं जगतीसंबद्धं चाक्षरद्वयमन्तर्भूतमिति कद्रूश्चेत्यत्र प्रतिपादितम् । ततो गायत्रीरसः सर्वच्छन्दसां रसो भवति । महावीराख्यं पात्रं निष्पादयितुं मृत्खननार्थोऽभयतस्तीक्ष्णा व्याममात्री काष्ठकुद्दालरूपाऽभ्रिरित्युच्यते । व्यममात्रत्वादिलक्षणानि पञ्चमकाण्ड उखासंभरणप्रस्तावे दर्शितानि । अत एव **सूत्रकारेण** तल्लक्षणमतिदिश्यते– साग्निक्या व्याख्यातेति ।

खादिरेण[1] सह विकल्पार्थं पक्षत्रयं[2] विधत्ते—

यदौदुम्बरी । ऊर्वा उदुम्बरः । ऊर्जैव यज्ञस्य शिरः संभरति । यद्वैणवी । तेजो वै वेणुः (४) । तेजसैव यज्ञस्य शिरः संभरति । यद्वैकङ्कती । भा एवावरुन्धे, इति ।

(प्र० ५ । अ० २ । वि० ७)

औदुम्बरफलस्योपदंशरूपेण भक्ष्यत्वादूर्ग्रूपत्वम् । 'अग्निर्देवेभ्यो निलायत स वेणुं प्राविशत्' इत्युक्तत्वाद्वेणोस्तेजोरूपत्वम् । 'अग्नेः सृष्टस्य यतः । विकङ्कतं भा आर्च्छत्' इत्युक्त्वाद्वैकङ्कतत्वेन **भा** दीप्तिः प्राप्नोति ।

अभ्यादाने मन्त्रं विनियुज्य व्याचष्टे—

देवस्य त्वा सवितुः प्रसव इत्यभ्रिमादत्ते प्रसूत्यै । अश्विनोर्बाहुभ्यामित्याह । अश्विनौ हि देवानामध्वर्यू आस्ताम् । पूष्णो हस्ताभ्यामित्याह यत्यै, इति ।

(प्र० ५ । अ० २ । वि० ८)

अभ्रिरसि नारिरसि । अध्वरकृद्देवेभ्यः ।

---

१ क. ख. खादिरेग । २ क. ख. °यं क्रमेण वि° ।

कल्पः—'अभिरसि नारिरसीत्यभ्रिं मन्त्रयते' इति। अध्वरकृद्देवेभ्य इत्येतावान्मन्त्रशेषः। हे खननहेतो त्वं केनापि न ह्रियसे न भज्यस इत्यभ्रिः, असि। नृणां महावीरार्थिनामुपकार(रि)त्वान्नारिरसि। देवेभ्यो देवार्थेऽध्वरकृद्यागनिष्पादिकाऽसि।

अस्मिन्मन्त्रे पूर्वभागस्य तात्पर्यं दर्शयति—

वज्र इव वा एषा। यदभ्रिः। अभिरसि
नारिरसीत्याह शान्त्यै। (५), इति।
(प्र० ५। अ० २। वि० ९)

तीक्ष्णाग्रत्वाद्वज्रसमानत्वम्। न ह्रियसे नृणामुपकर्त्री चेत्युपलालनादुग्रस्य शान्तिः। अथवाऽरिर्न भवसीति नारिरित्युपलालनम्।

उत्तरभागस्य तात्पर्यं दर्शयति—

अध्वरकृद्देवेभ्य इत्याह। यज्ञो वा अध्वरः।
यज्ञकृद्देवेभ्य इति वावैतदाह, इति।
(प्र० ५। अ० २। वि० १०)

कल्पः—"उत्तिष्ठ ब्रह्मणस्पत इति ब्रह्माणमामन्त्रयत उपोत्तिष्ठति ब्रह्मोभावुत्तरमर्धर्चं जपतः" इति। तस्या ऋचः पाठस्तु—

उत्तिष्ठ ब्रह्मणस्पते (१)। **देवयन्तस्त्वेमहे। उपप्र-**
यन्तु मरुतः सुदानवः। इन्द्र प्राशूर्भवा सचा, इति।

हे **ब्रह्मणस्पते** मन्त्रस्य पालक मृत्खननदेशं प्रति गन्तुमस्मात्स्थानादुत्तिष्ठ। **देवयन्तो** देवानिच्छन्तो वयं त्वां ब्रह्माणमीमहे प्रार्थयामहे। **सुदानवः** शोभनस्य फलस्य दातारो **मरुतो** देवा **उपप्रयन्तु** समीपे प्रकर्षेण गच्छन्तु। हे **इन्द्र सचाऽस्माभिः सह प्राशूः** प्रकर्षेण शीघ्रगामी भव।

मन्त्रस्य तात्पर्यं दर्शयति—

उत्तिष्ठ ब्रह्मणस्पत इत्याह। ब्रह्मणैव यज्ञस्य शिरोऽच्छैति, इति।
(प्र० ५। अ० २। वि० ११)

ऋत्विजा ब्रह्माख्येनै(णै)व सह यज्ञस्य शिरोरूपं प्रवर्ग्यपात्रमच्छ प्राप्नोति गच्छति।

कल्पः—"आददते कृष्णाजिनमनुनयन्त्यजां पुँच्छगलामश्वं वृषाणमिति प्रैतु ब्रह्मणस्पतिरिति प्राञ्चोऽध्वप्रथमो अभिप्रव्रजन्ति यत्र मृदं खनिष्यन्तः स्युः" इति।

पाठस्तु—

प्रैतु ब्रह्मणस्पतिः। प्र देव्येतु सूनृता। अच्छा वीरं

---

१ क. °भा उत्त°। २ क. °मर्धं च जप इ°। ३ ग. °क्रियते। ४ ख. पूंगछला°। ग. पुंछ°लम°। ५ ग. °मामभि°।

नर्यं पङ्क्तिराधसम्। देवा यज्ञं नयन्तु नः, इति।

ब्रह्मणस्पतिर्मन्त्रस्य पालक ऋत्विग्ब्रह्मा **प्रैतु** प्रथमतो गच्छतु। **सूनृता** यज्ञसंबन्धिनी मन्त्रगतप्रियवाक्यरूपा **देवी** प्रकर्षेणैतु गच्छतु। किमर्थमिति तदुच्यते—**नर्यं** नृभ्यो यजमानेभ्यो हितं **पङ्क्तिराधसं** पाङ्क्तस्य यज्ञस्य साधकं **वीरं** महावीराख्यं पात्रमच्छ प्राप्तुं **देवाः** सर्वे **नोऽस्मदीयं** यज्ञं **नयन्तु**।

प्रथमपादे **प्रैतु**शब्दस्य तात्पर्यं दर्शयति—

प्रैतु ब्रह्मणस्पतिरित्याह। प्रेत्यैव यज्ञस्य शिरोऽच्छैति, इति।
(प्र० ५। अ० २। वि० १२)

प्रेत्यैव प्रथमतो गत्वैव।

द्वितीयपादे सूनृताशब्देन प्रियवाक्ययुक्तस्य यज्ञस्य विवक्षां दर्शयति—

प्र देव्येतु सूनृतेत्याह। यज्ञो वै सूनृता, इति।
(प्र० ५। अ० २। वि० १३)।

तृतीयपादे पङ्क्तिराधसशब्देन धानाकरम्भादिपञ्चहविर्युक्तस्य यज्ञस्य विवक्षां दर्शयति—

अच्छा वीरं नर्यं पङ्क्तिराधसमित्याह (६)। पाङ्क्तो हि यज्ञः, इति।
(प्र० ५। अ० २। वि० १४)

चतुर्थपादे देवा यज्ञं नयन्तु न इत्यस्य तात्पर्यं दर्शयति—

देवा यज्ञं नयन्तु न इत्याह। देवानेव यज्ञनियः कुरुते, इति।
(प्र० ५। अ० २। वि० १५)

यज्ञनियो यज्ञस्य नेतॄन्प्रवर्तकान्।

देवी द्यावापृथिवी अनु मेऽमꣳसाथाम्।

कल्पः—"उत्तरेण मृत्खननं कृष्णाजिनं प्राचीनग्रीवमुत्तरलोमाऽऽस्तीर्य देवी द्यावापृथिवी इति मृत्खननमभिमन्त्रयते" इति। अनु मेऽमꣳसाथामिति मन्त्रशेषः। हे **द्यावापृथिव्यौ मे** मदीयं व्यापारमन्वमꣳसाथां युवयोरनुमतं कुरुतम्।

मन्त्रस्य देवतयोरभ्यनुज्ञायां तात्पर्यं दर्शयति—

देवी द्यावापृथिवी अनु मेऽमꣳसाथामित्याह।
आभ्यामेवानुमतो यज्ञस्य शिरः संभरति, इति।
(प्र० ५। अ० २। वि० १६)

ऋध्यासमद्य। मखस्य शिरः (२)॥

कल्पः—"ऋध्यासमद्येति मृत्खनेऽभ्रिया प्रहृत्य मखस्य शिर इत्युपादाय" इति। **अद्यास्मिन्यज्ञ ऋध्यासं** कर्मणा समृद्धो भूयासम्। इदं मृद्रूपं **मखस्य शिरो** यज्ञस्य शिरःस्थानीयं प्रवर्ग्यपात्ररूपम्।

मन्त्रद्वयं[3] सहैव व्याचष्टे—

ऋध्यासमद्य मखस्य शिर इत्याह। यज्ञो वै मखः।
ऋध्यासमद्य यज्ञस्य शिर इति वावैतदाह, इति।
(प्र० ५। अ० २। वि० १७)

मखाय त्वा। मखस्य त्वा शीर्ष्णे।

कल्पः—"मखाय त्वेति हरति मखस्य त्वा शीर्ष्ण इति कृष्णाजिने[4] निवपति" इति। मृत्तिके त्वां **मखाय** यज्ञार्थं हरामीति शेषः। तथा त्वां **मखस्य** यज्ञस्य **शीर्ष्णे** शिरोरूपप्रवर्ग्यार्थं निर्वपामीति शेषः।

मन्त्रद्वयं सहैव व्याचष्टे—

मखाय त्वा मखस्य त्वा शीर्ष्ण इत्याह। निर्दिश्यैवैनद्धरति (७) इति।
(प्र० ५। अ० २। वि० १८)

निर्दिश्यैव यज्ञार्थमिह हरणनिर्वपणे कथयित्वैवैनन्मृत्स्वरूपं **हरति** निर्वपति चेति द्रष्टव्यम्।

यदुक्तं **सूत्रकारेण**—"एवं द्वितीयं तृतीयं च हरति तूष्णीं चतुर्थं यावतीं मृदं प्रवर्ग्यपात्रेभ्य आप्तां मन्यते" इति। तदिदं विधत्ते—

त्रिर्हरति। त्रय इमे लोकाः। एभ्य एव लोकेभ्यो
यज्ञस्य शिरः संभरति। तूष्णीं चतुर्थꣳ हरति।
अपरिमितादेव यज्ञस्य शिरः संभरति, इति।
(प्र० ५। अ० २ वि० १९)

वक्ष्यमाणसंभारेभ्यो मृदः प्राथम्यं विधत्ते—

मृत्खनादग्रे हरति। तस्मान्मृत्खनः करुण्यतमः। इति।
(प्र० ५। अ० २। वि० २०)

ये च वराहविहतादयः संभारास्तेभ्योऽग्रे प्रथममेव, मृदं खात्वा तस्मान्**मृत्खनाद्**र्तान्मृदं हरेत्। यस्मादयं **मृत्खनः** स्वकीयां वेदनामगणयित्वा यजमानोपकारार्थं मृदं प्रयच्छति। तस्मादयमतिशयेन **करुण्यः** कृपालुः। ततो मृत्खनादेव मृदं हरेत्। न त्वन्यतो यतः कुतश्चिन्मृदानेया।

---

१ क. ख इत्यपा°। २ ग °स्मिन्दिन ऋ°। ३ ख. ग. °यं व्या°। ४ ग. निर्वप°।

इयत्यग्र आसीः।

कल्पः—"एवमितरान्संभारानभिमन्त्रणे विकारः, इयत्यग्र आसीरिति वराहविहतम्" इति। येन प्रकारेण मृदो हरणमुक्तं तेनैव प्रकारेणेतरे सर्वे संभाराः संपादनीयाः। अभिमन्त्रणे तु तत्र तत्र मन्त्रविशेषोऽस्ति। 'देवी द्यावापृथिवी' इति पूर्वत्र मृदोऽभिमन्त्रणम्। इह त्वियत्यग्र आसीरिति मन्त्रः। वराहो दंष्ट्रया यं मृद्विशेषं संपादयति तन्मृत्स्वरूपं वराहविहतम्। हे वराहविहतेयत्यग्र एतावति पुरोदेशे त्वमासीः।

अभिमन्त्रितस्य वराहविहतस्याऽऽहरणे मन्त्रान्दर्शयति—

ऋध्यासमद्य। मखस्य शिरः। मखाय
त्वा। मखस्य त्वा शीर्ष्णे, इति।

एते मन्त्राः पूर्ववद्व्याख्येयाः।

एतेषां वराहविहतसंभारमन्त्राणां तात्पर्यं दर्शयति—

इयत्यग्र आसीरित्याह। अस्यामेवाच्छम्ब-
× ट्कारं यज्ञस्य शिरः संभरति, इति।
(प्रपा० ५। अनु० २। विभा० २१)

यावद्वराहविहतमस्ति, एतावती सर्वा भूमिर्वराहेणोद्धृतत्वात्। एतच्चाऽऽधानब्राह्मणे[1]—'स वराहो रूपं कृत्वा' इत्यादिना विस्पष्टमाम्नातम्। अतो वराहविहतसंभारेणास्यामेव सर्वस्यामपि पृथिव्यामच्छम्बट्कारमल्पोऽप्यंशो व्यर्थो यथा न भवति तथा कृत्वा यज्ञस्य शिरः संपादितं भवति।

कल्पः—"देवीर्वभ्रीरिति वल्मीकवपाम्" इति। अभिमन्त्रयत इति शेषः। पाठस्तु—

देवीर्वभ्रीरस्य भूतस्य प्रथमजा ऋतावरीः, इति।

वल्मीकस्य निष्पादिकाः क्षुद्रजन्तुस्वरूपा वभ्रयः। हे वभ्रयो देव्यो यूयमस्य भूतस्य प्राणिजातस्य प्रथमजाः प्रथमत उत्पन्नाः। ऋतावरीर्यज्ञवत्यः संररूपेण यज्ञनिष्पादकत्वात्तादृश्यो भवथेति शेषः।

अनेन मन्त्रेणाभिमन्त्रितायाः[2] वल्मीकवपायाः संभरणमन्त्रानाह[3]—

ऋध्यासमद्य। मखस्य शिरः (३) मखाय

× अच्छं वषट्कारमिति ग. पुस्तके शोधितः पाठः।

१ क. मन्त्रे वि°। २ क. ग. °संभरणेनास्या°। ३ ग. °तान्वल्मी°।

त्वा । मखस्य त्वा शीर्ष्णे, इति ।

पूर्ववद्व्याख्येयम् ।

वल्मीकवपायाः संभरणं विधत्ते—

ऊर्जं वा एतꣳ रसं पृथिव्या उपदीका उद्वहन्ति (८) । यद्वल्मीकम् । यद्वल्मीकवपासंभारो भवति । ऊर्जमेव रसं पृथिव्या अवरुन्धे । अथो श्रोत्रमेव । श्रोत्रꣳ ह्येतत्पृथिव्याः । यद्वल्मीकः, इति ।

(प्रपा० ५ । अनु० २ । विभा० २२)

वल्मीकं यद्विद्यते तदेतदुपदीकाः पूर्वोक्ता वय्याः, **पृथिव्याः** सकाशादन्नहेतुमेव **रसं** मृदमुद्धृत्य निष्पादयन्ति । अतो वल्मीकवपायाः संभरणेन भूमिसारमूर्जमेव प्राप्नोति । अपि च कर्णशष्कुल्याकारसाम्याद्वल्मीको भूमेः **श्रोत्रमेव** । तस्माद्वल्मीकवपा प्रशस्ता ।

श्रोत्रवेदनं प्रशंसति—

अबधिरो भवति । य एवं वेद, इति ।

(प्रपा० ५ । अनु० २ । विभा० २३)

इद्रस्यौजोऽसि ।

कल्पः—" इद्रस्यौजोऽसीति पूतीकान् " इति । हे पूतीकसमूहेन्द्रस्यौजो बलमसि । अनेन मन्त्रेणाभिमन्त्रितानां पूतीकानां संभरणमन्त्रानाह—

ऋध्यासमद्य । मखस्य शिरः । मखाय त्वा । मखस्य त्वा शीर्ष्णे, इति ।

पूर्ववद्व्याख्येयम् ।

पूतीकसंभरणं विधत्ते—

इन्द्रो वृत्राय वज्रमुदयच्छत् । स यत्र यत्र पराक्रमत (९) । तन्नाध्रियत । स पूतीकस्तम्बे पराक्रमत । सोऽध्रियत । सोऽब्रवीत् । ऊतिं वै मे धा इति । तदूतीकानामूतीकत्वम् । यदूतीका भवन्ति । यज्ञायैवोतिं दधति, इति ।

(प्रपा० ५ । अनु० २ । विभा० २४)

पुरा कदाचिदिन्द्रो वृत्रवधार्थं **वज्रमुद्यम्य** प्रेरितवान् । तदानीं **स** इन्द्रो **यत्र यत्र देशे पराक्रमत** वज्रप्रक्षेपलक्षणं पराक्रमं कृतवांस्तत्र सर्वत्र **नाध्रियत** पलायनपरो

१ क. ख. °कर्सं° । २ ग. अथैनं । ३ ग. पूतिक° ।

वृत्रस्तेन वज्रेण धृतः प्रहृतो नाऽऽसीत्। ततः स इन्द्रो विचार्य पूतीकस्तम्बसमीपे कदाचिदवस्थितं वृत्रं प्रति पराक्रमत वज्रप्रक्षेपलक्षणं पराक्रमं कृतवान्। तदानीं स वृत्रः पूतीकस्तम्बेनावरुद्धमार्गः पलायितुमशक्तस्तेन वज्रेणाध्रियत प्रहृतोऽभूत्। तदानीं पारितुष्टः स इन्द्रोऽब्रवीत्पूतीकस्तम्बं प्रत्येवमब्रवीत्। हे पूतीकस्तम्ब म ऊतिं मदीय-पराक्रमरक्षां धा धृतवानसि इत्यूतीधारकत्वात्तेषां * पूतीकानामूतीकेति नाम संपन्नम्। तेषां संभरणे सति यज्ञस्य रक्षां ते संपादयन्ति।

अग्निजा असि प्रजापते रेतः।

कल्पः— "अजलोमानि कृष्णाजिनलोमानि च संसृज्याग्निजा असि प्रजापते रेतः" इति। हे द्विविधलोमसंघ त्वमग्निजा असि। आग्नेयी वा एषा यदजेत्यजाया आग्नेयत्वश्रवणात्, अग्निर्देवेभ्यो निलायत कृष्णो रूपं कृत्वेति श्रवणाच्चोभयस्याग्नित्वमभिप्रेत्य तल्लोम्नामग्निजत्वमुक्तम्। महावीरदार्ढ्यहेतुत्वात्प्राजापत्ये(त्य)सृष्टौ लोम्नां सारत्वम्।

अनेनाभिमन्त्रितस्य द्विविधलोमसंघस्य संभरणमन्त्रानाह—

ऋध्यासमद्य। मखस्य शिरः (४)।
मखाय त्वा। मखस्य त्वा शीर्ष्णे, इति।

पूर्ववद्व्याख्येयम्।

प्रजापते रेत इत्यनेन प्रजापतिसृष्टाया गायत्र्या रसोऽजां प्राविशत्, स एव विवक्षित इत्येतद्दर्शयति—

अग्निजा असि प्रजापते रेत इत्याह। य एव रसः
पशून्प्राविशत् (१०)। तमेवावरुन्धे, इति।
(प्रपा० ५। अनु० २। विभा० २५)

पूर्वोक्तानां मृत्तिकावराहविहतवल्मीकवपापूतीकाजकृष्णाजिनलोमरूपाणां संभाराणां पञ्चसंख्यां प्रशंसति—

पञ्चैते संभारा भवन्ति। पाङ्क्तो यज्ञः। यावा-
नेव यज्ञः। तस्य शिरः संभरति, इति।
(प्रपा० ५। अनु० २। विभा० २६)

धानाकरम्भादिहविष्पञ्चकयोगात्पाङ्क्तो यज्ञो यावानस्ति तस्य सर्वस्य शिरः संभारगतया पञ्चसंख्यया संपादितं भवति।

---

* मूलस्थोतीकानामिति पदस्य व्याख्यानमेतदिति भाति।

---

१ ख. पूतिक°। २ ख. पूतिक°। ३ ख. °त्पूतिक°। ४ ग. °कानां पूतीक इति।

एतेषां संभारद्रव्याणां कृष्णाजिने संभरणं विधत्ते—

यद्ग्राम्याणां पशूनां चर्मणा संभरेत् । ग्राम्यान्पशून्शुचाऽर्पयेत् । कृष्णाजिनेन संभरति । आरण्यानेव पशून्शुचाऽर्पयति । तस्मात्समावत्पशूनां प्रजायमानानाम् (११) । आरण्याः पशवः कनीयाꣳसः । शुचा ह्यताः, इति ।

(प्रपा० ५ । अनु० २ । विभा० २७)

ग्राम्याणां गवादिपशूनां **चर्मणा** संभरणे सति **तान्पशून्शुचा** शोकेन रोगादिजनितेन **योजयेत्** । तन्मा भूदिति **कृष्णाजिनेनैव** सर्वं संभरणीयम्, कृष्णमृगस्यारण्यजत्वादारण्यानेव पशून्महावीरजनितेन संतापेन योजयति । यस्मादारण्येनैव संभरणादारण्याः पशवः शुचा योजिताः, **तस्मात्समावत्प्रजायमानानां** साम्येनोत्पद्यमानानामपि द्विविधानां **पशूनां** मध्य **आरण्या** एव **पशवः** कनिष्ठाः । न हि जना गवाश्वादिषु यावन्तमादरं तावन्तं कृष्णाजिनमृगेषु कुर्वन्ति ।

कृष्णाजिनस्य सलोमके भागे संभरणं विधत्ते—

लोमतः संभरति । अतो ह्यस्य मेध्यम्, इति ।

(प्रपा० ५ । अनु० २ । विभा० २८ ।)

लोमतो लोमवति प्रदेशे संभरेत् । **अतो** लोम[व]तः प्रदेशादस्य कृष्णाजिनस्य **मेध्यं** यागयोग्यः संभारः संपद्यते ।

कल्पः—"आयुर्धेहि प्राणं धेहीत्यश्वेनावघ्राप्य" इति । पाठस्तु—

आयुर्धेहि प्राणं धेहि । अपानं धेहि व्यानं धेहि । चक्षुर्धेहि श्रोत्रं धेहि । मनो धेहि वाचं धेहि । आत्मानं धेहि प्रतिष्ठां धेहि । मां धेहि मयि धेहि, इति ।

हे, अश्व मृदमाघ्राय यजमानस्याऽऽयुरादीन्संपादय । **मां** यजमानं **धेहि** पोषय । अपेक्षितं धनादिकं **मयि** यजमाने **धेहि** स्थापय ।

यदुक्तं सूत्रकारेण—"बहव आर्याः परिगृह्य हरन्त्युत्तरेण विहारमुद्धते चोक्षिते सिक्तोपोप्ते परिश्रिते निदधति" इति । तदेतदार्यैर्नयनमार्याणां च बहुत्वं स्थापनदेशविशेषं च क्रमेण विधत्ते—

परिगृह्याऽऽयन्ति । रक्षसामपहत्यै । बहवो हरन्ति । अपचिति-

---

१ क. समेध्यं ।

मेवास्मिन्दधति। उद्धते सिकतोपोहे परिश्रिते निदधति शान्त्यै, इति।

(प्रपा० ५। अनु० २। विभा० २९)

आयन्त्यागच्छेयुः। आर्याणां परिग्रहणेन रक्षांस्यपहतानि भवन्ति। तेषां बहुत्वेनास्मिन्द्रव्ये पूजा कृता भवति। भूमेरुद्धननेन सिकतावापेन परितस्तिरोधानकरणेन च तस्मिन्देशेऽवस्थापितस्य द्रव्यस्योपद्रवपरिहाररूपा शान्तिर्भवति।

मधु त्वा मधुला करोतु।

कल्पः—"मधु त्वा मधुला करोत्विति मदन्तीभिरुपसृजति" इति[2]। हे संभारसमूहरूप द्रव्य **मधु त्वा** पूर्वमपि मधुरं महावीरनिष्पादनयोग्यं मृदुरूपं त्वामयं मदन्तीसंसर्गः पुनरपि **मधुला** माधुर्ययुक्तं[3] सौकार्य्यं(कुमार्य)युक्तं **करोतु**।

अनेन मन्त्रेण साध्यं मदन्तीमेलनं विधत्ते—

मदन्तीभिरुपसृजति (१२)। तेज एवास्मिन्दधाति, इति।

(प्रपा० ५। अनु० २। विभा० ३०)

तप्ता आपो मदन्त्यः, तन्मेलनादस्मिन्द्रव्ये तेजः संपादितं भवति।

यद्यपि जलमेलनादेव महावीरनिष्पादनसामर्थ्यरूपं तेजः संपद्यते। तथाऽपि मन्त्रेणैव सामर्थ्यातिशयाय मन्त्रपाठ इत्येतद्दर्शयति—

मधु त्वा मधुला करोत्वित्याह। ब्रह्मणैवास्मिन्तेजो दधाति, इति।

(प्रपा० ५। अनु० २ विभा० ३१)

अथास्मिन्द्रव्ये मेलयितव्यं द्रव्यान्तरं विधत्ते—

यद्ग्राम्याणां पात्राणां कपालैः सꣳसृजेत्। ग्राम्याणि पात्राणि शुचाऽर्पयेत्। अर्मकपालैः सꣳसृजति। एतानि वा अनुपजीवनीयानि। तान्येव शुचाऽर्पयति, इति।

(प्रपा० ५। अनु० २। विभा० ३२)

गृहेषु पाकाद्यर्थानि भाण्डानि ग्राम्यपात्राणि तदीयकपालैः संसर्गे सति तानि **शुचा** शोकेन स(भ)ङ्गरूपेण योजितानि भवन्ति। तन्मा भूदित्यर्मकपालैर्मिश्रयेत। अर्मशब्देन चिरंतने जीर्णग्रामदेशेऽवस्थिता भाण्डांशा उच्यन्ते। तानि प्राणिभिरुपजीवितुमयोग्यान्यतस्तेषां शुचा योजनेऽपि न कश्चिद्बाधः।

द्रव्यान्तरं विधत्ते—

शर्कराभिः सꣳसृजति धृत्यै। अथो शंत्वाय, इति।

(प्रपा० ५। अनु० २। विभा० ३३)

---

१ ग. °पसꣳसृ°। २ क. ··. °ति। सं°। ३ क. ख. °क्तं क°। ४ क. ख. °शे भा°।

शर्कराः क्षुद्रपाषाणाः, तत्संसर्गे सति महावीरस्य **धृतिर्दार्ढ्यं** भवति । अपि च **शं** सुखं कुर्वन्तीति 'शर्करानामनिरुक्तेस्तद्योगः **शंत्वाय** सुखसिद्धये भवति । एतच्चाऽऽधानप्रकरणे समाम्नातम्—' शं वै नोऽभूदिति। तच्छर्कराणाꣳ शर्करत्वम्' इति ।

द्रव्यान्तरं विधत्ते—

अजलोमैः सꣳसृजति । एषा वा अग्नेः प्रिया तनूः ।
यदजा । प्रिययैवैनं तनुवा सꣳसृजति। अथो तेजसा, इति।
(प्रपा० ५ । अनु० २ । विभा० ३४)

अजाग्न्योः प्रजापतिमुखजत्वेन सोदरत्वात्प्रियत्वम् । अपि चाग्नेः स्वेनैव तेजोरूपत्वात्**तेजसा** द्रव्यं संसृष्टं भवति—

द्रव्यान्तरं विधत्ते—

कृष्णाजिनस्य लोमभिः सꣳसृजति । यज्ञो वै
कृष्णाजिनम्। यज्ञेनैव यज्ञꣳ सꣳसृजति, इति।
(प्रपा० ५ । अनु० २ । विभा० ३५)

अवघातप्रस्तावे यज्ञो देवेभ्यो निलायत कृष्णो रूपं कृत्वेत्युक्तत्वात्कृष्णाजिनस्य यज्ञत्वम् । तल्लोमरूपेण **यज्ञेनैव** महावीरद्रव्यरूपो **यज्ञः संसृष्टो** भवति ।

याज्यायै न जुहुयादविशद्वेणुः शान्त्यै पङ्क्तिराधसमित्याह हरति दिहन्ति
पराक्रमताविशत्प्रजायमानानाꣳ सृजति शंत्वायाष्टौ च ॥
इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके पञ्चमप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

महावीरनिर्माणाय देशविशेषं ब्राह्मणगततृतीयानुवाके विधत्ते—

पारिश्रिते करोति । ब्रह्मवर्चसस्य परिगृहीत्यै, इति ।
(प्रपा० ५ । अ० ३ । विभा० १)

योऽयं देशः पारिश्रितः कटादिभिरावृतस्तस्मिन्**परिश्रिते** महावीरं **करोति** । तदेतद्ब्रह्मवर्चसपरिग्रहाय भवति ।

तत्र नियमं कंचिद्विधत्ते—

न कुर्वन्नभिप्राण्यात् । यत्कुर्वन्नभिप्राण्यात् । प्राणाञ्शुचार्पयेत् । अपहाय प्राणिति । प्राणानां गोपीथाय, इति ।
(प्रपा० ५ । अनु० ३ । विभा० २)

सोऽयं तदानीं **नाभिप्राण्यात्**तदाभिमुख्येन श्वासं न कुर्यात् । तत्करणे स्वकीयाः **प्राणा** दुःखेन योजिता भवन्ति । तस्मान्मुखमपहाय परतो नीत्वा श्वासं कुर्यात् । **तच्च प्राणानां** रक्षणाय भवति ।

नियमान्तरं विधत्ते—

न प्रवर्ग्यं चाऽऽदित्यं चान्तरेयात् । यदन्तरेयात् । दुश्चर्मा स्यात् ।
(१) । तस्मान्नान्तराग्न्यम् । आत्मनो गोपीथाय, इति ।
(प्रपा० ५ । अनु० ३ । विभा० ३)

यत्र प्रवर्ग्यपात्राणि तिष्ठन्ति तत्र सूर्यश्चेत्प्राच्यां वसेत्तदानीं स्वयं प्रतीच्यां तिष्ठेत् । सूर्यस्य प्रतीच्यामवस्थाने स्वयं प्राच्यां तिष्ठेत् । एवं सति प्रवर्ग्यादित्ययोर्मध्येऽन्तरायो न भवेत् । अन्तराये तु कुष्ठरोगी स्यात् । अतः स्वशरीररक्षार्थमन्तरायं न कुर्यात् ।

मृत्पात्रनिर्माणे साधनं विधत्ते—

वेणुना करोति । तेजो वै वेणुः । तेजः
प्रवर्ग्यः । तेजसैव तेजः समर्धयति, इति ।
(प्रपा० ५ । अनु० ३ । विभा० ४)

कुम्भनिर्माणार्थं कुम्भकाराः काष्ठेन यं व्यापारं कुर्वन्ति तमत्र वेणुना कुर्यान्नतु दारुणा । " अग्नेर्देवेभ्यो निलायत स वेणुं प्राविशत् " इति श्रुत्या वेणोस्तेजस्त्वं तत्घृताधारत्वात्प्रवर्ग्यपात्रमपि तेजः । अतो वेणुरूपेण तेजसा प्रवर्ग्यरूपं तेजः समृद्धं करोति ।

मखस्य शिरोऽसि (५) ।

कल्पः—" संपिष्टच मृदं मखस्य शिरोऽसीति पिण्डं कृत्वा " इति । हे मृत्पिण्ड त्वं यज्ञस्य शिरःस्थानीयोऽसि ।

प्रवर्ग्यार्थस्य द्रव्यस्य शिरःस्थानीयत्वं विशदयति—

मखस्य शिरोऽसीत्याह । यज्ञो वै मखः । तस्यै-
तच्छिरः । यत्प्रवर्ग्यः (२) । तस्मादेवमाह, इति ।
(प्रपा० ५ । अनु० ३ । विभा० ५)

प्रथमानुवाके धनुष्कोट्योच्छिन्नं यज्ञपुरुषस्य शिरो द्यावापृथिव्योरनुवर्तनात्प्रवर्ग्यनाम संपन्नमित्युक्तम् । तस्मान्मखस्य शिरोऽसीतिमन्त्रोक्तमुपपन्नम् ।

यज्ञस्य पदे स्थः ।

कल्पः—" यज्ञस्य पदे स्थ इत्यङ्गुष्ठाभ्यां निगृह्य " इति । आर्द्रस्य पिण्डस्योपर्यङ्गुष्ठद्वयग्रहेण निष्पन्नबिन्दुद्वयाकारे हे लाञ्छने युवां यज्ञस्य पादौ भवथः ।

एतयोर्यज्ञपादत्वे शास्त्रप्रसिद्धिं दर्शयति —

यज्ञस्य पदे स्थ इत्याह । यज्ञस्य ह्येते पदे । अथो प्रतिष्ठित्यै, इति ।
(प्रपा० ५ । अनु० ३ । विभा० ६)

---

१ क. रक्षणार्थं । २ क सम्प्रक्षिप्य । ख. संप्रक्ष्य ।

समानरूपत्वेन द्वित्वेन च पादसादृश्यादित्थं कर्तव्यम्। अपि च पादद्वयसादृश्येन प्रतिष्ठार्थमेतद्भवति।

कल्पः—" महावीरं करोति त्र्युद्धिं पञ्चोद्धिमपरिमितोद्धिं वा प्रादेशमात्रमूर्ध्वसानुमुपरिष्टादासेचनवन्तं मध्ये संनतं वा यैन्यप्रकारं गायत्रेण त्वा छन्दसा करोमीति प्रथमं त्रैष्टुभेनेति द्वितीयं जागतेनेति तृतीयमपि वा सर्वैरेकैकम्" इति। पाठस्तु—

गायत्रेण त्वा छन्दसा करोमि। त्रैष्टुभेन त्वा छन्दसा करोमि। जागतेन त्वा छन्दसा करोमि, इति।

हे प्रथम महावीर त्वां गायत्रच्छन्दोदेवतासामर्थ्येन निष्पादयामि। एवं द्वितीयतृतीययोर्महावीरयोस्त्रैष्टुभजागतमन्त्रौ व्याख्येयौ।

मन्त्रेषु गायत्रादिपदानामुपयोगं दर्शयति—

गायत्रेण त्वा छन्दसा करोमीत्याह। छन्दोभिरेवैनं करोति, इति।

(प्रपा० ५। अनु० ३। विभा० ७)

एतेषां मन्त्राणां पाठेन महावीरस्य च्छन्दोदेवताभिर्निष्पादनं भवति।

एकैकस्मिन्महावीरे कक्ष्यात्रयं विधत्ते—

त्र्युद्धिं करोति। त्रय इमे लोकाः। एषां लोकानामाप्त्यै, इति।

(प्रपा० ५। अनु० ३। विभा० ८)

भाण्डस्योपरि भाण्डान्तरप्रक्षेपे यादृश आकारो भवति तादृश आकार उद्धिरित्युच्यते। ऊर्ध्वाधोभावेनावस्थितभाण्डत्रयवत्त्रिविधा उदध्यो(द्धयो) यस्य महावीरस्य सोऽयं त्र्युद्धिः। तत्र त्रित्वसाम्याल्लोकत्रयप्राप्तिः पूर्वं व्याख्याता।

छन्दःप्रतिपादकैर्मन्त्रैस्तन्निष्पादनं विधत्ते—

छन्दोभिः करोति (३)। वीर्यं वै छन्दाꣳसि। वीर्येणैवैनं करोति, इति।

(प्रपा० ५। अनु० ३। विभा० ९)

वीर्यप्रदत्वाद्गायत्र्यादिच्छन्दसां वीर्यरूपत्वम्।

मखस्य रास्नाऽसि।

कल्पः—"मखस्य रास्नाऽसीत्युपबिलं रास्नां करोति" इति।

बिलस्य समीपे वर्तमान हे वलयाकर त्वं यज्ञस्य **रास्ना** रँशनाऽसि। यथा काञ्चीदाम कण्ठाभरणं वा तद्वत्।

---

१ ख. °यर्ध्यं प्र°। २ ग. °रस्येदं छ°। ३ ग. °तादिभि°। ४ ग. °ष्यादितं भ°। ५ ग. °मिः ॥ पू°। ६ ग °ष्यातैश्छन्दः°। ७ ग. रसना°।

अदितिस्ते बिलं गृह्णातु। पाङ्क्तेन छन्दसा।

कल्पः—"अदितिस्ते बिलं गृह्णात्विति वेणुपर्वणा बिलं करोति" इति। **पाङ्क्तेन च्छन्दसेति** मन्त्रशेषः। हे महावीर पङ्क्तिच्छदोदेवतया सहादितिर्भूमिदेवी **ते** तव **बिलं गृह्णातु** स्वी करोतु।

तमेतं मन्त्रं विनियुङ्क्ते—

यजुषा बिलं करोति व्यावृत्त्यै, इति।

(प्रपा० ५। अनु० ३। विभा० १०)

लौकिकेषु मृत्पात्रेषु मन्त्रमन्तरेणैव कुम्भकारा **बिलं** कुर्वन्ति। अत्र तु **मन्त्रेणेति व्यावृत्तिः**।

महावीरस्य प्रादेशपरिमाणं हस्ताभिनयेन विधत्ते—

इयन्तं करोति। प्रजापतिना यज्ञमुखेन संमितम्, इति।

(प्रपा० ५। अनु० ३। विभा० ११)

यज्ञपुरुषस्य शिरश्चिबुकयोर्मध्यवर्ति प्रादेशमात्रम्। प्रजापतिश्च **वैश्वानरविद्यायां** प्रादेशमात्रत्वेनोपास्यः। यस्त्वेतदेवं प्रादेशमात्रमिति **च्छन्दोगैराम्नातत्वात्**। **अतः** प्रादेशमात्रो महावीरः **प्रजापतिना यज्ञमुखेन** च सदृशो भवति।

तदेव परिमाणमनूद्य प्रशंसति—

इयन्तं करोति। यज्ञपरुषा। संमितम्, इति।

(प्रपा० ५। अनु० ३। विभा० १२)

यज्ञस्य परुरङ्गमैन्द्रवायवादिग्रहपात्रं तेन सादृश्यं प्रादेशमात्रत्वे **संपद्यते**। पुनरप्यनूद्य प्रशंसति—

इयन्तं करोति। एतावद्वै पुरुषे वीर्यम्। वीर्यसंमितम् (४), इति।

(प्रपा० ५। अनु० ३। विभा० १३)

पुरुषशरीरे **वीर्यं** दर्शनश्रवणादिसामर्थ्यं प्रादेशपरिमिते मुखे विद्यते। **अतो वीर्य**-सादृश्यमेतस्य भवति।

अथ पारिमाणाभावरूपं पक्षान्तरं विधत्ते—

अपरिमितं करोति। अपरिमितस्यावरुद्ध्यै, इति।

(प्रपा० ५। अनु० ३। विभा० १४)

पारिमाणनियत्यभावेनापि निमित्तेन बहुलं फलं संपद्यते।

---

१ ख. ग. °मिर्देवी। २ ग. प्रजापत्यत्वे°। ३ ग. °देवं प°। ४ ग. यतः। ५ ग. °निमित्तत्व°

यदुक्तं सूत्रकारेण—' उपबिलं ग्रीवां करोति ' इति, तदत्र विधत्ते—

परिग्रीवं करोति धृत्यै, इति ।

(प्रपा० ५ । अनु० ३ । विभा० १५)

ग्रीवायाः पारितः **परिग्रीवं** तत्र वलयाकारो धारणायोपयुज्यते ।

सूर्यस्य हरसा श्राय ।

कल्पः—" सूर्यस्य हरसा श्रायेत्युत्तरतः सिकतासु प्रतिष्ठाप्य " इति । हे महावीर **सूर्यस्य हरसा** तेजसाऽऽतपेन **श्रायं** पक्वः शुष्को भव ।

मन्त्रस्य स्पष्टार्थतां दर्शयति—

सूर्यस्य हरसा श्रायेत्याह । यथा यजुरेवैतत्, इति ।

(प्रपा० ५ । अनु० ३ । विभा० १६)

मखोऽसि (६) ॥

कल्पः—" मखोऽसीत्यनुवीक्षते " इति । हे महावीर त्वं यज्ञसाधनत्वान्**मखो** यज्ञस्वरूपोऽसि ।

पते शिरः ऋतावरीरुध्यासमद्य मखस्य शिरः शिरः

शिरोऽसि नवं च ॥

इयति देवीरिन्द्रस्यौजोऽस्यग्निजा अस्यायुर्धेहि प्राणं पञ्च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठके

द्वितीयोऽनुवाकः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयारण्यकभाष्ये चतुर्थप्रपाठके द्वितीयोऽनुवाकः ॥ २ ॥

अथ चतुर्थे तृतीयेऽनुवाकः ।

द्वितीये महावीरनिर्माणमुक्तं तृतीये तत्संस्कारा उच्यन्ते । कल्पः—"वृष्णो अश्वस्येति सकृद्गार्हपत्ये प्रदीप्य प्रथमकृतं महावीरं शफाभ्यां परिगृह्य धूपयति वृष्णो अश्वस्य निष्पदसि " इति । पाठस्तु—

वृष्णो अश्वस्य निष्पदसि । वरुणस्त्वा धृतव्रत

आधूपयतु । मित्रावरुणयोर्ध्रुवेण धर्मणा, इति ।

---

१ ग. °य कृष्णशुक्ल भ° ।

हे महावीर त्वं **वृष्णः** सेचनसमर्थस्याश्वस्य संबन्धि **निष्पन्निःसृतं यच्छकृत्**-द्योगेन तद्रूपोऽसि। तादृशं त्वां **धृतव्रतः** स्वीकृतनियमो वरुणो देव **आधूपयतु सर्पतो** धूपितं करोतु। **मित्रावरुणयोः** संबन्धी ध्रुवो धर्मास्थितः पुण्यविशेषस्तद्रूपेण **द्रव्येण धूपयत्वित्यन्वयः**।

अनेन मन्त्रेण साध्यं धूपनं विधत्ते—

अश्वशकेन धूपयति। प्राजापत्यो वा अश्वः सयोनित्वाय, इति।

(प्रपा० ५। अनु० ३। विभा० १७)

शकशब्देन शकृदुच्यते। **अश्वस्य** प्रजापत्यक्षिजन्यत्वात्**प्राजापत्यत्वम्**। अतोऽश्वसंबन्धिधूपेन सर्वकारणभूतप्रजापतिसंबन्धसिद्धेः **सयोनित्वं** भवति।

मन्त्रोक्तमश्वं शकृच्चाऽऽदित्यरूपेण च्छन्दोरूपेण च प्रशंसति—

वृष्णो अश्वस्य निष्पदसीत्याह। असौ वा
आदित्यो वृषाऽश्वः तस्य च्छन्दाँ[1]सि निष्पत्।
(५)। छन्दोभिरेवैनं धूपयति, इति।

(प्रपा० ५। अनु० ३। विभा० १८)

कल्पः—"अग्रेण गार्हपत्यमवटं खात्वा लोहितपचनीयैः संभारैरवस्तीर्य तेषु महावीरानुपावहरति, लोहितपचनीयैः संभारैः प्रच्छाद्य गार्हपत्ये मुञ्जानादीप्योपोषत्यर्चिषे त्वेत्येतैः प्रतिमन्त्रं प्रतिदिशमपि वा सर्वैः सर्वतः" इति। पाठस्तु—

अर्चिषे त्वा। शोचिषे त्वा।
ज्योतिषे त्वा। तपसे त्वा, इति।

अर्चिरादयः शब्दा ज्वालाविशेषवाचिनः। हे महावीर त्वामर्चिरादिभ्यः समर्पयामि।

एतैर्मन्त्रैर्यजमानस्य शरीरकान्तिः संपद्यत इति दर्शयति—

अर्चिषे त्वा शोचिषे त्वेत्याह। तेज एवास्मिन्दधाति, इति।

(प्रपा० ५। अनु० ३। विभा० १९)

कल्पः—"पच्यमानान्मैत्र्योपचरत्यभीमं महिना दिवमित्युत्तरया वा" इति। तयोरुभयोर्ऋचोः पाठस्तु—

अभीमं महिना दिवम्। मित्रो बभूव सप्रथाः। उत
श्रवसा पृथिवीम् (१)। मित्रस्य चर्षणीधृतः। श्रवो
देवस्य सानसिम्। द्युम्नं चित्रश्रवस्तमम्, इति।

---

१ ग. °स्य प्राजापत्यादिन्°। २ ग. °न्दाꣳसीति नि°। ३ क. मुञ्जानादीप्य°।

दिवं दीप्यमानमिमं महावीरमभिलक्ष्य **मित्रो** देवः **सप्रथा** विस्तारसहितो बभूव। **स्वकीयां मैत्रीं** विस्तृतवान्। **उतापि** च **पृथिवीमभिलक्ष्य श्रवसा** कीर्त्या **सप्रथा बभूव**। **अस्यां सर्वस्यां** पृथिव्यां महावीरस्य कीर्तिं **विस्तृतवानित्यर्थः**। **दिवं दिवि द्युलोक इति वा व्याख्येयम्**। **चर्षणीधृतो** मनुष्यान्मैत्र्या धारयतो **मित्रस्य देवस्य सानसिं** दानशीलं **श्रवः** श्रवणं कीर्तिरूपं सर्वे वदन्तीति शेषः। **द्युम्नं** मित्रेण दत्तं धनं **चित्रश्रवस्तमं**मतिशयेन विचित्रकीर्तियुक्तं वर्तते।

मन्त्रयोः फलं दर्शयति—

वारुणोऽभीद्धः। मैत्रियोपैति शान्त्यै, इति।

(प्रपा० ९। अनु० ३। विभा० २०)

सिद्ध्यै त्वा।

कल्पः—"पक्वेषु सिद्ध्यै त्वेति धृष्टीमादाय[1] भस्मापोह्य" इति। हे महावीर त्वां **सिद्ध्यै** समीचीनस्वरूपसिद्ध्यै महावीरगतभस्मापोहनसिद्ध्यर्थं त्वां स्वी करोमीति **शेषः**।

मन्त्रस्य स्पष्टार्थतां दर्शयति—

सिद्ध्यै त्वेत्याह। यथा यजुरेवैतत्, इति।

(प्रपा० ९। अनु० ३। विभा० २१)

कल्पः—"प्रथमकृतं महावीरं शफाभ्यां परिगृह्योद्वासयति देवस्त्वा सवितोद्वपतु" इति। पाठस्तु—

देवस्त्वा सवितोद्वपतु। सुपाणिः
स्वङ्गुरिः। सुबाहुरुत शक्त्या, इति।

हे महावीर त्वां **सविता** देवः स्वशक्त्योद्वपतु। इतोऽवटादूर्ध्वं नयतु। कीदृशः **सविता सुपाणिः** शोभनाभ्यामुद्यमनकुशलाभ्यां पाणिभ्यां युक्तः। **स्वङ्गुरिः** शोभनाभिरुद्वपनक्षमाभिरङ्गुलीभिर्युक्तः। **उतापि** च **सुबाहुः** शोभनाभ्यां बाहुभ्यां **युक्तः**। **पाणिशब्देन** मणिबन्धादूर्ध्वमङ्गुल्याधारभाग उच्यते। **बाहुशब्देन** मणिबन्धादर्वाचीनभागः।

सवितृशब्दस्य तात्पर्यं दर्शयति—

देवस्त्वा सवितोद्वपत्वित्याह। सवितृप्रसूत
एवैनं ब्रह्मणा देवताभिरुद्वपति, इति।

(प्रपा० ९। अनु० ३। विभा० २२)

---

१ ख. धृष्टिमा°। २ क. °मनानुकूलकु°। ख. °मनानुकूला°।

सवित्रा प्रेरितः सन्मन्त्रेण देवताभिश्च सहोद्वपनं कृतवान्भवति।

कल्पः—"उद्वास्यापद्यमानः पृथिव्यामाशा दिश आपृणेत्युत्तरतः सिकतासु प्रतिष्ठाप्य" इति। पाठस्तु—

अपद्यमानः पृथिव्याम्। आशा दिश आपृण।

उत्तिष्ठ बृहन्भव (२)। ऊर्ध्वस्तिष्ठ ध्रुवस्त्वम्, इति।

हे महावीर त्वं **पृथिव्यां** भूमावपद्यमानोऽसि। भङ्गमप्राप्नुवन्**नाशा दिशः** प्राच्याद्या मुख्यदिश आग्नेय्याद्या अमुख्यदिशश्चाऽऽ**पृण** सर्वतः पूरय, सर्वत्र प्रसिद्धो भव। **उत्तिष्ठो**त्सहस्व। **बृहन्भव** स्वव्यापारेण प्रख्यातो भव। इह सिकतासूर्ध्वमुखः स्थिरस्त्वं तिष्ठ।

दिश आपृणेत्यस्य तात्पर्यं दर्शयति—

अपद्यमानः पृथिव्यामाशा दिश आपृणेत्याह (६)।
तस्मादग्निः सर्वा दिशोऽनुविभाति, इति।

(प्रपा० ५। अनु० ३। विभा० २३)

यस्मान्महावीरस्य सर्वदिङ्मू(क्पू)र्तिः प्रार्थ्यते **तस्मान्महावीरेणाभिन्नोऽग्निः** स्वतेजसा **सर्वा दिशः** प्रकाशयति—

ऊर्ध्वस्तिष्ठेत्यस्य तात्पर्यं दर्शयति—

उत्तिष्ठ बृहन्भवोर्ध्वस्तिष्ठ ध्रुवस्त्वमित्याह प्रतिष्ठित्यै, इति।

(प्रपा० ५। अनु० ३। विभा० २४)

कल्पः—"सूर्यस्य त्वा चक्षुषाऽन्वीक्ष इत्यनुवीक्षते" इति। पाठस्तु—

सूर्यस्य त्वा चक्षुषाऽन्वीक्षे। ऋजवे त्वा।

साधवे त्वा। सुक्षित्यै त्वा भूत्यै त्वा, इति।

हे महावीर त्वां **सूर्यस्य** चक्षुषाऽहमनुक्रमेण **वीक्षे**। **ऋजव** आर्जवयुक्तायै भूम्यै त्वामीक्षे। **साधवे** समीचीनायान्तरिक्षाय त्वामीक्षे। **सुक्षित्यै** शोभननिवासाय द्युलोकाय त्वामीक्षे। **भूत्या** ऐश्वर्ययुक्ताभ्यो दिग्भ्यस्त्वामीक्षे। त्वद्वीक्षणेन सर्वे लोकाः स्वस्वकार्यक्षमा भवन्तीत्यर्थः।

सूर्यस्य चक्षुषेत्यस्य तात्पर्यं दर्शयति—

ईश्वरो वा एषोऽन्धो भवितोः। यः प्रवर्ग्यमन्वीक्षते। सूर्यस्य त्वा चक्षुषाऽन्वीक्ष इत्याह। चक्षुषो गोपीथाय, इति।

(प्रपा० ५। अनु० ३। विभा० २५)

---

१ क ख. प्राप्यते।

स्वचक्षुषा प्रवर्ग्यं पश्यन्नन्धो भवितुं समर्थो भवति, अतः स्वचक्षुषो **गोपीथाय** सूर्यस्य चक्षुषेत्युक्तम् ।

ऋज्वादिशब्दैः पृथिव्यादयो वक्ष्यन्त इत्येतद्दर्शयति—

ऋजवे त्वा साधवे त्वा सुक्षित्यै त्वा भूत्यै त्वेत्याह । इयं वा ऋजुः । अन्तरिक्षꣳ साधु । असौ सुक्षितिः (७) । दिशो भूतिः । इमानेवास्मै लोकान्कल्पयति । अथो प्रतिष्ठित्यै, इति ।

(प्रपा० ५ । अनु० ३ । विभा० २६)

इदमहममुमामुष्यायणं विशा पशुभिर्ब्रह्मवर्चसेन पर्यूहामि ।

कल्पः—" अथैनान्प्रदक्षिणं सिकताभिः पर्यूहति । इदमहममुमामुष्यायणं विशा पशुभिर्ब्रह्मवर्चसेन पर्यूहामीति । विशेति राजन्यस्य पशुभिरिति वैश्यस्य " इति । **अहम्** अध्वर्युः, **आमुष्यायणममुष्य** देवदत्तस्य पुत्रम् । **अमुं** यज्ञदत्तनामानं महावीररूपेणावस्थितम् । **विशा** प्रजया **पशुभिर्ब्रह्मवर्चसेन** चैतत्त्रितयरूपाभिः सिकताभिरिदं प्रत्यक्षं यथा भवति तथा **पर्यूहामि** परितः स्थिरं करोमि ।

मन्त्रपाठेन तदर्थस्तथैव फलतीत्येतद्दर्शयति—

इदमहममुमामुष्यायणं विशा पशुभिर्ब्रह्मवर्चसेन पर्यूहामीत्याह । विशैवैनं पशुभिर्ब्रह्मवर्चसेन पर्यूहति, इति ।

(प्रपा० ५ । अनु० ३ । विभा० २७)

क्षत्रियवैश्ययोर्मन्त्रप्रयोगे विशेषं दर्शयति—

विशेति राजन्यस्य ब्रूयात् । विशैवैनं पर्यूहति । पशुभिरिति वैश्यस्य । पशुभिरेवैनं पर्यूहति, इति ।

(प्रपा० ५ । अनु० ३ । विभा० २८)

पशुभिर्ब्रह्मवर्चसेनेत्येतावत्क्षत्रियं प्रति परित्यजेत् । वैश्यं प्रति तु **विशा ब्रह्मवर्चसेनेत्येतावत्परित्यजेदित्यर्थः** ।

कल्पः—" अथैनान्प्रभूतेनाजापयसाऽऽच्छृणात्ति गायत्रेण त्वा छन्दसाऽऽच्छृणद्मीत्येतैस्त्रिभिस्त्रिभिरेकैकमपि वा सर्वैरेकैकम् " इति । पाठस्तु—

गायत्रेण त्वा छन्दसाऽऽच्छृणद्मि । त्रैष्टुभेन त्वा छन्दसाऽऽच्छृणद्मि । जागतेन त्वा छन्दसाऽऽच्छृणद्मि । छृणत्तु त्वा वाक् । छृणत्तु त्वोर्क् । छृणत्तु त्वा हविः । छृन्धि वाचम् । छृन्ध्यूर्जम् । छृन्धि हविः, इति ।

---

१ क 'स्त्रिभिरे ।

हे महावीर त्वां गायत्रच्छन्दोदेवतारूपेणाऽजक्षीरेणाऽऽच्छृणद्मि सर्वतः सिञ्चामि। एवं त्रैष्टुभजागतमन्त्रयोरपि योज्यम्। तथा वागन्नहविरभिमानिन्यो देवतास्त्वां सिञ्चन्तु त्वमपि वागादीन्सिञ्च।

एतन्मन्त्रसाध्यं सेचनं विधत्ते—

असुर्यं पात्रमनाच्छृण्णम् (८)। आच्छृणत्ति। देवत्राऽकः, इति।

(प्रपा० ५। अनु० ३। विभा० २९)

अनाच्छृण्णं क्षीरसेचनरहितं पात्रम**सुर्यं**मुष्णत्वेनात्युग्रत्वादसुरेभ्यो हितं न तु देवेभ्योऽतो देवार्थमासिञ्चेत्। तेन शान्तं शीतलं पात्रं देवेषु करोति।

तत्र द्रव्यं विधत्ते—

अजक्षीरेणाऽऽच्छृणत्ति। परमं वा एतत्पयः। यदजक्षीरम्। परमेणैवैनं पयसाऽऽच्छृणत्ति, इति।

(प्रपा० ५। अनु० ३। विभा० ३०)

सर्वव्याधिहरत्वादजक्षीरस्य परमत्वम्। तत्र सेचने देवस्त्वा सवितेत्यादिकं यजुर्विनियुङ्क्ते—

यजुषा व्यावृत्त्यै, इति।

(प्रपा० ५। अनु० ३। विभा० ३१)

उष्णशान्त्यर्थे लौकिके सेचने मन्त्रो नास्ति। अत्र तु **यजुषा** मन्त्रेण सिञ्चेदिति तद्व्यावृत्तिः।

मन्त्रगतांश्छन्दोवाचकशब्दान्प्रशंसति—

छन्दोभिराच्छृणत्ति। छन्दोभिर्वा एष क्रियते। छन्दोभिरेव छन्दाꣳस्याच्छृणत्ति, इति।

(प्रपा० ५। अनु० ३। विभा० ३२)

पूर्वं गायत्रेण च्छन्दसा करोमीत्येवं छन्दोयुक्तैर्मन्त्रैरेष महावीरः कृतः, अतोऽयमेव च्छन्दांसि। अत्रापि च्छन्दोवाचकशब्दयुक्तैर्मन्त्रैः सेचने सत्यत्रत्यैश्छन्दोभिरिव पूर्वोक्तानि च्छन्दांसि सिक्तानि भवन्ति।

वागादिदेवता महावीरं सिञ्चन्तीत्येतद्युक्तं महावीरस्तु वागादीन्सिञ्चतीत्यत्र प्रयोजनं दर्शयति—

छृन्धि वाचमित्याह। वाचमेवावरुन्धे। छृन्ध्यूर्जमित्याह। ऊर्जमेवावरुन्धे। छृन्धि हविरित्याह। हविरेवाकः, इति।

(प्रपा० ५। अनु० ३। विभा० ३३)

---

१ क. ख. °णाजाक्षी°। २ ग. °वागूर्क्शब्दा°। ३ क. तत्रापि। ४ ग. °वागूर्क्शब्द°।

तैरेतैर्मन्त्रैर्वागन्नप्राप्तिर्हविष्मत्सिद्धिश्च भवति ।

देव पुरश्चर सध्यासं त्वा (३) ।
पृथिवीं भव वाक्षट् च ॥
इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठके
तृतीयोऽनुवाकः ॥ ३ ॥

कल्पः—"अथैनान्कृष्णाजिन उपानह्याऽऽसजति देव पुरश्चर सध्यासं त्वा" इति। **पुरश्चर** पुरतोवर्तमान हे महावीर **देव** द्योतनात्मक त्वां **सध्यासं** कृष्णाजिने बद्ध्वा क्वचिदूर्ध्वदेशे सक्तं कुर्याम् ।

मन्त्रस्य स्पष्टार्थतां दर्शयति—

देव पुरश्चर सध्यासं त्वेत्याह । यथा यजुरेवैतत् (९), इति ।
(प्रपा० ५ । अनु० ३ । विभा० ३४)

स्याद्यत्प्रवर्ग्यश्छन्दोभिः करोति वीर्यसंमितं छन्दाꣳसि निष्पत्तृणेत्याह
सुक्षितिरनाच्छृण्णं छन्दाꣳस्याच्छृणत्त्यष्टौ च ॥
इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके पञ्चमप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥
इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीया-
रण्यकभाष्ये चतुर्थप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

अथ चतुर्थप्रपाठके चतुर्थोऽनुवाकः ।

तृतीये महावीरसंस्कारा उक्ताः । चतुर्थे प्रैषा उच्यन्ते । कल्पः—"प्रोक्षणीनामावृत्त्या प्रोक्षणीः सꣳस्कृत्य ब्रह्माणमामन्त्रयते ब्रह्मन्प्रवर्ग्येण" इति । पाठस्तु—

ब्रह्मन्प्रवर्ग्येण प्रचरिष्यामः । होतर्धर्ममभिष्टुहि ।
अग्नीद्रौहिणौ पुरोडाशावधिश्रय । प्रतिप्रस्था-
तर्विहर । प्रस्तोतः सामानि गाय, इति ।

हे **ब्रह्मन्वयं** सर्वे प्रवर्ग्याख्येण कर्मणा प्रचरिष्यामोऽनुष्ठानं संपादयिष्यामः । हे **होतस्त्वं धर्मं** प्रवर्ग्यं ब्रह्मजज्ञानमित्यादिभिर्मन्त्रैरभिष्टुतं कुरु । आग्नीध्र रौहिणाख्यौ **पुरोडाशावधिश्रय** श्रपणार्थं कपालस्योपरि स्थापय । हे **प्रतिप्रस्यातर्विहरणं** कुरु । तच्च विहरणं बौधायनेन दर्शितम्—"अथ प्रतिप्रस्याता प्रवर्ग्यं विहरत्याहवनीये कार्ष्म(इम)र्यमयान्परिधीन्परिदधाति" इत्यादि । हे **प्रस्तोतः** प्रवर्ग्यार्थानि सामानि गाय।

---

१ क. ख. °थैनान्कृ° । २ क. ख. °वृना प्रो° । ३ क प्रचारमनु° । ४ ग. °धीन्प्रहरति।

कल्पः— "यजुर्युक्तꣳ सामभिराक्तखं त्वेत्युपांशूक्त्वोमिन्द्रवन्तः प्रचरतेत्युच्चैरनुजानाति" इति । पाठस्तु—

यजुर्युक्तꣳ सामभिराक्तखं त्वा । विश्वेदेवैरनुमतं मरुद्भिः । दाक्षिणाभिः प्रततं पारयिष्णुम् । स्तुभो वहन्तु सुमनस्यमानम् । स नो रुचं धेह्यहृणीयमानः । भूर्भुवः सुवः । ओमिन्द्रवन्तः प्रचरत (१), इति ॥

अहृणीयमानो द्वे च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

हे प्रवर्ग्य त्वां **स्तुभः** सामसु प्रयुज्यमानाः स्तोभा **वहन्तु** विघ्नपरिहारेण समाप्तिपर्यन्तं निर्वहन्तु । कीदृशं त्वाम् । **यजुर्युक्तं** यजुरुपलक्षितैर्मन्त्रैः संबद्धम् । **सामभिराक्तखमाक्तान्याप्यायितानि खानीन्द्रियाण्यवयवा यस्य** प्रवर्ग्यस्य सोऽयमाक्तखस्तादृशम् । सामगानेन हि प्रवर्ग्य आप्यायितो भवति । तथा **विश्वेदेवैर्मरुद्भिरनुमतमङ्गीकृतम्** । प्रवर्ग्यमुद्वासयिष्यन्नजामग्नीधे ददातीत्यादिभिर्**दाक्षिणाभिः प्रततं** विस्तीर्णम् । **पारयिष्णुं** निर्विघ्नेन समाप्तिं गन्तुं शक्तम् । **सुमनस्यमानं** यजमाने स्नेहातिशयेन सौमनस्ययुक्तम् । हे प्रवर्ग्य **स** त्वमहृणीयमानः केनाप्यहिंस्यमानो **नोऽस्मदर्थं रुचं धेहि** महतीं ज्वालां धारय । भूरादयस्त्रयो लोका अनुगृह्णन्तु । प्रणवशब्दवाच्यः परमात्माऽप्यनुगृह्णातु । हे, ऋत्विजो यूयमिन्द्रवन्त इन्द्रदेवतास्वामिकाः सन्तः **प्रचरत** प्रवर्ग्यमनुतिष्ठत । अयमनुवाकः स्पष्टार्थबुद्ध्या ब्राह्मणेनोपेक्षितः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये चतुर्थप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

अथ चतुर्थे पञ्चमोऽनुवाकः ।

चतुर्थे प्रैषा उक्ताः । पञ्चमे तु रङ्गतेष्वङ्गारेषु महावीरस्थापनमुच्यते । तत्राऽऽदौ पूर्वोक्तप्रैषमन्त्रे पाठान्तरं दर्शयति—

ब्रह्मन्प्रचरिष्यामः । होर्तर्घर्ममभिष्टुहि, इति ।

---

१ ग. °स्मदर्थं रु° ।

पूर्वमाम्नाते मन्त्रे प्रवर्ग्येणेति शब्दोऽस्ति । अस्मिंस्त्वसौ नास्तीत्येतावान्पाठविशेषः ।

ब्रह्मन्निति संबोधनस्य तात्पर्यं दर्शयति--

ब्रह्मन्प्रचरिष्यामो होतर्घर्ममभिष्टुहीत्याह । एष वा एतर्हि बृहस्पतिः । यद्ब्रह्मा । तस्मा एव प्रतिप्रोच्य प्रचरति । आत्मनोऽनार्त्यै, इति ।

(प्रपा० ९ । अनु० ४ । विभा० १)

एतर्हि कर्मकाले यो ब्रह्माऽस्ति एष एव बृहस्पतिस्थानीयः । **तस्मै** बृहस्पतये **कथयित्वा** प्रचारे सति स्वस्याऽऽर्तिर्वैकल्यनिमित्तापराधो न भवति ।

कल्पः—" यमाय त्वा मखाय त्वेति सर्वं पारिप्लवमभिपूर्वं त्रिः प्रोक्षति " इति । पाठस्तु—

यमाय त्वा मखाय त्वा । सूर्यस्य हरसे त्वा, इति ।

हे **घर्म** पात्रसमूह **यमाय** नियमार्थं त्वां प्रोक्षामीति शेषः । तथा **मखाय** यज्ञार्थं त्वां प्रोक्षामि । **सूर्यस्य हरसे** सूर्यसंबन्धितेजोर्थं सूर्यमण्डलपर्यन्तं ज्वालोद्गमार्थं त्वां प्रोक्षामि ।

यममखसूर्यशब्दैः सूचिताभिः प्रवर्ग्यदेवताभिः सर्वाभिः संपादितां प्रवर्ग्यसमृद्धिं दर्शयति—

यमाय त्वा मखाय त्वेत्याह । एता वा एतस्य देवताः । ताभिरेवैनꣳ समर्धयति, इति ।

(प्रपा० ९ । अनु० ४ । विभा० २)

प्रोक्षणद्रव्यं विधत्ते—

मदन्तीभिः प्रोक्षति । तेज एवास्मिन्दधाति (१), इति ।

(प्रपा० ९ । अनु० ४ । विभा० ३)

तस्मा आपो मदन्त्यः, ताभिः प्रोक्षणे यजमाने कान्तिः संपद्यते ।

तत्रानुक्रमं विधत्ते —

अभिपूर्वं प्रोक्षति । अभिपूर्वमेवास्मिन्तेजो दधाति, इति ।

(प्रपा० ९ । अनु० ४ । विभा० ४)

पूर्वं प्रथमं महावीरमभिलक्ष्याभिपूर्वं तदादिकमेव प्रोक्षेत्, न तु विपर्ययेण । एवं सति यजमाने पितृपुत्रादिक्रमेणैव तेजः संपद्यते ।

---

१ ग. घर्म्य ।

आवृत्तिं विधत्ते—

त्रिः प्रोक्षति। व्यावृद्धि यज्ञः। अथो मेध्यत्वाय, इति।

(प्रपा० ९। अनु० ४। विभा० ५)

अग्नित्रयसाध्यत्वेन सवनत्रयरूपत्वेन वा यज्ञस्याऽऽवृत्तित्रयोपेतत्वम्, अपि च प्रोक्षणावृत्त्या सिध्यतीत्या(त्यति)शये सति यज्ञयोग्यता संपद्यते।

होतर्धर्ममभिष्टुहीति प्रैषस्योक्तत्वाद्धोतृकृत्यमनुवचनं विधत्ते—

होताऽन्वाह। रक्षसामपहत्यै, इति।

(प्रपा० ९। अनु० ४। विभा० ६)

होतुरनुवचनं यज्ञविघातिनां रक्षसां वधाय भवति।

अयं चानुवाकप्रकार आश्वलायनेन स्पष्टमभिहितः—"स्पृष्ट्वोदकं प्रवर्ग्येण चरिष्यन्सूत्तरेण खरं परिव्रज्य पश्चादस्योपविश्य प्रेषितोऽभिष्टुयादृगावार्नमृचमृचमनवानमुक्त्वा प्रणुत्यावस्येद्ब्रह्मजज्ञानम्" इत्यादिः।

तत्रैकस्या ऋचो मध्ये श्वासराहित्यं विधत्ते—

अनवानम्। प्राणानाꣳ संतत्यै, इति।

(प्रपा० ९। अनु० ४। विभा० ७)

अवानः श्वासस्तद्रहितं यथा भवति तथा पठेत्। तच्च यजमानप्राणानामविच्छेदाय भवति।

तास्वृक्षु गायत्रीधर्ममतिदिशति—

त्रिष्टुभः सतीर्गायत्रीरिवान्वाह (२)। गायत्रो हि प्राणः। प्राणमेव यजमाने दधाति, इति।

(प्रपा० ९। अनु० ४। विभा० ८)

यद्यपि ब्रह्मजज्ञानमित्यादयस्त्रिष्टुभस्तथाऽपि गायत्रीवदनुवचनं कुर्यात्। गायत्रीरूपं ध्यात्वा पठेदित्यर्थः। प्राणस्य गायत्रत्वाद्गायत्रीसमानानुवचनेन यजमाने प्राणं स्थैर्येण स्थापयति। गायत्र्या रक्ष्यमाणत्वात्प्राणस्य गायत्रत्वम्। तद्रक्ष्यत्वं च प्राणस्य वाजसनेयिनः समामनन्ति—"प्राणा वै गयास्तत्प्राणांस्तत्रे तद्यद्गयांस्तत्रे तस्माद्गायत्री नाम" इति।

अनुवचनकाले व्यापारान्तरेण व्यवधानं निवारयति—

संततमन्वाह। प्राणानामन्वाद्यस्य संतत्यै। अथो रक्षसामपहत्यै, इति।

(प्रपा० ९। अनु० ४। विभा० ९)

---

१ ग. ॰त्या मेध्यत्वातिश॰। २ ख. एवं चानुवचनप्रकार। ३ क. ख. ॰ष्यत्सूत्त॰ ४ क; ॰मृचमृ॰। ५ ग. ॰मन्यवा॰। ६ ख. ॰णुह्यव॰; ७ ग. ॰वश्येद्ब्र॰; ८ ख. त्यादि। त॰ ९ क. ख. तासु गा॰। १० ख. ॰रूपत्वं ध्या॰।

एकामृचमुक्त्वा[1] प्राणानामवसानं कृत्वाऽपि पुनरप्यन्यामृचमेव ब्रूयात्, न त्वन्यं वाग्व्यापारं कुर्यात्। तदिदं सांतत्यम्। एतेन प्राणा अविच्छिन्ना भवन्ति, अन्नं च न विच्छिद्यते, रक्षांसि चापहन्यन्ते।

ऋचां बहुत्वं विधत्ते—

> यत्परिमिता अनुब्रूयात्। परिमितमवरुन्धीत। अप-
> रिमिता अन्वाह। अपरिमितस्यावरुद्ध्यै, इति।
> (प्रपा० ९। अनु० ४। विभा० १०)

ऋचामल्पत्वे फलमप्यल्पं स्यात्। अतः फलबाहुल्याय बह्वीरनुब्रूयात्।

यदुक्तं सूत्रकारेण—"अथैतं प्रचरणीयं महावीरं शफाभ्यां परिगृह्य[2] विच्छिन्नाग्रेण वेदेनोपरिष्टात्संमार्ष्टि" इति। तत्र वेदस्य दर्भमयत्वं वारयितुं मौञ्जत्वं विधत्ते—

> शिरो वा एतद्यज्ञस्य (३)। यत्प्रवर्ग्यः ऊर्ङ्मुञ्जाः। यन्मौञ्जो
> वेदो भवति। ऊर्जैव यज्ञस्य शिरः समर्धयति, इति।
> (प्रपा० ९। अनु० ४। विभा० ११)

प्रवर्ग्यस्यैव यज्ञशिरस्त्वं प्रथमानुवाके प्रपञ्चितम्। मुञ्जास्तृणविशेषाः, तेषां पशुभिर्भक्ष्यत्वादूर्मूपत्वम्। अतो वेदस्य मौञ्जत्वे सत्यूर्मूपेण वेदेन **यज्ञस्य शिरः** समृद्धं करोति।

कल्पः—"प्राणाय स्वाहा व्यानाय स्वाहेति स्रुवेणाऽऽहवनीये सप्तैकादश वा प्राणाहुतीर्हुत्वा" इति। पाठस्तु—

> प्राणाय स्याहा[3] व्यानाय स्वाहाऽपानाय स्वाहा।
> चक्षुषे स्वाहा श्रोत्राय स्वाहा। मनसे स्वाहा
> वाचे सरस्वत्यै स्वाहा। दक्षाय स्वाहा क्रतवे
> स्वाहा। ओजसे स्वाहा बलाय स्वाहा, इति।

प्राणादिदेवेभ्यः स्वाहुतमिदमस्तु। वाच इत्यनेन सरस्वती विशेष्यते, शब्दात्मिकाया वाग्देवताया इत्यर्थः। दक्ष उत्साहः। क्रतुः संकल्पः। ओजोऽष्टमो धातुः। तत्कार्यं बलम्।

एतैर्मन्त्रैः साध्यान्होमान्विधत्ते—

> प्राणाहुतीर्जुहोति। प्राणानेव यजमाने दधाति, इति।
> (प्रपा० ९। अनु० ४। विभा० १२)

---

१ ख. °क्त्वा प्रणवेनाव°। २ ग. प्राणनाव°। ३ क ह्याप्रच्छि°। ४ क. ख. °स्य [श]।

तत्र सप्तसंख्यापक्षं विधत्ते—

सप्त जुहोति । सप्त वै शीर्षण्याः प्राणाः । प्राणानेवास्मिन्दधाति, इति ।
(प्र० ९ । अ० ४ । वि० १३)

शिरोगतसप्तच्छिद्रवर्तिप्राणानां सप्तत्वात्संख्यया तत्प्राप्तिः ।

देवस्त्वा सविता मध्वाऽनक्तु (१) ।

कल्पः—"देवस्त्वा सविता मध्वाऽनक्त्वित्यवि स्रुवेणोपर्याहवनीये महावीरमङ्क्त्वा" इति । हे महावीर **त्वां सविता देवो मध्वा** मधुरेण घृतेनानक्तु अक्तं करोतु ।

मध्वेति प्रयोगाद्यजमानस्य तेजोव्याप्तिं दर्शयति—

देवस्त्वा सविता मध्वाऽनक्त्वित्याह (४) । तेजसैवैनमनक्ति, इति ।
(प्र० ९ । अ० ४ वि० १४)

पृथिवीं तपसस्त्रायस्व ।

कल्पः—"पृथिवीं तपसस्त्रायस्वेत्यपरास्मिन्खरे राजतं रुक्मं निधाय" इति । हे रुक्म **पृथिवीमेतां तपसस्त्रायस्व**, अग्निसंतापाद्रक्ष ।

मन्त्रस्य तात्पर्यं दर्शयति—

पृथिवीं तपसस्त्रायस्वेति । हिरण्यमुपास्यति । अस्या अनतिदाहाय, इति ।
(प्र० ९ । अ० ४ । वि० १९)

अस्याः पृथिव्या इत्यर्थः ।

रुक्मस्योपरि प्रदीप्तानां मुञ्जानां प्रक्षेपं विधत्ते—

शिरो वा एतद्यज्ञस्य । यत्प्रवर्ग्यः । अग्निः
सर्वा देवताः । प्रलवानादीप्योपास्यति ।
देवतास्वेव यज्ञस्य शिरः प्रतिदधाति, इति ।
(प्र० ९ । अ० ४ । वि० १६)

अग्नेः सर्वदेवतात्वं ते देवा अग्नौ तनूः संन्यदधतेति श्रुतेरवगन्तव्यम् । **प्रलवाः** प्रकर्षेण लूना मुञ्जामुष्टयः, तानग्नौ सर्वतः प्रदीप्य रुक्मस्योपरि निदध्यात् । एवं सत्यग्निरूपासु **देवतास्वेव** प्रवर्ग्यरूपं यज्ञशिर स्थापनं भवति । प्रदीपनप्रकारस्तु **सूत्रकारेण** स्पष्टमुक्तः—"द्वयान्मुञ्जप्रलवानादाय दक्षिणेषामग्राणि[1] गार्हपत्ये प्रदीपयत्यर्चिषे त्वेति, तेषामग्रैरुत्तरेषां मूलानि शोचिषे त्वेति, तेषां मूलैर्दक्षिणेषां मूलानि ज्योतिषे त्वेति, तेषां मूलैरुत्तरेषामग्राणि तपसे त्वा" इति ।

---

१ ख. °णि तप° । २ ग. °पयाभ्यार्चि° । ३ क. तेषां मूलैरु° ।

प्रदीप्तमुञ्जस्थापने कंचिद्विशेषं विधत्ते—

अप्रतिशीर्णाग्रं भवति । एतद्बर्हिर्ह्येषः (९), इति ।

(प्रपा० ९ । अनु० ४ । विभा० १७)

दीप्तमुञ्जानामग्रं **प्रतिशीर्ण**मितस्ततो विप्रसृतं यथा न **भवति** तथा समुह्यैव स्थापयेत् । यस्मादयं प्रवर्ग्य **एतद्बर्हिर्मुञ्ज**रूपबर्हिर्युक्तः, तस्माद्बर्ह्यास्तरणबर्हिष इवाप्रतिशीर्णत्वं युक्तम् ।

अर्चिरसि शोचिरसि ज्योतिरसि तपोऽसि ।

कल्पः—"तान्यत्यस्तानुपरि रुक्मे निदधाति, अर्चिरसि शोचिरसि ज्योतिरसि तपोऽसि" इति । हे दक्षिणमुञ्जाग्रभाग त्वम् **अर्चिर्**ज्वालारूपोऽसि । हे उत्तरमुञ्जमूलभाग त्वं **शोचिः** शुचिरूपोऽसि । हे दक्षिणमुञ्जमूलभाग त्वं **ज्योतिः** प्रकाशरूपोऽसि । हे, उत्तरमुञ्जाग्रभाग त्वं **तपः** संतापरूपोऽसि ।

मन्त्रतात्पर्यं दर्शयति—

अर्चिरसि शोचिरसीत्याह । तेज एवास्मिन्ब्रह्मवर्चसं दधाति, इति ।

(प्रपा० ९ । अनु० ४ । विभा० १८)

शरीरकान्तिः श्रुताध्ययनसंपत्तिश्चेत्युभयविधप्रकाशस्तेन मन्त्रेण यजमाने संपद्यते ।

कल्पः—"सꣳसीदस्व महाꣳ असीति तेषु महावीरं प्रतिष्ठाप्य" इति । पाठस्तु—

सꣳसीदस्व महाꣳ असि । शोचस्व देववीतमः । विधू-
मग्ने अरुषं मियेध्य । सृज प्रशस्त दर्शतम्, इति ।

हे महावीर **सꣳसीदस्व** त्वमेतेषु प्रदीप्तमुञ्जेषु सम्यगुपविश । **महाꣳ असि** त्वं गुणैरधिकोऽसि, अतो **देववीतमो**ऽतिशयेन देवैः काम्यो भूत्वा **शोचस्व** दीप्यस्व । हे **मियेध्य** मेधार्ह, **प्रशस्तोत्कृष्टाग्ने, अरुषमरोषणमनुग्रं दर्शतं** द्रष्टुं शक्यं शान्तं **धूमं** विशेषेण **सृज** ।

प्रौढस्य कर्मणो हेतुत्वान्महच्छब्दार्थः प्रसिद्ध इत्येतद्दर्शयति—

सꣳसीदस्व महाꣳ असीत्याह । महान्ह्येषः, इति ।

(प्रपा० ९ । अनु० ४ । विभा० १९)

कल्पः— " अञ्जन्ति यं प्रथयन्त इति स्रुवेण महावीरमनक्त्यभिपूरयति च " इति। पाठस्तु—

अञ्जन्ति यं प्रथयन्तो न विप्राः । वपावन्तं

---

१ ग °मानं सं° । २ ग. °दस्वात एतं° । ३ क. ख. °ति वा " इ° ।

नाग्निना तपन्तः। पितुर्न पुत्र उपासि प्रेष्ठः।
आघर्मो अग्निमृतयन्नसादीत् (२), इति।

विप्रा ब्राह्मणा ऋत्विजो **वपावन्तं** मध्ये रन्ध्रयुक्तं यं महावीरं **प्रथयन्तो न** प्रख्यापयन्त इवाञ्जन्ति घृतेनाक्तं कुर्वन्ति। कीदृशा **विप्राः**। **अग्निना न तपन्तः** प्रज्वालयोऽत्यन्तं दाहमकुर्वन्तः। अञ्जनाभावे ह्यतितापेन महावीरस्य भङ्गोऽपि प्रसज्येत। स घर्मो विप्रैरक्तो महावार ऋतयन्नृतं यज्ञं निष्पादयन्नग्निमेतमसादीदासन्नवान्प्राप्तवान्। तत्र दृष्टान्तः—**पितुरुपासि**, उपान्तिके, **प्रेष्ठः पुत्रो न** प्रियतमः पुत्र इव।

कल्पः—" अध्यधि महावीरमसंस्पृशन्यजमानः प्राञ्चं प्रादेशं धारयमाणो जपत्यनाधृष्या पुरस्तादित्येतैर्यथालिङ्गम् " इति। पाठस्तु—

अनाधृष्या पुरस्तात्। अग्नेराधिपत्ये। आयुर्मे दाः।
पुत्रवती दक्षिणतः। इन्द्रस्याऽऽधिपत्ये। प्रजां मे दाः।
सुषदा पश्चात्। देवस्य सवितुराधिपत्ये। प्राणं मे दाः।
आश्रुतिरुत्तरतः (३)। मित्रावरुणयोराधिपत्ये। श्रोत्रं
मे दाः। विधृतिरुपरिष्टात्। बृहस्पतेराधिपत्ये। ब्रह्म
मे दाः क्षत्रं मे दाः। तेजो मे धा वर्चो मे
धाः। यशो मे धास्तपो मे धाः। मनो मे धाः, इति।

पुरस्तात्पूर्वस्यां दिशि वर्तमाने हे देवतेऽ**नाधृष्या** केनाप्यतिरस्कार्या त्वम**ग्नेराधिपत्ये** वर्तमाना सती, **आयुर्मे दा** मे देहि। एवं दिगन्तरेषु योज्यम्। **पुत्रवती** पुत्रयुक्ता देवता। **सुषदा** सुखेनोपविष्टा। **आश्रुतिः** सर्वत्र प्रख्याता। **विधृतिः** सर्वस्य विधारयित्री। **ब्रह्म** मन्त्रजातं, **क्षत्रं** बलं तत्सर्वशो देहि। **तेजः** शरीरकान्तिः, **वर्चो** दीप्तिः, **यशः** ख्यातिः, **तपो** नियमविशेषः, **मनश्चित्तदार्ढ्यम्**। एतत्सर्वं **धाः** संपादय।

मन्त्रस्य तात्पर्यं दर्शयितुमादौ[2] ब्रह्मवादिनां प्रश्नोत्तरमाह—

ब्रह्मवादिनो वदन्ति। एते वाव त ऋत्विजः। ये दर्शपूर्णमासयोः। अथ कथा होता यजमानायाऽऽशिषो नाऽऽशास्त इति। पुरस्ता-

---

१ ख. °या मन्तं। २ ग. °दौ तावद्ब्रह्म°।

दाशीः खलु वा अन्यो यज्ञः । उपरिष्टादशीरन्यः (६), इति ।
(प्रपा० ५ । अनु० ४ । विभा० २०)

दर्शपूर्णमासयोर्ब्रह्मा होताऽध्यर्युरग्नीदित्यामाता ऋत्विजो ये सन्ति त ऋत्विजः सर्वेऽप्येत एवात्रापि वर्तन्ते । **अथैवं** सति तत्र **होता** यजमानस्याऽऽयुराद्याशिषः प्रार्थितवान्, सूक्तवाकमाशास्तेऽयं यजमानोऽसावित्यादिमन्त्रपाठात् । अत्र तु स एव **होता कथा कथमाशिषो नाऽऽशास्त** इति ब्रह्मवादिनां प्रश्नः । तत्राभिज्ञस्यैतदुत्तरम् । द्विविधो हि यज्ञः **पुरस्तादाशीरुपरिष्टादाशीश्चेति** । तथा सति यत्र प्रधानकर्मण ऊर्ध्वमाशीराशासनीया तत्रैव होतुस्तत्कर्तव्यता, इह तु **पुरस्तादाशीरिति** कृत्वा होता नाऽऽशास्ते ।

अथ मैन्त्रतात्पर्यं दर्शयति—

अनाधृष्या पुरस्तादिति यदेतानि यजूंष्याह ।
शीर्षत एव यज्ञस्य यजमान आशिषोऽवरुन्धे, इति ।
(प्रपा० ५ । अनु० ४ । विभा० २१)

महावीरस्योपरि प्रादेशधारणेनैतेषु यजुःषु यजमानेन पठितेषु यज्ञशिरोरूपमहावीरसकाशादेव **यजमानः** सर्वा अप्याशिषः प्राप्नोति । एतेषां च यजुषां प्रधानकर्मणः पुरा पठनीयत्वादयं यज्ञः पुरस्तादाशीः ।

कास्ता मन्त्रोक्ता आशिष इत्याशङ्क्य दिग्भेदेन व्यवस्थितास्ता दर्शयति—

आयुः पुरस्तादाह । प्रजां दक्षिणतः । प्राणं पश्चात् । श्रोत्रमुत्तरतः । विधृतिमुपरिष्टात् । प्राणानेवास्मै समीचो दधाति, इति ।
(प्रपा० ५ । अनु० ४ । विभा० २२)

विधृतिशब्देन ब्रह्मक्षत्रादयः सर्वेऽपि विधेयत्वादुपलक्ष्यन्ते । अनेन मन्त्रपाठेनायं यजमानोऽस्मै स्वदेहेऽर्थे **प्राणान्समीचो**ऽनुकूलानवस्थापयति ।

कल्पः —"मनोरश्वाऽसि भूरिपुत्रेत्युत्तरतः पृथिवीमभिमृशति" इति । पाठस्तु—

मनोरश्वाऽसि भूरिपुत्रा । विश्वाभ्यो
मा नाष्ट्राभ्यः पाहि (४) । सूपसदा
मे भूया मा मा हिꣳसीः, इति ।

हे भूमे त्वं **मनोरश्वा** मनुष्यजातेर्व्यापिका सती, **भूरिपुत्रा** बहुभिः पुत्रैर्युक्ताऽसि । ये प्राणिनो भूमेरुत्पन्नास्ते सर्वेऽपि भूमेः पुत्राः । तादृशी त्वं **विश्वाभ्यो नाष्ट्राभ्यो**

---

१ क. ख. °र्युराग्नीध्र इत्या° । २ क. ख. मन्त्रार्थता° । ३ क. ख. °ता द° । ४ ग. विधार्यत्वा° । ५ क. ख. °हाय पा° ।

विनाशकारणेभ्यः सर्वेभ्यो मां **पाहि**, **मे** मम **सूपसदा** सुखेन सेवितुं योग्या **भूयाः**, **मां मा हिꣳसीः**, हिंसितं मा कुरु।

अनेन मन्त्रेण साध्यं भूमिस्पर्शं विधत्ते——

ईश्वरो वा एष दिशोऽनून्मदितोः। यं दिशोऽनु-
व्यास्थापयन्ति (७)। मनोरश्वाऽसि भूरिपुत्रेती-
मामभिमृशति। इयं वै मनोरश्वा भूरिपुत्रा।
अस्यामेव प्रतितिष्ठत्यनुन्मादाय, इति।

(प्रमा० ९। अनु० ४। विभा० २३)

लोके यं पुरुषं मनुष्या **दिशो व्यास्थापयन्ति** बह्वीर्दिशोऽनुक्रमेण विविधं संचारयन्ति, **एष** संचारी पुरुषो **दिशोऽनुलक्ष्योन्मदितोरीश्वर** उन्मत्तो भवितुं समर्थो भवति, दिग्भ्रमं प्राप्नोतीत्यर्थः। तस्यानेन मन्त्रेण भूमिस्पर्शे सत्युन्मादो न भवति।

मा हिꣳसीरित्यस्य तात्पर्यं दर्शयति——

सूपसदा मे भूया मा मा हिꣳसीरित्याहाहिꣳसायै, इति।

(प्रपा० ९। अनु० ४। विभा० २४)

कल्पः——"तपो ष्वग्ने अन्तराꣳ अमित्रानिति गार्हपत्यादुदीचोऽङ्गारान्निरुह्य" इति। पाठस्तु——

**तपो ष्वग्ने अन्तराꣳ अमित्रान्। तपा शꣳसमर-
रुषः परस्य। तपा वसो चिकितानो अचि-
त्तान्। वि ते तिष्ठन्तामजरा अयासः** इति।

हे **अग्नेऽन्तरान्देवयजनमध्ये** गूढत्वेन वर्तमानानमित्रान्रक्षोरूपाञ्शत्रून्**सुतपः**(पो) सुष्ठु तपस्तप्तान्कुरु(र्वेव)। **अररुषः**, अररुर्वै नामासुर आसीदिति श्रुतस्याररुनामकस्य **परस्य** शत्रोः **शꣳसं** संस्तवं **तप** विनाशय। हे **वसो** वासहेतो वह्ने **चिकितानोऽभिज्ञस्त्वमचित्तानस्मासु** चित्तरहितान्विरोधिनस्तप। **ते** सर्वेऽप्यमित्रा **वितिष्ठन्तां** परस्परमेलनं परित्यज्य विविधं यथा भवति तथा तिष्ठन्तु। ततो वयमजरा वयोहानिरहिताः, **अयास** आयासरहिताश्च भूयास्मेति शेषः।

चितः स्थ परि चितः। स्वाहा मरुद्भिः परिश्रयस्व।

कल्पः——"चितः स्थ परिचित इति प्रदक्षिणमङ्गारैः पर्यू(र्यु)ह्य" इति। स्वाहा मरुद्भिः परिश्रयस्वेति मन्त्रशेषः।

हेऽङ्गारा यूयं गार्हपत्यात्पृथक्कृताः सन्तश्चितो महावीरसमीपे संचिताः **परिचितः**

स्थ पारितः समूहरूपा भवथ । हे महावीर मरुद्भिरङ्गाररूपैर्देवैः स्वाहा परिश्रयस्व सुष्ठु पारितो व्याप्तो भव । स्वाहाशब्दो निपातत्वादनेकार्थवाची ।

मन्त्रे पूर्वभागस्य तात्पर्यं दर्शयति—

चितः स्थ परि चित इत्याह । अपचितिमेवास्मिन्दधाति, इति ।

(प्रपा० ९ । अनु० ४ । विभा० २९)

अङ्गारेषु पारितः सेवकवत्स्थितेषु मध्ये स्थितस्य महावीरस्य राज्ञ इव पूजा संपद्यते ।

उत्तरभागे मरुच्छब्देन विवक्षितमर्थं दर्शयति—

शिरो वा एतद्यज्ञस्य । यत्प्रवर्ग्यः । असौ खलु वा आदित्यः प्रवर्ग्यः । तस्य मरुतो रश्मयः (८) । स्वाहा मरुद्भिः परिश्रयस्वेत्याह । अमुमेवाऽऽदित्यꣳ रश्मिभिः पर्यूहति । तस्मादसावादित्योऽमुष्मिँल्लोके रश्मिभिः पर्यूढः । तस्माद्राजा विशा पर्यूढः । तस्माद्ग्रामणीः सजातैः पर्यूढः, इति ।

(प्रपा० ९ । अनु० ४ । विभा० २९)

यज्ञशिरोरूपः प्रवर्ग्य आदित्यस्थानीयः, देवतात्वेन भाविता अङ्गारा रश्मिस्थानीया अतो महावीरस्याङ्गारैः पर्यूहणेनात्राऽऽदित्यमेव रश्मिभिः पारितो व्यापयति । यस्मादेवं तस्मात्स्वर्गे लोकेऽप्यादित्यो रश्मिभिर्व्याप्तो दृश्यते । तथा भूलोकेऽपि महावीरवन्मुख्यो राजाऽङ्गारवदुपसर्जनभूतया प्रजया व्याप्तो भवति । एकस्मिन्ग्रामे ग्रामणीर्मुख्यः पुरुषः सजातैः सहोत्पन्नैरुपसर्जनैः पुरुषैः पारितो व्याप्तो दृश्यते ।

कल्पः—" वैकङ्कतैः पारिधिभिः परिधत्तो मा असीति प्राञ्चावध्वर्युर्निदधाति प्रमा असीत्युदञ्चौ प्रतिप्रस्थाता । एवमवशिष्टानां पूर्वेण पूर्वेण मन्त्रेणाध्वर्युरुत्तरेणोत्तरेण प्रतिप्रस्थाताऽध्वर्युरेव दक्षिणतस्त्रयोदशं निदधात्यन्तरिक्षस्यान्तार्धिरसि " इति । पाठस्तु—

मा असि । प्रमा असि । प्रतिमा असि (५) । संमा असि । विमा असि । उन्मा असि । अन्तरिक्षस्यान्तर्धिरसि, इति ।

हे पारिधे प्रागग्रत्वेन दक्षिणदिग्वर्ती, उत्तरदिग्वर्ती वा त्वं मा असि महावीरस्यानं मातुमियत्तया परिच्छेत्तुं समर्थोऽसि । तथा हे पारिधे, उदगग्रत्वेन प्राग्दिग्वर्ती

---

१ ग. °चीति । म° । २ क. ख. महच्छ° । ३ ग. °धातीति । ४ ख. ग. पूर्वपू° । ५ ग. °रवत्युत्तरदि° ।

पश्चिमदिग्वर्ती वा त्वं प्रमा आसि प्रकर्षेण मातुं समर्थोऽसि। तृतीयपञ्चममन्त्रौ प्रथममन्त्रवद्व्याख्येयौ। चतुर्थषष्ठमन्त्रौ द्वितीयमन्त्रवद्व्याख्येयौ। एवं त्रिभिर्मन्त्रैर्विषमसंख्योपेतैरध्वर्युर्दिग्द्वये प्रागग्रान्षट्परिधीन्परिदधाति। समसंख्योपेतैर्मन्त्रैः प्रतिप्रस्थाता दिग्द्वय उदगग्रान्षट्परिधीन्परिदधाति। हे[1] त्रयोदशपरिधे त्वमन्तरिक्षस्य लोकस्यान्तर्धिरसि महावीराद्व्यवधानकरोऽसि। अनेन मन्त्रेणोर्ध्वलोकदिग्व्यवधानबुद्ध्या दक्षिणभागेऽध्वर्युरेकं परिधिं परिदध्यात्।

तैर्मन्त्रैः परिधेयानां परिधीनां वृक्षविशेषं विधत्ते—

अग्नेः सृष्टस्य यतः। विकङ्कतं भा आर्च्छत्। यद्वै-
कङ्कताः परिधयो भवन्ति। भा एवावरुन्धे, इति।
(प्रपा० ५। अनु० ४। विभा० २७)

प्रजापतिसृष्टस्य पलायमानस्याग्नेस्तेजो विकङ्कतं[2] वृक्षं प्रति प्राविशत्, अतो वैकङ्कतपरिधिभिस्तत्तेजः प्राप्नोति।

परिधीनां संख्यां विधत्ते—

द्वादश भवन्ति (९)। द्वादश मासाः
संवत्सरः। संवत्सरमेवावरुन्धे, इति।
(प्रपा० ५। अनु० ४। विभा० २८)

अधिकमेकं परिधिं विधत्ते—

अस्ति त्रयोदशो मास इत्याहुः। यत्त्रयोदशः परि-
धिर्भवति। तेनैव त्रयोदशं मासमवरुन्धे, इति।
(प्रपा० ५। अनु० ४। विभा० २९)

ज्योतिःशास्त्रविदः कदाचित्[3]कदाचित्संक्रान्तिरहितोऽधिकमासस्त्रयोदशोऽस्तीत्येवमाहुः। त्रयोदशेन परिधिना तन्मासप्राप्तिर्भवति।

अन्तर्धेरेव तात्पर्यं दर्शयति—

अन्तरिक्षस्यान्तर्धिरसीत्याह व्यावृत्त्यै, इति।
(प्रपा० ५। अनु० ४। विभा० ३०)

एतावती महावीरस्य सीमा, इत ऊर्ध्वमन्तरिक्षलोक इति विभागो व्यावृत्तिः।

दिवं तपसस्त्रायस्व।

कल्पः—"दिवं तपसस्त्रायस्वेति सौवर्णेन रुक्मेणापिधाय" इति। महावीरस्योपरि पिधानत्वेन स्थाप्यमान हे रुक्म दिवं द्युलोकं तपसो वह्नितापात्त्रायस्व पालय।

---

१ क. ख. एवं। २ ग. °क्षं प्रा°। ३ क. °चित्सं°।

एतन्मन्त्रसाध्यं रुक्मस्थापनं विधत्ते —

दिवं तपसस्त्रायस्वेत्युपरिष्टाद्धिरण्यमधि निदधाति । अमुष्या अनतिदाहाय । अथो आभ्यामेवैनमुभयतः परिगृह्णाति, इति ।
(प्रपा० ५ । अनु० ४ । विभा० ३१)

उपरितनरुक्मव्यवधानेन द्युलोकस्यातिदाहो न भवति । अपि. चोर्ध्वाधोगताभ्यां रुक्माभ्यामेनं महावीरमुभयतो दृढं परिगृह्णाति ।

कल्पः—"आभिर्गीर्भिरिति तिसृभिराभिमन्त्र्य" इति । तत्र प्रथमामाह—

आभिर्गीर्भिर्यदतो न ऊनम् । आप्यायय हरिवो वर्धमानः । यदा स्तोतृभ्यो महिगोत्रा रुजासि । भूयिष्ठभाजो अध ते स्याम, इति ।

हे हरिवोऽश्वयुक्तेन्द्रत्वेन स्तूयमान महावीराऽऽभिर्गीर्भिरस्मदीयस्तुतिभिर्वर्धमानस्त्वमतोऽस्मात्कर्मण ऊनं यदङ्गं नोऽ(तन्नोऽ)स्मदर्थमाप्याययाभिवर्धय । यदा यस्मिन्काले स्तोतृभ्यः स्तोत्रनुग्रहार्थं महिगोत्रा महतो मेघान्रुजासि भञ्जान्करोषि, अध तदा वयं ते तवानुग्रहाद्भूयिष्ठभाजः स्याम प्रभूतधनानां लब्धारो भूयास्म ।

अथ द्वितीयामाह—

शुक्रं ते अन्यद्यजतं ते अन्यत् (६)। विषुरूपे अहनी द्यौरिवासि । विश्वा हि माया अवसि स्वधावः । भद्रा ते पूषन्निह रातिरस्तु, इति ।

हे पूषन्पोषक महावीराऽऽदित्यत्वेन स्तूयमान ते तव शुक्रं शुद्धं स्वरूपमन्यदनेकप्रकारम् । उदयकाले रक्तवर्णं रूपमन्यत्, मध्याह्नकाले श्वेतवर्णं रूपमन्यत्, इत्येवमनेकप्रकारत्वम् । तथा ते तव यजतं पूजनमप्यन्यत् । प्रातःकाले मित्रस्य चर्षणी धृत इत्यादिभिर्मन्त्रैः पूज्यसे, मध्याह्न आ सत्येनेत्यादिभिः । तथाविधया निष्पादिते अहनी अपि विषुरूपे नानारूपे । अहःशब्दश्छत्रिन्यायेन रात्रिमप्युपलक्षयति । अहः प्रकाशोपेतं रात्रिस्तमोयुक्तेति नानारूपत्वम् । एवं विचित्रकार्यकृदपि[1] त्वं द्यौरिवासि, आकाशं यथैकरूपं तद्वत्त्वमपि सर्वत्र पक्षपातराहित्यादेकरूपोऽसि । मीयन्ते प्रमीयन्ते पदार्था आभिश्चित्तवृत्तिभिस्ताश्चित्तवृत्तयो मायाः । कव्यदानवाचिना स्वधाशब्देन कृत्स्नमप्यन्नमुपलक्ष्यते । हे स्वधावोऽन्नवन्विश्वा हि मायाः सर्वा अप्यस्मदीयचित्तवृत्तीरवसि रक्षसि । हे पूषंस्ते तव रातिर्भद्राऽस्तु फलप्रदानं समीचानं भवतु ।

---

१ क. °कार्यं कदाऽपि ।

अथ तृतीयामाह—

अर्हन्बिभर्षि सायकानि धन्व। अर्हन्निष्कं यजतं
विश्वरूपम्। अर्हन्निदं दयसे विश्वमभ्वम्।
न वा ओजीयो रुद्र त्वदस्ति, इति।

हे **रुद्र** महावीर रुद्रत्वेन स्तूयमान, **अर्हन्**योग्यः सन्**सायकानि** बाणान्**धन्व** धनुश्च **बिभर्षि** हस्तयोर्धारयसि। तथैवार्हन्योग्यः सन्**यजतं** पूजासाधनं **विश्वरूपं** नानाविधं **निष्कमाभरणं बिभर्षि** कर्णकण्ठहस्तादौ धारयसि। तथैवार्हन्योग्यः सन्**अभ्वमबादिभ्यः** पञ्चभूतेभ्य उत्पन्नमिदं जगद्**दयसे** पालयसि। अतो हे **रुद्र त्वदोजीयस्त्वत्तो** बलवद्वस्तु किमपि **नैवास्ति**।

एतन्महावीरस्य सायकादिधारणासंभवमाशङ्क्य स्तुतित्वेन परिहरति—

अर्हन्बिभर्षि सायकानि धन्वेत्याह (१०)। स्तौत्येवैनमेतत्, इति।

(प्रपा० ५। अनु० ४ विभा० ३२)

अनेनैव न्यायेन पूर्वोक्तमन्त्रद्वयार्थासंभवशङ्काऽपि परिहर्तव्या।

गायत्रमसि। त्रैष्टुभमसि। जागतमसि।

कल्पः—"धवित्राण्यादत्ते गायत्रमसीति प्रथमं त्रैष्टुभमसीति द्वितीयं जागतमसीति तृतीयम्" इति। वायुना ज्वालोत्पादकं व्यजनं धवित्रम्। हे प्रथमधवित्र त्वं **गायत्रमसि** गायत्रीछन्दोदेवतारूपमसि[3]। एवमुत्तरयोरपि योज्यम्।

एतैर्मन्त्रैः साध्यमादानं विधत्ते—

गायत्रमसि त्रैष्टुभमसि जागतमसीति धवि-
त्राण्यादत्ते। छन्दोभिरेवैनान्यादत्ते, इति।

(प्रपा० ५। अनु० ४ विभा० ३३)

गायत्रादिशब्दैर्महावीरस्य व्यवहारश्छन्दोदेवताभिरादानसिद्ध्यर्थो द्रष्टव्यः॥

मधु मधु मधु (७)।

अनक्त्वसादीदुत्तरतः पाहि प्रतिमा असि यजतं
तेऽन्यज्जागतमस्येकं च॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठके
पञ्चमोऽनुवाकः॥ ५॥

---

१ क. °जाध°। २ ग. °ध्या। एवमुत्तरयोरपि योज्यम्। क°। ३ ग. °सि। एतै°। ४ ग. °यङ्गादि°।

कल्पः—"तैरेनं त्रिरूर्ध्वमुपवीजयतीति मधु मधु" इति । तृतीयो मधुशब्दो मन्त्रशेषः । हे धवित्रत्रय मधु समीचीनं ज्वालोत्पादनं यथा भवति तथा वायुं कुर्विति शेषः।

एतन्मन्त्रसाध्यां क्रियां विधत्ते—

मधु मध्विति धूनोति । प्राणो वै मधु
प्राणमेव यजमाने दधाति, इति ।
(प्रपा० ९ । अनु० ४ । विभा० ३४)

समीचीनवायुरूपत्वात्प्राणस्य मधुत्वम् ।

यदुक्तं सूत्रकारेण—" तेषामेकं प्रतिप्रस्थात्रे प्रयच्छत्येकमाग्नीध्रायाऽऽग्नीध्रप्रथमास्त्रिः प्रदक्षिणमूर्ध्वं धून्वन्तः परियन्ति" इति । तदिदं विधत्ते—

त्रिः परियन्ति । त्रिवृद्धि प्राणः, इति ।
(प्रपा० ९ । अनु० ४ । विभा० ३५)

प्राणापानव्यानाख्यवृत्तिभेदात्प्राणस्य त्रैगुण्यं प्रदक्षिणत्रयेण सिध्यति ।

तमेव विधिमनूद्य पुनः प्रशंसति—

त्रिः परियन्ति । त्र्यावृद्धि यज्ञः (११) । अथो रक्षसामपहत्यै, इति ।
(प्रपा० ९ । अनु ४ । विभा० ३६)

सवनत्रयानुष्ठानेन यज्ञस्याऽऽवृत्तित्रयम् । अपि च प्रदक्षिणत्रयेण रक्षांस्यपहन्यन्ते ।

यदुक्तं सूत्रकारेण— "अध्वर्युप्रथमा अनभिधून्वन्तास्त्रिः परियन्ति" इति । तदिदं विधत्ते—

त्रिः पुनः परियन्ति । षट्संपद्यन्ते । षड्वा
ऋतवः । ऋतुष्वेव प्रतितिष्ठन्ति, इति ।
(प्रपा० ९ । अनु० ४ । विभा० ३७)

पूर्वोक्ताः प्रदक्षिणावृत्तयस्तिस्र एताश्च विपरीतावृत्तयस्तिस्र इत्येवं षट्संपत्तिः । चतुर्थावृत्तिं निषेधति—

यो वै घर्मस्य प्रियां तनुवमाक्रामति । दुश्चर्मा
वै स भवति । एष ह वा अस्य प्रियां तनुवमाक्रामति। यस्त्रिः परीत्य चतुर्थं पर्येति । एताꣳ ह वा
अस्योग्रदेवो राजानिराचक्राम (१२) । ततो वै
स दुश्चर्माऽभवत् । तस्मात्त्रिः परीत्य न चतुर्थं
परीयात् । आत्मनो गोपीथाय, इति ।
(प्रपा० ९ । अनु० ४ । विभा० ३८)

---

१ क. ख. °था कु° । २ क. ख. °तास्ति° ।

धर्मस्य महावीरस्य प्रियशरीराक्रमणे त्वग्दोषः स्यात्। यः पुमानपेक्षितं प्रदक्षिणत्रयं कृत्वा ततश्चतुर्थं प्रदक्षिणमनपेक्षितमपि कुर्यात्, स एव प्रियशरीरमाक्रामतीति[1] त्वग्दोषं प्राप्नुयात्। न चैतद्वार्तामात्रं किंतु काश्चिद्राजनिनामकः पुरुष उग्रदेव उग्राणामृत्विजां शास्त्रार्थमुल्लङ्घयतां स्वामी सन्कदाचिदेतां प्रियतनूमाचक्राम। ततोऽपराधात्कुष्ठरोगवानभूत्। अतः स्वदेहरक्षार्थं चतुर्थावृत्तिं न कुर्यात्।

धवित्राणि प्रशंसति--

प्राणा वै धवित्राणि, इति।

(प्रपा० ९। अनु० ४। विभा० ३९)

यदुक्तं सूत्रकारेण—"तमभिमुखाः पर्युपविशन्ति पुरस्तादध्वर्युर्दक्षिणतः प्रतिप्रस्थातोत्तरत आग्नीध्रोऽव्यतिषङ्गमूर्ध्वं धून्वन्तः" इति। तत्र धवित्रदण्डानां यः परस्परसंश्लेषाभावस्तामिमं विधत्ते--

अव्यतिषङ्गं धून्वन्ति। प्राणानामव्यतिषङ्गाय कल्पत्यै, इति।

(प्रपा० ९। अनु० ४। विभा० ४०)

प्राणादिवृत्तीनां सांकर्यपरिहारेण स्वव्यापारसामर्थ्यार्थो धवित्राणामयमव्यतिषङ्गः। तमभिमुखाः पर्युपविशन्तीति यदुक्तं तद्विधत्ते--

विनिषद्य धून्वन्ति। दिक्ष्वेव प्रतितिष्ठन्ति, इति।

(प्रपा० ९। अनु० ४। विभा० ४१)

पुरस्तादध्वर्युरित्याद्यभिधानादिक्षु[2] प्रतिष्ठा।

ऊर्ध्वाभिमुखत्वेन वायूत्पादनं विधत्ते—

ऊर्ध्वं धून्वन्ति। सुवर्गस्य लोकस्य समष्टयै, इति।

(प्रपा० ९। अनु० ४। विभा० ४२)

स्वर्गस्योर्ध्ववर्तित्वादूर्ध्वधूननेन तत्प्राप्तिः।

सर्वासु दिक्षु धूननं विधत्ते--

सर्वतो धून्वन्ति। तस्मादयꣳ सर्वतः पवते, इति।

(प्रपा० ९। अनु० ४। विभा० ४३)

दधातीवान्वाह यज्ञस्याऽऽहैष उपरिष्टादाशीरन्यो व्यास्थाप्यन्ति रश्मयो भवन्ति धून्वेत्याह यज्ञश्चक्राम समष्टयै द्वे च॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके पञ्चमप्रपाठके चतुर्थोऽनुवाकः॥ ४॥

---

१ ग. 'षं न प्रा'। २ क. ख. 'र्थ्यार्थं ध'।

यस्मान्महावीरस्य सर्वासु दिक्षु वायुमुत्पादयन्ति तस्माल्लोकेऽप्ययं वायुः सर्वासु दिक्षु संचरति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये चतुर्थप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

अथ चतुर्थे षष्ठोऽनुवाकः ।

पञ्चमे महावीरस्थापनमुक्तम् । षष्ठे तस्याभिमन्त्रणमुच्यते । कल्पः—" अध्वर्युर्महावीरमभिमन्त्रयते दश प्राचीर्दश भासि दक्षिणेत्यनुवाकेन" इति । तत्राऽऽदावेकामृचमाह—

दश प्राचीर्दश भासि दक्षिणा । दश प्रतीची-
र्दश भास्युदीचीः । दशोर्ध्वा भासि सुमनस्य-
मानः । स नो रुचं धेह्यहृणीयमानः, इति ।

हे महावीर **प्राचीः** प्राग्दिग्वर्तिन्यो ज्वाला **दश**संख्याका यथा भवन्ति तथा **भासि** त्वं दीप्यसे । एवं दक्षिणादिषु योज्यम् । ताभिरेताभिः सर्वाभिर्ज्वालाभिः सौमनस्यं प्राप्तः(सः), **स** त्वम**हृणीयमानः** केनाप्यहिंस्यमानः सन्नोऽस्मदर्थं **रुचं धेहि** तेजो धारय ।

अथ दिग्भेदेन देवताविशेषप्रतिपादकानि पञ्च यजूंषि तत्र प्रथमं यजुराह—

अग्निष्ट्वा वसुभिः पुरस्ताद्रोचयतु गायत्रेण
छन्दसा । स मां रुचितो रोचय, इति ।

हे महावीर त्वां पूर्वस्यां दिशि **वसुभि**र्दैवैर्गायत्रीछन्दोदेवतया च सहाग्निर्देवो **रोचयतु** दीपयतु । पुरतो **रुचितो** दीपितः **स** त्वं **मां रोचय** प्रकाशय ।

अस्मिन्मन्त्रे यदग्नेर्दीपकत्वं तन्मुख्यमेव न तूपचारितमित्येवकारेण दर्शयति—

अग्निष्ट्वा वसुभिः पुरस्ताद्रोचयतु गायत्रेण
छन्दसेत्याह । अग्निरेवैनं वसुभिः पुर-
स्ताद्रोचयति गायत्रेण छन्दसा, इति ।
(प्रपा० ५ । अनु० ५ । विभा० १)

रोचयेत्ययं लोट्प्रत्ययो न विध्यर्थः किंत्वाशीरर्थ इत्येतद्दर्शयति—

स मा रुचितो रोचयेत्याह । आशिषमेवैतामाशास्ते, इति ।
(प्रपा० ५ । अनु० ५ । विभा० २)

१ ग. °चयत्वित्य° ।

अथ दक्षिणादिदिग्देवताविषयाणि चत्वारि यजूंष्याह—

इन्द्रस्त्वा रुद्रैर्दक्षिणतो रोचयतु त्रैष्टुभेन छन्दसा । स मा रुचितो रोचय । वरुणस्त्वाऽऽदित्यैः पश्चाद्रोचयतु जागतेन छन्दसा । स मा रुचितो रोचय (१) । द्युतानस्त्वा मारुतो मरुद्भिरुत्तरतो रोचयत्वानुष्टुभेन छन्दसा । स मा रुचितो रोचय । बृहस्पतिस्त्वा विश्वैर्देवैरुपरिष्टाद्रोचयतु पाङ्क्तेन छन्दसा । स मा रुचितो रोचय, इति ।

पूर्वोक्ताग्निविषययजुर्वदेन्द्रादिविषयाणि चत्वारि यजूंषि व्याख्येयानि ।

एतेषु चतुर्ष्वपि यजुःषूपचारव्यावृत्तिमेवकारेण लोट्प्रत्ययस्याऽऽशीरर्थत्वं च पूर्ववद्दर्शयति

इन्द्रस्त्वा रुद्रैर्दक्षिणतो रोचयतु । त्रैष्टुभेन छन्दसेत्याह । इन्द्र एवैनꣳ रुद्रैर्दक्षिणतो रोचयति त्रैष्टुभेन छन्दसा । स मा रुचितो रोचयेत्याह । आशिषमेवैतामाशास्ते । वरुणस्त्वाऽऽदित्यैः पश्चाद्रोचयतु जागतेन छन्दसेत्याह । वरुण एवैनमादित्यैः पश्चाद्रोचयति जागतेन छन्दसा (१)। स मा रुचितो रोचयेत्याह । आशिषमेवैतामाशास्ते । द्युतानस्त्वा मारुतो मरुद्भिरुत्तरतो रोचयत्वानुष्टुभेन छन्दसेत्याह । द्युतान एवैनं मारुतो मरुद्भिरुत्तरतो रोचयत्यानुष्टुभेन छन्दसा । स मा रुचितो रोचयेत्याह । आशिषमेवैतामाशास्ते । बृहस्पतिस्त्वा विश्वैर्देवैरुपरिष्टाद्रोचयतु पाङ्क्तेन छन्दसेत्याह । बृहस्पतिरेवैनं विश्वैर्देवैरुपरिष्टाद्रोचयति पाङ्क्तेन छन्दसा । स मा रुचितो रोचयेत्याह । आशिषमेवैतामाशास्ते, (२) । इति ।

(प्रपा० ५ । अनु० ५ । विभा० । ३)

अथ यजुरन्तरमाह—

रोचितस्त्वं देव घर्म देवेष्वसि ।
रोचिषीयाहं मनुष्येषु, इति ।

हे देव द्योतमान घर्म महावीर त्वं देवेषु मध्ये रोचितः प्रकाशितोऽसि । अतस्त्वत्प्रसादादहमपि मनुष्येषु मध्ये रोचिषीय प्रकाशितो भूयासम् ।

अस्मिन्मन्त्रे भागद्वयगतयोरर्थयोः प्रसिद्धिमवश्यंभावित्वं च हिशब्देनैवकारेण[च?]दर्शयति-

रोचितस्त्वं देव घर्म देवेष्वसीत्याह । रोचितो ह्येष देवेषु । रोचिषीयाहं मनुष्येष्वित्याह । रोचत एवैष मनुष्येषु, इति ।

(प्रपा० ५ । अनु० ५ । विभा० ४)

अथ यजुरन्तरमाह—

सम्राड्घर्म रुचितस्त्वं देवेष्वायुष्माꣳस्तेजस्वी ब्रह्मवर्चस्यसि । रुचितोऽहं मनुष्येष्वायुष्माꣳस्तेजस्वी ब्रह्मवर्चसी भूयासम्, इति ।

हे घर्म महावीर त्वं देवेषु मध्ये बहुगुणयुक्तोऽसि । के ते गुणा इति त उच्यन्ते। **सम्राट्**साम्राज्ययुक्तः, **रुचितः** प्रकाशितः, **आयुष्मान्**दीर्घेणाऽऽयुषा युक्तः, **तेजस्वी** महत्या कान्त्या युक्तः, **ब्रह्मवर्चसी** श्रुताध्ययनसंपन्नः । त्वत्प्रसादादहमपि **मनुष्येषु** मध्ये रुचितत्वादिगुणयुक्तो **भूयासम्** ।

अत्रापि हिशब्दैवकाराभ्यां मन्त्रभागौ पूर्ववदव्याचष्टे—

सम्राड्घर्म रुचितस्त्वं देवेष्वायुष्माꣳस्तेजस्वी ब्रह्मवर्चस्यसीत्याह । रुचितो ह्येष देवेष्वायुष्माꣳस्तेजस्वी ब्रह्मवर्चसी । रुचितोऽहं मनुष्येष्वायुष्माꣳस्तेजस्वी ब्रह्मवर्चसी भूयासमित्याह । रुचित एवैष मनुष्येष्वायुष्माꣳस्तेजस्वी ब्रह्मवर्चसी भवति, इति ।

(प्रपा० ५ । अनु० ५ । विभा० ५)

अथ यजुरन्तरमाह—

रुगसि । रुचं मयि धेहि[1] (२) । मयि रुक्, इति ।

हे महावीर रुगसि त्वमेव दीप्तिरूपोऽसि । अतो **मयि रुचं** दीप्तिं **धेहि** संपादय त्वदनुग्रहाद्रुग्दीप्तिर्मयि तिष्ठत्विति शेषः ।

धेहीत्यस्य लोट्प्रत्ययस्याऽऽशीरर्थत्वं दर्शयति—

रुगसि रुचं मयि धेहि मयि रुगित्याह । आशिषमेवैतामाशास्ते, इति ।

(प्रपा० ५ अनु० ५ विभा० ६)

अथ यजुरन्तरमाह—

दश पुरस्ताद्रोचसे । दश दक्षिणा । दश प्रत्यङ् । दशोदङ् । दशोर्ध्वो[2] भासि सुमनस्यमानः । स

---

१ ग. °हि । म° । २ ग. °शोर्ध्वा भा° ।

नः सम्राडिषमूर्जं धेहि । वाजी वाजिनं पवस्व ।
रोचितो घर्मो रुचीय (१), इति ॥
रोचय धेहि नवं च ॥
इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठके
षष्ठोऽनुवाकः ॥ ६ ॥

अनुवाकादौ दश प्राचीरिति योऽर्थ उक्तः सोऽत्रोपसंहियते । हे महावीर **पुरस्तात्पूर्वस्यां दिशि दश** दीप्तयो यथा भवन्ति तथा त्वं **रोचसे** दीप्यसे । एवं दक्षिणादिषु दिक्षु द्रष्टव्यम् । अतः **सुमनस्यमानः** सौमनस्यं प्राप्तः **सम्राट्साम्राज्यं** प्राप्तः **स** त्वं **नोऽस्माकमिषमूर्जं** च धेहि संपादय । **वाजी** समृद्धान्नस्त्वं **वाजिने** समृद्धान्नाय **मह्यं पवस्व** सर्वं भोग्यं शोधय । एवमनेन प्रकारेण **घर्मो** महावीरो **रोचितोऽस्माभिः** प्रकाशितः, अतस्त्वत्प्रसादादहमपि **रुचीय** प्रकाशवान्भूयासम् ।

यदुक्तं सूत्रकारेणोपोत्तिष्ठन्नध्वर्युराह रुचितो घर्म इति तदिदं कालसहितं **विधत्ते**—

तं यदेतैर्यजुर्भिररोचयित्वा । रुचितो घर्म इति प्रब्रूयात् ।
अरोचुकोऽध्वर्युः स्यात् । अरोचुको यजमानः । अथ
यदेनमेतैर्यजुर्भी रोचयित्वा । रुचितो घर्म इति प्राह ।
रोचुकोऽध्वर्युर्भवति । रोचुको यजमानः (२), इति ।
(प्रपा० ५ । अनु० ५ । विभा० ७)

पश्चाद्रोचयति जागतेन छन्दसा स मा रुचितो रोचयेत्याहाऽऽशिषमेवैतामाशास्ते शास्तेऽष्टौ च ॥
इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके पञ्चमप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

तं महावीरं यद्येतैरनुवाकोक्तैर्यजुभिर्मन्त्रैररोचयित्वा प्रकाशितमकृत्वा **प्रथमत एव घर्मो** महावीरो **रुचितः** प्रकाशित इति प्रब्रूयात्तदाऽध्वर्युयजमानौ दीप्तिरहितौ स्याताम् । यजुष्पाठादूर्ध्वं तु नायं दोषः, तस्मादुत्तरकाल एव **रुचितो घर्म** इति मन्त्रमध्वर्युर्ब्रूयात् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये चतुर्थप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

---

१ घ. (३) । २ घ. ॥ ५ ॥ ३ क. ख. सर्वभो°

अथ चतुर्थे सप्तमोऽनुवाकः ।

षष्ठे महावीराभिमन्त्रणमुक्तम् । अथ सप्तमे महावीरावेक्षणमुच्यते । कल्पः— "यथालोकमवस्थाय सर्वे ऋत्विजो यजमानश्चाधीयन्तो महावीरमवेक्षन्ते, अपश्यं गोपाम्" इति । तस्यानुवाकस्याऽऽदावेकामृचमाह—

अपश्यं गोपामनिपद्यमानम् । आ च परा
च पथिभिश्चरन्तम् । स सध्रीचीः स विषू-
चीर्वसानः । आवरीवर्ति भुवनेष्वन्तः, इति ।

अहं महावीरमपश्यं दृष्टवानस्मि । कीदृशम् । **गोपां** कर्मनिष्पादनेन रक्षकम् । **अनिपद्यमानं** विनाशरहितम्, अथवाऽऽदित्यरूपेण पतनरहितम् । तथा **पथिभिर्नानामार्गैराचरन्तं च पराचरन्तं च,** आदित्यरूपः सन्नाभिमुख्येन प्रातःकाले समागच्छन्तं सायंकाले पराङ्मुखत्वेन गच्छन्तम् । **स** महावीर आदित्यरूपः **सध्रीचीः** सहावस्थिता अपि **विषूचीर्**नानादेशेषु विभज्य गच्छन्तीरपि प्रजाः सर्वा **वसानः** स्वकीयरश्मिभिराच्छादयन्निव वर्तते । अथवैकत्रावस्थितास्तत्र तत्र पृथगवस्थिताश्च मरीचीः स्वस्मिन्नाच्छादयन्वर्तते । **स** च **भुवनेष्वन्तः** सर्वेषु लोकेषु मध्य **आवरीवर्ति** पुनः पुनरावर्तते । सोऽयं मन्त्र उपरिष्टाद्व्याख्यास्यते ।

तत्र प्रथमं तावत्प्रवर्ग्यस्य कालं विधत्ते—

शिरो वा एतद्यज्ञस्य । यत्प्रवर्ग्यः । ग्रीवा उपसदः । पुरस्तादुपसदां
प्रवर्ग्यं प्रवृणक्ति । ग्रीवास्वेव यज्ञस्य शिरः प्रतिदधाति, इति ।
(प्रपा० ५ । अनु० ६ । विभा० १)

प्रवर्ग्यस्य यज्ञशिरोरूपत्वादुपसदां च यज्ञग्रीवारूपत्वादुभयोः सामीप्यायोपसदनुष्ठानात्प्रागेव प्रवर्ग्यकर्मानुतिष्ठेत् । तप्ते घृते पयःप्रक्षेपः प्रवृज्ञनं तद्यस्मिन्कर्मविशेषे विद्यते सोऽयं **प्रवर्ग्यः,** स कर्मविशेषो यथा संपद्यते तथा प्रवृज्ञनं कुर्यादित्यक्षरार्थः । प्रवर्ग्योपसदोः सामीप्ये सति यथा लोके ग्रीवायां **शिरः** प्रतिहितं भवति तथैतत्संपद्यते । **ग्रीवा**स्विति वचनव्यत्ययः ।

प्रवर्ग्यस्याऽऽवृत्तिं विधत्ते—

त्रिः प्रवृणक्ति । त्रय इमे लोकाः । एभ्य
एव लोकेभ्यो यज्ञस्य शिरोऽवरुन्धे, इति ।
(प्रपा० ५ । अनु० ६ । विभा० २)

---

१ ग. °ध्रीचीरेकत्र स° । २ क. ख. °षूचीः खननदे° । ३ क. ख. °श्च स्व° । ४ ग. °सदोऽनु° । ५ म. °वर्ग्यं क° ।

उपसदां दिनत्रयेऽनुष्ठेयत्वात्तत्समीपवर्ती प्रवर्ग्योऽपि दिनत्रयेऽनुष्ठेयः । तथा सति लोकत्रयार्थं यज्ञशिरः प्रतिहितं भवति ।

सायं प्रातश्चेति कालद्वयानुष्ठानं प्रशंसति—

षट्संपद्यन्ते । षड्वा ऋतवः (१) ।
ऋतुभ्य एव यज्ञस्य शिरोऽवरुन्धे, इति ।
(प्रपा० ५ । अनु० ६ । विभा० ३)

एकैकस्मिन्दिने कालभेदेन द्विरनुष्ठानात्षट्संख्या संपद्यते[1] । तत ऋतुभ्यः सकाशाद्यज्ञशिरः संपादितं भवति ।

दिनषट्कपक्षं विधत्ते—

द्वादशकृत्वः प्रवृणक्ति । द्वादश मासाः संवत्सरः ।
संवत्सरादेव यज्ञस्य शिरोऽवरुन्धे, इति ।
(प्रपा० ५ । अनु० ६ । विभा० ४)

षट्सु दिनेषु कालद्वयानुष्ठानेन द्वादशत्वम् ।

द्वादशसु दिनेष्वनुष्ठानविधिमभिप्रेत्य प्रशंसति—

चतुर्विंशतिः संपद्यन्ते । चतुर्विंशतिरर्धमासाः ।
अर्धमासेभ्य एव यज्ञस्य शिरोऽवरुन्धे, इति ।
(प्रपा० ५ । अनु० ६ । विभा० ५)

द्वादशस्वपि दिनेषु कालद्वयानुष्ठानेन चतुर्विंशतिसंपत्तिः । अग्निष्टोमे त्रिष्वेव दिनेषूपसदोऽग्निचयने षट्सु दिनेष्वहीने सत्रे[2] च द्वादशसु दिनेषु तदनुसारेण प्रवर्ग्यावृत्तिः । एतच्च सूत्रकारेण संगृहीतम्—"व्युपसत्के षट्कृत्वः षडुपसत्के द्वादशकृत्वो द्वादशोपसत्के चतुर्विंशतिकृत्वः" इति ।

विकल्पितं पक्षान्तरं विधत्ते—

अथो खलु । सकृदेव प्रवृज्यः । एकꣳ हि शिरः (२), इति ।
(प्रपा० ५ । अनु० ६ । विभा० ६)

पक्षान्तरोपन्यासायाथोशब्दः शिरस एकत्वात्तत्स्थानीयोऽयं[3] प्रवर्ग्यः सकृदेवानुष्ठेयो न त्वावृत्त्येति केषांचित्पक्षः । एतच्च सूत्रकारेण विस्पष्टमुदाहृतम्—"मुत्यायां प्रवृज्यमेके समामनन्ति । तत्र मीमांसा । यदा पुरस्तादरुणः स्यादथ प्रवृज्य उपकाश उपव्युषं समर्थाविषित[4] उदितानुदित उदिते वा प्रातः सवने[5] माध्यंदिने[6] वा पवमाने स्तुत आग्नीध्रागारे प्रवृत्त्यः सकृदेव प्रवृज्य इति विज्ञायते" इति ।

---

१ क ख. संपद्यन्ते । २ ग. °त्रे द्वा° ३ ग. °नीयः प° । ४ ग. °यास्तावि° । ५ ग. संगवे । ६ ग. माध्यंदिने ।

प्रवर्ग्यस्याग्निष्टोमसंबन्धं विधत्ते—

अग्निष्टोमे प्रवृणक्ति । एतावान्वै यज्ञः । यावानग्निष्टोमः ।
यावानेव यज्ञः । तस्य शिरः प्रतिदधाति, इति ।
(प्रपा० ५ । अनु० ६ । विभा० ७)

यावन्तः सोमयागाः सन्ति तेषु सर्वेष्वप्यग्निष्टोमः संचार्यतः सर्वयज्ञात्मकः, तत्रानुष्ठिते सति कृत्स्नेऽपि यज्ञे शिरः प्रतिहितं भवति । अनारभ्याधीतस्य प्रवर्ग्यस्य यद्यपि पुरस्तादुपसदामितिवाक्येनैव प्रकृतिभूताग्निष्टोमसंबन्धः प्राप्तः, तथाऽपि शाखान्तरगतं न प्रथमयज्ञे प्रवृञ्ज्यादिति निषेधमपोह्य प्रतिप्रसवार्थं पुनर्विधानम् । निषेधस्त्वतिरात्रेऽपि चरितार्थो भविष्यति, तस्यापि विकल्पितः प्रथमयज्ञत्वात् । तथाचाऽऽपस्तम्ब आह— "अग्निष्टोमः प्रथमयज्ञोऽतिरात्रमेके पूर्वं समामनन्ति" इति ।

पुरस्तादुपसदामितिवाक्येनोक्थ्येऽप्युपसद्भावात्पूर्वं प्रवर्ग्यस्यापि प्राप्तौ निषेधयति—

नोक्थ्ये प्रवृञ्ज्यात् । प्रजा वै पशव उक्थानि ।
यदुक्थ्ये प्रवृञ्ज्यात् । प्रजां पशूनस्य निर्दहेत्, इति ।
(प्रपा० ५ । अनु० ६ । विभा० ८)

एह्यू षु ब्रवाणीत्यादीनि शस्त्राण्यत्रोक्थशब्देनाविधीयन्ते तान्यर्हतीत्युक्थ्यः क्रतुः, तत्र प्रवृञ्जनेनोक्थशस्त्रसाध्याः प्रजाः पशवश्च दह्येयुः (रन्), तस्मात्तत्र न प्रवृञ्ज्यात् ।

उक्थ्यविशेषे प्रतिप्रसवं विधत्ते—

विश्वजिति सर्वपृष्ठे प्रवृणक्ति (३) । पृष्ठानि वा अच्युतं
च्यावयन्ति । पृष्ठैरेवास्मा अच्युतं च्यावयित्वाऽवरुन्धे, इति ।
(प्रपा० ५ । अनु० ६ । विभा० ९)

रथंतरबृहद्वैरूपवैराजशाक्वररैवतसामसाध्यानि पृष्ठस्तोत्राणि सर्वाण्यपि यस्मिन्विश्वजिद्याग विद्यन्ते सोऽयं सर्वपृष्ठः । यद्यपि विश्वजिदुक्थ्यसंस्थो नात्र प्रसिद्धः, तथाऽपि शाखान्तरे तत्सद्भावमभिप्रेत्य नोक्थ्ये प्रवृञ्ज्यादिति निषेधं वारयितुं पुनर्विधिः । सर्वत्र पृष्ठस्तोत्राणि अच्युतं न च्युतमपि दोषं च्यावयन्ति विनाशयन्ति । अत्रापि पृष्ठस्तोत्रैरेवाच्युतं निषेधप्रयुक्तं प्रबलमपि दोषं च्यावयित्वा प्रवर्ग्यफलमपि प्राप्नोति ।

तदेवं बुद्धिस्थं प्रवर्ग्यविधिविचारं परिसमाप्य प्रकृतस्यैव मन्त्रस्य प्रथमपादे पूर्वभागं व्याचष्टे—

अपश्यं गोपामित्याह । प्राणो वै गोपाः ।

---

१ ग. °नोक्थोऽप्यु° । २ क. निषेधति ३ क. ख. °ब्देन वि° । ४ क. ख. °तं प्रच्यु° ।

प्राणमेव प्रजासु वियातयति, इति ।

(प्रपा० ५ । अनु० ६ । विभा० १०)

प्राणो हि स्वावस्थानेन शरीराणि गोपायतीति **गोपाः** । मन्त्रे च प्राणत्वेन स्तुतिमभिप्रेत्य महावीरे गोपाशब्दः प्रयुक्तः । अतो गोपामपश्यमित्युक्ते सति सर्वासु **प्रजासु प्राणमेव** प्रसारितवान्भवति ।

आदित्यरूपेण स्तुतिमभिप्रेत्य पुनरपि व्याचष्टे—

अपश्यं गोपामित्याह । असौ वा आदित्यो गोपाः । स हीमाः
प्रजा गोपायति । तमेव प्रजानां गोप्तारं कुरुते, इति ।

(प्रपा० ५ । अनु० ६ । विभा० ११)

आदित्यो ह्युदयेन प्रकाशं कृत्वा सर्वाः **प्रजा** गोपायतीति **गोपाः**, तद्रूपत्वेन स्तुतत्वान्महावीरो **गोपाः** । एतत्पाठेन यजमानमेव **प्रजानां गोप्तारं** करोति ।

प्रथमपादस्योत्तरभागोक्तादित्यरूपेणावस्थितस्य महावीरस्य भूमौ पतनाभावः प्रसिद्ध इति दर्शयति—

अनिपद्यमानमित्याह (४) । न ह्येष निपद्यते, इति ।

(प्रपा० ५ । अनु० ६ । विभा० १२)

द्वितीयपादोक्तं नानामार्गैरादित्यस्याऽऽगमनं परागमनं च प्रसिद्धमिति दर्शयति—

आ च परा च पथिभिश्चरन्तमित्याह ।
आ च ह्येष परा च पथिभिश्चरति, इति ।

(प्रपा० ५ । अनु० ६ । विभा० १३)

यदाऽयमादित्य उदयं प्राप्तः सर्वाः प्रजा अभितो विशेषेण पश्यति तदानीं स्वेन सह वर्तमाना दूरे विविधं प्रसृताश्च मरीचीर्वस्त्रवद्वसानो वर्तत इत्येतत्प्रसिद्धमित्येतादृशं तृतीयपादाभिप्रायं दर्शयति—

स सध्रीचीः स विषूचीर्वसान इत्याह । सध्रीचीश्च ह्येष
विषूचीश्च वसानः प्रजा अभिविपश्यति, इति ।

(प्रपा० ५ । अनु० ६ । विभा० १४)

चतुर्थपादोक्ता भुवनमध्ये सूर्यस्याऽऽवृत्तिः प्रसिद्धेति दर्शयति—

आ वरीवर्ति भुवनेष्वन्तरित्याह । आ
ह्येष वरीवर्ति भुवनेष्वन्तः, इति ।

(प्रपा० ५ । अनु० ६ । विभा० १५)

---

१ क. °रीचीः शस्त्रद्वयं वसा° । २ ख. °स्त्रद्वयं वसा° ।

अथ वसन्तर्तुरूपेण स्तावकं मन्त्रमाह—

अत्रं प्रावीः । मधुमाध्वीभ्यां मधुमाधूचीभ्याम् । अनु वां देववीतये, इति ।

हे महावीरात्रास्मिन्कर्मणि **मधुमाध्वीभ्यां** सहितस्त्वं **प्रावीः**रस्मान्प्रकर्षेण रक्षितवानसि । **मधु**शब्दो वसन्तावयवचैत्रमासाभिमानिदेवमाचष्टे, **माध्वी**शब्दस्तत्पत्नीम् । तथा द्वितीयो **मधु**शब्दो वसन्तावयवैवैशाखमासाभिमानिदेवमाचष्टे, **माधूची**शब्दस्तत्पत्नीम् । ताभ्यां सहितस्त्वं प्रावीरित्यन्वयः । वां वसन्तदेवौ युवामनुसृत्य **देववीतये** देवप्राप्त्यर्थम्, महावीरमवेक्षे इति शेषः ।

मन्त्रस्य वसन्तर्तुपरतां दर्शयति—

अत्र प्रावीर्मधुमाध्वीभ्यां मधुमाधूचीभ्यामित्याह ।
वासन्तिकावेवास्मा ऋतू कल्पयति, इति ।
(प्रपा० ५ । अनु० ६ । विभा० १६)

अस्मै यजमानार्थं वसन्तसंबन्धिनावृत्ववयवौ चैत्रवैशाखमासौ स्वोचितभोगप्रदानसमर्थौ करोति ।

अथ ग्रीष्मर्तुरूपेण स्तावकं मन्त्रमाह—

समग्निरग्निना गत । सं देवेन सवित्रा ।
स सूर्येण रोचते (१), इति ।

अग्निशब्दाभ्यामत्युष्णौ ग्रीष्मावयवौ ज्येष्ठाषाढमासौ विवक्षितौ । तत्रैकोऽग्निर्ज्येष्ठमासरूपो द्वितीयेनाग्निनाऽऽषाढमासरूपेण **संगतो**ऽभूत् । तदुभयमासवर्तिनावादित्यौ सवितृसूर्यशब्दाभ्यां विवक्ष्येते । अयं महावीराख्यो देवो ज्येष्ठमासे **सवित्रा संगतः**, आषाढमासे **सूर्येण संगत्य रोचते** ।

अस्य मन्त्रस्य ग्रीष्मर्तुपरतां दर्शयति—

समग्निरग्निना गतेत्याह (९) । ग्रैष्मावेवास्मा ऋतू कल्पयति, इति ।
(प्रपा० ५ । अनु० ६ । विभा० १७)

वसन्तवाक्यवद्व्याख्येयम् ।

तस्यैव मन्त्रस्यार्थान्तरं दर्शयति—

समग्निरग्निना गतेत्याह । अग्निर्ह्येवैषोऽग्निना संगच्छते, इति ।
(प्रपा० ५ । अनु० ६ । विभा० १८)

---

१ क. ख. °यवार्धवै° । २ क. ख. °वतामा° । ३ क. °म्, अवै° । ४ ग. °क्षत इ° । ५ ग. गतः । ६ क. °मासरूयेण वि° । ७ ख. तत्रैव । ८ ख. °स्यार्थं द° ।

एष महावीररूपोऽग्निरादित्यरूपेणाग्निना संगच्छत इत्ययमर्थः प्रसिद्धः।

पुनरपि ग्रीष्मर्तुरूपेणैव स्तावकं मन्त्रान्तरमाह--

स्वाहा समग्निस्तपसा गत । सं देवेन
सवित्रा । स१ सूर्येणारोचिष्ट, इति।

स्वाहाशब्दो निपातत्वादनेकार्थः। अग्निवदुष्णरूपो ज्येष्ठमासस्तपसा तापयुक्तेनाऽऽषाढमासेन स्वाहा सुष्ठु समागतः संगतोऽभूत्। सं देवेनेत्यादि पूर्ववत्।

अस्य मन्त्रस्य पूर्वमन्त्रेण सह समानार्थतां दर्शयति--

स्वाहा समग्निस्तपसा गतेत्याह। पूर्वमेवोदितम्। उत्तरेणाभिगृणाति, इति।

(प्रपा० ५। अनु० ६। विभा० १९।)

ग्रीष्मविषयत्वं पूर्वस्मिन्मन्त्रेऽभिहितमेव ग्रीष्ममुक्त(मेवोक्त)रमन्त्रेणापि श्रुतिर्ब्रूते।

अथ वर्षर्तुरूपेण स्तावकं मन्त्रमाह--

धर्ता दिवो विभासि रजसः। पृथिव्या धर्ता। उरोरन्तरिक्षस्य
धर्ता। धर्ता देवो देवानाम्। अमर्त्यस्तपोजाः, इति।

हे महावीर वर्षर्तुरूपेण दिवो द्युलोकस्य रजसो मेघादिरञ्जनोपेतस्य धर्ता धारको विभासि प्रकाशसे। तथौषधीजननेन पृथिव्या अपि धर्ता, स्वकीयवृष्टिप्रसारणेनोरोर्विस्तीर्णस्यान्तरिक्षस्यापि धर्ता, हविर्द्वारेणोपकारकत्वाद्देवानामपि धर्ता पोषको देवः। अत एवामर्त्यो मरणरहितः, दीक्षादिरूपेण तपसा जायते सिध्यतीति तपोजाः।

अस्य मन्त्रस्य वर्षर्तुपरतां दर्शयति--

धर्ता दिवो विभासि रजसः पृथिव्या
इत्याह। वार्षिकावेवास्मा ऋतू कल्पयति, इति।

वसन्तमन्त्रवद्व्याख्येयम्।

(प्रपा० ५ अनु० ६। विभा० २०)

शारदर्तु(शरदृतु)रूपेण स्तावकं मन्त्रमाह--

हृदे त्वा मनसे त्वा । दिवे त्वा सूर्याय त्वा (२)।
ऊर्ध्वमिममध्वरं कृधि। दिवि देवेषु होत्रा यच्छ, इति।

हे महावीर त्वां हृदे हृदयार्थमवेक्ष इति शेषः। मनसे मनोर्थं त्वामवेक्षे। अत्र हृन्मनःशब्दाभ्यामनुकूलभोगार्थत्वेन चिन्त्यमानावाश्वयुजकार्तिकमासावुपलक्ष्येते। तन्मा-

---

ग. गतः।

सद्वयोचितभोगसिद्ध्यर्थमित्यर्थः। तथा **दिवे** द्युलोकप्राप्त्यर्थं, **सूर्याय** सूर्यप्राप्त्यर्थं च त्वामवेक्षे। **इममस्मदीयमध्वरं** यागमूर्ध्वं **कृधि**, उन्नतं कुरु। होत्रा इमा होमक्रिया **दिवि** द्युलोके **देवेषु** मध्ये **यच्छ** देहि कथयेत्यर्थः।

अस्य मन्त्रस्य शारदर्तु(शरदृतु)परतां दर्शयति—

हृदे त्वा मनसे त्वेत्याह। शारदावेवास्मा ऋतू कल्पयति (६), इति।

(प्रपा० ५। अनु० ६। विभा० २१)

वसन्तवाक्यवद्व्याख्येयम्।

मन्त्रचरमभागेन(ण)सर्वेषां लोकानां होमक्रियाभिसंबन्धं दर्शयति—

दिवि देवेषु होत्रा यच्छेत्याह। होत्राभिरेवेमाँल्लोकान्संदधाति, इति।

(प्रपा० ५। अनु० ६। विभा० २२)

अथ हेमन्तर्तुरूपेण स्तावकं मन्त्रमाह—

विश्वासां भुवां पते। विश्वस्य भुवनस्पते।
विश्वस्य मनसस्पते। विश्वस्य वचसस्पते।
विश्वस्य तपसस्पते। विश्वस्य ब्रह्मणस्पते।

जम्बूद्वीपादयो या भुवस्तासां **भुवां विश्वासां** सर्वासां हे **पते** पालक **हेमन्तर्तुरूप** महावीर त्वामवेक्ष इति शेषः। **भुवनो** भवनस्य लोकजातस्य, **मनसो**ऽन्तःकरणजातस्य, **वचसो** वाक्यजातस्य, **तपसस्तपो**जातस्य, **ब्रह्मणो** वेदजातस्य, **पते** पालक त्वामवेक्षे।

अस्य मन्त्रस्य हेमन्तर्तुपरतां दर्शयति—

विश्वासां भुवां पत इत्याह। हैमन्तिकावेवास्मा ऋतू कल्पयति, इति।

(प्रपा० ५। अनु० ६। विभा० २३)

वसन्तवाक्यवद्व्याख्येयम्।

शौ(शि)शिरर्तुरूपेण स्तावकं मन्त्रमाह—

देवश्रूस्त्वं देव घर्म देवान्पाहि, इति।

हे **घर्म** प्रवर्ग्य **देव शौ(शि)शिरर्तुरूप**, **देवश्रूर्देवेषु** श्रूयमाणस्त्वं **देवान्हविष्प्रदानेन पाहि** रक्ष।

अस्य मन्त्रस्य शौ(शि)शिरर्तुपरतां दर्शयति—

देवश्रूस्त्वं देव घर्म देवान्पाहीत्याह। शौशिरावेवास्मा ऋतू कल्पयति, इति।

(प्रपा० ५। अनु० ६। विभा० २४)

---

१ क. ख. °न्तरू°।

वसन्तवाक्यवद्व्याख्येयम् ।

अथ बहूनि वाक्यानि नानाविधैः स्तावकान्युच्यन्ते । तत्रैकवाक्यतामाह—

तपोजां वाचमस्मे नियच्छ देवायुवम् (३), इति ।

हे महावीरास्मेऽस्मभ्यं **तपोजां** तपस उत्पन्नां **देवायुवं** देवानिच्छन्तीं **वाचं** मन्त्ररूपां **नियच्छ** नितरां देहि ।

तपोजामित्यनेन यज्ञयोग्या मन्त्ररूपा वाग्विवक्ष्यते तस्यास्तपस्विना पुरुषेण लभ्यमानत्वादित्येतद्दर्शयति—

तपोजां वाचमस्मे नियच्छ देवायुवमित्याह । या वै मेध्या वाक् । सा तपोजाः । तामेवावरुन्धे, (७), इति ।

(प्रपा० ५ । अनु० ६ । विभा० २५)

वाक्यान्तरमाह—

गर्भो देवानाम्, इति ।

अयं महावीरो **देवानां** संबन्धी **गर्भ**रूपः, देवैरपेक्षितस्य हविषोऽत्र गर्भरूपेणावस्थानात् ।

मन्त्रार्थस्य प्रसिद्धिं दर्शयति—

गर्भो देवानामित्याह । गर्भो ह्येष देवानाम्, इति ।

(प्रपा० ५ । अनु० ६ । विभा० २६)

वाक्यान्तरमाह—

पिता मतीनाम्, इति ।

देवैर्हविष्प्रदानार्थं तदा तदा मन्यन्त इति मतयः प्रजास्तासां प्रजानां महावीरः फलदानेन पालकत्वात्**पिता** ।

मतिशब्देन प्रजाविवक्षां दर्शयति—

पिता मतीनामित्याह । प्रजा वै मतयः । तासामेष एव पिता । यत्प्रवर्ग्यः । तस्मादेवमाह, इति ।

(प्रपा० ५ । अनु० ६ । विभा० २७)

वाक्यान्तरमाह—

पतिः प्रजानाम्, इति ।

अयं महावीरः पूर्वोक्तरीत्या पालकत्वात्**प्रजानां** स्वामी ।

---

१ क. °म् । मन्त्रान्तरमा° । २ ख. °नां पाता म° । ग. °नां मातुं म° ।

अस्य वाक्यस्यार्थप्रसिद्धिं दर्शयति—

पतिः प्रजानामित्याह । पतिर्ह्येष प्रजानाम्, इति ।

(प्रपा० ५ । अनु० ६ । विभा० २८)

वाक्यान्तरमाह—

मतिः कवीनाम्, इति ।

ये कवयः शास्त्रार्थाभिज्ञाः, तेषामभिज्ञानसाधनबुद्धिरूपोऽयं महावीरः । अनेन कर्मण्यनुष्ठिते तेन सुकृतेन प्रज्ञोदयात् ।

अस्मिन्नर्थे प्रसिद्धिं दर्शयति—

मतिः कवीनामित्याह (८) । मतिर्ह्येष कवीनाम्, इति ।

(प्रपा० ५ । अनु० ६ । विभा० २९)

वाक्यान्तरमाह—

सं देवो देवेन सवित्राऽयतिष्ट । सꣳ सूर्येणारुक्त, इति ।

अयं महावीरो **देवो देवेन सवित्रा संयुज्यायतिष्ट** यजमानमनुग्रहीतुं प्रयत्नं कृतवान् । तथा **सूर्येण संयुज्यारुक्त** दीप्तवान् ।

अत्र देवशब्दद्वयेनाऽऽदित्यमहावीरौ विवक्षिताविति दर्शयति—

सं देवो देवेन सवित्राऽयतिष्ट सꣳ सूर्येणारुक्तेत्याह ।
अमुं चैवाऽऽदित्यं प्रवर्ग्यं च सꣳशास्ति, इति ।

(प्रपा० ५ । अनु० ६ । विभा० ३०)

सम्यक्कथयतीत्यर्थः ।

वाक्यान्तरमाह—

आयुर्दास्त्वमस्मभ्यं घर्म वर्चोदा असि, इति ।

हे **घर्म** महावीर **त्वमस्मभ्यमायुस्तेजसोः प्रदाताऽसि** ।

अस्य वाक्यस्याऽऽयुष्परतां दर्शयति—

आयुर्दास्त्वमस्मभ्यं घर्म वर्चोदा असी-
त्याह । आशिषमेवैतामाशास्ते, इति ।

(प्रपा० ५ । अनु० ६ । विभा० ३१)

वाक्यान्तरमाह—

पिता नोऽसि पिता नो बोध, इति ।

---

१ ख. ग. °स्यार्थे प्र° । २ क. °र्मणाऽनु° ।

हे महावीर नोऽस्माकं पालकत्वात्पिताऽसि अतः पिता जनक एव भूत्वा नोऽस्मान्बोध, इदं कुर्विति सन्मार्गं बोधय ।

महावीरे प्रवृत्तस्योत्तरकर्तव्यताया बुध्यमानत्वाद्बोधकत्वमस्यावश्यमस्तीत्येतद्दर्शयति—

पिता नोऽसि पिता नो बोधेत्याह । बोधयत्येवैनम्, इति ।

(प्रपा० ९ । अनु० ६ । विभा० ३२)

वाक्यान्तराण्याह—

आयुर्धास्तनूधाः पयोधाः । वर्चोदा वरिवोदा
द्रविणोदाः (४) । अन्तरिक्षप्र उरोर्वरीयान् ।
अशीमहि त्वा मा मा हिꣳसीः, इति ।

अयं महावीरो दीर्घमायुः शरीरपाटवं क्षीरसमृद्धिं च संपादयति । तथा कान्तिं पूजां धनं च प्रयच्छति । अन्तरिक्षं स्वोत्पन्नया ज्वालया प्र(प्रा)ति पूरयतीत्यन्तरिक्षप्रः । अत एवोरोर्विशालादपि वस्तुनो वरीयानतिशयेन *विवृत्तः(तः) । तादृश हे महावीर त्वामशीमहि व्याप्नुयाम व्याप्नुवन्तं मां मा हिꣳसीर्हिंसितं मा कुरु ।

अथाग्निरूपेण +स्तुतये कांचिद्देवता(दृचः?)माह—

त्वमग्ने गृहपतिर्विशामसि । विश्वासां मानुषीणाम् । शतं
पूर्भिर्यविष्ठ पाह्यꣳहसः । समेद्धारꣳ शतꣳ हिमाः ।
तन्द्राविणꣳ हार्दिवानम् । इहैव रातयः सन्तु, इति ।

हेऽग्ने त्वं मानुषीणां मनुष्यजातियुक्तानां विश्वासां सर्वासां विशां प्रजानां गृहपतिरसि गृहस्वामी भवसि । हे यविष्ठ युवतम पूर्भिर्धनादीनां पूरणैः शतं शतसंवत्सरमायुः पाहि रक्ष । तथा शतꣳ हिमाः शतसंवत्सरान्समेद्धारं सम्यगभिवृद्धियुक्तं मामंहसः पाहि पापाद्रक्ष । कीदृशं माम् । तन्द्राविणं त्वत्पालनात्पूर्वं तन्द्रायुक्तं कर्मण्यलसम् । हार्दिवानं त्वत्पालनादूर्ध्वं हृदयगतकर्मोत्साहवन्तम् । रातयस्तदीयानि फलदानानीहैवास्मिन्नेव कर्माणि सन्तु ।

---

* "विस्तृत" इति तै० पु० पाठः, इति ग. पुस्तकटिप्पणी । + "स्तुतामेकामृचमाह" इति तै० पु० पाठः, इति ग. पुस्तके टिप्पणी ।

---

१ ग इदमिदं । २ क. स्तूयते । ख. स्तुयते । ३ ग. तन्द्रीयु° ।

कल्पः—"अनुवाकशेषं तु परिश्रिते प्रतिप्रस्थाता पत्नीं वाचयति [1]त्वष्टीमती ते सपेय" इति । पाठस्तु—

त्वष्टीमती ते सपेय । सुरेता रेतो दधाना । वीरं विदेय तव संदृशि । माऽहꣳ रायस्पोषेण वियोषम् (५), इति ॥
रोचते सूर्याय त्वा देवायुवं द्रविणोदा दधाना द्वे च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

हे महावीर ते तव प्रसादादहं पत्नी [2]त्वष्टीमती सिक्ते रेतसि रूपाणां विकर्त्री *त्वष्टृशब्देन युक्ता सती **सपेय** पत्या संगच्छेय । ततः संगमादूर्ध्वं **सुरेताः** शोभनेन पुत्रोत्पादने(के)न रेतसा युक्ता सती **रेतो दधाना** तादृशमेव पतिसंबद्धं रेतो धारयन्ती **तव संदृशि** त्वदीयकटाक्षे सति **वीरं विदेय** कर्मणि शूरं पुत्रं लभेय । **अहं** त्वत्प्रसादाद्**रायस्पोषेण** धनपुष्ट्या **मा वियोषं** वियुक्ता मा भूवम् ।

अस्मिन्ननुवाके मन्त्रसंख्यां दर्शयति—

नवैतेऽवकाशा भवन्ति । पत्नियै दशमः । नव वै पुरुषे प्राणाः (९) । नाभिर्दशमी । प्राणानेव यजमाने दधाति । अथो दशाक्षरा विराट् । अन्नं विराट् । विराजैवान्नाद्यमवरुन्धे, इति ।
(प्रपा० ५ । अनु० ६ । विभा० ३३)

अवकाशयन्तेऽर्थं प्रकाशयन्त इत्यवकाशा मन्त्राः । ते चात्र **नव**संख्याकाः **भवन्ति** । अपश्यं गोपामित्येको मन्त्रः, अत्र प्रावीरित्याद्या ऋतुविषयाः षण्मन्त्राः, तपोजामित्यादि मा मा हिꣳसीरित्यन्तं वाक्यजातमेको मन्त्रः, त्वमग्न इत्यादिको रातयः सन्त्विति[3]त्यन्त एको मन्त्रः । एवं नवसंख्याकाः । त्वष्टीमतीत्यादिकः पत्न्या **दशमो** मन्त्रः । पुरुषशरीरेऽपि च्छिद्रगताः **प्राणा नव**संख्याकास्तदपेक्षया **नाभिर्दशमी**, अतो मन्त्रगतसंख्यासाम्याद्यजमाने **प्राणानेव** सुस्थितान्करोति । अपि च **विराड्द्वारा**ऽन्नमपि प्राप्नोति ।

एतैर्मन्त्रैः साध्यं महावीरावेक्षणं विधत्ते—

यज्ञस्य शिरोऽच्छिद्यत । तद्देवा होत्राभिः प्रत्यदधुः । ऋत्विजोऽवेक्षन्ते ।

---

* "त्वष्ट्रा देवेन" इति तै पु० पाठः, इति ग पुस्तकटिप्पणी ।

---

१ ग. त्वष्ट्रीम° । २ ग. त्वष्ट्रीम° । ३ ग. त्वष्ट्रीम° । ४ ग. °का ऋत्विजां भ° । ५ ग. °न्तित्यन्तिको मन्त्र एकः । ए° । ६ ग °स्थिताक° ।

एता वै होत्राः। होत्राभिरेव यज्ञस्य शिरः प्रतिदधाति (१०), इति।

(प्रपा० ५। अनु० ६। विभा० ३४)

यदा धनुष्कोट्या यज्ञपुरुषस्य **शिरश्छिन्नं** तदा **देवास्तच्छिरो होत्राभिर्यज्ञशरीरे** प्रतिहितवन्तः। होमनिष्पादिका ऋत्विजां याः प्रत्यवेक्षणादिक्रिया **एता** एव होत्रास्तस्मादृत्विजामवेक्षणेन **होत्राभिरेव यज्ञस्यः शिरः** प्रतिहितं भवति।

अग्निष्ट्रेत्यादिमन्त्रैरुपस्थानादूर्ध्वकालीनत्वमवेक्षणस्य विधत्ते—

रुचितमवेक्षन्ते। रुचिताद्वै प्रजापतिः प्रजा
असृजत। प्रजानाꣳ सृष्ट्यै, इति।

(प्रपा० ५। अनु० ६। विभा० ३५)

रुचिधात्वर्थप्रतिपादकैरग्निष्ट्वेत्यादिकैर्मन्त्रैरभिमन्त्रितो महावीरो रुचितः, तादृशं पश्चादवेक्षेरन्। पुरा **प्रजापतिः** प्रवर्ग्याद्रुचितादेव **प्रजाः** सृष्टवान्, अतोऽत्रापि **सृष्ट्यै** तद्भवति।

पूर्वोक्तमेवानूद्य पुनः प्रशंसति—

रुचितमवेक्षन्ते। रुचिताद्वै पर्जन्यो वर्षति।
वर्षुकः पर्जन्यो भवति। सं प्रजा एधन्ते, इति।

(प्रपा० ५। अनु० ६। विभा० ३६)

पूर्वोक्ताद्रुचितात्प्रवर्ग्यादेव कर्मानुष्ठानद्वाराऽऽदित्यप्राप्त्या मेघो **वर्षति**, अतोऽत्रापि रुचितावेक्षणे **पर्जन्यो** वर्षणशीलो **भवति, प्रजाश्च** सम्यग्वर्धन्ते।

पुनरपि प्रकारान्तरेण प्रशंसति—

रुचितमवेक्षन्ते। रुचितं वै ब्रह्मवर्चसम्।
ब्रह्मवर्चसिनो भवन्ति (११), इति।

(प्रपा० ५। अनु० ६। विभा० ३७)

ब्रह्मवर्चसं श्रुताध्ययनसंपत्ती **रुचितं** विद्वत्सभायां प्रकाशितं भवति। अतो रुचितावेक्षणेन ब्रह्मवर्चसयुक्ता **भवन्ति**।

अवेक्षणे पूर्वोक्तमन्त्रान्विधत्ते—

अधीयन्तोऽवेक्षन्ते। सर्वमायुर्यन्ति, इति।

(प्रपा० ५। अनु० ६। विभा० ३८)

अधीयन्तोऽपश्यं गोपामित्यादिमन्त्रान्पठन्त ऋत्विजोऽवेक्षेरन्, ततो मन्त्रसामर्थ्यात्सर्वायुष्प्राप्तिः।

क. ख. °ति प्रत्यवे° । २ ग. वर्धते।

पत्न्याः कांचिद्विशेषं विधत्ते—

न पत्न्यवेक्षेत । यत्पत्न्यवेक्षेत । प्रजायेत । प्रजां त्वस्यै निर्दहेत् । यन्नावेक्षेत । न प्रजायेत । नास्यै प्रजां निर्दहेत् । तिरस्कृत्य यजुर्वाचयति । प्रजायते । नास्यै प्रजां निर्दहति, इति ।

(प्रपा० ५ । अनु० ६ । विभा० ३९)

अत्रायं विचारः, किं **पत्न्यवेक्षेत न** वेति । अवेक्षणपक्षे प्रजोत्पत्तिलक्षणे गुणे सत्यपि तदीयां **प्रजां** महावीरो **निर्दहेदि**त्येष महान्दोषः, अतो **नावेक्षेते**त्येकः पक्षः । अनवेक्षणपक्षे निर्दाहाभावेऽपि प्रजोत्पत्तिर्न स्यादित्यन्यो दोषः, अतो दोषद्वयनिवृत्तये पत्नीं केनाचिद्व्यवधानेन **तिरस्कृत्य त्वष्टीमतीति** मन्त्रं पठेत्(पाठयेत्) ।

तस्मिन्मन्त्रे सपेयेत्यस्य तात्पर्यं दर्शयति—

त्वष्टीमती ते सपेयेत्याह । सपाद्धि प्रजाः प्रजायन्ते (१२), इति ।

(प्रपा० ५ । अनु० ६ । विभा० ४०)

ऋतवो हि शिरः सर्वपृष्ठे प्रवृणक्त्यनिपद्यमानमित्याह गतेत्याह शारदावेवास्मा ऋतू कल्पयति रुन्धे कवीनामित्याह प्राणाः प्रतिदधाति भवन्ति वाचयति चत्वारि च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके पञ्चमप्रपाठके षष्ठोऽनुवाकः ॥ ६ ॥

स्त्रीपुरुषयोः समवायात्प्रजोत्पत्तिः प्रसिद्धा तस्मात्**सपेये**त्युच्यते ।

अत्र मीमांसा । तृतीयाध्यायस्य तृतीयपादे चिन्तितम्—

"न प्रवृञ्ज्यादाद्ययज्ञे क्रतौ सोऽनुष्ठितावुत ।
प्रतिषेधः क्रतौ युक्त उक्ता ह्यस्याऽऽद्ययज्ञता ॥
प्रवृणक्त्युपसद्व्रचः प्रागिति वाक्यात्*क्रतौ विधेः ।
आद्यप्रयोगे प्राथम्यान्निषेधः क्वचिदेव सः" ॥

ज्योतिष्टोमे प्रवर्ग्याख्यं कर्म प्रकृत्य श्रूयते—न प्रथमयज्ञे प्रवृञ्ज्यादिति । सोऽयं निषेधो ज्योतिष्टोमक्रतौ द्रष्टव्यो न तु तदीयप्रथमप्रयोगे । कुतः । एष वाव प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोम इति तस्य प्रथमयज्ञत्वाभिधानादिति चेत् । मैवम् । पुरस्तादुपसदां प्रवर्ग्यं प्रवृणक्तीति वाक्ये क्रतौ प्रवर्ग्यस्य विहितत्वात् । न च

---

* न्यायमालानुरोधेनायं पाठः । अत्र तु भाष्यपुस्तकेषु क्रतोर्विधेरित्येव पाठ उपलभ्यते स च नातीव समञ्जसः ।

---

१ ग. °णक्तित्रति ।

विधिनिषेधवाक्ययोः समानबलत्वाद्[1]निर्णयः, प्रतिषेधवाक्ये प्रथमशब्देन *निषेधस्य प्रयोगपरत्वनिर्णयात्। प्रथमद्वितीयादिशब्दाः क्रियाया आवृत्तौ मुख्याः, तत्संबन्धाद्व-स्तुषूपचर्यन्ते। प्रथममध्येतव्यत्वात्प्रथम(मं) काण्डं तदनन्तरमध्येतव्यत्वाद्द्वितीय(य)-काण्डम्। एवमादावुत्पन्नत्वात्प्रथमः पुत्रः, तदनन्तरमुत्पन्नत्वाद्द्वितीयः पुत्रः। तथाऽपि (तथा सति) प्रयोगाक्रियाया[4] आवृत्तिविशेषे प्रथमशब्दो मुख्यः, तदावृत्तिविशेष(षय)तया यज्ञशब्दो(यज्ञे) लाक्षणिकः। त्वत्पक्षे क्रतौ मुख्यो यज्ञशब्दः प्रयोगे लाक्षणिकः स्यादिति चेत्। बाढम्। तथाऽप्यसंजातविरोधिनि लाक्षणिकत्वकल्पनात्काम(द्वर)मुक्त-रपदे तत्कल्पनं, तस्माज्ज्योतिष्टोमस्य प्रथमप्रयोगे प्रवर्ग्यस्य निषेधः। नतु सप्तसंस्था-युक्तस्य ज्योतिष्टोमस्य प्रथमसंस्थारूपोऽग्निष्टोमः, तत्रायं निषेधः पर्यवस्यति। विधिश्च तत्र श्रूयते—अग्निष्टोमे प्रवृणक्तीति। एवं तर्ह्यधिकारिभेदेन विधिनिषेधयोर्व्यवस्थाऽ-स्तु; तथा च श्रूयते—कामं तु योऽनूचानः स्यात्तस्य प्रवृञ्ज्यादिति। तस्मादनूचान-व्यतिरिक्त[=कर्तृके]प्रथमप्रयोग एवायं निषेधः॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरी-यारण्यके चतुर्थप्रपाठके सप्तमोऽनुवाकः॥ ७॥

अथ चतुर्थेऽष्टमोऽनुवाकः।

सप्तमे महावीरावेक्षणमुक्तम्। अष्टम आज्ययुक्ते महावीरे+ पयःप्रक्षेपणं प्रवृञ्जनमु-च्यते। कल्पः—"सावित्रेण रशनामादाय" इति। पाठस्तु—

देवस्य त्वा सवितुः प्रसवे। अश्विनोर्बा-
हुभ्याम्। पूष्णो हस्ताभ्यामादद[12]े, इति।

द्वितीयानुवाके (प्रपा० ४ अनु० २ पृ० २२४) व्याख्यातोऽयं मन्त्रः।
अनेन मन्त्रेण साध्यमादानं विधत्ते—

देवस्य त्वा सवितुः प्रसव इति रशनामादत्ते प्रसूत्यै।

---

* निषेधस्येति पदं न्यायमालाविस्तरानुसारेण स्थापितमादर्शपुस्तकेषु तु नास्ति।
= एतच्चिह्नान्तर्गतं न्यायमालाविस्तरानुरोधेन स्थापितमादर्शपुस्तकेषु तु नोपलभ्यते।
+ पयःप्रक्षेपणमुच्यत इति तै० पु० पाठ इति ग. पुस्तकटिप्पणी।

---

१ क. टि. ग. 'दयं नि' २ क. ख. ग °यः। तथा सति प्र°। ३ क. ख. °यः। त°। ४ क. यागक्रियाया। ५ क ख. ग. °षेऽपि प्र°। ६ ख. ग. प्रयोगो। ७ ख. 'र्ग्यनि°। ८ ग. °सप्तसं°। ९ ग. °णक्तिवति। १० ख. °कारभे°। ११ ख. ग आज्ये म°। १२ ग °णं विधत्ते प्र°।

अश्विनोर्बाहुभ्यामित्याह । अश्विनौ हि देवानामध्वर्यू
आस्ताम् । पूष्णो हस्ताभ्यामित्याह यत्यै, इति ।
(प्रपा० ५ । अ० ७ । विभा० १)

अदित्यै रास्नाऽसि ।

कल्पः—" अदित्यै रास्नाऽसीत्यभिमन्त्र्य " इति । हे रशने त्वमदित्यै भूमिरूपायै धेन्वै **रास्ना** बन्धनार्था रशनाऽसि ।

मन्त्रतात्पर्यं दर्शयति—

आददेऽदित्यै रास्नाऽसीत्याह यजुष्कृत्यै, इति ।
(प्रपा० ५ । अनु० ७ । विभा० २)

आदद इत्येष पूर्वमन्त्रशेषः स्पष्टार्थत्वात्पाठ एव तस्य व्याख्यानम् । यजुषा मन्त्रेण कृतिर्निष्पादनं यजुष्कृतिः, तत्सिद्ध्यर्थमनेनाभिमन्त्रणम् ।

इड एहि । अदित एहि । सरस्वत्येहि ।

कल्पः—"पूर्वया द्वारोपनिष्क्रम्य त्रिरुपांशु घर्मदुघामाह्वयति । इड एहि । अदित एहि । सरस्वत्येहि" इति । इडादीनि गोनामधेयानि तैः संबोध्येहीत्याह्वयति ।

मन्त्रतात्पर्यं दर्शयति—

इड एह्यदित एहि सरस्वत्येहीत्याह । एतानि वा
अस्यै देवनामानि । देवनामैरेवैनामाह्वयति, इति ।
(प्रपा० ५ । अनु० ७ । विभा० ३)

वक्ष्यमाणाह्वानेन पुनरुक्तिं वारयितुं **देवनामानीति** विशेष्यते । इडादीनि देवानां प्रसिद्धानि गोनामानि, मन्त्रपाठे सति तैरेवेयमाहूता भवति ।

असावेहि । असावेहि । असावेहि (१) ।

कल्पः—" प्रत्येत्य दोग्ध्रे निदान इत्यादाय दक्षिणया द्वारोपनिष्क्रम्य त्रिरुच्चैरसावेहि । असावेहि । असावेहि " इति । घर्मदुघामाह्वयतीत्यनुवर्तते । मनुष्ये व्यवहारार्थं सङ्केतितं गङ्गादिकं धेनुनाम 'असौ' इति शब्देन निर्दिश्यते, हे गङ्गे समागच्छ ।

पूर्वाह्वानादव्यावृत्तिमन्त्रं दर्शयति—

असावेह्यसावेह्यसावेहीत्याह । एतानि वा अस्यै मनुष्य-
नामानि (१) । मनुष्यनामैरेवैनामाह्वयति, इति ।
(प्रपा० ५ । अनु० ७ । विभा० ४)

---

१ क. °न्त्रविशे° । २ क. ख. °दुघमा° । ३ क. ख गोर्नाम° । ४ क. °हि इ° । ५ क. ख. °दुघमा° । ६ क. साङ्केतिकं ।

द्विविधाह्वानगतां संख्यां प्रशंसति—

षट्संपद्यन्ते । षड्वा ऋतवः । ऋतुभिरेवैनामाह्वयति, इति ।

(प्रपा० ५ । अनु० ७ । विभा० ५)

त्रीणि देवनामानि त्रीणि मनुष्यनामानीत्येवं षट्संपत्तिः ।

अदित्या उष्णीषमसि ।

कल्पः—"अदित्या उष्णीषमसीति रशनया घर्मदुघामभिदधाति" इति । हे रशनेऽदित्या भूमिरूपाया धेनोरुष्णीषस्थानीयाऽसि ।

मन्त्रस्य स्पष्टार्थतां दर्शयति—

अदित्या उष्णीषमसीत्याह । यथा यजुरेवैतत्, इति ।

(प्रपा० ५ । अनु० ७ । विभा० ६)

वायुरस्यैडः ।

कल्पः—"वायुरस्यैड इति वत्सम्" इति । अभिदधातीत्यनुवर्तते । इडाया अपत्यमैडो वत्सः, तादृशस्त्वं वायुस्वरूपोऽसि ।

वायुत्वमुपपादयति—

वायुरस्यैड इत्याह । वायुदेवत्यो वै वत्सः, इति ।

(प्रपा० ५ । अनु० ७ । विभा० ७)

वत्सापाकरणे वायवः स्थेत्याम्नानाद्वायुदेवत्यत्वम् । अत एवान्यत्र ब्राह्मणे वायुर्वत्स इत्युक्तम् ।

पूषा त्वोपावसृजतु । अश्विभ्यां प्रदापय ।

कल्पः—"पूषा त्वोपावसृजत्वित्युपावसृज्य" इति । अश्विभ्यां प्रदापयेति मन्त्रशेषः । हे वत्स त्वां पूषारूयो देवः स्तनपानार्थं मुञ्चतु, त्वं चाश्विदेवार्थं पयः प्रदापय ।

मन्त्रस्य पूर्वभागे पूषेत्यस्य तात्पर्यं दर्शयति—

पूषा त्वोपावसृजत्वित्याह । पौष्णा वै देवतया पशवः (२) । स्वयैवैनं देवतयोपावसृजति, इति ।

(प्रपा० ५ । अनु० ७ । विभा० ८)

पोषकत्वादेवायं पशूनां देवः ।

उत्तरभागेऽश्विशब्दतात्पर्यं दर्शयति—

अश्विभ्यां प्रदापयेत्याह । अश्विनौ वै देवानां भिषजौ । ताभ्यामेवास्मै भेषजं करोति, इति ।

(प्रपा० ५ । अनु० ७ । विभा० ९)

---

१ क. ख. °दुघम° ।

अस्मै वत्साय क्षीरं **भेषजमित्येतत्प्रत्यक्षम्** । **अश्विभ्यां** तु हविष्प्रदानद्वारा **भेषजम्** ।

कल्पः—"यस्ते स्तनः शशय इति घर्मदुघामभिमन्त्रयते" इति । पाठस्तु—

यस्ते स्तनः शशयो यो मयोभूः । येन विश्वा
पुष्यसि वार्याणि । यो रत्नधा वसुविद्यः
सुदत्रः । सरस्वति तमिह धातवेऽकः, इति ।

हे धेनो ते तव **यः स्तनः शशयः** शयानः स्थैर्येणावस्थितः, यश्च **स्तनो मयोभूः** सुखस्य भावयिता, **येन** च स्तनेन **विश्वा** सर्वाणि **वार्याणि** वरणीयानि वत्सादिशरीराणि **पुष्यसि** पुष्टानि करोषि, **यश्च स्तनो रत्नधा** रत्नवन्महार्घं क्षीरं धारयति, अत एव **वसुविदुत्तमं** वस्तु लभते, **यश्च** स्तनः **सुदत्रः** शोभनदानशीलः, बहुक्षीरं ददातीत्यर्थः । हे **सरस्वति**, एतन्नामयुक्ते धेनो **तं** स्तनमिह कर्माणि **धातवे** धातुं देवानां क्षीरं पातुमकर्योग्यं कुरु ।

स्तनवर्णनेन धेनोरेव स्तुतिः संपद्यत इत्येतद्दर्शयति—

यस्ते स्तनः शशय इत्याह । स्तौत्येवैनाम्, इति ।

(प्रपा० ५ । अनु० ७ । विभा० १०)

उस्र घर्मꣳ शिꣳष । उस्र घर्मं
पाहि (२) । घर्माय शिꣳष ।

कल्पः—"उस्र घर्मꣳ शिꣳष । उस्र घर्मं पाहि । घर्माय शिꣳषेति निदाय वत्सम्" इति । **निदाय** बद्ध्वेत्यर्थः । हे **उस्र** वत्स **घर्मम**(र्मं क्ष)*रणयोग्यं क्षीरं **शिंषावशेषय** । हे **उस्र** क्षीराख्यं **घर्मं पाहि** पालय यथा सुरक्षितं भवति तथा कुरु । किमर्थमिति तदुच्यते—**घर्माय** प्रवर्ग्यार्थं **शिंषावशेषय** ।

घर्मायेत्येतच्चतुर्थ्यन्तस्य तात्पर्यं दर्शयति—

उस्र घर्मꣳ शिꣳषोस्र घर्मं पाहि घर्माय शिꣳषेत्याह । यथा ब्रूयादमुष्मै देहीति । तादृगेव तत्, इति ।

(प्रपा० ५ । अनु० ७ । विभा० ११)

---

* "रक्षणयोग्यम्" इति तै० पु० पाठ इति ग. पुस्तकटिप्पणी ।

---

१ क. ख. °द्वारेण भे° । २ क. ख. °दुवम° । ३ ग. विश्वाः । ४ ग. विश्वाः । ५ क. प्रेरणीयानि । ६ क. घर्मं श्रवण° । ख. घर्मं श्रयण° ।

लोके हि बालपुत्रार्थं क्षीरं देहीति गृहस्वामिनं बालस्य माता याचते तद्वदिदं द्रष्टव्यम् ।

बृहस्पतिस्त्वोपसीदतु ।

कल्पः—"बृहस्पतिस्त्वोपसीदत्वित्युपसीदति" इति । हे धेनो **त्वा** त्वां दोग्धृरूपो **बृहस्पतिरुपसीदतु** समीपे प्राप्नोतु ।

बृहस्पतिशब्दतात्पर्यं दर्शयति—

बृहस्पतिस्त्वोपसीदत्वित्याह (३) । ब्रह्म वै
देवानां बृहस्पतिः । ब्रह्मणैवैनामुपसीदति, इति ।
(प्रपा० ५ । अनु० ७ । विभा० १२)

देवानां मध्ये बृहस्पतेः परब्रह्मरूपत्वात्तेनैवोपसदनं कृतं भवति ।

दानवः स्थ पेरवः । विष्वग्वृतो लोहितेन ।

कल्पः—"दानवः स्थ पेरव इति स्तनान्संमृश्य" इति । विष्वग्वृतो लोहितेनेति मन्त्रशेषः । हे स्तना यूयं **दानवः** क्षीरदानकुशलाः, **पेरवो** वत्सेन[1] पातुं योग्याः, **लोहितेन** रक्तेन **विष्वग्वृतः** पृथग्भूत्वा वर्तमानाः **स्थ** । न हि स्तनदोहने रक्तमायाति ।

पानयोग्यत्वकथनेन शुद्धिः सूचितेत्येतद्दर्शयति—

दानवः स्थ पेरव इत्याह । मेध्यानेवैनान्करोति, इति ।
(प्रपा० ५ । अनु० ७ । विभा० १३)

विष्वग्वृत इत्यनेन क्षीरस्य रक्ताद्व्यावृत्तिर्विवक्षितेति दर्शयति—

विष्वग्वृतो लोहितेनेत्याह व्यावृत्त्यै, इति ।
(प्रपा० ५ । अनु० ७ । विभा० १४)

अश्विभ्यां पिन्वस्व । सरस्वत्यै पिन्वस्व ।
पूष्णे पिन्वस्व । बृहस्पतये पिन्वस्व । इन्द्राय
पिन्वस्व । इन्द्राय पिन्वस्व (३) ।

कल्पः—"अश्विभ्यां पिन्वस्व सरस्वत्यै पिन्वस्व पूष्णे पिन्वस्व बृहस्पतये पिन्वस्वेति वैर्षायसि दोग्ध्रे दोग्धि" इति । स्थूले दोहनपात्रे दुह्यादित्यर्थः । इन्द्राय पिन्वस्व । इन्द्राय पिन्वस्वेति मन्त्रशेषः । हे धेनोऽश्विसरस्वत्यादिदेवार्थं **पिन्वस्व** हविः प्रभूतं देहि ।

प्रभूतदातृत्वं धेनोः प्रसिद्धमित्येतद्दर्शयति—

अश्विभ्यां पिन्वस्व सरस्वत्यै पिन्वस्व पूष्णे पिन्वस्व बृहस्पतये

---

१ ग वत्सेन । २ ग. वृष्णीयसि ।

पिन्वस्वेत्याह । एताभ्यो ह्येषा देवताभ्यः पिन्वते, इति ।

(प्रपा० ९ । अनु० ७ । विभा० १५)

बृहस्पत्यादिवदिन्द्रस्य संबन्धमात्रेण परितोषो न भवति किंतु हविर्भागोऽप्यस्तीत्येतद्दर्शयति—

इन्द्राय पिन्वस्वेन्द्राय पिन्वस्वेत्याह । इन्द्रमेव भागधेयेन समर्धयति, इति ।

(प्रपा० ९ । अनु० ७ । विभा० १६)

भागाधिक्येनेन्द्रमन्त्रावृत्तिं दर्शयति—

द्विरिन्द्रायेत्याह (४) । तस्मादिन्द्रो देवतानां भूयिष्ठभाक्तमः, इति ।

(प्रपा० ९ । अनु० ७ । विभा० १७)

गायत्रोऽसि । त्रैष्टुभोऽसि । जागतमसि ।

कल्पः—"उपोत्तिष्ठन्तावग्नीधे पयसी प्रदाय *पूर्ववैतिद्वृत्य शफोपयमानादत्ते गायत्रोऽसीति प्रथमं त्रैष्टुभोऽसीति द्वितीयं जागतमसीति तृतीयमित्यु(मु)पयमनं प्रतिप्रस्थाता" इति । तस्य महावीरस्य हस्ताभ्यां ग्रहीतुमशक्यत्वात्संदंशवदुभयतः काष्ठद्वयमध्ये महावीरं संदष्टं कृत्वा काष्ठद्वयस्य मूलद्वयमग्रद्वयं च धृत्वाऽध्वर्युप्रतिप्रस्थातारावानयतः, तौ काष्ठविशेषौ शफावित्युच्येते । महावीरस्याधस्ताद्धार्यमाणः काष्ठविशेष उपयम इत्युच्यते । हे प्रथमशफ त्वं गायत्रीछन्दःसंबन्ध्यसि । हे द्वितीयशफ त्वं त्रिष्टुप्छन्दःसंबन्ध्यसि । हे उपयम त्वं जगतीछन्दःसंबन्ध्यसि ।

एतन्मन्त्रसाध्यमादानं विधत्ते—

गायत्रोऽसि त्रैष्टुभोऽसि जागतमसीति शफोपयमानादत्ते । छन्दोभिरेवैनानादत्ते, इति ।

(प्रपा० ९ । अनु० ७ । विभा० १८)

गायत्रादिशब्दप्रयोगेण च्छन्दोभिरादानं सिध्यति ।

सहोर्जो भागेनोप मेहि ।

कल्पः—" सहोर्जो भागेनोप मेहीति पय आहियमाणं प्रतीक्षते " इति । आग्नीध्रेणाऽऽनीयमान हे पय **ऊर्जो रसस्य भागेन सह मामुपेहि** मत्समीपे समागच्छ ।

एतन्मन्त्रबलेनोर्जो रसस्य भागः संपादितो भवतीति दर्शयति—

सहोर्जो भागेनोप मेहीत्याह । ऊर्ज एवैनं भागमकः, इति ।

(प्रपा० ९ । अनु० ७ । विभा० १९)

* " पूव(र्व)त्तदु[प?]द्वृत्य " इति तै० पु. पाठ इति ग. पुस्तकटिप्पणी ।

१ ग. °ग्नीध्रे प° । २ ख. °वभिद्रु° । ग. °वभिहृत्य । ३ क. °मनमित्यु° । ४ ख. उपयमन ।

इन्द्राश्विना मधुनः सारघस्य ।
घर्मं पात वसवो यजता वट् ।

कल्पः—" इन्द्राश्विना मधुनः सारघस्येति महावीरे गोपय आनयति " इति । घर्मं पात वसवो यजता वडिति मन्त्रशेषः । हे इन्द्र हेऽश्विनौ यूयं त्रयोऽपि **मधुनः** संबन्धिनं **घर्मं** घृतसहितं क्षीरं **पात** पिबत । कीदृशस्य **मधुनः, सारघस्य** सरघा मधुमक्षिकास्ताभिर्निष्पादितं सारघं तादृशस्य । मधुनः संबन्धेन हविषस्तद्वन्मधुररसत्वम् । हे **वसवो** देवा **यजत** यागं कुरुत । **वट्**, इदं हविर्दत्तमस्तु ।

अस्मिन्मन्त्र इन्द्रशब्देन सहाश्विशब्दस्य प्रयोगाभिप्रायं दर्शयति—

अश्विनौ वा एतद्यज्ञस्य शिरः प्रतिदधतावब्रूताम् । आवाभ्यामेव पूर्वाभ्यां वषट्क्रियाता इति । इन्द्राश्विना मधुनः सारघस्येत्याह । अश्विभ्यामेव पूर्वाभ्यां वषट्करोति । अथो अश्विनावेव भागधेयेन समर्धयति (९), इति ।

(प्रपा० ९ । अनु० ७ । विभा० २०)

धनुष ऊर्ध्वकोट्या छिन्नमेतद्यज्ञस्य **शिरः** पुनस्तद्देहे प्रतिदधतावश्विनौ तस्मिन्काल इदं वचनमब्रूताम् । पूर्वभाविभ्यामावाभ्यामेव **वषट्**कारेण हविः प्रदातव्यमिति । अतस्ताभ्यां प्रार्थितत्वादश्विनाविति मन्त्र उच्यते । तेनैताभ्यां प्रथमतो हविर्दत्तं भवति । अपि च पूर्वं भागरहितावश्विनाविदानीं भागेन समृद्धं (द्धौ) करोति । **शिरः**प्रतिधानवेलायामितरदेवान्प्रति **पूर्वाभ्यामिति** वरस्य वृतत्वाद्देवान्तरापेक्षयाऽश्विनोः पूर्वत्वमतो नान्येभ्यो देवेभ्यो घर्मो दीयते किंत्विन्द्रसहिताश्विभ्यामेव ।

मन्त्रस्योत्तरभागे वसुशब्देन वसूनामपि भागसिद्धिं दर्शयति—

घर्मं पात वसवो यजता वडित्याह ।
वसूनेव भागधेयेन समर्धयति, इति ।

(प्रपा० ९ । अनु० ७ । विभा० २१)

अत्र मीमांसया वषट्शब्दं (वट्शब्दं) प्रशंसति —

यद्वषट्कुर्यात् । यातयामाऽस्य वषट्कारः स्यात् । यन्न वषट्कुर्यात् । रक्षाꣳसि यज्ञꣳ हन्युः । वडित्याह । परोक्षमेव वषट्करोति नास्य यातयामा वषट्कारो भवति । न यज्ञꣳ रक्षाꣳसि घ्नन्ति (६), इति ।

(प्रपा० ९ । अनु० ७ । विभा० २२)

अत्रेदं विचार्यते—**वषट्**शब्दः प्रयोक्तव्यो न वेति । तत्प्रयोगे सतीदानीमेव

---

१ क. ख. सति नीरसमे[1] ।

गतसारत्वात्सोमयागे भविष्यति वषट्कारो निःसारो भवेत् । तदप्रयोगे वज्रो वै वषट्कार इति श्रुतस्य वज्रस्याभावाद्रक्षांसि यज्ञं विनाशयेयुः । अत उभयदोषपरिहाराय द्वितीयाक्षरं परित्यज्य वडित्येव प्रयोक्तव्यम् । तथा सति संपूर्णत्वाभावात्प्रत्यक्षो **वषट्कारो न** भवति । अंश एव ततः (अंशत एव) सद्भावात्परोक्षस्तिरोहितो **वषट्कारो भवति** । ततः संपूर्णवषट्कारो न गतसारः, एकदेशस्यापि विद्यमानत्वाद्वज्रसद्भावेन **रक्षांस्यपि यज्ञं न** विनाशयन्ति ।

स्वाहा त्वा सूर्यस्य रश्मये वृष्टिवनये जुहोमि ।

कल्पः—"स्वाहा त्वा सूर्यस्य रश्मये वृष्टिवनये जुहोमीत्युद्यन्तमूष्माणमनुमन्त्रयते" इति । **वृष्टिवनये** वृष्टिप्रदानाय **सूर्यस्य रश्मये** हे ऊष्मंस्त्वां **स्वाहा जुहोमि** स्वाहाकारयोग्यामाहुतिमाहुतिद्रव्यं कृत्वा जुहोमि ।

सूर्यायेत्यनुक्त्वा रश्मय इत्युक्तेस्तात्पर्यं दर्शयति —

> स्वाहा त्वा सूर्यस्य रश्मये वृष्टिवनये जुहोमीत्याह । यो वा अस्य पुण्यो रश्मिः । स वृष्टिवनिः । तस्मा एवैनं जुहोति, इति ।
>
> (प्रपा० ५ । अनु० ७ । विभा० २३)

सूर्यो न साक्षाद्वृष्टिं प्रयच्छति किंतु पुण्यरश्मिद्वाराऽतः साक्षाद्रश्मय एव वृष्टिप्रदानायाऽऽहुतिर्युक्ता ।

मधु हविरसि ।

कल्पः— "मधु हविरसीत्यजापयः" इति । महावीर आनयतीत्यनुवर्तते । हेऽजाक्षीर त्वं **मधुरं हविरसि** ।

स्वादु कर्तुं मधुशब्दप्रयोग इति दर्शयति—

> मधु हविरसीत्याह । स्वदयत्येवैनम्, इति ।
>
> (प्रपा० ५ । अनु० ७ । विभा० २४)

सूर्यस्य तपस्तप ।

कल्पः—"सूर्यस्य तपस्तपेत्यूष्माणम्" इति । उद्यन्तमनुमन्त्रयत इत्यनुवर्तते । हे ऊष्मन्**सूर्यस्य तपः** सूर्यसंबन्धिनं तापमपि तप त्वमतिशयेन तप्तं कुरु ।

मन्त्रस्य स्पष्टार्थतां दर्शयति—

> सूर्यस्य तपस्तपेत्याह । यथा यजुरेवैतत्, इति ।
>
> (प्रपा० ५ । अनु० ७ । विभा० २५)

---

१ क. ख. °यागो भ° । २ ग. °हुतिं द्र° ।

द्यावापृथिवीभ्यां त्वा परिगृह्णामि[1] (४)।

कल्पः—"द्यावापृथिवीभ्यां त्वा परिगृह्णामीति शफाभ्यां महावीरं परिगृह्य" इति। हे महावीर त्वां द्यावापृथिवीदेवतारूपाभ्यां शफाभ्यां परिगृह्णामि।

मन्त्रबलाद्द्यावापृथिवीपरिग्रहः सिध्यतीति दर्शयति—

द्यावापृथिवीभ्यां त्वा परिगृह्णामीत्याह। द्यावा-
पृथिवीभ्यामेवैनं परिगृह्णाति (७), इति।
(प्रपा० ५। अनु० ७। विभा० २६)

अन्तरिक्षेण त्वोपयच्छामि।

कल्पः—"प्रच्छिन्नाग्रेण वेदेन भस्म प्रमृज्यान्तरिक्षेण त्वोपयच्छामीत्युपयमनेन प्रतिप्रस्थातोपयच्छति" इति। हे महावीर त्वामन्तरिक्षदेवतारूपेणोपयमनाख्यकाष्ठपात्रेणोपयच्छामि, शफनामकाभ्यां काष्ठाभ्यामुद्ध्रियमाणे त्वयि तयोः सहायरूपेणानेनाधस्तादुपयच्छामि[2]।

मन्त्रबलादन्तरिक्षदेवतासाहाय्यं सिध्यतीति दर्शयति—

अन्तरिक्षेण त्वोपयच्छामीत्याह। अन्तरिक्षेणैवैन-
मुपयच्छति[3]। न वा एतं मनुष्यो भर्तुमर्हति, इति।
(प्रपा० ५। अनु० ७। विभा० २७)

देवानां त्वा पितृणामनुमतो भर्तुꣳ शकेयम्।

कल्पः—"देवानां त्वा पितृणामनुमतो भर्तुꣳ शकेयमित्यादायोत्थाय" इति। हे महावीर देवानां पितृणां वाऽनुमतिं प्राप्तोऽहं त्वां भर्तुं धारयितुं शक्तो भूयासम्।

एतत्पाठेनोभयानुमतिसिद्धिं दर्शयति[4]—

देवानां त्वा पितृणामनुमतो भर्तुꣳ शकेयमित्याह।
देवैरेवैनं पितृभिरनुमत आदत्ते, इति।
(प्रपा० ५। अनु० ७। विभा० २८)

कल्पः—" तेजोऽसि तेजोऽनुप्रेहीति हरति " इति। पाठस्तु—

तेजोऽसि तेजोऽनुप्रेहि। दिविस्पृङ्मा मा हिꣳसीः। अन्त-
रिक्षस्पृङ्मा मा हिꣳसीः। पृथिविस्पृङ्मा मा हिꣳसीः। सुवरसि

---

१ ग. °मि। अ°। २ ख. °दुपयच्छा°। ३ क. ख. °ति। इ°। ४ क. ख. °ति। न वा एतं मनुष्यो भर्तुमर्हति। इ°।

सुवर्मे यच्छ । दिवं यच्छ दिवो मा पाहि (५), इति ॥
एहि पाहि पिन्वस्व मृळामि नवं च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

हे प्रवर्ग्य त्वं तेजोरूपोऽसि । अतस्तेजोरूपमाहवनीयमनुलक्ष्य प्रेहि प्रकर्षेण गच्छ । अत्युष्णस्त्वं द्युलोकादीन्स्पृशन्नपि मा [मा] हिꣳसीः, तापं मा कुरु । सुवरसि त्वमेव स्वर्गरूपोऽसि । अतः स्वर्गसुखं मे प्रयच्छ । तत्सुखाधारं दिवं द्युलोकं मे प्रयच्छ । दिवो द्युलोकान्मां पाहि । तत्र राक्षसप्रवेशं निवार्य पालय ।

मन्त्रस्य पूर्वभागे तेजोऽनुप्रेहीत्यस्य तात्पर्यं दर्शयति—

वि वा एनमेतदर्धयन्ति । यत्पश्चात्प्रवृज्य पुरो जुह्वति ।
तेजोऽसि तेजोऽनुप्रेहीत्याह । तेज एवास्मिन्दधाति, इति ।
(प्रपा० ५ । अनु० ७ । विभा० २९)

आहवनीयस्य पश्चिमभागे गार्हपत्यस्योत्तरदेशे प्रवर्ग्यं कृत्वा पुरः पूर्वस्यां दिश्याहवनीये जुह्वतीति यदस्ति एतेनैनं प्रवर्ग्यं [व्यर्धयन्ति] समृद्धिरहितं कुर्वन्ति । प्रवृज्यनेनैव तेजसो गतत्वात् । अतस्तेजोऽनुप्रेहीत्युक्त्या द्रव्ये तेजः संपादितं भवति ।

मध्यमभागस्याहिंसापरत्वं दर्शयति—

दिविस्पृङ्मा मा हिꣳसीरन्तरिक्षस्पृङ्मा मा हिꣳसीः पृथिविस्पृङ्मा मा हिꣳसीरित्याहाहिꣳसायै (८), इति ।
(प्रपा० ५ । अनु० ७ । विभा० ३०)

तृतीयभागस्याऽऽशीःपरत्वं दर्शयति—

सुवरसि सुवर्मे यच्छ दिवं यच्छ दिवो
मा पाहीत्याह । आशिषमेवैतामाशास्ते, इति ।
(प्रपा० ५ । अनु० ७ विभा० ३१)

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

---

१ ग. (४) । २ क. ख. °सि स्व° । ३ ग. °र्गसुखरू° । ४ क. ख. स्वर्यं सु° । ५ क. ख. यच्छ । ६ क. तत्राक्षिशब्दप्र° । ख. तत्र क्ष्(क्ष्य)शब्दप्र° । ७ क. ख. पुनः । ८ ग. °सोऽनु°

अथ चतुर्थे नवमोऽनुवाकः ।

अष्टमे महावीरे घृतयुक्ते क्षीरप्रक्षेपलक्षणं प्रवृञ्जनमुक्तम् । नवमे तस्य प्रवर्ग्यद्रव्यस्याऽऽहवनीये याग उच्यते । कल्पः—" व्रजन्नवानं पञ्च वातनामानि व्याचष्टे समुद्राय त्वा वाताय स्वाहेत्यपान्य पञ्चोत्तराण्यग्नये त्वा वसुमते स्वाहा " इति । पाठस्तु—

समुद्रायं त्वा वातायं स्वाहा । सलिलायं त्वा वातायं स्वाहा । अनाधृष्यायं त्वा वातायं स्वाहा । अप्रतिधृष्यायं त्वा वातायं स्वाहा । अवस्यवे त्वा वातायं स्वाहा । दुवस्वते त्वा वातायं स्वाहा । शिमिद्वते त्वा वातायं स्वाहा । अग्नये त्वा वसुमते स्वाहा । सोमाय त्वा रुद्रवते स्वाहा । वरुणाय त्वाऽऽदित्यवते स्वाहा (१) बृहस्पतये त्वा विश्वदेव्यावते स्वाहा । सवित्रे त्वर्भुमते विभुमते प्रभुमते वाजवते स्वाहा । यमाय त्वाऽङ्गिरस्वते पितृमते स्वाहा, इति ।

अत्र वायेति विशेष्यनिर्देशः । समुद्रादिशब्दा विशेषणभूता नामधेयविशेषवाचिनः । हे प्रवर्ग्य त्वां समुद्रनामकाय वाताय स्वाहा कथयामीत्यर्थः । निपातानामनेकार्थत्वात् । एवमुत्तरेष्वपि योज्यम् । षष्ठसप्तमौ मन्त्रौ विकल्पार्थौ । वसुयुक्ताय अग्नयेऽग्निनामकाय वातविशेषाय त्वां स्वाहा कथयामि । एवमुत्तरत्रापि योज्यम् । ऋभ्वादिभिर्युक्ताय सवितृनामकाय वाताय कथयामि । अङ्गिरोभिः पितृभिश्च युक्ताय यमनामकाय वाताय कथयामि । अयमपि मन्त्रो विकल्पार्थः ।

एतैर्मन्त्रैः साध्यं वातनामकथनं विधत्ते—

शिरो वा एतद्यज्ञस्य । यत्प्रवर्ग्यः । आत्मा वायुः । उद्यत्य वातनामान्याह । आत्मन्नेव यज्ञस्य शिरः प्रतिदधाति, इति ।

(प्रपा० ५ । अनु० ७ । विभा० ३२)

आहवनीयं प्रति नेतुं प्रवर्ग्यमुद्यत्य वातनामकथनेन वायोरात्मत्वादात्मन्येव =यज्ञस्य शिरः प्रतिहितो(तं) भवति ।

= 'यज्ञशिरः प्रतिहितं भवति' इति तै० पुस्तकपाठ इति ग. पुस्तकटिप्पणी ।

---

१ ख. °ल्पः—"व्रज° । ग. °ल्प.—"प्रभञ्जनावानं । २ ग. °त्यपि प° । ३ ग °शब्दवि° । ४ ग. विकल्पिनौ । ५ ख. ग. साध्यवा° । ६ ग. °मुद्धृत्य । ७ ख. ग. °ज्ञस्याग्निः प्र° ।

तत्कथनमध्ये श्वासं वारयति—

अनवानम्। प्राणानाꣳ संतत्यै, इति।

(प्रपा० ९। अनु० ७। विभा० ३३)

अवानं श्वासः स यथा न भवति तथा पठेत्। तच्च प्राणानामविच्छेदाय भवति। मन्त्रसंख्यां विधत्ते—

पञ्चाऽऽह (९)। पाङ्क्तो यज्ञः। यावानेव यज्ञः। तस्य शिरः प्रतिदधाति, इति।

(प्रपा० ९। अनु० ७। विभा० ३४)

धानाकरम्भादिहविष्पञ्चकयोगेन **यज्ञः पाङ्क्तः**। स च **यावानस्ति तस्य** सर्वस्य **शिरो** नामपञ्चकेन प्रतिहितं भवति।

उत्तरपञ्चकस्य प्रथममन्त्रेऽग्निशब्देनाऽऽदित्यो विवक्षित इति दर्शयति—

अग्नये त्वा वसुमते स्वाहेत्याह। असौ वा आदित्योऽग्निर्वसुमान्। तस्मा एवैनं जुहोति, इति।

(प्रपा० ९। अनु० ७। विभा० ३५)

हविष्प्रक्षेपाभावेऽपि स्वाहाशब्दप्रयोगमात्रेण जुहोतीत्युच्यते।

द्वितीयमन्त्रादौ सोमादिशब्दैः प्रसिद्धार्थतामेव विवक्षितां दर्शयति—

सोमाय त्वा रुद्रवते स्वाहेत्याह। चन्द्रमा वै सोमो रुद्रवान्। तस्मा एवैनं जुहोति। वरुणाय त्वाऽऽदित्यवते स्वाहेत्याह (१०)। अप्सु वै वरुण आदित्यवान्। तस्मा एवैनं जुहोति। बृहस्पतये त्वा विश्वदेव्यावते स्वाहेत्याह। ब्रह्म वै देवानां बृहस्पतिः। ब्रह्मण एवैनं जुहोति, इति।

(प्रपा० ९। अनु० ७। विभा० ३६)

अनन्तरमन्त्रे सवितृशब्देन संवत्सरस्य विवक्षां दर्शयति—

सवित्रे त्वर्भुमते विभुमते प्रभुमते वाजवते स्वाहेत्याह। संवत्सरो वै सवितर्भुमान्विभुमान्प्रभुमान्वाजवान्। तस्मा एवैनं जुहोति, इति।

(प्रपा० ९। अनु० ७। विभा० ३७)

अनन्तरमन्त्रे यमशब्देन प्राणस्य विवक्षां दर्शयति—

यमाय त्वाऽङ्गिरस्वते पितृमते स्वाहेत्याह। प्राणो वै यमोऽङ्गिरस्वान्पितृमान् (११)। तस्मा एवैनं जुहोति, इति।

(प्रपा० ९। अनु० ७। विभा० ३८)

घातानां मन्त्रानुपसंहरति—

एताभ्य एवैनं देवताभ्यो जुहोति, इति।

(प्रपा० ९। अनु० ७। विभा० ३९)

समुद्रादिभ्यो यमान्तेभ्यस्त्रयोदशमन्त्रोक्ताभ्यो देवताभ्यो होमः कृतो भवति।
अनुष्ठेयमन्त्रसंख्यां प्रशंसति—

दश संपद्यन्ते। दशाक्षरा विराट्। अन्नं विराट्। विराजैवान्नाद्यमवरुन्धे, इति।
(प्रपा० ९। अनु० ७। विभा० ४०)

*त्रयोदशसु त्रयाणां विकल्पार्थत्वेन पूर्वपञ्चकमुत्तरपञ्चकं चेत्येवमनुष्ठेयमन्त्राणां दशत्वसंपत्तिः, अतो विराजाऽन्नप्राप्तिः।

अथ रौहिणपुरोडाशौ विधत्ते—

रौहिणाभ्यां वै देवाः सुवर्गं लोकमायन्। तद्रौहिणयो रौहिणत्वम्। यद्रौहिणौ भवतः। रौहिणाभ्यामेव तद्यजमानः सुवर्गं लोकमेति, इति।
(प्रपा० ९। अनु० ७। विभा० ४१)

स्वर्ग(र्गे) रोहेत्याभ्यां पुरोडाशाभ्यामिति रौहिणौ ताभ्यां स्वर्गप्राप्तिः।

रौहिणपुरोडाशयोर्दक्षिणोत्तरयोरपि होममन्त्रावुत्तरानुवाक आम्नास्यमानावपि पुरोडाशविधिप्रसङ्गादिहैवोपहृत्य व्याख्यास्ये(ये)ते—

अहर्ज्योतिः केतुना जुषतां सुज्योतिर्ज्योतिषा स्वाहा रात्रिर्ज्योतिः केतुना जुषता सुज्योतिर्ज्योतिषा स्वाहेत्याह। आदित्यमेव तदमुष्मिँल्लोकेऽह्ना परस्ताद्धार। रात्रिया अवस्तात्।
तस्मादसावादित्योऽमुष्मिँल्लोकेऽहोरात्राभ्यां धृतः (१२), इति।
(प्रपा० ९। अनु० ७। विभा० ४२)

मनुष्यनामानि पशवः सीदन्त्वित्याहेन्द्रायेत्याहार्धयति घ्नन्ति गृह्णात्याहिꣳसायै
पञ्चाऽऽहाऽऽदित्यवते स्वाहेत्याह पितृमानेति चत्वारि च॥
इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके पञ्चमप्रपाठके सप्तमोऽनुवाकः॥ ७॥

अहर्देवता केतुनाऽध्यक्षरूपेणाऽऽदित्यमण्डलेन सह ज्योतिर्जुषतां प्रकाशं सेवताम्। ज्योतिषां मध्ये सुज्योतिः शोभनज्योतीरूपमहरुद्दिश्य स्वाहुतमिदमस्तु। एवं रात्रिदेवतामन्त्रोऽपि व्याख्येयः। तत्तेन मन्त्रद्वयेन स्वर्गलोकात्परस्तादुपरिभागेऽहर्देवतया सहितमादित्यं धारयति। अवस्तादधोभागे रात्रिदेवतया सहितमादित्यं धारयति। यस्मादेवं तस्मात्स्वर्गेऽसावादित्यो देवताद्वयेन धृतो वर्तते।

विश्वा आशा दक्षिणसत्।

कल्पः—"अपरेणाऽऽहवनीयं दक्षिणोऽतिक्रामन्विश्वा आशा दक्षिणसदिति

* 'त्रयोदशमन्त्रेषु' इति तै. पुस्तकपाठ इति ग. पुस्तकटिप्पणी।

१ ग. °राड्द्वाराऽन्नत्वप्रा°। २ ख. °त्वप्रा°। ३ क. °हणाभ्यां। ४ क. ख. °न्नाद्व्याख्याद्°। ५ ग. °ाऽभिका°। ६ क. तिक्रम°। ख. °तिक्रम्य विश्वा।

ब्रह्माणमीक्षते" इति । दक्षिणदेशे सीदतीति **दक्षिणसद्ब्रह्मा** सोऽयं **विश्वा आशाः** सर्वदिग्वर्तिनो देवान्प्रीणात्विति शेषः ।

उक्तार्थपरत्वं मन्त्रस्य दर्शयति—

विश्वा आशा दक्षिणसदित्याह । विश्वानेव देवान्प्रीणाति । अथो दुरिष्ट्या एवैनं पाति, इति ।

(प्रपा० ९ । अनु० ८ । विभा० १)

अनेन मन्त्रेण देवप्रीतिर्भवति । यागे संभावितदोषाच्च यजमानं पालयति ।

विश्वान्देवानयाडिह ।

कल्पः—" विश्वान्देवानयाडिहेति होतारम् " इति । ईक्षत इत्यनुवर्तते । इह कर्मणि होता **विश्वान्देवानयाडिष्टवान् ।**

अयाट्शब्देन सर्वदेवानां भागसमृद्धिं दर्शयति—

विश्वान्देवानयाडिहेत्याह । विश्वानेव देवान्भागधेयेन समर्धयति, इति ।

(प्रपा० ९ । अनु० ८ । विभा० २)

कल्पः—"स्वाहाकृतस्य घर्मस्येति घर्ममभिमन्त्र्य" इति । पाठस्तु—

स्वाहाकृतस्य घर्मस्य । मधोः पिबतमश्विना ।
स्वाहाऽग्नये यज्ञियाय । शं यजुर्भिः, इति ।

अश्विना हेऽश्विनौ **स्वाहाकृतस्य** स्वाहाकारेण समर्पितस्य **मधोर्मधुरस्य घर्मस्य** प्रवर्ग्यद्रव्यस्य रसं **पिबतम् ।** यजुर्भिर्यजुर्देवताभिः सहिताय **यज्ञियाय** यज्ञयोग्यायाग्नये **शं** सुखं यथा भवति तथा स्वाहुतमस्तु ।

मन्त्रस्य पूर्वभागेणाश्विनोर्भागसमृद्धिं दर्शयति—

स्वाहाकृतस्य घर्मस्य मधोः पिबतमश्विनेत्याह । अश्विनावेव भागधेयेन समर्धयति, इति ।

(प्रपा० ९ । अनु० ८ । विभा० ३)

उत्तरभागे स्वाहेत्युच्चारेण प्रवर्ग्येऽभिधारणं हविष्टं च संपद्यत इति दर्शयति—

स्वाहाऽग्नये यज्ञियाय शं यजुर्भिरित्याह । अभ्येवैनं धारयति । अथो हविरेवाकः (१), इति ।

(प्रपा० ९ । अनु० ८ । विभा० ४)

कल्पः—" अश्विना घर्मं पातमिति वषट्कृते जुहोति " इति । पाठस्तु—

अश्विना घर्मं पातꣳ हार्दिवानम् (२) ।

अहर्दिवाभिरूतिभिः। अनु वां द्यावा-
पृथिवी मꣳसाताम्। स्वाहेन्द्राय, इति।

हेऽश्विनौ घर्मं प्रवर्ग्यहविः पातं पिबतम्। कीदृशम्। हार्दिवानं हृदयप्रियातिशयो हार्दी सोऽस्यास्तीति हार्दिवा तादृशम्। अहरह्नचस्मिन्दिने दिवाभिर्द्योतमानाभिरूतिभिरस्मद्विषयल(र ?)क्षणाकियाभिर्निमित्तभूताभिः पातामिति पूर्वत्रान्वयः। हेऽश्विनौ वां युवां द्यावापृथिव्यौ देवते अनुमंसातामनुमतौ कुरुताम्। इन्द्रायेदं स्वाहुतमस्तु।

स्वाहेन्द्रा वट्।

कल्पः—" स्वाहेन्द्रा वडित्यनुवषट्कृते " इति। जुहोतीत्यनुवर्तते। ईन्द्रेत्ययं शब्दः परमैश्वर्ययोगात्स्विष्टकृदग्निमाचष्टे। स्वाहाशब्द आहुतियोग्यतामाह। तादृशाय वषडिदं हविः समर्पितम्।

आश्विना घर्मं पातमित्युक्त्या तयोर्भागसमृद्धिं दर्शयति—

अश्विना घर्मं पातꣳ हार्दिवानमहर्दिवाभिरूतिभिरित्याह। अश्विनावेव भागधेयेन समर्धयति, इति।

(प्रपा० ९ । अनु० ८ । विभा० ९)

अनुमꣳसातामिति पदेन द्यावापृथिव्योरनुज्ञा प्रार्थ्यत इति दर्शयति—

अनु वां द्यावापृथिवी मꣳसातामित्याहानुमत्यै, इति।

(प्रपा० ९ । अनु० ८ । विभा० ६)

चतुर्थ्यन्तस्येन्द्रशब्दस्य प्रथमतः प्रयोगे कारणं दर्शयति—

स्वाहेन्द्राय स्वाहेन्द्रा वडित्याह।
इन्द्राय हि पुरो हूयते, इति।

(प्रपा० ९ । अनु० ८ । विभा० ७)

यस्मात्प्रधानदेवतारूपायेन्द्राय प्रथमत आहुतिः पश्चात्स्विष्टकृद्देवताया आहुतिर्युक्ता, तस्मादिन्द्रायेति मुख्यदेवताविवक्षया प्रथमप्रयोगः।

अत्रानुष्ठानक्रमं विधत्ते—

आश्राव्याऽऽह घर्मस्य यजेति। वषट्कृते जुहोति।
रक्षसामपहत्यै। अनुयजति स्वगाकृत्यै, इति।

(प्रपा० ९ । अनु० ८ । विभा० ८)

---

१ ग. °वर्ग्यं ह°। २ क. °याभिः पा°। ३ ग. °न्द्राय व°। ४ ग. इन्द्र इत्य°। ५ क. ख. °न्द्रपदस्य।

प्रथममाश्रावणं कृत्वा ततो **घर्मस्य यजेति** ब्रूयात्। हे होतर्घर्मस्य प्रवर्ग्यस्यानुष्ठानार्थं **यज** याज्यां पठ। एवं प्रैषमुक्त्वा ततो होत्रा याज्यापाठेन **वषट्कृते** सत्यश्विना घर्ममित्यनेन मन्त्रेण जुहुयात्। एतच्च रक्षसामपघाताय भवति। ततोऽनुवषट्कारे होत्रा प्रयुक्ते सति स्वाहेन्द्रा वडिति मन्त्रेण यजेत्। तच्च **स्वगाकृत्यै** स्वाधीनकरणायोपयुज्यते।

कल्पः—"घर्ममपातमश्विनेत्यनुवाकशेषेणोपस्थाय" इति। पाठस्तु—

घर्ममपातमश्विना हार्दिवानम्। अहर्दिवाभिरूतिभिः। अनु वां द्यावापृथिवी अमत्साताम्। तं प्राव्यं यथावट्। नमो दिवे। नमः पृथिव्यै (३)। दिवि धा इमं यज्ञम्। यज्ञमिमं दिवि धाः। दिवं गच्छ। अन्तरिक्षं गच्छ। पृथिवीं गच्छ। पञ्च प्रदिशो गच्छ। देवान्घर्मपान्गच्छ। पितॄन्घर्मपान्गच्छ (४) इति॥

आदित्यवते स्वाहा हार्दिवानं पृथिव्या अष्टौ च॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठके नवमोऽनुवाकः॥ ९॥

हेऽश्विनावस्मिन्नहनि द्योतमानैरक्षणक्रियानिमित्तं हृदयप्रियातिशययुक्तं प्रवर्ग्यद्रव्यमपातं युवां पीतवन्तौ। द्यावापृथिव्यौ च युवयोरनुमतिं दत्तवत्यौ। प्रकृष्टरक्षाहेतुं **तं प्राव्यं** [प्रवर्ग्यद्रव्यं?] **यथावट्** स्विष्टकृद्देवतायै यथावद्दत्तवानस्मि। द्यावापृथिव्योः प्रसादादस्य कर्मणो निष्पत्तेस्ताभ्यां **नमोऽस्तु**। हेऽश्वीन्द्ररूप प्रवर्ग्यदेवास्मदीयमिमं **यज्ञं दिवि धा** द्युलोके स्थापय। द्विरुक्तिरादरार्था। हे प्रवर्ग्य द्युप्रभृतिकं लोकत्रयं प्राप्नुहि। तथोर्ध्वदिक्सहिताः प्राच्यादिपञ्च दिग्देवताः प्राप्नुहि। प्रवर्ग्यस्य पातारो ये देवा ये च पितरस्तानुभयान्प्राप्नुहि।

होममन्त्रेण सहोपस्थानमन्त्रस्य समानार्थतां दर्शयति—

घर्ममपातमश्विनेत्याह (२)। पूर्वमेवोदितम्। उत्तरेणाभिगृणाति, इति।

(प्रपा० ९। अनु० ८। विभा० ९)

---

१ ग. °ध्यै। दि°। २ क. ख. ग पितॄन्व°। ३ ग. °च्छ (३)। ४ ख. °नलक्ष°। ५ ग. °त्यौ। प्राव्यं प°।

अमꣳसातामित्यस्यातीतार्थवाचिशब्दस्य सिद्धानुज्ञापरत्वं दर्शयति—

अनु वां द्यावापृथिवी अमꣳसातामित्याहानुमत्यै, इति ।

(प्रपा० ५ । अनु० ८ । विभा० १०)

अनन्तरमन्त्रभागस्य स्पष्टार्थतां दर्शयति—

तं प्राच्यं यथावण्णमो दिवे नमः पृथिव्या इत्याह । यथायजुरेवैतत्, इति ।

(प्रपा० ५ अनु० ८ । विभा० ११)

हविषः स्वर्गप्राप्तिपरत्वमनन्तरभागस्य दर्शयति—

दिवि धा इमं यज्ञं यज्ञमिमं दिवि धा

इत्याह । सुवर्गमेवैनं लोकं गमयति, इति ।

(प्रपा० ५ । अनु० ८ । विभा० १२)

दिवं गच्छेति प्रार्थनाया हविषो लोकत्रयप्रतिष्ठापनार्थतां दर्शयति—

दिवं गच्छान्तरिक्षं गच्छ पृथिवीं गच्छेत्याह ।

एष्वेवैनं लोकेषु प्रतिष्ठापयति, इति ।

(प्रपा० ५ । अनु० ८ । विभा० १३)

अथोत्तरवाक्यानां सर्वदिक्षु देवेषु पितृषु च हविषः प्रतिष्ठापनार्थतां दर्शयति—

पञ्च प्रदिशो गच्छेत्याह (३) । दिक्ष्वेवैनं प्रतिष्ठापयति । देवान्धर्मपान्गच्छ । पितॄन्धर्मपान्गच्छेत्याह । उभयेष्वेवैनं प्रतिष्ठापयति, इति ।

(प्रपा० ५ । अनु० ८ । विभा० १४)

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

अथ चतुर्थे दशमोऽनुवाकः ।

आहवनीये प्रवर्ग्यद्रव्येण होमो नवमेऽभिहितः । दशमे तद्द्रव्यशेषेणाग्निहोत्रहोमोऽभिधीयते । तत्राऽऽदौ किंचिदनुमन्त्रणमुच्यते । कल्पः—"उपर्याहवनीये धार्यमाणं प्रतिप्रस्थाता शृतदधना पूरयतीषे पीपिह्यूर्जे पीपिहीति विक्षरन्तमनुमन्त्रयते" इति । पाठस्तु—

इषे पीपिहि । ऊर्जे पीपिहि । ब्रह्मणे पीपिहि । क्षत्राय पीपिहि ।

अद्भ्यः पीपिहि । ओषधीभ्यः पीपिहि । वनस्पतिभ्यः पीपिहि ।

---

१ क. °चिनः श° । २ घ. पितृन्घ° । ३ ग. °ये चार्य° । ४ ख. शृतं द° । ५ ग. °पिह्युर्जे । ६ क. घ. उर्जे ।

द्यावापृथिवीभ्यां पीपिहि । सुभूतायं पीपिहि । ब्रह्मवर्चसायं पीपिहि (१)। यजमानाय पीपिहि । मह्यं ज्यैष्ठ्यायं पीपिहि, इति।

आहवनीयस्योपरि महावीरं धारयित्वा तत्रत्ये तप्ते घृते तप्तस्य दध्नः प्रक्षेपे सति प्रवर्ग्यो विक्षरति विशेषेण पात्रस्योर्ध्वं यदोद्गच्छति तदानीमुद्गच्छन्तं प्रवर्ग्यं संबोध्येद-मुच्यते—हे प्रवर्ग्य, **इषेऽन्नार्थं पीपिहि** त्वं प्रवृद्धो भव । तथोर्जे रसार्थं ब्राह्मणाद्यर्थं च प्रवृद्धो भव । सुभूतं शोभनं प्राणिजातम् । **मह्यं ज्यैष्ठ्यायाध्वर्योर्मम** प्रशस्तत्वाय । प्रवर्ग्यस्याभिवृद्ध्या सर्वमिदमभिवर्धत इत्यर्थः ।

एतस्याभिवृद्धेर्मन्त्रोक्ताया वृष्टिहेतुत्वं दर्शयति—

यत्पिन्वते । वर्षुकः पर्जन्यो भवति । तस्मात्पिन्वमानः पुण्यः, **इति** ।

(प्रपा० ५ । अनु० ८ । विभा० १५)

पिन्वते वर्धते पात्रस्योपर्युद्गच्छतीत्यर्थः ।

हविष उद्गमनं दिग्विशेषेण प्रशंसति—

यत्प्राङ्पिन्वते । तद्देवानाम् । यद्दक्षिणा । तत्पितृणाम् (४)।
यत्प्रत्यक् । तन्मनुष्याणाम् । यदुदङ् । तद्रुद्राणाम्, **इति** ।

(प्रपा० ५ । अनु० ८ । विभा० १६)

इत्थमभिवृद्धिं प्रशस्य प्रागुदादिशोः संधौ क्षरणं विधत्ते—

प्राच्यमुदच्यं पिन्वयति । देवत्राऽकः, **इति** ।

(प्रपा० ५ । अनु० ८ । विभा० १७)

प्रागुदङ्मध्यवर्तिनमेतं प्रवर्ग्यमिष्टं **पिन्वयति,** अभिवृद्धं कुर्यात् । महावीरमध्ये तस्मिन्प्रदेशे दधिप्रक्षेपेणाभिवर्धयेत् । तेन देवत्रा देवेष्वकरेतं प्रवर्ग्यं करोति ।

पक्षान्तरं विधत्ते—

अथो खलु । सर्वा अनुदिशः पिन्व-
यति । सर्वा दिशः समेधन्ते, **इति** ।

(प्रपा० ५ । अनु० ८ । विभा० १८)

पात्रमध्ये **सर्वा दिशोऽनुलक्ष्य** दधिप्रक्षेपेण तद्धविरुद्गमयेत् । तेन सर्वा अपि दिशः सम्यग्वर्धन्ते ।

पात्रादुद्गतस्य[3] हविषः पारिधिभ्यो बहिर्देशे पतनं वारयितुं विधत्ते—

अन्तःपारिधि पिन्वयति (५) । तेजसोऽस्कन्दाय, **इति** ।

(प्रपा० ५ । अनु० ८ । विभा० १९)

---

१ ग. धारयित्वा । २ क. ख. °र्यद्रव्यं पि° । ३ क. °दुद्गत° ।

परिधीनामन्तरेव यथा पतति तथाऽभिवर्धयेत् । तथा सत्यविनाशितं तेजो भवति । मन्त्रेषु चतुर्थीविभक्तेस्तात्पर्यं दर्शयति—

इषे पीपिह्यूर्जे पीपिहीत्याह । इषमेवोर्जं यजमाने दधाति, इति ।
(प्रपा० ५ । अनु० ८ । विभा० २०)

उत्तरमन्त्रेष्वप्येतदनुसंधेयम् ।

सर्वेषां यजमानार्थत्वे समाने सति पुनर्यजमानायेत्युक्तेस्तात्पर्यमाह—

यजमानाय पीपिहीत्याह । यजमानायैवैतामाशिषमाशास्ते, इति ।
(प्रपा० ५ । अनु० ८ । विभा० २१)

यजमानस्य फलान्तरानुशासनायेयमुक्तिरित्यर्थः ।

अध्वर्योः स्वार्थं मह्यमित्युक्तिरिति दर्शयति—

मह्यं ज्यैष्ठ्याय पीपिहीत्याह । आत्मन एवैतामाशिषमाशास्ते, इति ।
(प्रपा० ५ । अनु० ८ । विभा० २२)

त्विष्यै त्वा । द्युम्नाय त्वा । इन्द्रियाय त्वा भूत्यै त्वा ।

कल्पः—"अथैनं दिशोऽनुप्रहावयति त्विष्यै त्वा द्युम्नाय त्वेन्द्रियाय त्वा भूत्यै त्वा" इति । हे प्रवर्ग्य त्विष्यै दीप्तिसिद्धये त्वां प्राच्यां दिशि हुतं करोमि । द्युम्नाय धनसिद्धये त्वां दक्षिणस्यां दिशि हुतं करोमि । इन्द्रियाभिवृद्धये त्वां प्रतीच्यां दिशि हुतं करोमि । भूत्या ऐश्वर्यसिद्ध्यर्थमुदीच्यां दिशि हुतं करोमि ।

मन्त्रस्य स्पष्टार्थतां दर्शयति—

त्विष्यै त्वा द्युम्नाय त्वेन्द्रियाय त्वा
भूत्यै त्वेत्याह । यथायजुरेवैतत्, इति ।
(प्रपा० ५ । अनु० ८ । विभा० २३)

धर्माऽसि सुधर्मा मे न्यस्मे । ब्रह्माणि धारय । क्षत्राणि धारय । विशं धारय । नेत्त्वा वातः स्कन्दयात् (२) ।

कल्पः—"प्रत्याक्रम्योपयमने शेषमानीयान्तर्वेद्युपयमनं निधाय पूर्वस्मिन्खरे राजतं रुक्मं निधाय तस्मिन्महावीरं प्रतिष्ठापयति धर्माऽसि सुधर्मा मे न्यस्मे ब्रह्माणि धारयेति [ब्राह्मणस्य?] क्षत्राणि धारयेति राजन्यस्य विशं धारयेति वैश्यस्य" इति । नेत्त्वा वातः

---

१ ग. 'पिह्यूर्जे । २ घ. °मानमेवै° । ३ ग. °प्रजाव° । ४ ख. ग. धनसि° । ५ ग. °याय वीर्यवृ° । ६ क. ख विधाय । ७ क. °ति । हे ।

स्कन्दयादिति [मन्त्रशेषः]। हे महावीर **धर्माऽसि** त्वं धारणशक्तियुक्तोऽसि **मे** मम **सुधर्मा** सुष्ठु धारको भवेति शेषः । **अस्मे** अस्मासु **ब्रह्माणि** ब्राह्मणजात्युचितानि कर्माणि **[नि]धारय** नितरां संपादय । **क्षत्राणि** क्षत्रियजात्युचितानि कर्माणि **धारय** । **विशं** प्रजां **धारय** । **वातो** वायुस्त्वां **नेत्स्कन्दयान्नैव** शोषयतु ।

मन्त्रपाठेन ब्राह्मणजात्युचिते कर्माणि यजमानस्य स्थापनं दर्शयति—

धर्माऽसि सुधर्मा मे न्यस्मे ब्रह्माणि धारये-
त्याह (६)। ब्रह्मन्नेवैनं प्रतिष्ठापयति, इति ।
(प्रपा० ५ । अनु० ८ । विभा० २४)

मन्त्रशेषस्य निगदव्याख्यातत्वमभिप्रेत्य तत्स्वरूपमात्रमुपदर्शयति—

नेत्त्वा वातः स्कन्दयादिति, [इति] ।
(प्रपा० ५ । अनु० ८ । विभा० २५)

ब्राह्मणादिविषयेषु मन्त्रत्रयेष्वनुषङ्गद्योतनाय पृथगुपदर्शनम् ।

कल्पः—"यद्यभिचरेदमुष्य त्वा प्राणे सादयामीति सादयेत्" इति । पाठस्तु—

अमुष्य त्वा प्राणे सादयामि । अमुना सह निरर्थं
गच्छ । योऽस्मान्द्वेष्टि । यं च वयं द्विष्मः , इति ।

हे महावीर द्वेष्टा द्वेष्यश्चेत्युभयविधस्यामुष्य शत्रोः **प्राणे** त्वां **सादयामि** । **अमुना** शत्रुणा **सह** त्वं **निरर्थं गच्छ** प्रयोजनाभावं प्राप्नुहि, तदीयं प्रयोजनं मा कुर्वित्यर्थः ।

अनेन मन्त्रेणाभिचारप्रयोगं विधत्ते—

यद्यभिचरेत् । अमुष्य त्वा प्राणे सादयाम्यमुना
सह निरर्थं गच्छेति ब्रूयाद्यं द्विष्यात् । यमेव
द्वेष्टि । तेनैनꣳ सह निरर्थं गमयति, इति ।
(प्रपा० ५ । अनु० ८ । विभा० २६)

यं शत्रुं यजमानो **द्विष्यात्**, शत्रुश्च **यमेव** यजमानं **द्वेष्टि**, **ऐनं** द्वेष्यं द्वेष्टारं चेत्युभयविधं शत्रुं स यजमानस्तेन महावीरेण **सह निरर्थं** पुरुषार्थाभावं प्रापयति ।

कल्पः—"अथैताञ्शकलानुपयमने जुहोति पूष्णे शरसे स्वाहेत्येतैः प्रतिमन्त्रम्" इति । पाठस्तु—

पूष्णे शरसे स्वाहा । ग्रावभ्यः स्वाहा ।
प्रतिरेभ्यः स्वाहा । द्यावापृथिवीभ्याꣳ

---

१ क. ख. निरन्तरं ।

स्वाहा। पितृभ्यो घर्मपेभ्यः स्वाहा, इति ।

अनिष्टस्य हिंसकः शराः, तादृशाय **शरसे पूष्णे** पोषकाय देवाय स्वाहुतमिदमस्तु। **ग्रावभ्यः** पाषाणजन्यध्वनिरूपाभ्यो वाग्देवताभ्यः। **प्रतिरेभ्योऽभिवृद्धिहेतुभ्यः** प्राणदेवेभ्यः।

प्रथममन्त्रे पूषञ्श(श)ब्देन बहुदेवताविवक्षां दर्शयति—

पूष्णे शरसे स्वाहेत्याह। या एव देवता
हुतभागाः। ताभ्य एवैनं जुहोति, इति ।
(प्रपा० ५। अनु० ८। विभा० २७)

द्विविधा हि **देवता** हुतभागा अहुतभागाश्चेति। तथा चान्यत्राऽऽम्नातम्—"हुतादो वा अन्ये देवा अहुतादोऽन्ये" इति। तासु **हुतभागाः** सर्वा अप्यत्रोपलक्षितास्ताभ्यः सर्वाभ्य एनैमुक्तं शकलं **जुहोति**।

ग्रावशब्देन तज्जन्यध्वनिविवक्षां दर्शयति—

ग्रावभ्यः स्वाहेत्याह। या एवान्तरिक्षे
वाचः (७)। ताभ्य एवैनं जुहोति, इति।
(प्रपा० ५। अनु० ८। विभा० २८)

प्रतिरशब्देन प्राणविवक्षां दर्शयति—

प्रतिरेभ्यः स्वाहेत्याह। प्राणा वै देवाः
प्रतिराः। तेभ्य एवैनं जुहोति, इति।
(प्रपा० ५। अनु० ८। विभा० २९)

द्यावापृथिवीशब्देन मुख्यार्थविवक्षां दर्शयति—

द्यावापृथिवीभ्या[१]ꣳ स्वाहेत्याह। द्यावा-
पृथिवीभ्यामेवैनं जुहोति, इति ।
(प्रपा० ५। अनु० ८। विभा० ३०)

घर्मपेभ्य इति विशेष्येण[२](षणेन) सोमयागं कृत्वा पितृलोकगतानां पितॄणां विवक्षां दर्शयति—

पितृभ्यो घर्मपेभ्यः स्वाहेत्याह। ये वै यज्वानः। ते
पितरो घर्मपाः। तेभ्य एवैनं जुहोति (८), इति।
(प्रपा० ५। अनु० ८। विभा० ३१)

यज्वनां स्वकीययागकाले प्रवर्ग्यपानमस्तीति ते घर्मपाः।

रुद्राय रुद्रहोत्रे स्वाहा (३)।

---

१ क 'नमक्तश'। २ क. °शेषेण।

कल्पः—"षष्ठं शकलं सर्वेषु लेपेष्वेङ्क्त्वाऽनन्वीक्षमाण उदञ्चं निरस्यति रुद्राय रुद्रहोत्रे स्वाहा" इति। रुद्राः सहस्रसंख्याका होतार आह्वातारो यस्य मुख्यरुद्रस्य तस्मै रुद्रहोत्रे मुख्यरुद्राय स्वाहुतमिदं शकलमस्तु।

अनेन मुख्यरुद्रस्य भागसमृद्धिं दर्शयति—

रुद्राय रुद्रहोत्रे स्वाहेत्याह। रुद्र-
मेव भागधेयेन समर्धयति, इति।
(प्रपा० ९। अनु० ८। विभा० ३२)

अस्य शकलस्याऽऽज्यपयःपिष्टलेपेषु सर्वेष्वञ्जनं विधत्ते—

सर्वतः समनक्ति। सर्वत एव रुद्रं निरवदयते, इति।
(प्रपा० ९। अनु० ८। विभा० ३३)

सर्वाञ्जनेन क्रूरदेवस्य रुद्रस्य सर्वतोऽपसारणं कृतं भवति।

शकलपरित्यागस्य दिग्विशेषं विधत्ते—

उदञ्चं निरस्यति। एषा वै रुद्रस्य दिक्।
स्वायामेव दिशि रुद्रं निरवदयते, इति।
(प्रपा० ९। अनु० ८। विभा० ३४)

ऐशान्याः समीपे वर्तत इत्युदीच्यपि रुद्रस्य दिग्भवति।

हस्तेन जलस्पर्शनं विधत्ते—

अप उपस्पृशति मेध्यत्वाय, इति।
(प्रपा० ९। अनु० ८। विभा० ३५)

रुद्रार्थशकलस्पर्शेन यज्ञयोग्यत्वं विनष्टं पुनर्जलस्पर्शेन तद्योग्यता संपद्यते।

शकलपरित्यागकाले तद्दर्शनं निषेधति—

नान्वीक्षेत। यदन्वीक्षेत (९)। चक्षुरस्य
प्रमायुकꣳ स्यात्। तस्मान्नान्वीक्ष्यः, इति।
(प्रपा० ९। अनु० ८। विभा० ३६)

प्रमायुकं विनश्वरम्।

अहर्ज्योतिः केतुना जुषताम्। सुज्योति-
र्ज्योतिषाꣳ स्वाहा। रात्रिर्ज्योतिः केतुना
जुषताम्। सुज्योतिर्ज्योतिषाꣳ स्वाहा।

कल्पः—"प्रतिप्रस्थाता दक्षिणं रौहिणं प्रतिष्ठितं जुहोत्यहर्ज्योतिः केतुना

---

१ ग. 'ष्वक्त्वा'ऽ। २ ग प्रतितिष्ठन्तं।

जुषतां सुज्योतिर्ज्योतिषा॑ स्वाहा । रात्रिर्ज्योतिः केतुना जुषतां सुज्योतिर्ज्योतिषा॑ स्वाहा " इति । तावेतौ मन्त्रौ पूर्वस्मिन्ननुवाके ब्राह्मणोदाहरणप्रसङ्गेन व्याख्यातौ ।

अपीपरो माऽह्नो रात्रियै मा पाहि । एषा ते अग्ने समित् । तया समिध्यस्व । आयुर्मे दाः । वर्चसा माऽऽज्ञीः । अपीपरो मा रात्रिया अह्नो मा पाहि (४) । एषा ते अग्ने समित् । तया समिध्यस्व । आयुर्मे दाः । वर्चसा माऽऽज्ञीः ।

कल्पः—" अपीपरो माऽह्नो रात्रियै मा पाह्येषा ते अग्ने समित्तया समिध्यस्वाऽऽयुर्मे दा वर्चसा माऽऽज्ञीरिति सायं समिधमादधाति, अपीपरो मा रात्रिया अह्नो मा पाहीति प्रातः " इति । तन्मन्त्रशेषस्तु—" एषा ते अग्ने समित् । तया समिध्यस्व । आयुर्मे दाः । वर्चसा माऽऽज्ञीः " इति । हेऽग्ने मां यजमानमपीपरः पारं नीतवानसि । तस्माद्दह्नो रात्रेश्च सकाशान्मां **पाहि** । हेऽग्ने **ते** तवैँ**षा** समिदाधीयते, **तया** समिधा त्वं **समिध्यस्व** संदीप्तो भव । **मे** मह्यमायुः, दा देहि । **वर्चसा** तेजसा मां यजमान-**माज्ञीः**, अक्तं कुरु । संयोजयेत्यर्थः । अपीपरो मा रात्रिया इति मन्त्रोऽपि तद्वद्व्याख्येयः । अहःशब्दस्य रात्रिशब्दस्य च पाँठे पौर्वापर्यमात्रं विशेषः ।

मन्त्रद्वयेऽपि यजमानस्याऽऽयुर्वर्चःप्राप्तिं दर्शयति—

अपीपरो माऽह्नो रात्रियै मा पाह्येषा ते अग्ने समित्तया समिध्यस्वाऽऽयुर्मे दा वर्चसा माऽऽज्ञीरित्याह । आयुरेवास्मिन्वर्चो दधाति । *अपीपरो मा रात्रिया अह्नो मा पाह्येषा ते अग्ने समित्तया समिध्यस्वाऽऽयुर्मे दा वर्चसा माऽऽज्ञीरित्याह । आयुरेवास्मिन्वर्चो दधाति, इति ।

(प्रपा० ९ । अनु० ८ । विभा० ३७)

अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा । सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा ।

कल्पः—" अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायमग्निहोत्रं जुहोति सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातः " इति । योऽयमग्निः स ज्योतिःस्वरूपः, यश्च ज्योतिः-

---

* एतदीदृ दधातीत्यन्तं ब. पुस्तके त्रुटितम् ।

---

१ ग. °दृशति । २ ग. पाठपौ° । ३ ग. °होतीति ।

स्वरूपः सोऽप्यग्निः । अग्नेर्ज्योतिषश्चात्यन्तमभेदं द्योतयितुं व्यतिहारेण द्विरुपन्यासः । तस्मादग्नये स्वाहुतमिदमस्तु । सूर्यमन्त्रोऽप्येवं व्याख्येयः ।

मन्त्रद्वयस्य स्पष्टार्थतां दर्शयति—

अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्यो ज्योतिर्ज्योतिः
सूर्यः स्वाहेत्याह । यथायजुरेवैतत्, इति ।
(प्रपा० ९ । अनु० ८ । विभा० ३८)

भूः स्वाहा ।

कल्पः—"अथाप उपस्पृश्य तूष्णीं काण्टकीं समिधमाधायैतस्मादेव शेषादुपयमनेनाग्निहोत्रं जुहोति भूः स्वाहा" इति । भूः सत्तास्वभावः सदेव सौम्येदमग्र आसीदित्यादिशास्त्रप्रतिपाद्यस्य परमात्मनः स्वरूपभूतो योऽग्निस्तस्मै स्वाहुतमिदमस्तु ।

अत्र मीमांसया भूः स्वाहेति मन्त्रं प्रथमप्रवर्ग्यकालीनाग्निहोत्रविषयत्वेन व्यवस्थापयति—

ब्रह्मवादिनो वदन्ति । होतव्यमग्निहोत्रं३ न होतव्या३मिति
(१०) । यद्यजुषा जुहुयात् । अयथापूर्वमाहुतीं जुहुयात् ।
यन्न जुहुयात् । अग्निः पराभवेत् । भूः स्वाहेत्येव होतव्यम् ।
यथापूर्वमाहुतीं जुहोति । नाग्निः पराभवति, इति ।
(प्रपा० ९ । अनु० ८ । विभा० ३९)

अत्र प्रथमप्रवर्ग्ये प्रातःकालीने तदीयद्रव्येणाग्निहोत्रं जुहुयान्न वेति विचारः । होमपक्षे प्रथमाम्नातेनाग्निर्ज्योतिरिति मन्त्रेण होतव्यम् । स च मन्त्रो नित्याग्निहोत्रे सायंकालीनः, अतो यथापूर्वमनुष्ठानं न स्यात् । अहोमपक्षे त्वाहुत्यभावादग्निः क्षुधया पराभूतो भवेत् । अतो दोषद्वयपरिहाराय भूः स्वाहेति मन्त्रेण प्रथमप्रवर्ग्यकाले जुहुयात् । ततः सायमग्निर्ज्योतिरिति मन्त्रः । परेद्युः प्रातः सूर्यो ज्योतिरिति मन्त्रः । एवं सति यथापूर्वं नित्याग्निहोत्रवदेवेमा आहुतीर्जुहोति । अग्निश्चाऽऽहुतिसद्भावान्न पराभवति ।

कल्पः—"हुतꣳ हविर्मधु हविरिति भक्षयित्वा" इति । पाठस्तु—

हुतꣳ हविः । मधु हविः । इन्द्रतमेऽग्नौ । पिता नोऽसि
मा मा हिꣳसीः । अश्यामं ते देव घर्म । मधुमतो

---

१ ग. °यमेना° । २ ग. 'होतीति । ३ क. ख. °व सोम्ये' । ४ क. ख. दितिशा° । ५ क. ख. घ. °तीर्जुहु' । ६ ग. °तीर्जुहो° ७ क. ख. °देवायमिमा ।

वाजवतः पितुमतः। अङ्गिरस्वतः स्वधाविनः।
अशीमहि त्वा मा मा हिꣳसीः, इति।

इदं प्रवर्ग्यारूयं हविरुत्तराग्नौ हुतम्। तच्च हविर्मधु स्वादुभूतम्। कुत्र हुतमिति तदुच्यते--इन्द्रतमेऽग्नावतिशयेन परमैश्वर्ययुक्ते जाठरे प्राणरूपेऽग्नौ। हे प्रवर्ग्य त्वं नोऽस्माकं पिता पालकोऽसि, अतो मां मा हिंसीः। हे घर्म प्रवर्ग्य देव मधुमतो माधुर्ययुक्तस्य वाजवतः शरीरव्यापित्वेन गतियुक्तस्य पितुमतोऽन्नसाधनत्वेनान्नयुक्तस्याङ्गिरस्वतोऽङ्गसौष्ठवहेतोः स्वधाविनोऽमृतयुक्तस्य ते तव सारमश्याम भक्षयेम। अथवा स्वधाविन इत्युत्तरत्रान्वेतव्यम्। यस्मात्स्वधाविनोऽमृतत्वार्थिनो[3] वयं त्वामशीमहि तस्मान्मां मा हिंसीः।

मधुशब्देन स्वादुत्वं विवक्षितमिति दर्शयति—

हुतꣳ हविर्मधु हविरित्याह। स्वदयत्येवैनम्, इति।
(प्रपा० ९। अनु० ८। विभा० ४०)

अग्निशब्देन प्राणविवक्षां दर्शयति—

इन्द्रतमेऽग्नावित्याह (११)। प्राणो वा इन्द्रतमोऽग्निः। प्राण एवैनमिन्द्रतमेऽग्नौ जुहोति, इति।
(प्रपा० ९। अनु० ८। विभा० ४१)

मा मा हिꣳसीरिति प्रार्थनायाः क्षरणादिहिंसापरिहारार्थत्वं दर्शयति—

पिता नोऽसि मा मा हिꣳसीरित्याहाहिꣳसायै, इति।
(प्रपा० ९। अनु० ८। विभा० ४२)

अश्यामेत्यस्य लिङ्प्रत्ययस्याऽऽशीरर्थविवक्षां दर्शयति—

अश्याम ते देव घर्म मधुमतो वाजवतः पितुमत इत्याह। आशिषमेवैतामाशास्ते, इति।
(प्रपा० ९। अनु० ८। विभा० ४३)

मा हिꣳसीरित्येनेन देवताशरीरभक्षणप्रयुक्तहिंसानिवारणविवक्षां दर्शयति—

स्वधाविनोऽशीमहि त्वा मा मा हिꣳसीरित्याहाहिꣳसायै, इति।
(प्रपा० ९। अनु० ८। विभा० ४४)

उक्तमन्त्रसाध्यं भक्षणं विधत्ते—

तेजसा वा एते व्यृध्यन्ते। ये प्रवर्ग्येण चरन्ति।

---

१ क, ख. °क्ते मज्जठ°। २ क. भक्षयाम। ३ क. °नोऽग्ने त्वा°। ४ ख. ग. °नाया अक्ष°।

प्राश्नन्ति । तेज एवाऽऽत्मन्दधते (१२), इति।

(प्रपा० ५ । अनु० ८ । विभा० ४५)

प्रवर्ग्यप्रचरणप्रयासेन क्षीणा शक्तिर्हविर्भक्षणेन समाहिता भवति ।

नियमान्विधत्ते—

संवत्सरं न मा॑ꣳसमश्नीयात् । न रामामुपेयात् ।
न मृ॒न्मयेन पिबेत् । नास्य राम उच्छिष्टं
पिबेत् । तेज एव तत्सꣳश्यति, इति ।

(प्रपा० ५ । अनु० ८ । विभा० ४६)

प्रवर्ग्यानुष्ठायी **संवत्सरमात्रं मांसं न** भक्षयेत् । **स्त्रियं नोपेयात्। मृ॒न्मयेन** कारकादिना जलं **न पिबेत्** । **अस्य** यजमानस्योच्छिष्टं **रामो** रमणीयः पुत्रो **न पिबेत्** । तत्तेन नियमेन स्वकीयं तेज **एव** सम्यक्तीक्ष्णी करोति ।

यथोक्तं संवत्सरमांसवर्जनादिव्रतं प्रशंसति—

देवासुराः संयत्ता आसन् । ते देवा विजयमुपयन्तः । विभ्राजि
सौ॒र्ये ब्रह्म संन्यदधत । यत्किञ्च दिवाकी॒र्त्यम् । तदे॒तेनै॒व
व्रतेनागोपायत् । तस्मादे॒तद्व्रतं चार्यम् । तेजसो गोपीथाय ।
तस्मादे॒तानि यजू॒ꣳषि विभ्राजः सौ॒र्यस्येत्याहुः, इति ।

(प्रपा० ५ । अनु० ८ । विभा० ४७)

देवाश्चासुराश्च यदा परस्परं योद्धुं संनद्धा **आसंस्तदानीं ते देवा विजयं** प्राप्तुमिच्छन्तः सूर्यस्य पुत्रे विभ्राण्नामके देवे **ब्रह्म** वेदजातं सम्यॅङ्निहितवन्तः । स च विभ्राड्देवो वेदे **यत्किंचिद्दिवाकीर्त्यमहन्येव** पठनीयमनुवाकजातमस्ति, **तत्सर्वमेतेन** पूर्वोक्तनिरूपणेनैव **व्रतेन** युक्तो रक्षितवान्, **तस्मात्कारणाद्दिवाकीर्त्येन** प्रवर्ग्याध्यायेनानुष्ठानं कुर्वता पुरुषेण पूर्वोक्तमेतद्व्रतं चरणीयम् । यस्माद्विभ्राण्नामको देवो दिवाकीर्त्यानि नमो वाचे या चोदितेत्यादीनि यजूंषि रक्षितवान्, **तस्मादेतानि यजूंषि** सूर्यपुत्रस्य विभ्राड्देवस्य संबन्धीनीत्येवमभिज्ञाः कथयन्ति । तदीयानुष्ठाने तेजोरक्षणार्थं व्रतचरणम् ।

स्वाहा॑ त्वा सूर्यस्य र॒श्मिभ्यः ।
स्वाहा॑ त्वा नक्ष॒त्रेभ्यः (९) ॥
ब्रह्मवर्चसायं पीपिहि स्कन्दयाद्रुद्राय रु॒द्रहोत्रे स्वाहाऽग्नी

---

१ ग. मृण्मये॑ । २ ग. मृण्मये॑ । ३ घ. ॑देनानि । ४ क. स्पर्धया । ५ क. ख. °म्यङ्न्यदधत । स° ।

मा पाह्यग्नौ सप्त च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठके
दशमोऽनुवाकः ॥ १० ॥

कल्पः—" अग्नेणाऽऽहवनीयं पर्याहृत्य सम्राडासन्द्यां संसादयति स्वाहा त्वा सूर्यस्य रश्मिभ्य इति प्रातः स्वाहा त्वा नक्षत्रेभ्य इति सायम् " इति । हे धर्मपात्रसमूह त्वां **सूर्यस्य रश्मिभ्यः स्वाहा** समर्पयामि । ततस्त्वां **नक्षत्रेभ्यः** समर्पयामि ।

एतन्मन्त्रद्वयसाध्यं धर्मपात्रसाधनं विधत्ते—

स्वाहा त्वा सूर्यस्य रश्मिभ्य इति प्रातः सꣳसादयति ।
स्वाहा त्वा नक्षत्रेभ्य इति सायम् । एता वा एतस्य
देवताः । ताभिरेवैनꣳ समर्धयति (१३) , इति ।
(प्रपा० ५ । अनु० ८ । विभा० ४८)

अकरश्चिनेत्याह प्रदिशो गच्छेत्याह पितृणामन्तःपरिधि पिन्वयति धारयेत्याह वाचो धर्मपास्तेभ्य एवैनं जुहोत्यन्वीक्षेत होतव्या३मित्यग्नावित्याह दधतेऽगोपायत्सप्त च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके पञ्चमप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

सूर्यो नक्षत्राणि चेत्येताः प्रवर्ग्यपात्रसमूहस्य स्वामिभूताः, अतस्ताभिरेव देवताभिरेनं पात्रसमूहं समृद्धं करोतीति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये चतुर्थप्रपाठके दशमोऽनुवाकः ॥ १० ॥

अथ चतुर्थ एकादशोऽनुवाकः ।

दशमे प्रवर्ग्यशेषेणाग्निहोत्रहोम उक्तः, एकादशे प्रवर्ग्योद्वासनमुच्यते । कल्पः—"प्रवर्ग्यमुद्वासयिष्यन्नजामग्नीधे ददाति षष्ठीहो(हीं) ब्रह्मणे धेनुं होत्रे रुक्ममध्वर्यवेऽपरं खरं पूर्वस्मिन्खरे न्युप्योच्छिष्टखरं संकृष्योत्तरेणाऽऽहवनीयं सम्राडासन्दीं प्रतिष्ठाप्य तस्यां सर्वं परिधर्मं समाधायौदुम्बर्या स्रुचि चतुर्गृहीतं गृहीत्वा घर्म या ते दिवि शुगित्येतैर्यथालिङ्गं जुहोत्यपि वा प्रतिप्रस्थाता त्रीन्सन्नखाञ्शलाकान्मु(मु)ष्टीनादाय तेषामेकमाह-

---

१ ग. °सङ्त्वां संपाद° । २ क. ख. °रोमीति । ३ ग. °भजमग्नीधे द° । ४ ग. °दात्यष्टौ हि व्र° । ५ ग. °वे षडप° । ६ ग. °रे न्यस्योच्छि° । ७ क. ख. परिधर्म्यं । ८ क. °हीत्वा ।

वनीये प्रदीप्याऽऽस्यदघ्ने धारयति तमध्वर्युरभिजुहोति घर्म या ते दिवि शुक्" इति । पाठस्तु—

घर्म या ते दिवि शुक् । या गायत्रे छन्दसि । या ब्राह्मणे । या हविर्धाने । तां त एतेनावयजे स्वाहा, इति ।

हे **घर्म** प्रवर्ग्य **ते** तव संबन्धिनी शुक्संतापः । **या दिवि** द्युलोके **या गायत्रे छन्दसि या ब्राह्मणे** पुरुषे **या हविर्धाने** मण्डपे च विद्यते, **तां** सर्वां **ते** त्वदीयां शुचमेतेन होमेनाहमवयजे नाशयामि ।

कल्पः—"तस्मिन्नपरं प्रदीप्याऽऽहवनीये पूर्वं प्रत्दत्य नाभिदघ्ने धारयति तमध्वर्युरभिजुहोति घर्म या तेऽन्तरिक्षे शुगिति, तस्मिन्नपरं प्रदीप्याऽऽहवनीये पूर्वं प्रहृत्य जानुदघ्ने धारयति तमध्वर्युरभिजुहोति घर्म या ते पृथिव्याः शुक्" इति । पाठस्तु—

घर्म या तेऽन्तरिक्षे शुक् । या त्रैष्टुभे छन्दसि । या राजन्ये । याऽऽग्नीध्रे । तां त एतेनावयजे स्वाहा (१) ।
घर्म या ते पृथिव्याः शुक् । या जागते छन्दसि । या वैश्ये । या सदसि । तां त एतेनावयजे स्वाहा, इति ।

एतौ मन्त्रौ प्रथममन्त्रवदूह्यास्येयौ ।

एतन्मन्त्रसाध्यं होमं विधत्ते—

घर्म या ते दिवि शुगिति तिस्र आहुतीर्जुहोति ।
छन्दोभिरेवास्यैभ्यो लोकेभ्यः शुचमवयजते, इति ।

(प्रपा० ५ । अनु० ९ । विभा० १)

अस्य घर्मस्य संबन्धिनीं **शुचं** छन्दोदेवताभिरेव सहायभूताभिर्लोकत्रयादपनयति ।

प्रदीप्यमानस्य शलाकामुष्टेर्धारणे क्रमेण मुखनाभिजानुप्रमाणानि हस्तेनाभिनीय विधत्ते—

इयत्यग्रे जुहोति । अथेयत्यथेयति । त्रय इमे
लोकाः । एभ्य एव लोकेभ्यः शुचमवयजते, इति ।

(प्रपा० ५ । अनु० ९ । विभा० २)

अग्रे प्रथममियत्यास्यदघ्ने देशे [धारयित्वा] **जुहोति** । **अथानन्तरमियति** नाभिदघ्ने देशे धारयित्वा **जुहोति** । **अथानन्तरमियति** जानुदघ्ने देशे धारयित्वा **जुहोति** । एते च त्रयो देशा लोकत्रयरूपाः, अतो **लोकेभ्यः शुचं** निगकरोति ।

अनु नोऽद्यानुमतिः। अन्विदनुमते त्वम्।

कल्पः—"आहवनीय एवैनमनुप्रहरत्यनु नोऽद्यानुमतिरिति परिश्रिते प्रतिप्रस्थाता पत्नीमुदानयत्यन्विदनुमते त्वम्" इति। अनु नोऽद्यानुमतिरित्येकस्या ऋचः प्रतीकम्। अन्विदनुमते त्वमित्यपरस्या ऋचः प्रतीकम्। एते ऋचाविदं वामास्ये हविरित्यनुवाके व्याख्याते।

अनयोर्देवतानुरूपतां दर्शयति—

अनु नोऽद्यानुमतिरित्याहानुमत्यै, इति।

(प्रपा० ५। अनु० ९। विभा० ३)

कल्पः—"दिवस्त्वा परस्या(स्पा)या इति। प्रथमेऽभिप्रव्रजन्ति" इति। पाठस्तु—

दिवस्त्वा पँरस्पायाः। अन्तरिक्षस्य तनुवः
पाहि। पृथिव्यास्त्वा धर्मणा (२)।
वयमनुक्रामाम सुविताय नव्यसे, इति।

सर्वे मिलित्वा प्रवर्ग्योद्वासनदेशं प्रति यदा गच्छन्ति तदा मार्गं त्रेधा विभज्य प्रथमे भागे मन्त्रेणानेन प्रव्रजन्ति। हे प्रवर्ग्य **दिवो** द्युलोकस्य **परस्या(स्पा)या** अतिशयेन पालननिमित्तं त्वां **वयमनुक्रामाम**, त्वं **चान्तरिक्षस्य** संबन्धिनीस्तनुवः प्राणिशरीराणि **पाहि** रक्ष। तथा **पृथिव्या धर्मणा** धारणनिमित्तं त्वां **वयमनुक्रामाम**, एतदनुक्रमग्रहणं **नव्यसे** नूतनाय **सुविताय** शोभनगमनाय संपद्यताम्।

अस्य मन्त्रस्य लोकत्रयधारणे तात्पर्यं दर्शयति—

दिवस्त्वा पँरस्पाया इत्याह। दिव एवेमाँल्लोकान्दाधार, इति।

(प्रपा० ५। अनु० ९। विभा० ४)

दिवो द्युलोकदेवताया रक्षणेन लोकत्रयं धृतं भवतीत्यर्थः।

कल्पः—"ब्रह्मणस्त्वा परस्या(स्पा)या इति द्वितीये" इति। अनेन **मन्त्रेण** द्वितीयमार्गभागे प्रव्रजेयुरित्यर्थः। पाठस्तु—

ब्रह्मणस्त्वा पँरस्पायाः। क्षत्रस्य तनुवः पाहि। विशस्त्वा
धर्मणा। वयमनुक्रामाम सुविताय नव्यसे, इति।

---

१ ग. व्याख्यास्येते। २ क. °तारू। ३ ग. °न्ति। प°। ४ क. ख. ग. परस्यायाः। ५ क ख. °म, त°। ६ क. ख. ग परस्यायाः। ७ क. ख. ग. परस्यायाः।

पूर्ववद्व्याख्येयम् ।

लोकविषयमन्त्रानन्तरं ब्राह्मणादिजातिविषयमन्त्रेण लोकेषु प्रजानां धारणं सिध्यतीति दर्शयति—

ब्रह्मणस्त्वा परँस्पाया इत्याह । (१) । एष्वेव लोकेषु प्रजा दाधार, इति ।
(प्रपा० ९ । अनु० ९ । विभा० ९)

कल्पः—"प्राणस्य त्वा परँस्पाया इति तृतीये" इति । अनेन मन्त्रेण मार्गस्य तृतीयभागे प्रव्रजेयुः । पाठस्तु—

प्राणस्यँ त्वा परँस्पायैं । चक्षुषस्तनुवः पाहि । श्रोत्रस्य त्वा धर्मणा । वयमनुक्रामाम सुविताय नव्यसे, इति ।

चक्षुषस्तनुव इत्यनेन चक्षुष्मन्ति शरीराणीत्यर्थो विवक्षितः । अन्यत्पूर्ववद्व्याख्येयम् ।

ब्रह्मक्षत्रादिप्रजाविषया(य)[मन्त्रा]नन्तरं प्राणचक्षुरादिविषयमन्त्रेण प्रजासु प्राणधारणसिद्धिं दर्शयति—

प्राणस्य त्वा परँस्पाया इत्याह । प्रजास्वेव प्राणान्दाधार इति ।
(प्रपा० ९ । अनु० ९ । विभा० ६)

प्रवर्ग्यस्य पूर्वदिश्युद्वासनं विधत्ते—

शिरो वा एतद्यज्ञस्य । यत्प्रवर्ग्यः । असौ खलु वा आदित्यः प्रवर्ग्यः ।
तं यद्दक्षिणा प्रत्यञ्चमुदञ्चमुद्वासयेत् । जिह्मं यज्ञस्य शिरो हरेत् ।
प्राञ्चमुद्वासयति । पुरस्तादेव यज्ञस्यँ शिरः प्रतिदधाति (२) ।
प्राञ्चमुद्वासयति । तस्मादसावादित्यः पुरस्तादुदेति, इति ।
(प्रपा० ९ । अनु० ९ । विभा० ७)

प्रवर्ग्यस्य यज्ञशिरोरूपस्य दक्षिणादिषु तिसृषु दिक्षूद्वासने सति **शिरो जिह्मं** कुटिलं यथा भवति तथा हृतं स्यात् । अतः **पुरस्तादेवाऽऽर्जवेन** यज्ञशिरःप्रतिधानाय प्रवर्ग्यं प्राङ्मुखमेवोद्वासयेत् । किंच प्रवर्ग्यस्याऽऽदित्यरूपत्वादादित्यस्य च पुरस्तादेवोदयात्प्रागुद्वासनं युक्तम् ।

शफादीनां तत्रँ नयनं विधत्ते—

शफोपयमान्धवित्राणि धृष्टी इत्यन्ववहरन्ति ।

---

१ क. ख. ग. °रस्याया । २ क. ख. ग. °रस्याया । ३ क. ख ग. °रस्यायै । ४ क. ख. ग. °रस्याया । ५ घ. °स्य प्र° । ६ ग. तत्राऽऽत्त° ।

सात्मानमेवैनꣳ सतनुं करोति, इति ।

(प्रपा० ५ । अनु० ९ । विभा० ८)

तप्तस्य महावीरस्य हस्तेन स्प्रष्टुमशक्यत्वात्तद्धारणार्थौ काष्ठविशेषौ शफौ । उपयमः पात्रविशेषः । धृष्टी अङ्गारनिर्हरणाद्यर्थौ साधनविशेषौ । साधनान्तराणामप्युपदर्शनार्थ इतिशब्दः । एतानि सर्वाण्यपि महावीरमनुप्रवर्ग्योद्वासनदेशे हरेयुः । तेनैनं प्रवर्ग्यमात्मसहितं शरीरसहितं करोति ।

एतद्वेदनं प्रशंसति—

सात्माऽमुष्मिँल्लोके भवति । य एवं वेद, इति ।

(प्रपा० ५ । अनु० ९ । विभा० ९)

साधनानां कारणं वृक्षविशेषं विधत्ते—

औदुम्बराणि भवन्ति । ऊर्ग्वा उदुम्बरः[३] । ऊर्जमेवावरुन्धे, इति ।

(प्रपा० ५ । अनु० ९ । विभा० १०)

उदुम्बरफलस्य भक्ष्यत्वेनोर्ग्रूपत्वात्तद्वृक्षेणोर्क्प्राप्तिः ।

गमनकाले साधनीभूतं सामगानं विधत्ते—

वर्त्मना वा अन्वित्य (३) । यज्ञꣳ रक्षाꣳसि जिघाꣳसन्ति । साम्ना प्रस्तोताऽन्ववैति । साम वै रक्षोहा । रक्षसामपहत्यै, इति ।

(प्रपा० ५ । अनु० ९ । विभा० ११)

गमनवेलायां प्रस्तोतुं सामगानेन सहितः × प्रस्तोता तान्सर्वाननुगच्छेत् । साम्नो रक्षोघ्नत्वात्तद्गानं रक्षोपघाताय भवति ।

यदुक्तं सूत्रकारेण—" सर्वे सहपत्नीकास्त्रिः साम्नो निधनमुपयन्त्यर्धर्चे द्वितीयं प्राप्यापरेणोत्तरवेदिं तृतीयम् " इति । तदिदं[६] विधास्यन्नादौ प्रस्तोतुर्निधनावृत्तिं विधत्ते—

त्रिर्निधनमुपैति । त्रय इमे लोकाः । एभ्य एव लोकेभ्यो रक्षाँꣳस्यपहन्ति, इति ।

(प्रपा० ५ । अनु० ९ । विभा० १२)

पञ्चभागयुक्तस्य साम्नश्चरमो भागो निधनं तत्त्रिवारं पठेत् । तेन लोकत्रयाद्रक्षसामपहतिर्भवति ।

× रक्षांसि चोरवन्मर्मणैव पृष्ठत आगत्य यज्ञं हन्तुं गच्छन्ति । अतस्तत्परिहाराय सामगानेन सहित इति तै० पुस्तकपाठः । इति ग. पुस्तके ।

---

१ ख. °त्मन (ना) सं° । २ क. घ. उर्ग्वा । ३ क. घ. °रः । उर्ज° । ४ क. ख. °म वि° । ५ ग. °र्धाये द्वि° । ६ ग. °दिदमुत्तरं वि° । ७ घ. °क्षाꣳसि ह° ।

पत्नीसहितानां सर्वेषां प्रस्तोतृनिधनभागोच्चारणं विधत्ते—

पुरुषः पुरुषो निधनमुपैति । पुरुषः पुरुषो
हि रक्षस्वी । रक्षसामपहत्यै (४), इति ।
(प्रपा० ५ । अनु० ९ । विभा० १३)

सर्वेष्वपि पुरुषेषु बाधकानि रक्षांस्यनुगच्छन्ति, अतः सर्वोऽपि **पुरुषो रक्षस्वी** । निधनपाठेन तानि रक्षांस्यपहन्यन्ते ।

उद्वासनदेशे हिरण्यस्थापनं विधत्ते—

यत्पृथिव्यामुद्वासयेत् । पृथिवीꣳ शुचार्पयेत् । यदप्सु । अपः शुचार्पयेत् । यदोषधीषु । ओषधीः शुचार्पयेत् । यद्वनस्पतिषु । वनस्पतीञ्छुचार्पयेत् । हिरण्यं निधायोद्वासयति । अमृतं वै हिरण्यम् (९) । अमृत एवैनं प्रतिष्ठापयति, इति ।
(प्रपा० ५ । अनु० ९ । विभा० १४)

प्रवर्ग्यस्य दाहकत्वात्पृथिव्यादीनां दाहो मा भूदिति हिरण्ये तदुद्वासनम् । अग्निसंयोगेऽपि विनाशाभावाद्धिरण्यममृतम् । अतस्तत्रैव प्रवर्ग्यं **प्रतिष्ठापयति** ।

कल्पः—"उदकुम्भमादायाध्वर्युर्वल्गुरसि शंयुधाया इति त्रिः प्रदक्षिणमुत्तरवेदिं परिषिञ्चन्पर्येति" इति । पाठस्तु—

वल्गुरसि शंयुधायाः (३) । **शिशुर्जनंधायाः**, इति ।

हे परिषेक त्वं **शंयुधायाः** सुखप्राप्तेर्दुःखवियोगस्य धारको **वल्गुः** सुन्दरोऽसि । **जनधाया** जनस्य धारकः **शिशुर्**बालवदुपलालनीयोऽसि । उत्तरवेदिपरत्वेन व्याख्येयम् ।

एतन्मन्त्रसाध्यं परिषेचनं विधत्ते—

वल्गुरसि शंयुधाया इति त्रिः परिषिञ्चन्पर्येति । त्रिवृद्वा अग्निः । यावानेवाग्निः । तस्य शुचꣳ शमयति, इति ।
(प्रपा० ५ । अनु० ९ । विभा० १५)

आहवनीयादिरूपेणाग्नेस्त्रिगुणत्वात्त्रिवारंपरिषेचनेन सर्वस्याग्नेः शोकः शाम्यति ।

शं च वाक्षि परि च वाक्षि ।

कल्पः—"निधाय कुम्भं शं च वाक्षि परि च वक्षीति त्रिः परिषिञ्चन्प्रतिपर्येति" इति । हे उत्तरवेदे **शं च वाक्षि** सुखमपि वहसि, **परि च वाक्षि** दुःखपरिहारमपि वहसि ।

---

१ व °त् । यꣳ° । २ क. °वारं प° । ३ ग. °वेदि शं ।

एतन्मन्त्रसाध्यां प्रदक्षिणावृत्तिं विधत्ते——

त्रिः पुनः पर्येति । षट्संपद्यन्ते । षड्वा
ऋतवः । ऋतुभिरेवास्य शुचꣳ शमयति, इति ।
(प्रपा० ५ । अनु० ९ । विभा० १६)

त्रीणि प्रदक्षिणानि त्रीण्यप्रदक्षिणानीति षट्संपत्तिः ।

चतुःस्रक्तिर्नाभिर्ऋतस्य ।

कल्पः—"चतुःस्रक्तिर्नाभिर्ऋतस्येत्युत्तरवेदिमभिमृश्य" इति । **चतुःस्रक्तिः** कोण-चतुष्टयोपेतोत्तरवेदिः, इयमृतस्य यज्ञस्य नाभिस्थानीया । यद्वा, **ऋतस्य** सत्यभूताया भूमेर्नाभिस्थानीया ।

मन्त्रस्य भूमिनाभिपरत्वं दर्शयति——

चतुःस्रक्तिर्नाभिर्ऋतस्येत्याह (६) इयं वा ऋतम् । तस्या
एष एव नाभिः । यत्प्रवर्ग्यः । तस्मादेवमाह, इति ।
(प्रपा० ५ । अनु० ९ । विभा० १७)

प्रवर्ग्यहोमाधारत्वादुत्तरवेदिः **प्रवर्ग्य** इत्युच्यते ।

सदो विश्वायुः शर्म सप्रथाः ।

कल्पः——" सदो विश्वायुरित्युत्तरेणोत्तरवेदिं खरौ न्युप्यानुव्यूहति " इति । **शर्म सप्रथा** इति मन्त्रशेषः । **सदो** भूप्रदेशविशेष उत्तरवेद्युत्तरदेशरूपः । **विश्वायुः** कृत्स्नायुर्हेतुः । अत एव **सप्रथाः** ख्यातियुक्तः । **शर्म** सुखहेतुः ।

सदःशब्देन[1] भूमिविवक्षां दर्शयति——

सदो विश्वायुरित्याह । सदो हीयम्, इति ।
(प्रपा० ५ । अनु० ९ । विभा० १८)

अप द्वेषो अप ह्वरः । अन्यद्व्रतस्य सश्चिम ।

कल्पः——"अप द्वेषो अप ह्वर इति मार्जालीयदेश उच्छिष्टखरम् " इति । न्युप्या-नुव्यूहतीत्यनुवर्तते । अन्यद्व्रतस्य सश्चिमेति मन्त्रशेषः । **द्वेषो** द्वेष्टा शत्रुरपनीतः, **ह्वरः** कौटिल्यकारी चापनीतः । **व्रतस्य** अनुष्ठीयमानस्य कर्मणोऽन्यत्सश्चिम[2][3] पूर्वोक्तद्वेषकौटि-ल्याभ्यामतिरिक्तं क्षेमेणानुष्ठानं वयं संपादितवन्तः ।

अनेन मन्त्रेण शत्रुनिराकरणं दर्शयति——

अप द्वेषो अप ह्वर इत्याह भ्रातृव्यापनुत्यै, इति ।
(प्रपा० ५ । अनु० ९ । विभा० १९)

---

१ ग. शर्मशब्देन । २ ग सश्चिमः । ३ ग 'श्चिम. पू° ।

कल्पः—"घर्मैतत्तेऽन्नमेतत्पुरीषमिति दध्ना मधुमिश्रेण पूरयति" इति । पाठस्तु—

घर्मैतत्तेऽन्नमेतत्पुरीषम् । तेन वर्धस्व चाऽऽ च प्यायस्व । वर्धिषीमहि च वयम् । आ च प्यासिषीमहि (४), इति ।

हे घर्मैतन्मधुमिश्रं दधि ते तवान्नम् । एतच्च पुरीषं संपूर्णम् । तेन मधुमिश्रेण दध्ना त्वं वर्धस्वाऽऽप्यायस्व च । अभिवृद्धिः स्वरूपबाहुल्यम् । आप्यायनं मैनसः पारितोषः । त्वत्प्रसादाद्वयमपि वृद्धिमाप्यायनं च प्राप्नवाम ।

एतन्मन्त्रसाध्यं पूरणं विधत्ते—

घर्मैतत्तेऽन्नमेतत्पुरीषमिति दध्ना मधुमिश्रेण पूरयति । ऊर्ग्वा अन्नाद्यं दधि । ऊर्जैवैनमन्नाद्येन समर्धयति (७), इति ।

(प्रपा० ९ । अनु० ९ । विभा० २०)

ऊर्क्शब्देन स्वादुत्वमुच्यते । अन्नाद्यशब्देनोदरपूर्तिहेतुत्वम् ।

वेदनं प्रशंसति—

अनशनायुको भवति । य एवं वेद इति, ।

(प्रपा० ९ । अनु० ९ । विभा० २१)

अशनेच्छाशीलोऽशनायुको दरिद्रः । अनशनायुकस्तृप्तः ।

कल्पः—"अथैनमुपतिष्ठन्ते रन्तिर्नामासि दिव्यो गन्धर्वः" इति । रन्तिरित्यादयः पारिजानादहीमित्यन्ता बहवो मन्त्राः । तेषु प्रथमं मन्त्रमाह—

रन्तिर्नामासि दिव्यो गन्धर्वः । तस्य ते पद्वद्धविर्धानम् । अग्निरध्यक्षः । रुद्रोऽधिपतिः, इति ।

रन्तिनामको द्युलोकवर्ती यो गन्धर्वोऽस्ति हे प्रवर्ग्य तद्रूपस्त्वमसि । तस्य ते तादृशस्य गन्धर्वरूपस्य तव हविर्धानं पद्वद्धविर्धानाख्यमण्डपाद्विसदृशम् । उत्तरवेद्यां प्राक्शिरस्त्वेनावस्थितस्य तवाधोभागवर्तित्वात् । योऽयमग्निरुत्तरवेदिगतः सोऽयमध्यक्षास्तव स्वामी । योऽयं रुद्रः क्रूरो देवः सोऽयमधिपतिरनिष्टनिवारणेनाधिकपालकः ।

मन्त्राक्षरैः प्रवर्ग्यमहिम्नः स्पष्टप्रतिभानं दर्शयति—

रन्तिर्नामासि दिव्यो गन्धर्व इत्याह । रूपमेवास्यैतन्महिमानꣳ रन्तिं बन्धुतां व्याचष्टे, इति ।

(प्रपा० ९ । अनु० ९ । विभा० २२)

---

१ ग. °ण पात्राणि पू° । २ ग. °वृद्धिस्व° । ३ ग. मानसः । ४ ख. उर्ग्वा । ५ क. ख. अनश° । ६ क. °ष्ठते र° । ७ ग. °ह । पाठस्तु—र° । ८ ग. ते यद्व° । ९ ग. °नं यद्व° । १० ग. °वेर्दि ग° ।

रन्तिर्बन्धुत्वं रमणहेतुत्वात्। मन्त्रस्य यत्स्वरूपमस्ति रन्त्यादिशब्दोपेतमेतदेव प्रवर्ग्यस्य बन्धुत्वलक्षणं महिमानं प्रकाशयति।

द्वितीयं मन्त्रमाह—

समहमायुषा। सं प्राणेन। सं वर्चसा। सं
पयसा। सं गोपत्येन। सꣳ रायस्पोषेण (५), इति।

अहमस्य प्रवर्ग्यस्य प्रसादादायुरादिना रायस्पोषान्तेन फलषट्केन संगतो भूयासम्।

मन्त्रस्याऽऽशीरर्थतां दर्शयति—

समहमायुषा सं प्राणेनेत्याह। आशिषमेवैतामाशास्ते, इति।
(प्रपा० ६। अनु० ९। विभा० २३)

तृतीयं मन्त्रमाह—

व्यसौ। योऽस्मान्द्वेष्टि। य च वयं द्विष्मः, इति।

योऽस्माकं द्वेष्टा यश्चास्माभिर्द्वेष्य उभयविधोऽसौ शत्रुः प्रवर्ग्येण विनाशितः। मन्त्रस्य परविनाशपरत्वेनाभिचाररूपतां दर्शयति—

व्यसौ योऽस्मान्द्वेष्टि यं च वयं द्विष्म इत्याह। अभिचार एवास्यैषः, इति।
(प्रपा० ६। अनु० ९। विभा० २४)

अस्य शत्रोरेष मन्त्रपाठो यजमानेन कृतोऽभिचारः। तेनासौ विनश्यतीत्यर्थः।

चतुर्थं मन्त्रमाह—

अचिक्रदद्वृषा हरिः। महान्मित्रो न
दर्शतः। सꣳ सूर्येण रोचते, इति।

अयं प्रवर्ग्यो वृषा कामानां वर्षयिता हरिः पापस्य हर्ता तादृशः सन्नचिक्रदत्। क्रन्दनमुत्साहेनाऽऽक्रन्दनं कृतवान्। स च प्रवर्ग्यो महान्गुणैरधिकः। मित्रो न मित्र इव दर्शतो दर्शनीयः। तादृशः सूर्येण संभूय रोचते प्रकाशयति।

प्रथमपादे विशेषणयोः प्रसिद्धिं दर्शयति—

अचिक्रदद्वृषा हरिरित्याह। वृषा ह्येषः (८)। वृषा हरिः, इति।
(प्रपा० ६। अनु० ९। विभा० २५)

सोमो वृषत्वं प्रसिद्धं तथा हरित्वमपीति वक्तुं ह्येषेति पुनरुक्तिः।

---

१ क. °तः। परस्पर°। २ ख. °नाऽऽस्क्रन्द्°। ग. °नाऽऽस्फोटनं। ३ ग. वृष इति।

द्वितीयपादस्य स्तुतिपरतां दर्शयति—

महान्मित्रो न दर्शत इत्याह । स्तौत्येवैनमेतत्, इति ।

(प्रपा० ५ अनु० ९ । विभा० २६)

पञ्चमं मन्त्रमाह—

चिदसि समुद्रयोनिः । इन्दुर्दक्षः श्येन ऋतावा । हिरण्यपक्षः शकुनो भुरण्युः । महान्त्सधस्थे ध्रुव आनिषत्तः (६) । नमस्ते अस्तु मा मा हिꣳसीः, इति ।

हे प्रवर्ग्य त्वं चिदादिविशेषणविशिष्टोऽसि । चिदभिज्ञः । **समुद्रयोनिर्यागद्वारा** समुद्रस्यापि कारणभूतः । इन्दुश्चन्द्रवदाह्लादकारी । **दक्ष** उत्साहवान् । **श्येनः** श्येनवद्वेगवान् । **ऋतावा** कर्मफलयुक्तः । **हिरण्यपक्षः**, चित्याग्नावनुष्ठीयमानः सन्सुवर्णसमानपक्षोपेतः । **शकुनः** पक्ष्याकारः । **भुरण्युर्**गगद्गरणसमर्थः । **महान्**गुणैरधिकः । **सधस्थे** कर्मकर्तृभिः सहावस्थानप्रदेशे **ध्रुवः** स्थिरः । **आनिषत्त** आभिमुख्येनोपविष्टः । हे प्रवर्ग्य **ते तुभ्यं नमोऽस्तु मा मा हिंसीः** ।

समुद्रयोनिशब्दस्य तात्पर्यं दर्शयति—

चिदसि समुद्रयोनिरित्याह । स्वामेवैनं योनिं गमयति, इति ।

(प्रपा० ५ । अनु० ९ । विभा० २७)

समुद्रादिकं जगत्कर्मरूपां स्वकीयां **योनिं** प्रापयति । यद्वा समुद्रो योनिर्यस्य प्रवर्ग्यस्येति बहुव्रीहिः । समुद्रसदृशः परमात्मा तस्य कारणम्, ततो मन्त्रपाठेन स्वकीययोनिप्राप्तिः ।

वैकल्यप्रयुक्तहिंसापरिहारार्थतां नमस्कारस्य दर्शयति—

नमस्ते अस्तु मा मा हिꣳसीरित्याहाहिꣳसायै, इति ।

(प्रपा० ५ । अनु० ९ । विभा० २८)

षष्ठं मन्त्रमाह—

विश्वावसुꣳ सोमगन्धर्वम् । आपो दद्दृशुषीः । तद्भतेना व्यायन् । तदन्ववैत् । इन्द्रो रारहाण आसाम् । परि सूर्यस्य परिधीꣳरपश्यत्, इति ।

सोमस्य परिमोषको गन्धर्वः **सोमगन्धर्वः** । स च **विश्वावसु**नामकः । अत एव

---

१ घ. °त्तः(६)॥ २ ग° । २ ग. ऋतवा । ३ क. ख. चित्यग्नाव° । ४ ग. ते नमः । मां ।

सोमप्रकरणे श्रूयते—"तꣳ सोममाहियमाणं गन्धर्वो विश्वावसुः पर्यमुष्णात्" इति। सोमस्यापहर्तारं तं विश्वावसुमापो ददृशुषीः, अब्देवता दृष्टवत्यः। ताश्चाब्देवता ऋतेन यज्ञेन निमित्तेन तत्तदा व्यायन्विशेषेण गन्धर्वसमीपं प्रत्यागच्छन्। इन्द्रो देवस्तदपां गमनमन्ववैदनुक्रमेण ज्ञातवान्। स चेन्द्र आसामपां समीपे रारहाणो भृशं गच्छन्सूर्यस्य परिधीन्परिधिसदृशान्रश्म्यभिमानिनो देवान्पर्यपश्यत्परितो वेष्टयितृनवलोकितवान्। यदा गन्धर्वः सोमं मुष्णाति तदानीमापो दृष्ट्वा तत्र गताः। इन्द्रश्च तदभिज्ञायापां सहायार्थं गन्धर्वमवरोद्धुं सूर्यरश्मीन्प्रेषितवानित्यर्थः।

विश्वावसुवृत्तान्तस्मरणस्य विकलाङ्गसमाधानार्थत्वं दर्शयति—

विश्वावसुꣳ सोमगन्धर्वमित्याह। यदेवास्य क्रियमाणस्यान्तर्यन्ति। तदेवास्यैतेनाऽऽप्याययति, इति।

(प्रपा० ५। अनु० ९। विभा० २९)

अनुष्ठीयमानस्य प्रवर्ग्यस्य यदङ्गमृत्विजोऽन्तार्हितं कुर्वन्ति, तदङ्गमेतेन वृत्तान्तस्मरणेन समृद्धं करोति। गन्धर्वेणाऽऽपादितस्य वैकल्यस्याद्भिरिन्द्रेण च समाहितत्वात्तदनुस्मरणस्य समाधानार्थत्वं युक्तम्।

सप्तमं मन्त्रमाह—

विश्वावसुरभि तन्नो गृणातु। दिव्यो गन्धर्वो रजसो विमानः। यद्वा घा सत्यमुत यन्न विद्म (७)। धियो हिन्वानो धिय इन्नो अव्यात्, इति।

अस्मिन्कर्मणि यद्वा घ यदेव किंचिदङ्गं यथाशास्त्रमनुष्ठितम्, उतापि च यदङ्गं न विद्म वयं विस्मृतवन्तः, तत्सर्वं नोऽस्मभ्यं विश्वावसुर्गृ(रभिगृ)णातु कथयतु। कीदृशः। दिव्यो गन्धर्वः, दिवि भवो गन्धर्वजातिः। अतः सर्वज्ञ इत्यर्थः। रजसो विमानः, रञ्जकस्य गीतस्य विशेषेण निर्माता। धियो हिन्वानः, बुद्धेः प्रीणयिता। स गन्धर्वो नोऽस्मदीया धिय इद्बुद्धीः सर्वा अप्यव्याद्रक्षतु।

पूर्वमन्त्रे यथाऽङ्गवैकल्यसमाधानहेतुत्वं तद्वदस्यापि वैकल्यसमाधानहेतुतां दर्शयति—

विश्वावसुरभि तन्नो गृणात्वित्याह (९)। पूर्वमेवोदितम्। उत्तरेणाभिगृणाति, इति।

(प्रपा० ५। अनु० ९। विभा० ३०)

---

१ क. ख. ता अब्दे°। २ क. °प्रेरित°। ३ ग. °द्वा य स°। ४ ग. °द्वा य य°। ५ ग. °णातु। इ°।

चतुर्थपादे धीरक्षणेनर्तुसमृद्धिर्विवक्षितेति दर्शयति—

धियो हिन्वानो धिय इन्नो ऊव्यादित्याह । ऋतूनेवास्मै कल्पयति, इति ।

(प्रपा० ५ । अनु० ९ । विभा० ३१)

ऋतवो यदा स्वस्वकार्यकरास्तदा प्राणिनां बुद्धयः स्वस्था भवन्ति । अतो धीरक्षणमृतुषु प्रवाहरूपेण प्रवर्तते ।

अष्टममन्त्रमाह —

सन्निमविन्दच्चरणे नदीनाम् । अपावृणोद्दुरो
अश्मव्रजानाम् । प्राऽऽसां गन्धर्वो अमृतानि
वोचत् । इन्द्रो दक्षं परिजानादहीनम् , इति ।

यः पूर्वो गन्धर्वोऽस्ति सोऽयं **नदीनां** गङ्गायमुनादीनां **चरणे** प्रवाहरूपे प्रवर्तके **सन्निमविन्दच्छद्धिं** लब्धवान् । नदीप्रवहणेन पङ्कादिप्रक्षालनाच्छुद्धिं दृष्टवान् । अश्मसु पाषाणेषु व्रजन्ति प्रवहन्तीत्यश्मव्रजा नद्यः । तासां **दुरो** द्वाराण्यपावृणोदपनीतवान् । नदीषु प्रवेष्टुं द्वारस्थानीयास्तीर्थभूता मार्गा अश्मभिर्येऽवरुद्धास्तत्र पाषाणानपनीय नदीः सेवितुं योग्याः कृतवान् । तत **आसां** नदीनाममृतानि शुद्धिकारणानि जलानि स **गन्धर्वः प्रवोचत्**प्राणिनामग्रे कथितवान् । तत **इन्द्रो दक्षं** कुशलं **गन्धर्वमहीनं** क्वापि वैकल्यरहितं **परिजानात्**परितो ज्ञातवान् ।

अत्र जलवाचिनाऽमृतशब्देन मरणरहितानां प्राणानामपि सूचनं दर्शयति—

प्राऽऽसां गन्धर्वो अमृतानि वोचदित्याह । प्राणा
वा अमृताः । प्राणानेवास्मै कल्पयति, इति ।

(प्रपा० ५ । अनु० ९ । विभा० ३२)

अमृतशब्दपाठेन यजमानस्य प्राणान्सुस्थितान्करोति ।

एतत्त्वं देव घर्म देवो देवानुपागाः ।

कल्पः—" एतत्त्वं देव घर्म देवो देवानुपागा इत्यभिमन्त्र्य " इति । हे **घर्म देव त्वं देवो** देवतारूपः सन्नेतदस्माकं प्रत्यक्षं यथा भवति तथा **देवानुपागाः** प्राप्तवानसि ।

अत्र प्रवर्ग्यस्य देवत्वं सर्वदेवप्रापणं च प्रसिद्धमित्येतद्दर्शयति—

एतत्त्वं देव घर्म देवो देवानुपागा इत्याह ।
देवो ह्येष सन्देवानुपैति, इति ।

(प्रपा० ५ । अनु० ९ । विभा० ३३)

---

१ क. स्वका° ।

कल्पः—" इदमहं मनुष्यो मनुष्यानिति प्रदक्षिणमावृत्य " इति । पाठस्तु—

इदमहं मनुष्यो मनुष्यान् । सोमपीथानु मेहि ।
सह प्रजया सह रायस्पोषेण, इति ।

अहं यजमानो **मनुष्यः** सन्निदं प्रत्यक्षं यथा भवति तथा **मनुष्यान्प्राप्नोमीति** शेषः । हे **सोमपीथ** सोमपान [मा] **मामाभिमुख्येनान्विहि** प्राप्नुहि । न केवलं त्वमेव किं तु **प्रजया रायस्पोषेण** च **सह**, तदुभयमपि मां प्राप्नोतु ।

यजमानस्य मनुष्यत्वं मनुष्यप्राप्तिश्च प्रसिद्धेत्येतद्दर्शयति—

इदमहं मनुष्यो मनुष्यानित्याह (१०) ।
मनुष्यो हि । एष सन्मनुष्यानुपैति, इति ।
(प्रपा० ५ । अनु० ९ । विभा० ३४)

सोमपानप्रार्थनायां कारणं दर्शयति—

ईश्वरो वै प्रवर्ग्यमुद्रासयन् । प्रजां पशून्त्सोमपीथ-
मनूद्रासः सोमपीथानु मेहि । सह प्रजया सह राय-
स्पोषेणेत्याह । प्रजामेव पशून्त्सोमपीथमात्मन्धत्ते, इति ।
(प्रपा० ५ । अनु० ९ । विभा० ३५) ।

यः प्रवर्ग्यमुद्रासयति, असौ तदानीं तं **प्रवर्ग्यमनु** स्वकीयां **प्रजां** पुत्रादिकां **पशून्गवादीन्सोमपीथं** कारिष्यमाणं सोमपानं **चोद्रास ईश्वरं** उद्रासयितुं समर्थो भवति । प्रवर्ग्योद्रासनमनु सर्वमिदं नश्यतीत्यर्थः । अतः सोमपीथेत्यादिमन्त्रपाठेन प्रजादिकं स्वात्मनि संपादयति ।

कल्पः—" सुमित्रा न आप ओषधय इति मार्जालीयदेश उच्छिष्टखरे मार्जयित्वा " इति । पाठस्तु—

सुमित्रा न आप ओषधयः सन्तु । दुर्मित्रास्तस्मै
भूयासुः । योऽस्मान्द्वेष्टि । यं च वयं द्विष्मः, इति ।

एता **आपः**, तत्कार्या (र्यभूता) **ओषधयश्च नोऽस्माकं सुमित्राः** सुस्निग्धाः **सन्तु** । **यो** द्वेष्टा यश्च द्वेष्यः, **तस्मा** उभयस्मै **दुर्मित्राः** शत्रवः **सन्तु** ।

प्रथमपादस्याऽऽशीःपरतां दर्शयति—

सुमित्रा न आप ओषधयः सन्त्वित्याह । आशिषमेवैतामाशास्ते, इति ।
(प्रपा० ५ । अनु० ९ । विभा० ३६)

---

१ ग. "ष्यत्वपा° ।

उत्तरभागस्य शत्रुविषयाभिचारत्वं दर्शयति—

दुर्मित्रास्तस्मै भूयासुर्योऽस्मान्द्वेष्टि यं च वयं द्विष्म इत्याह । अभिचार एवास्यैषः, इति ।

(प्रपा० ५ । अनु० ९ । विभा० ३७)

उद्वयं तमसस्परि । उदु त्यं चित्रम् ।

कल्पः—" उद्वयं तमसस्परीत्यादित्यमुपस्थायोदु त्यं चित्रमिति द्वाभ्यां गार्हपत्ये जुहोत्युपतिष्ठत इत्येके" इति । उद्वयमिति मन्त्रः समास्त्वाऽग्न इत्यनुवाके व्याख्यातः । उदु त्यं जातवेदसं चित्रं देवानामिति मन्त्रद्वयमुदु त्यमित्यनुवाके व्याख्यातम् ।

एतन्मन्त्रद्वयसाध्यं होमं विधत्ते—

प्र वा एषोऽस्माल्लोकाच्च्यवते । यः प्रवर्ग्यमुद्वासयति । उदु त्यं चित्रमिति सौरीभ्यामृग्भ्यां पुनरेत्य गार्हपत्ये जुहोति । अयं वै लोको गार्हपत्यः । अस्मिन्नेव लोके प्रतितिष्ठति । असौ खलु वा आदित्यः सुवर्गो लोकः । यत्सौरी भवतः । तेनैव सुवर्गाल्लोकान्नैति(११), इति ।

(प्रपा० ५ । अनु० ९ । विभा० ३८)

प्रवर्ग्यस्योद्वासनेन स्वयमेवास्माल्लोकाद्भ्रष्टो भवति । गार्हपत्यस्यैतल्लोकरूपत्वेन तत्र होमे सति स्वयमस्मिँल्लोके प्रतितिष्ठितो भवति । आदित्यस्य स्वर्गलोकरूपत्वात्सौरमन्त्रेण स्वर्गादपि भ्रंशो न भवति ।

ब्रह्मणस्त्वा पर्स्पाया इत्याह दधात्यन्वित्य रक्षस्वी रक्षसामपहत्यै वै हिरण्यमाहार्धयति ह्येष गृणात्वित्याह मनुष्यानित्याहास्यैषोऽष्टौ च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके पञ्चमप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

कल्पः—"इममू षु त्यमस्मभ्यमित्याहवनीये जुहोत्युपतिष्ठन्त(तः?) इत्येके" इति । पाठस्तु—

इममू षु त्यमस्मभ्यꣳ सनिम् । गायत्रं नवीयाꣳसम् । अग्ने देवेषु प्रवोचः (८), इति ।

याऽऽग्नीध्रे तां त एतेनावयजे स्वाहा घर्मणा शंयुधायाः प्यासिषीमहि पोषेण निषत्तो विश्व सन्त्वष्टौ च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

---

१ ख. °ष्ठन्त इ° । २ ग. इति । ३ ग. °साध्यहो° । ४ ग. °रस्याया । ५ ख.ग. °होतीत्यु° ।

हेऽग्ने देवेषु मध्येऽस्मभ्यं सनिं फलदानं प्रवोचः प्रकर्षेण कथय। न केवलं फलदानं किं तु त्यामिममू षुं तं शास्त्रप्रसिद्धमिममस्माभिरिदानीमनुष्ठितं प्रवर्ग्यमपि सुष्ठु देवेषु क्षेपय(कथय?)। कीदृशं प्रवर्ग्यम्। गायत्रं गायत्र्यादिच्छन्दोयुक्तम्। अत एव पूर्वत्राऽऽम्नातम्— "छन्दोभिर्वा एष क्रियते" इति। नवीयांसमतिशयेन नूतनं सर्वाङ्गसंपूर्णमित्यर्थः।

शाखान्तरे यानि प्रवर्ग्यसामानि तेषामाधारभूता ये मन्त्रास्तान्विधत्ते—

> प्रजापतिं वै देवाः शुक्रं पयोऽदुहन्[3]। तदेभ्यो न व्यभवत्। तदग्निर्व्यकरोत्। तानि शुक्रियाणि सामान्यभवन्। तेषां यो रसोऽत्यक्षरत्। तानि शुक्रयजूंष्यभवन्। शुक्रियाणां वा एतानि शुक्रियाणि। सामपयसं वा एतयोरन्यत्। देवानामन्यत्पयः। यद्गोः पयः (१)। तत्साम्नः पयः। यदजायै पयः। तद्देवानां पयः। तस्माद्यत्रैतैर्यजुर्भिश्चरन्ति। तत्पयसा चरन्ति। प्रजापतिमेव तद्देवान्पयसाऽन्नाद्येन समर्धयन्ति, इति।
>
> (प्रपा० ५। अनु० १०। विभा० १)

पुरा कदाचिद्देवाः सर्वे **प्रजापतिं** कामधेनुं कृत्वा **शुक्रं पयः** प्रवर्ग्यरूपं क्षीरं दुग्धवन्तः। **तदेकमेव** भूत्वा देवेभ्यो **न व्यभवत्,** बहूनां देवानामर्थे विविधं नाभूत्। अतः सर्वेषां भोगाय न पर्याप्तम्। तदानीमग्निस्तदेकं पयो विविधमकरोत्। **तानि** विविधानि पयांसि **शुक्रियाणि** प्रवर्ग्यसंबन्धीनि **सामान्यभवन्**। **तेषां** च पयोरूपाणां साम्नां यो **रसोऽत्यक्षरत्तेभ्योऽस्रवत्, तानि** सामभ्यः स्रुतानि साराणि **शुक्रयजूंषि** प्रवर्ग्यसंबन्धिनो मन्त्रा आसन्। **शुक्रियाणां** प्रवर्ग्यसंबन्धिनां साम्नां संबन्धीनि प्रवर्ग्ययोग्यान्येतानि यजूंषि। इत्थं प्रवर्ग्याङ्गमन्त्रोत्पत्तिरुक्ता, अथ द्रव्यमुच्यते—**एतयोर्वक्ष्यमाणयोर्द्वयोः** पयसोर्मध्येऽन्यदेकं **सामपयसं** साम्नां प्रियं क्षीरम्। **अन्यद्देवानां** प्रियम्। तदुभयं विभज्य प्रदर्श्यते— तत्र गव्यं सामदेवतायाः प्रियम्। अजाक्षीरं देवानां प्रियम्। यस्मादेवं मन्त्रोत्पत्तिः क्षीरद्वयं चैतादृशं **तस्माद्यत्र** कर्मण्येतैर्यजुर्भिः प्रवर्ग्यमन्त्रैश्चरन्त्यनुतिष्ठन्ति, **तत्तत्र** कर्माणि द्विविधेन **पयसा चरन्ति**। शुक्रियमन्त्रैः क्षीरद्वयं जुहुयादिति मन्त्रद्रव्यविशिष्टकर्मविधिरयं द्रष्टव्यः। तेन कर्मणा **प्रजापतिं देवांश्चान्नसमृद्धान्कुर्वन्ति**।

तदेतदनं प्रशंसति—

> एष ह त्वै साक्षात्प्रवर्ग्यं भक्षयति। यस्यैवं

---

१ क. ख. 'षु शं'। २ ग. क्षेपय। ३ ग. 'दुहन्। ४ क. ग. °न्यद्दे°। ५ ख. एतद्देदनं। ग. तत्तद्दे'।

विदुषः प्रवर्ग्यः प्रवृज्यते, इति ।

(प्रपा० ५ । अनु० १० । विभा० २)

एवं विदुषः प्रवर्ग्यमाहात्म्यविदो **यस्य प्रवर्ग्यम(र्ग्यो ऽ)नुष्ठीयते स एष साक्षान्मुख्यं प्रवर्ग्यफलमनुभवति ।**

तस्य प्रवर्ग्यस्य काम्यमुद्वासनदेशं विधत्ते—

उत्तरवेद्यामुद्वासयेत्तेजस्कामस्य । तेजो वा उत्तरवेदिः ।
(२) । तेजः प्रवर्ग्यः । तेजसैव तेजः समर्धयति, इति ।

(प्रपा० ५ । अनु० १० । विभा० ३)

उत्तरवेदेरग्न्याधारत्वात्प्रवर्ग्यहविषश्च तत्स्वरूपत्वादुभयोस्तेजस्त्वम् ।

तमेव देशं फलान्तराय विधत्ते—

उत्तरवेद्यामुद्वासयेदन्नकामस्य । शिरो वा एतद्यज्ञस्य ।
यत्प्रवर्ग्यः । मुखमुत्तरवेदिः । शीर्ष्णैव मुखꣳ
संदधात्यन्नाद्याय । अन्नाद एव भवति, इति ।

(प्रपा० ५ । अनु० १० । विभा० ४)

प्रवर्ग्यस्य शिरोरूपत्वादुत्तरवेदेर्मुखत्वात्तत्रास्योद्वासने सत्यन्नं भोक्तुं शिरसा **मुखस्य संधानं कृतं** भवति । ततोऽयमन्नादो **भवत्येव** ।

उत्तरवेद्यामुद्वासनं प्रशंसति—

यत्र खलु वा एतमुद्वासितं वयाꣳसि पर्यासते । परि वै
ताꣳ समां प्रजा वयाꣳस्यासते (३) । तस्मादुत्तर-
वेद्यामेवोद्वासयेत् । प्रजानां गोपीथाय, इति ।

(प्रपा० ५ । अनु० १० । विभा० ५)

यत्र यस्मिन्संवत्सरे क्वचिद्देशविशेष **उद्वासितमेतं** प्रवर्ग्यं **वयांसि** पक्षिणः **पर्यासते** परित आगत्योपविशन्ति, **तां समां** तं संवत्सरं सर्वमपि पक्षिणः **प्रजाः** पुत्रादी-**न्पर्यासते** पुत्रादिशवदेहेषु[3] प्रविशन्ति, प्रजा म्रियन्त इत्यर्थः । अतस्तेजोऽन्नकामराहित्येऽपि प्रजारक्षणार्थं**मुत्तरवेद्यामेवोद्वासयेत्** ।

तत्रापि देशविशेषं विकल्पितं विधत्ते—

पुरो वा पश्चाद्वोद्वासयेत् । पुरस्ताद्वा एतज्ज्योतिरुदेति ।
तत्पश्चान्निम्रोचति । स्वामेवैनं योनिमनूद्वासयति, इति ।

(प्रपा० ५ । अनु० १० । विभा० ६)

---

१ क. ख एव । २ ग. साधनं ३ ख. °दिदेहे° ।

उत्तरवेदेः पूर्वभागे पश्चिमभागे वा प्रवर्ग्यमुद्वासयेत् । प्रवर्ग्यस्वरूपमिदमादित्य-ज्योतिः पुरस्तादुदेति पश्चादस्तमेति । ततस्तयोरुभयोरपि तदीयस्थानत्वात्स्वकीय-मेव स्थानमनुसृत्योद्वासयति ।

अन्यं देशविशेषं विधत्ते—

अपां मध्य उद्वासयेत् । अपां वा एतन्मध्याज्ज्यो-
तिरजायत । ज्योतिः प्रवर्ग्यः । स्व एवैनं
योनौ प्रतिष्ठापयति (४), इति ।

(प्रपा० ५ । अनु० १० । विभा० ७)

एतदौर्वविद्युत्स्वरूपं ज्योतिरपां मध्यादजायत । प्रवर्ग्यश्च ज्योतिःस्वरूपः । तस्मादेनं प्रवर्ग्यं स्वकीय एव स्थाने प्रतिष्ठापयति ।

देशान्तरं विधत्ते—

यं द्विष्यात् । यत्र स स्यात् । तस्यां दिश्युद्वासयेत् । एष वा अग्निर्वै-
श्वानरः । यत्प्रवर्ग्यः । अग्निनैवैनं वैश्वानरेणाभिप्रवर्तयति, इति ।

(प्रपा० ५ । अनु० १० । विभा० ८)

यजमानो यं पुरुषं द्विष्यात्स द्वेष्यो यस्यां दिशि तिष्ठति तस्यां दिशि प्रवर्ग्य-मुद्वासयेत् । प्रवर्ग्यस्य वैश्वानराग्निरूपत्वादेनं द्वेष्यमभिलक्ष्य वैश्वानराग्निनैव प्रवर्तयति । तेनाग्निना तमभितो दहतीत्यर्थः ।

तत्रैव कंचिद्विशेषं विधत्ते—

औदुम्बर्याः[2] शाखायामुद्वासयेत्[3] । ऊर्वा उदुम्बरः । अन्नं
प्राणः । शुग्घर्मः (५) । इदमहममुष्याऽमुष्या-
यणस्य शुचा प्राणमपिदहामीत्याह । शुचैवास्य
प्राणमपिदहति । ताजगार्तिमार्च्छति, इति ।

(प्रपा० ५ । अनु० १० । विभा० ९)

उदुम्बरवृक्षस्य येयं शाखा तस्यां प्रवर्ग्यमुद्वासयेत् । उदुम्बरस्यान्नरूपत्वात्, अन्नस्य प्राणस्थितिहेतुत्वात्, घर्मस्य च संतापरूपत्वात्, तदनुसारेणोद्वासनकाल इद-मित्यादिमन्त्र पठेत् । अमुष्यायणस्य देवदत्तपुत्रस्यामुष्य यज्ञदत्तस्य प्राणमिदं प्रत्यक्षं यथा भवति तथा शुचा संतापेनापिदहामि सर्वतो दग्धं करोमि । एतन्मन्त्र-पाठेनास्य द्वेष्यस्य प्राण संतापेन दहत्येव । तदानीमेवासावार्तिं प्राप्नोति ।

देशान्तरं विधत्ते—

यत्र दर्भा उपदीकसंतताः स्युः । तदुद्वासयेद्वृष्टिकामस्य । एता

---

१ क. °तदेव वि° । २ क. ग. यक्ष्यमाणो । ३ क. ग. °त् । ऊर्वा

वा अपामनू*ज्झावर्यो नाम । यद्दर्भाः । असौ खलु वा आदित्य इतो वृष्टिमुदीरयति । असावेवास्मा आदित्यो वृष्टिं नियच्छति । ता आपो नियता धन्वना यन्ति (ई), इति ।

(प्रपा० ५ । अनु० १० । विभा० १०)

गोः पय उत्तरवेदिरासते स्थापयति घर्मो यन्ति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके पञ्चमप्रपाठके दशमोऽनुवाकः ॥ १० ॥

यस्मिन्देशे **दर्भा उपदीकसंततः** स्तम्बैरविच्छिन्ना भवन्ति । वृष्टिकामस्तत्रोद्वासयेत् । य एते दर्भा **एता** एवापामनू[1]ज्झावर्य इत्येतन्नामभाजो भवन्ति । अनू[2]ज्झा अनुक्रमगताः प्रवाहाः, तद्युक्ता नद्योऽनूज्झावर्यः । आपो वै दर्भा इति श्रुत्यन्तराद्दर्भाणामविच्छिन्नप्रवाहोपेतनदीरूपत्वम् । प्रवर्ग्यश्चाऽऽदित्यरूपत्वादादित्यवद्वृष्टिप्रदः । अतो दर्भेषु तदुद्वासने सत्यादित्यो द्युलोकाद्वृष्टिं प्रेरयति । **ताश्चाऽऽपो धन्वना** मरुदेशेन सह **नियताः** प्रवर्तन्ते ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये चतुर्थप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

अथ चतुर्थे द्वादशोऽनुवाकः ।

एकादशे प्रवर्ग्योद्वासनमुक्तम् । तत्र महावीरे द्रव्यपूरणावसरे घर्मैतत्तेऽन्नमिति मन्त्रात्पूर्वं त्रयो मन्त्रा अपेक्षिताः, तेऽत्र द्वादशेऽभिधीयन्ते ।

महीनां पयोऽसि विहितं देवत्रा ।

कल्पः—"महीनां पयोऽसीति महावीरे गोपय आनयति" इति । विहितं देवत्रेति मन्त्रशेषः । हे द्रव्य देवत्रा देवनिमित्तं **विहितं** संपादितं **महीनां** गवां **पयोऽसि** ।

ज्योतिर्भा असि वनस्पतीनामोषधीना[5]ꣳ रसः ।

कल्पः—"ज्योतिर्भा असि वनस्पतीनामोषधीना[5]ꣳ रस इति मधु" इति । महावीर आनयतीत्यनुवर्तते । हे मधुद्रव्य **वनस्पतीनामोषधीनां** च रसभूतस्त्वं **ज्योतिर्भा** ज्योतिषा प्रकाशकोऽसि ।

*अत्र ग. पुस्तके मूले टीकायां च 'अनुज्जावर्यः' इति पाठः ।

१ ग. °मनुज्जाव° । २ ग. अनुज्जा । ३ ग. °द्योऽनुज्जाव° । ४ ग. °र्ग्यस्याऽऽदि° । ५ ग. °तिषा प्र° ।

वाजिनं त्वा वाजिनोऽवनयामः । ऊर्ध्वं मनः सुवर्गम् ।
इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठके
द्वादशोऽनुवाकः ॥ १२ ॥

कल्पः—"वाजिनं त्वा वाजिनोऽवनयाम इति दधि" इति । महातीर आनयतीत्यनुवर्तते । ऊर्ध्वं मनः सुवर्गमिति मन्त्रशेषः । ऊर्ध्वमुपरि वर्तमानं मनो मननीयं स्वर्गं प्राप्तुं हे दधिद्रव्य वाजिनमन्नवन्तं त्वां वाजिनोऽन्नवन्तो वयमवनयामो महावीरे प्रक्षिपामः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये चतुर्थप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

अथ चतुर्थे त्रयोदशोऽनुवाकः ।

त्रयोदशमारभ्य प्रायेण धर्मप्रायश्चित्तान्युच्यन्ते । कल्पः—"यदि धर्मः स्कन्देत् । अस्कान्द्यौः पृथिवीमिति द्वाभ्यामभिमन्त्रयते" इति । तत्र प्रथमामाह—

अस्कान्द्यौः पृथिवीम् । अस्कान्नृषभो युवा गाः । स्कन्ने-
मा विश्वा भुवना । स्कन्नो यज्ञः प्रजनयतु, इति ।

द्यौर्द्युलोकाख्यो देवः पृथिवीं देवतां प्रत्यस्कान्स्ववीर्यं स्कन्दितवान् । तथा युवा यौवनोपेत ऋषभो गा बर्ह्याः प्रत्यस्कान्स्वकीयं वीर्यं स्कन्दितवान् । इमा विश्वा भुवनैतानि सर्वाणि भूतजातानि, स्कन्ना स्कन्नवीर्यरूपाणि । अतोऽत्रापि स्कन्नो द्रव्यस्कन्दनयुक्तो यज्ञः प्रजनयतु प्रजामुत्पादयतु ॥

अथ द्वितीयामाह—

अस्कानजानि प्राजनि । आ स्कन्नाज्जायते वृषा । स्कन्नात्प्रजनिषीमहि, इति ॥
इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठके
त्रयोदशोऽनुवाकः ॥ १३ ॥

अस्कान्द्रव्यं स्कन्नमभूत्, तेनाजनि किंचिदपत्यमुत्पन्नम् । प्राजनि प्रकर्षेणापत्यस्यापत्यमुत्पन्नम् । स्कन्नाद्द्रव्याद्वृषा सेचनसमर्थः पुत्र आजायते । अतो वयं स्कन्नाद्द्रव्यात्प्रजनिषीमहि प्रकर्षेणापत्यमुत्पादयामः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये चतुर्थप्रपाठके त्रयोदशोऽनुवाकः ॥ १३ ॥

१ ब. वस्वन्नो । २ ब. °तु । अ° ।

अथ चतुर्थे चतुर्दशोऽनुवाकः ।

कल्पः—"यदि घर्मेण चरत्सु विद्युदापतेद्या पुरस्ताद्विद्युदापतदित्येतैर्यथालिङ्गं जुहुयात्" इति । पाठस्तु—

या पुरस्ताद्विद्युदापतत् । तां त एतेनावयजे स्वाहा ।
या दक्षिणतः । या पश्चात् । योत्तरतः । योपरिष्टाद्विद्युदापतत् । तां त एतेनावयजे स्वाहा, इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठके चतुर्दशोऽनुवाकः ॥ १४ ॥

या विद्युदशनिरूपा पुरस्तात्पूर्वस्यां दिश्यापतत्पतितवती, तां विद्युतं ते तव संबन्धिनैतेन होमेनावयजे नाशयामि । अत्र त इत्यभिधानाद्घर्मः संबोधनीयः । या दक्षिणत इत्यादिषु त्रिषु विद्युदित्यादिकमनुषञ्जनीयम् । अनुषङ्गद्योतनायैवोत्तमे मन्त्रे पुनः पठ्यते ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये चतुर्थप्रपाठके चतुर्दशोऽनुवाकः ॥ १४ ॥

अथ चतुर्थे पञ्चदशोऽनुवाकः ।

कल्पः—"प्राणाय स्वाहा पूष्णे स्वाहेत्येतावनुवाकौ घर्मप्रायश्चित्तानि" इति । घर्मविषये यद्वैकल्यं तद्वारयितुमनुवाकद्वयहोमः । तत्रैकमनुवाकमाह—

प्राणाय स्वाहा व्यानाय स्वाहाऽपानाय स्वाहा । चक्षुषे स्वाहा श्रोत्राय स्वाहा ।
मनसे स्वाहा वाचे सरस्वत्यै स्वाहा, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्के चतुर्थप्रपाठके पञ्चदशोऽनुवाकः ॥ १५ ॥

वाक्शब्देन वक्तव्यशब्दपात्रत्वशङ्कां वारयितुं देवतावाचकस्य सरस्वतीशब्दस्य प्रयोगः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये चतुर्थप्रपाठके पञ्चदशोऽनुवाकः ॥ १५ ॥

१ ग. °ती, इति तां । २ ग. नाशयाम ।

अथ चतुर्थे षोडशोऽनुवाकः।

अनुवाकान्तरमाह—

पूष्णे स्वाहा पूष्णे शरसे स्वाहा। पूष्णे प्रपथ्याय स्वाहा पूष्णे नरांधिषाय स्वाहा। पूष्णेऽङ्घृणये स्वाहा पूष्णे नरुणाय स्वाहा। पूष्णे साकेताय स्वाहा, इति॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठके षोडशोऽनुवाकः॥ १६॥

पोषको देवः **पूषा**। स एव विशेषणभेदाद्भिद्यते। **शरसे** शत्रूणां हिंसकाय। **प्रपथ्याय** प्रकृष्टस्वर्गमार्गाहिताय। नरान्मनुष्यान्धिनोति प्रीणयतीति **नरांधिषः**, तस्मै। **अङ्घृणि**रञ्जनेन दीप्यमानः, तस्मै। नृ नय इति धातोर्नरुणशब्दः। प्राणिनां स्वस्वमार्गेषु नेता **नरुणः**, तस्मै। आ समन्ताज्ज्ञानमाकेतस्तेन सह वर्तत इति **साकेतः**, तस्मै॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये चतुर्थप्रपाठके षोडशोऽनुवाकः॥ १६॥

अथ चतुर्थे सप्तदशोऽनुवाकः।

कल्पः—"घर्मेष्टकामुपदधात्युदस्य शुष्माद्भानुरित्यनुवाकेन" इति। एतच्च महाग्निचयने द्रष्टव्यम्। तथा च तत्र सूत्रकारेणोक्तम्—"घर्मेष्टकामुपधाय कुलायिनी तयोः प्रयोगे मन्त्रौ" इति। पाठस्तु—

* उदस्य शुष्माद्भानुर्नाऽऽर्त बिभर्ति। भारं पृथिवी न भूमं। प्र शुक्रैतु देवी मनीषा। अस्मत्सुतष्टो रथो न वाजी। अर्चन्त एके महि साम मन्वत। तेन सूर्यमधारयन्। तेन सूर्यमरोचयन्। घर्मः शिरस्तदयमाग्निः। पुरीषमसि सं

* उदस्येत्यादिभूमेत्यन्तस्य वाक्यस्यार्थं ऋग्वेदभाष्येऽप्युक्तं तत्र यथा—"अस्य यज्ञस्य शुष्माद्बलाद्भानुः सूर्य उदार्तोच्छ्रयति। भूम भूतानि पृथिवीव भारं लोकस्यायं यज्ञो बिभर्ति च" इति। तत्र प्रकरणानुरोधेन यज्ञप्रशंसाऽत्र त्वग्निप्रशंसेति विशेषः।

प्रियं प्रजया पशुभिर्भुवत् । प्रजापतिस्त्वा सादयतु ।
तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठके सप्तदशोऽनुवाकः ॥ १७ ॥

भानुः सूर्योऽस्याग्नेः शुष्मादबलादुदेति । उच्छब्देनाऽऽकाङ्क्षितत्वादेतीत्यध्याहर्तव्यः । स च भानुर्नाऽऽर्त । आर्तिं *न प्राप्तः । पुनः पुनरुदयं गच्छतोऽप्यग्निबलसाहाय्यादार्तिस्तस्य न विद्यते । पृथिवी न भूमिरिव भूमिप्रथातं(?) भारं बिभर्ति । यथा पृथिवी प्राणिनां भारं सहते तथाऽयं राशिमभारं सहते । तस्याग्नेः प्रसादाच्छुक्रा निर्मला मनीषा देवी कर्मणि मनः प्रेरयन्ती देवता प्रकर्षेणैतु प्राप्नोतु । किंनिमित्तमित्येतदुच्यते । अस्मत् । निमित्तार्थे पञ्चमी, अस्माननुग्रहीतुमित्यर्थः । बुद्धिप्राप्तौ दृष्टान्तः । सुतष्टो वर्धकिना सुष्ठुतक्षणेन निष्पादितो वाजी वेगवान्रथो न रथ इव । एके महात्मानस्तमग्निमर्चन्तो महि पूजार्हं साम सर्वेषु समं मन्वत मनसि निश्चितवन्तः । तेनाग्नितेजसा सूर्यमधारयन्पोषितवन्तः । "उद्यन्तं वावाऽऽदित्यमग्निरनु समारोहति" इति श्रुतम् । तेनाग्नितेजसा सूर्यमरोचयन्दीप्तियुक्तमकुर्वन् । घर्मः शिरो यदिदं प्रवर्ग्यरूपं यज्ञस्य शिरोऽस्ति, तदयं चीयमानोऽग्निरेव । अतो हेऽग्ने त्वं पुरीषमिष्टकोपादानमृत्स्वरूपमसि । तच्च स्वरूपं प्रजया पशुभिः समेत्य प्रियं भुवत् । यजमानानां प्रियं भवति । तथाविधाग्निरूपे हे घर्मेष्टके प्रजापतिस्त्वामत्र क्षेत्रे सादयतु स्थापयतु । अङ्गिरस्वदङ्गिरोभिरिव तया प्रजापतिदेवतयोपाहिता सती ध्रुवा सीद स्थिरा भूत्वा तिष्ठ ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये चतुर्थप्रपाठके सप्तदशोऽनुवाकः ॥ १७ ॥

अथ चतुर्थेऽष्टादशोऽनुवाकः ।

कल्पः—"कुलायिनीं यास्ते अग्न आर्द्रा योनय इत्यनुवाकेन" इति । उपदधातीत्यनुवर्तते । पाठस्तु—

यास्ते अग्न आर्द्रा योनयो याः कुलायिनीः ।

---

* एतदादिदेवीत्यन्तो ग्रन्थः क. ख पुस्तकयोस्त्रुटितः ।

---

१ क. ख. ह्रुदे प्रा° ।

ये ते अग्न इन्दवो या उ नाभयः। यास्ते अग्ने तनुव ऊर्जो नाम। ताभिस्त्वमुभयीभिः संविदानः। प्रजाभिरग्ने द्रविणेह सीद। प्रजापतिस्त्वा सादयतु। तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद इति॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठकेऽष्टादशोऽनुवाकः॥ १८॥

हेऽग्ने ते त्वदीया आर्द्रा योनयोऽश्वत्थवृक्षादिरूपा आर्द्राः कारणविशेषाः सन्ति। "अश्वत्थाद्धव्यवाहाद्धि जातामग्नेस्तनुं यज्ञियाꣳ संभरामि" इति श्रुतेः। याश्च कुलालाग्निगार्हपत्याहवनीयादिस्थानविशेषाः सन्ति। हेऽग्ने ते त्वदीया इन्दवश्चन्द्रप्रभृतयः स्थानविशेषा ये सन्ति। या उर्णुना (उ ना)भयो याश्चोर्णुना(याश्च ना)भ्यादिस्थानविशेषाः सन्ति। हेऽग्ने ते त्वदीया याश्चान्यास्तनुव ऊर्जो नामौषध्यादिपाचकत्वेनोर्ज्जामधारिण्यः सन्ति। ताभिः सर्वाभिर्युक्तस्त्वमुभयीभिर्देवीभिर्मानुषीभिश्च प्रजाभिः संविदान ऐकमत्यं गतस्त्वमिह क्षेत्रे द्रविणास्माकं धननिमित्तं हेऽग्ने सीद तिष्ठ। प्रजापतिरित्यादि पूर्ववत्॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये चतुर्थप्रपाठकेऽष्टादशोऽनुवाकः॥ १८॥

अथ चतुर्थ एकोनविंशोऽनुवाकः।

कल्पः—"अध्वर्युराग्निमभिमृशत्यग्निरसि वैश्वानरोऽसीत्यनुवाकेन" इति। पाठस्तु—

अग्निरसि वैश्वानरोऽसि। संवत्सरोऽसि। परिवत्सरोऽसि। इदावत्सरोऽसीदुवत्सरोऽसि। इद्वत्सरोऽसि वत्सरोऽसि। तस्य ते वसन्तः शिरः। ग्रीष्मो दक्षिणः पक्षः। वर्षाः पुच्छम्। शरदुत्तरः पक्षः। हेमन्तो मध्यम्। पूर्वपक्षाश्चितयः। अपरपक्षाः पुरीषम्। अहोरात्राणीष्टकाः। तस्य ते मासाश्चार्धमासाश्च कल्पन्ताम्। ऋतवस्ते

---

१ ग उर्णुना°। २ क, ख. °न्ति। हेऽ°। ३ क. ख °ग्ने त इ°। ४ क. ख. °न्दवो याश्चान्या°। ५ क. ख °लाः। ऐडिकया चित्याऽध्व°।

कल्पन्ताम् । संवत्सरस्ते कल्पताम् । अहोरात्राणि ते कल्पन्ताम् । एति प्रेति वीति समित्युदिति । प्रजापतिस्त्वा सादयतु । तया देवतयाऽङ्गिरस्वद्ध्रुवः सीद, इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठक एकोनविंशोऽनुवाकः ॥ १९ ॥

इष्टकाभिर्निष्पन्न हे देव त्वमग्निरसि । अङ्गारैर्विनेष्टकाशरीरमात्रेणैवाग्नित्वम् । वैश्वानरो विश्वेषां नराणामुपकारकोऽसि । प्रभवादीनामेकैकपञ्चके वर्तमानाः शब्दाः संवत्सरादयः । सर्वेष्वनुगतो वत्सरः । त्वमेवं षड्विधोऽसि । तस्य तथाविधस्य त ऊर्जरूपस्य वसन्ताद्यृतवः शिरआद्यवयवाः । चैत्रादिमासेषु ये शुक्लपक्षास्ते चितिरूपाः । ये च कृष्णपक्षास्ते पुरीषरूपाः । यान्यहोरात्राणि तानीष्टकारूपाणि । तस्य ते तादृशस्य तव मासादयः स्वस्वकार्यक्षमा भवन्तु । इतिशब्दशिरस्का आप्रविसमुद उपसर्गा अत्र निर्दिष्टाः । तैरुचितक्रियां संयोज्याग्निः स्तोतव्य इति तात्पर्यार्थः । उचितक्रियाणां च बहूनां संभवान्महती स्तुतिः संपद्यते । प्रजापतिरित्यादि पूर्ववत् । अग्निविशेषणत्वाद्ध्रुव इति (पुं)लिङ्गनिर्देशः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये चतुर्थप्रपाठक एकोनविंशोऽनुवाकः ॥ १९ ॥

अथ चतुर्थे विंशोऽनुवाकः ।

भूर्भुवः सुवः ।

[कल्पः—]"भूर्भुवः सुवः, इति सर्वप्रायश्चित्तानि" इति । त्रयो लोकाः सुखप्रदा भवन्त्विति मन्त्रत्रयस्यार्थः ।

कल्पः—"यदि महावीरः पच्येतोर्ध्व ऊ षु ण ऊतय इति द्वाभ्यामुच्छ्रयेत्" इति । पाठस्तु—

ऊर्ध्व ऊ षु ण ऊतये । ऊर्ध्वो नः पाह्यंहसः, इति ।

एतच्च मन्त्रयोः प्रतीकद्वयम् । तौ च मन्त्रावञ्जन्ति त्वामध्वरे देवयन्त इत्यनुवाके व्याख्यातौ ।

---

१ ग. °ज्याग्निहोत्रं स्तोतव्यमिति । २ ख. °ति । ऊँ° ।

कल्पः—"यदि भिद्येत विधुं दद्राणमिति संदध्यात्" इति । पाठस्तु—

विधुं दद्राणꣳ समने बहूनाम् । युवानꣳ सन्तं
पलितो जगार । देवस्य पश्य काव्यं महि-
त्वाऽद्या ममार । स ह्यः समान, इति ।

बहूनां कर्मणां **समने** समीचीनचेष्टारूपेऽनुष्ठाने **दद्राणं** भूयः प्रवर्तमानं **विधुमनु**ष्ठानस्य विधातारं महावीरं **युवानं** यौवनोपेतपुरुषवद्दृढमेव **सन्तं पलितो** वयोहीनसदृशः शैथिल्यविशेषो **जगार** निगीर्णवान् । **देवस्य** जगद्विधातुः परमेश्वरस्य **काव्यं**मभिज्ञानरूपं **महित्वा** महिमानं **पश्य** हे जनसमूहावलोकय । किं तन्माहात्म्यमिति तदुच्यते । **स** महावीरो **ह्यः** पूर्वेद्युः **समान** सम्यक्चेष्टितवान् । **अद्या**स्मिन्दिने **ममार** भग्नोऽभूत्, ईदृशं खल्वीश्वरस्य माहात्म्यम् ।

कल्पः—"ततो यानि दृढार्थे संश्लेषणानि स्युस्तैरेनमभिसंदध्यात्, यदन्यन्मासान्मोषेभ्यश्च । यद्दते चिदभिश्रिष इति । भिन्नं महावीरं विधुं दद्राणमिति मन्त्रेण संधाय यद्दते चिदिति मन्त्रेण संश्लेषणसाधनैरुपलिम्पेत्" [इति] । पाठस्तु—

यद्दते चिदभिश्रिषः । पुरा जत्रुभ्य आतृदः । संधाता संधिं
मघवा पुरोवसुः (१) । निष्कर्ता विहृतं पुनः, इति ।

यन्महावीरस्वरूपं जत्रुभ्यः पुरा कपालैर्जरणेभ्यः कपालानां चूर्णीभावेभ्यः पूर्वम**भिश्रिष** ऋतेऽभितः संश्लेषणसाधनानि द्रव्याणि विनाऽऽतृदस्तर्दनं भङ्गं प्राप्नोत् । तस्य **महावीरस्य मघवेन्द्रः संधिं** संधानं [**संधाता**] करिष्यति । कीदृशो मघवा । **पुरोवसुः** पुरतोऽवस्थितानि वसूनि संश्लेषणसाधनानि द्रव्याणि यस्यासौ पुरोवसुः । इत्थं स इन्द्रो **विहृ(हरु)तं** विशेषेण भग्नं महावीरं **पुनर्निष्कर्ता** पुनरपि संपादयिष्यति ।

पुनरूर्जा सह रय्या ।

कल्पः—"यदि घर्ममतिपरीयुर्न वा प्रतिपरीयुः पुनरूर्जा सह रय्येत्येताभ्यामेनं प्रतिपरीयुः" इति । त्रिः परिषिञ्चन्पर्येतीति यदुक्तं तत्राधिकपर्यावर्तने, त्रिः पुनः [प्रति]परियन्तीति विपरीतावर्तनं यदुक्तं तदकरणेऽप्येतत्प्रायश्चित्तम् । तत्र मन्त्रेणोदितं

---

१ ग. संदृह्यात् इ° । २ ग. °मेवं स° । ३ ग. °सदृह्यात्, । ४ क. °म्येत । पा° । ५ ग. विहृतं । ६ क. ख. °लक्षर° । ७ क. ख. °नां भूतिभावस्य पू° । ८ ग. मन्त्रयोर्यादृ° ।

प्रतीकद्वयम्। पुनरूर्जा निवर्तस्वेत्येको मन्त्रः, सह रय्या निवर्तस्वेत्यपरो मन्त्रः। एतावुभावपि भूमिर्भूम्नेत्यत्र व्याख्यातौ।

कल्पः— "मा नो घर्म व्यथित इत्यष्टौ घर्मे व्यथिते प्रायश्चित्तानि" इति। घर्मस्याऽऽज्यपयोरूपद्रव्यस्य व्यथनं (ने) चलनं (ने) संतापाधिक्येन पात्रस्योपर्युद्गमने सत्येतत्प्रायश्चित्तम्। तत्र प्रथममृचमाह—

मा नो घर्म व्यथितो विव्यथो नः। मा नः
परमधरं मा रजोऽनैः। मोष्वस्माꣳस्तमस्यन्त-
राधाः। मा रुद्रियासो अभिगुर्वृधानाः, इति।

नोऽस्मदीय हे घर्म हविर्द्रव्य त्वं **व्यथितश्चलितो** भूत्वा **नोऽस्मान्मा विव्यथः** स्वस्थानान्मा विचालय। **नोऽस्माकं परमुत्कृष्टं** कर्माधरं निकृष्टं **मा** कुरु। **रजो माऽनैः,** अस्मान्रजोगुणं मा प्रापय। तथा **तमस्यन्तस्तमोगुणमध्येऽस्मान्सुष्ठु माऽऽधाः,** मा स्थापय। **वृधानो** वर्धमाना उद्दान्ता **रुद्रियासो** रुद्रसंबन्धिनः क्रूरदेवा **माऽभिगुर्,** अस्मिन्कर्मण्याभिमुख्येन माऽऽगच्छन्तु।

अथ द्वितीयामाह—

मा नः क्रतुभिर्हीडितेभिरस्मान्। द्विषा सुनीते मा
परादाः। मा नो रुद्रो निर्ऋतिर्मा नो अस्ता।
मा द्यावापृथिवी हीडिषाताम् (२), इति।

हे घर्म हीडितेभिरपराधयुक्तैर्नोऽस्मदीयैः क्रतुभिः कुपितस्त्वमस्मान्यजमानान्**द्विषा** द्वेषेण **सुनीते** सुष्ठु संपादिते फले **मा परादा** निराकरणं मा कुरु। एतावन्तं कालं महता क्लेशेन संपादितं कर्मफलमीषदपराधद्वेषेण मा विनाशयेत्यर्थः। तथा **रुद्रः** क्रूरो देवो **नोऽस्मान्माऽस्ता** मैवास्यतु, मा निराकरोतु। **निर्ऋतिरपि** राक्षसदेवता **नोऽस्मान्माऽस्ता** माऽस्यतु, मा निराकरोतु। **द्यावापृथिव्यावपि** देवते **मा हीडिषातामस्मद्विषये** क्रोधं मा कुरुताम्।

अथ तृतीयामाह—

उप नो मित्रावरुणाविहावतम्। अन्वादीध्याथा-
मिह नः सखाया। आदित्यानां प्रसितिर्हेतिः।

---

१ ग °नैः। मा स्वस्मा°। २ क. उद्गशो। ३ क. ख. °गुः, माऽस्मिन्कर्मण्यागच्छेरन्त. मागच्छ°।

उग्रा शतापाष्ठा घ विषा परि णो वृणक्तु, इति ।

हे **मित्रावरुणौ** नोऽस्मान्धर्मापराधरहितानिह कर्मणि, **उपावतमुपेत्य** रक्षतम् । हे **सखाया** सखिवदत्यन्तस्निग्धौ युवामिह कर्मणि **नोऽस्मानन्वादीध्याथामनुक्रमेण** सर्वतो दीप्तान्कुरुतम् । **आदित्यानां** संबन्धिनी **हेतिः** पापिषु हिंसाकरणमायुधं **नोऽस्मान्परिवृणक्तु** सर्वतो वर्जयतु । कीदृशी हेतिः । **प्रसितिः** प्रकृष्टबन्धा। **उग्रा** तीक्ष्णाघाता । **शतापाष्ठा** बहुस्पर्शा, बहुभिरवयवैः प्रहर्तुं समर्थेत्यर्थः । **विषा** व्यापिनी । घशब्दो यथोक्तविशेषणसमुच्चयार्थः ।

चतुर्थादीनामष्टमान्तानां पञ्चानां प्रतीकानि दर्शयति—

इमं मे वरुण तत्त्वा यामि । त्वं नो अग्ने
स त्वं नो अग्ने । त्वमग्ने अयासि, [इति] ।

तत्राऽऽद्यं मन्त्रद्वयमिन्द्रं वो विश्वतस्परीन्द्रं नर इत्यत्र व्याख्यातम् । अनन्तरं तु मन्त्रद्वयमायुष्ट आयुर्दा अग्न इत्यत्र व्याख्यातम् । अन्तिमो जुष्टो दमूना इत्यत्र व्याख्यातः ।

उद्वयं तमसस्परि । उदु त्यं
चित्रम् । वयः सुपर्णाः (३) ।
पुरोवसुर्हविषाऽग्ने सुपर्णाः ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठके
विंशोऽनुवाकः ॥ २० ॥

कल्पः—"यदि घर्मेण चरेत्स्वादित्योऽस्तमियादपरस्यां द्वारि दर्भेण हिरण्यं प्रबध्योद्वयं तमसस्परीत्यादित्यमुपस्थायोदुत्यं चित्रमिति द्वाभ्यां गार्हपत्ये हुत्वा प्रवृज्य श्वोभूते वयः सुपर्णा इत्यादित्यमुपतिष्ठन्ते" इति । चतसृणामेतासामत्र प्रतीकान्यान्नातानि । उद्वयमिति मन्त्रः समास्त्वाऽग्न इत्यनुवाके व्याख्यातः । उदु त्यं चित्रमिति द्वयमुदु त्यं जातवेदस इत्यनुवाके व्याख्यातम् । वयः सुपर्णा इति व्याख्यास्यते ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये चतुर्थप्रपाठके विंशोऽनुवाकः ॥ २० ॥

---

१ ग. °ष्ठाऽद्य वि° । २ ग. °साहार° । ३ क. ख. °बन्धना । उ° । ४ ग. अद्यशब्दो । ५ ग. चरंस्त्वादि° । ६ ग. °रीत्युप° । ७ ख. ग. °ष्ठन्त इ° । ८ ग. °ति मन्त्रः स ईं पाहीत्यनुवाके व्याख्यातः । इ° ।

अथ चतुर्थ एकविंशोऽनुवाकः[१]।

कल्पः—"दधिघर्मं भक्षयन्ति भूर्भुवः सुवरित्यनुवाकेन" इति। पाठस्तु—

भूर्भुवः सुवः। मयि त्यदिन्द्रियं महत्। मयि दक्षो मयि क्रतुः। मयि धायि सुवीर्यम्। त्रिशुग्घर्मो विभातु मे। आकूत्या मनसा सह। विराजा ज्योतिषा सह। यज्ञेन पयसा सह। ब्रह्मणा तेजसा सह। क्षत्रेण यशसा सह। सत्येन तपसा सह। तस्य दोहमशीमहि। तस्य सुम्नमशीमहि। तस्य भक्षमशीमहि। तस्य त इन्द्रेण पीतस्य मधुमतः। उपहूतस्योपहूतो भक्षयामि (१), इति।

* **इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठके एकविंशोऽनुवाकः॥ २१॥**

भूरादिलोकदेवता अनुगृह्णन्त्विति शेषः। त्यत्प्रसिद्धं **महदिन्द्रियसामर्थ्यं मयि धायि** धीयतां स्थाप्यताम्। तथा **दक्ष** उत्साहः **क्रतुरनुष्ठानं सुवीर्यं** सर्वेषु कार्येषु शोभनं सामर्थ्यं तत्सर्वं **मयि** स्थाप्यताम्। **त्रिशुगग्निविद्युदात्मना** त्रेधाभिन्नदीप्तिर्**घर्मो** मदर्थमाकूत्यादिभिः **सह विभातु** विविधं दीप्यताम्। **आकूतिः** संकल्पः। **मनः** संकल्पसाधनम्। **विराडन्नम्**। **ज्योतिस्तेजः**। **यज्ञः** क्रतुः। **पयः** क्षीरम्। **ब्रह्म** ब्राह्मणजातिः। **तेजः** शरीरकान्तिः। **क्षत्रं** क्षत्रियजातिः। **यशः** कीर्तिः। **सत्यम**नृतवर्जितम्। **तपः** कृच्छ्रचान्द्रायणादिकम्। **तस्य** तैराकूत्यादिभिर्युक्तस्य घर्मस्य **दोहं** वृष्ट्यादिसमृद्धिं वयमशीमहि। **तस्य सुम्नं** तन्निमित्तं सुखं **चाशीमहि**। **तस्य** प्रवर्ग्यस्य प्रसादाद्भक्षं **चाशीमहि** व्याप्नुयाम। हे घर्म **तस्य** तादृशस्य **ते** तव **रसमु**पहूतोऽनुज्ञातोऽहं भक्षयामि। कीदृशस्य तव। **इन्द्रेण** प्रथमं **पीतस्य**। **मधुमतो** माधुर्ययुक्तस्य। **उपहूतस्या**नुज्ञातस्य॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये चतुर्थप्रपाठक एकविंशोऽनुवाकः॥ २१॥

---

* अस्मात्प्राग्. पुस्तके 'यशसा सह षट् च' इति प्रतीकग्रहणं वर्तते।

---

१ ग. °कः। यदि घ°।

अथ चतुर्थे द्वाविंशोऽनुवाकः ।

कल्पः—" व्याख्याता घोरास्तन्वोऽरण्येऽनुवाक्यो गण उत्तरौ चानुवाकौ " इति । घोरतनूनां प्रतिपादकौ द्वावनुवाकौ, तत्रोक्तास्तन्व आधानप्रतिपादके सूत्रे व्याख्याताः । अरण्येऽनुवाक्या भवन्तीति हि तत्र सूत्रेऽभिहितम् । तथा द्वयोरनुवाकयोर्मध्यगत उक्तः, स च विकल्पितः । तस्य विनियोगो राजसूयप्रकरणे सूत्रकारेणाभिहितः—" मारुतमेकविंशतिकपालं निर्वपति वैश्वदेवीमामिक्षां तस्यारण्येऽनुवाक्यैर्गणैः कपालानुपदधाति " इति । ब्राह्मणं चाऽऽम्नातम्—" योऽरण्येऽनुवाक्यो गणस्तं मध्यत उपदधाति " इति । तत्र घोरतनुप्रतिपादकं प्रथममनुवाकमाह—

यास्ते अग्ने घोरास्तनुवः । क्षुच्च तृष्णा च । अस्नुक्चा-
नाहुतिश्च । अशनया च पिपासा च । सेदिश्चा-
मतिश्च । एतास्ते अग्ने घोरास्तनुवः । ताभिरमुं गच्छ ।
योऽस्मान्द्वेष्टि । यं च वयं द्विष्मः, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठके
द्वाविंशोऽनुवाकः ॥ २२ ॥

हेऽग्ने ते तव संबन्धिन्यो घोरा अत्युग्रास्तनुवो याः सन्ति । कास्ता इति चेत् । क्षुदादिभिरमत्यन्तैरेष्टाभिः शब्दैः प्रतिपादिताः । हेऽग्ने ते तव संबन्धिन्य एता उक्ता [घोरा] स्तनुवः, ताभिस्तनुभिः सह योऽस्माकं द्वेष्टा यश्च द्वेष्योऽमुं द्विविधं पुरुषं गच्छ ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये चतुर्थप्रपाठके द्वाविंशोऽनुवाकः ॥ २२ ॥

अथ चतुर्थे त्रयोविंशोऽनुवाकः ।

अथ घोरतनुप्रतिपादकं द्वितीयमनुवाकमाह—

स्निक्च स्नीहितिश्च स्निहितिश्च । उष्णा च शीता च । उग्रा च
भीमा च । सदान्नी सेदिरनिरा । एतास्ते अग्ने घोरास्तनुवः ।

१ ख. °वाक्यो भ° । २ ख. ग. °तनप्र° ।

ताभिरमुं गच्छ । योऽस्मान्द्वेष्टि । यं च वयं द्विष्मः, इति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठके त्रयोविंशोऽनुवाकः ॥ २३ ॥

स्निग्धादीन्यनिरान्तानि तनुनामानि । अन्यत्पूर्ववत् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये चतुर्थप्रपाठके त्रयोविंशोऽनुवाकः ॥ २३ ॥

अथ चतुर्थे चतुर्विंशोऽनुवाकः ।

मरुद्गणप्रतिपादकं प्रथममनुवाकमाह—

धुनिश्च ध्वान्तश्च ध्वनश्च ध्वनयश्च ।
निलिम्पश्च विलिम्पश्च विक्षिपः, इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठके चतुर्विंशोऽनुवाकः ॥ २४ ॥

धुन्यादीनि सप्त पदानि गणगतानां मरुद्विशेषाणां नामधेयानि । एतद्रूपेण कपालान्यवतिष्ठन्त[1] इत्यर्थः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये चतुर्थप्रपाठके चतुर्विंशोऽनुवाकः ॥ २४ ॥

अथ चतुर्थे पञ्चविंशोऽनुवाकः ।

मरुद्गणप्रतिपादकमनुवाकान्तरमाह—

उग्रश्च धुनिश्च ध्वान्तश्च ध्वनश्च ध्वनयश्च । सहसह्वाश्च सहमानश्च सहस्वाश्च सहीयाश्च । एत्य प्रेत्य विक्षिपः, इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठके पञ्चविंशोऽनुवाकः ॥ २५ ॥

---

१ ग. °तिष्ठामीत्य° ।

उग्रादीनि सहमानान्तानि सप्त पदानि गणगतानां मरुद्विशेषाणां नामधेयानि । सह-स्वादीनि विक्षिप इत्यन्तानि षण्णा(पञ्चना?)मानि विकल्पितानि । अनुवाकद्वयोक्तं गणद्वयं कपालोपधाने विकल्पितम् । उत्तरगणे च नामषट्कं पुनर्विकल्पितम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये चतुर्थप्रपाठके पञ्चविंशोऽनुवाकः ॥ २५ ॥

अथ चतुर्थे षड्विंशोऽनुवाकः ।

कल्पः—"यदि घर्मदुघं वा महावीरं वा स्तेनोऽपहरेद्गार्हपत्ये स्रुवाहुतिं जुहुयात्, अहोरात्रे त्वोदीरयतामिति" [इति] । पाठस्तु—

अहोरात्रे त्वोदीरयताम् । अर्धमासास्त्वोदीं जयन्तु । मासास्त्वा श्रपयन्तु । ऋतवस्त्वा पचन्तु । संवत्सरस्त्वा हन्त्वसौ, इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठके षड्विंशोऽनुवाकः ॥ २६ ॥

चोरस्य नामनिर्देशार्थोऽसाविति शब्दः । हे देवदत्तनामक चोर त्वामहोरात्र देवते उदीरयतामुद्गमयताम् । अर्धमासदेवतास्त्वामुदीं जयन्तूत्कर्षेणैव जयन्तु । मास-देवतास्त्वां श्रपयन्तु वह्नौ पक्तुं प्रवर्तन्ताम् । ऋतुदेवतास्त्वां सम्यक्पक्वं कुर्वन्तु । संव-त्सरदेवस्त्वां हन्तु मारयतु ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये चतुर्थप्रपाठके षड्विंशोऽनुवाकः ॥ २६ ॥

अथ चतुर्थे सप्तविंशोऽनुवाकः ।

अभिचारप्रकरणे ब्राह्मणे[2] यदुक्तं यद्वाचः क्रूरं तेन वषट्करोतीति, तदेतत्क्रूरम[3].ह—

खट् फट् जहि । छिन्धी[4] भिन्धी हन्धी कट् । इति वाचः क्रूराणि इति ।

---

१ क. °मुद्गीमुक्°। २ क ख ब्राह्मणेन। ३ ख. °देव क्रू°। ४ क. छिन्धि।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठके
सप्तविंशोऽनुवाकः ॥ २७ ॥

भर्त्सनद्योतकाः खडादयस्त्रयोऽनुकरणशब्दाः । * हननच्छेदनभेदनवाचकानि तु क्रियापदानि । इत्येतानि षड्विधानि **वाचः क्रूराणि** ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये चतुर्थप्रपाठके सप्तविंशोऽनुवाकः ॥ २७ ॥

अथ चतुर्थेऽष्टाविंशोऽनुवाकः ।

कल्पः—"यदि घर्मेण चरत्स्वेकवृक उत्तिष्ठेद्विगा इन्द्र विचरन्त्स्पाशयस्वेत्येनमभिमन्त्रयते" इति । पाठस्तु —

विगा इन्द्र विचरन्त्स्पाशयस्व । स्वपन्तमिन्द्र पशुमन्तमिच्छ ।
वज्रेणामुं बोधय दुर्विदत्रम् । स्वपतोऽस्य प्रहर भोजनेभ्यः, इति ।

एकाकित्वेनारण्ये संचरन्वत्सान्मारयति योऽरण्यश्वा सोऽयमेकवृकः, तद्बाधनमत्र प्रार्थ्यते । हे, **इन्द्र विगा** वत्सानेकवृकाद्वियोज्य तद्रक्षार्थं **विशेषेण चरन्स्पाशयस्व** तमेकवृकं बाधितं कुरु । हे, **इन्द्र पशुमन्तं** वत्सान्भक्षयितुमायातैः पशुभिर्युक्तं तमेकवृकं **स्वपन्तं** निद्राणं गच्छ । गत्वा च **दुर्विदत्रं** दुर्बुद्धिशीलममुमेकवृकं **वज्रेणाऽऽयुधेन बोधय** । यथा + स्वपन्तं सुप्तं प्रहारेण बोधयन्ति, तथा वज्रप्रहारेण बोधय । बोधयेत्यस्यैवार्थः स्पष्टमुच्यते । **स्वपन्तमेनमेकवृकं भोजनेभ्यो** वत्सभक्षणेभ्यो निवारयितुं **प्रहर** मारयेत्यर्थः ।

कल्पः—"उभयत आदीप्योल्मुकमस्मै प्रत्यस्येत् । अग्ने अग्निना संवदस्व [इति]" इति । पाठस्तु—

अग्ने अग्निना संवदस्व । मृत्यो मृत्युना
संवदस्व । नमस्ते अस्तु भगवः, इति ।

हेऽग्न उल्मुकस्य मूलभागवर्तिन्नग्निनोल्मुकाग्रभागवर्तिना सह **संवदस्व,** एकवृकं हन्तुमैकमत्यं प्राप्नुहि । हे **मृत्यो** मूलभागस्थिताग्निप्रेरित **मृत्युनाऽग्रभागस्थिताग्निप्रे-**

---

* छेदनभेदनहननवाचकानीति युक्तं पठितुम् । + इदं पदमधिकम् ।

---

१ क. °कसृक । २ क. °कसृकः । ३ क. ख. °नमन्त्रं प्रार्थयते । ४ क. °कसृका° । ५ क. °कसृकं । ६ क. °कसृकं । ७ क. °कसृकं । ८ ख. सुप्तप° । ९ क. °कसृकं ।

रितेन सह संवदस्व, एकवृकं हन्तुं संवादमनुमतिं कुरु । हे भगव ऐश्वर्यादिगुणयुक्ताग्ने, ते तुभ्यं नमोऽस्तु ।

कल्पः—"अथैनमनुतिष्टन्ते सकृत्ते अग्ने नम इत्यनुवाकशेषेण" इति । पाठस्तु—

सकृत्ते अग्ने नमः । द्विस्ते नमः । त्रिस्ते नमः । चतुस्ते नमः । पञ्चकृत्वस्ते नमः । दशकृत्वस्ते नमः । शतकृत्वस्ते नमः । आसहस्रकृत्वस्ते नमः । अपरिमितकृत्वस्ते नमः । नमस्ते अस्तु मा मां हिꣳसीः*, इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठकेऽष्टाविंशोऽनुवाकः ॥ २८ ॥

वृकदर्शनावृत्त्यनुसारेण नमस्कारावृत्तिवाक्यानि योजनीयानि । यद्वा सकृद्दर्शनेऽपि कृत्स्नो मन्त्रः प्रयोक्तव्यः । नमस्कारावृत्त्युक्तिरादरार्था ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये चतुर्थप्रपाठकेऽष्टाविंशोऽनुवाकः ॥ २८ ॥

अथ चतुर्थ एकोनत्रिंशोऽनुवाकः ।

कल्पः—"अथ यदि गृध्रः शालावृको[1] भयेडको दीर्घमुख्युलूको भूतोपसृष्टः शकुनिर्वा वदेत्, " असृङ्मुखः " " यदेतत् " " यदीषितः " " दीर्घमुखि " " इत्थादुलूकः " यदेतद्भूतान्यन्वाविश्य " " प्रसार्य सक्थ्यौ " इत्येतैर्यथालिङ्गमभिमन्त्र्यो ल्मुकप्रत्यसनादि समानम् " इति । तत्र गृध्रविषयमनुवाकमाह—

असृङ्मुखो रुधिरेणाव्यक्तः । यमस्य दूतः श्वपाद्विधावसि । गृध्रः सुपर्णः कुणपं निषेवसे । यमस्य दूतः प्रहितो भवस्य चोभयोः, इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठक एकोनत्रिंशोऽनुवाकः ॥ २९ ॥

---

*एतदग्रे ग. पुस्तके " १॥ त्रिस्ते नमः सप्त च " इत्यधिकम् ।

---

१ ख सालावृको ।

गृध्रः पक्षिविशेषः । हे गृध्र त्वं **विधावसि** विविधं धावनं करोषि, शवमन्विच्छन्सर्वत्र संचरसि । कीदृशः । **असृङ्मुखोऽसृग्रक्तं** मुखे यस्यासौ तादृशः । पातुं स्वीकृतेन **रुधिरेण** मुखस्य सर्वस्य लेपितत्वादव्यक्तः[1], ईदृग्जातिरिति निश्चेतुमशक्यः । **यमस्य दूतो** यमो हि मारयितुं गृध्रं प्रेषयति[2] । श्वत्पद्यते[3] शवं गच्छतीति **श्वपात्** । त्वं रक्तमांसयोर्गन्धेन तृषया युक्तत्वाद्**गृध्रः** । शोभनौ पर्णौ शीघ्रपतनक्षमौ यस्यासौ **सुपर्णः** । तादृशस्त्वं **कुणपं** शवं **निषेवसे** नितरां सेवसे । सोऽयं गृध्रो **यमस्य** प्रेताधिपतिदेवस्य **भवस्य** परमेश्वरस्यान्तर्यामिण **उभयोरेतयोर्दूतः** । भवो हि यमं प्रेषयति यमश्च गृध्रम् । अतः साक्षात्परम्परया चोभयोर्दूतः सन्निह **प्रहितः** प्रेषितः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये चतुर्थप्रपाठक एकोनत्रिंशोऽनुवाकः ॥ २९ ॥

अथ चतुर्थे त्रिंशोऽनुवाकः ।

अथ[4] शालावृकविषयमनुवाकमाह—

यदेतद्वृकसो भूत्वा । वाग्देव्यभिरायसि । द्विषन्तं मेऽभिरा॑य । तं मृत्यो मृत्यवे नय । स आर्त्याऽऽर्तिमार्च्छतु, इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठके त्रिंशोऽनुवाकः ॥ ३० ॥

वृकः क्रोष्टा । हे **वाग्देवि** ध्वनिदेवते **वृकसो भूत्वा** वृकादुत्पद्याभिरायस्याभिमुख्येन शब्दं करोषीति **यत्तदेतन्मे** द्विषन्तमभिलक्ष्य **राय** शब्दं कुरु । हे **मृत्यो** वृकरूपं **तं द्विषन्तं मृत्यवे** मारकाय देवाय **नय** प्रापय । **स** द्विषन्नार्त्या रोगेणाऽऽर्तिं दुःखमार्च्छतु प्राप्नोतु ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये चतुर्थप्रपाठके त्रिंशोऽनुवाकः ॥ ३० ॥

---

१ ग. °पित्वा° । २ क. ख. °ति । शवव° । ३ ग. शीघ्रं । ४ क. ख. °थ साला° । ५ क. ख. °ति तदे° ।

अथ चतुर्थ एकत्रिंशोऽनुवाकः।

भयेडकविषयमनुवाकमाह —

यदीषितो यदि वा स्वकामी। भयेडको
वदति वाचमेताम्। तामिन्द्राग्नी ब्रह्मणा
संविदानौ। शिवामस्मभ्यं कृणुतं गृहेषु, इति।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठक
एकत्रिंशोऽनुवाकः ॥ ३१ ॥

एडको मेषः, स च युद्धव्यसनयुक्तो **भयेडकः**। तं दृष्ट्वैव भीत्या मनुष्याः पलायन्ते। स च **यदि** केनचिदीषितः प्रवर्तितो यदि **वा स्वकामी** स्वेच्छावर्ती सन्नेतां श्रूयमाणां **वाचं वदति** ध्वनिं करोति। हे **इन्द्राग्नी ब्रह्मणा** परमेश्वरेण सह **संविदानौ** वैकमत्यं गतावस्मभ्यमस्मदर्थं **गृहेष्वस्मदीयेषु** तां वाचं **शिवां** सुखकरीं **कृणुतं** कुरुतम्॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये चतुर्थप्रपाठक एकत्रिंशोऽनुवाकः ॥ ३१ ॥

अथ चतुर्थे द्वात्रिंशोऽनुवाकः।

दीर्घमुखीविषयमनुवाकमाह —

दीर्घमुखि दुर्हणु। मा स्म दक्षिणतो वदः।
यदि दक्षिणतो वदाद्द्विषन्तं मेऽवबाधासै, इति।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठके
द्वात्रिंशोऽनुवाकः ॥ ३२ ॥

दीर्घमुखी काकखी गर्दभी वा। **दुष्टा** हनूर्यस्याः सा **दुर्हणूः**। हे **दुर्हणु दीर्घमुखि दक्षिणतो** दक्षिणभागे **मा स्म वदो** ध्वनिं मा कार्षीः। **यदि दक्षिणभागे वदाच्छब्दं कुर्यास्तदा मे द्विषन्तमवबाधासै**(सा) [अ]**वबाधस्व** विनाशय॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये चतुर्थप्रपाठके द्वात्रिंशोऽनुवाकः ॥ ३२ ॥

---

१ ग. °बाधस्व, इ°। २ क. ख. ह्रदाग्नीवा। ३ क. ग. °बाधस्व।

अथ चतुर्थे त्रयस्त्रिंशोऽनुवाकः ।

उलूकविषयमनुवाकमाह—

इत्थादुलूक आपप्तत् । हिरण्याक्षो अयोमुखः ।
रक्षसां दूत आगतः । तमितो नाशयाग्ने, इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठके त्रयस्त्रिंशोऽनुवाकः ॥ ३३ ॥

उलूकः काकविरोधी घूकः । सोऽयमुलूक **इत्थादनेन** प्रकारेणाऽऽपप्तत्प्रोप्तात् । कीदृशः । हिरण्यवद्रक्ते अक्षिणी यस्यासौ **हिरण्याक्षः** । अयोवत्कृष्णवर्णं मुखं यस्यासावयोमुखः । स च यज्ञविघातिनां **रक्षसां दूतः** सन्निह **समागतः** । हेऽग्ने **तमुलूकमितः** स्थानान्नाशय ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये चतुर्थप्रपाठके त्रयस्त्रिंशोऽनुवाकः ॥ ३३ ॥

अथ चतुर्थे चतुस्त्रिंशोऽनुवाकः ।

अथ भूतोपसृष्टविषयमनुवाकमाह—

यदेतद्भूतान्यन्वाविश्य । दैवीं वाचं वदसि । द्विषतो नः परावद । तान्मृत्यो मृत्यवे नय । त आर्त्याऽऽर्तिमाच्छ्रन्तु । अग्निनाऽग्निः संवदताम्, इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठके चतुस्त्रिंशोऽनुवाकः ॥ ३४ ॥

यक्षराक्षसग्रहाविष्टो मनुष्यो यद्वदति तद्विषयमिदमुच्यते । यक्षादिभूतानि प्राणिनो मनुष्याननुप्रविश्य **दैवीं वाचं** मनुष्याणामयोग्यां कांचिद्वाचं **वदसीति यदेतदेतेन** वचनेन **नोऽस्माकं द्विषतः** शत्रून्**परावद** पराभूता यथा भवन्ति तथा वद । हे **मृत्यो** यक्षादिरूप **मृत्यवे** परंमृत्युरूपाय देवाय **तान्द्विषतो नय** प्रापय । ते द्विषन्त **आर्त्या** रोगेणाऽऽर्तिं दुःखमा**च्छ्रन्तु** प्राप्नुवन्तु । अस्मिन्नर्थेऽग्निर्**नो**ल्मुकमूलभागवर्तिनाऽग्निरुल्मुकाग्रवर्ती **संवदतां** संवादमनुमतिं करोतु ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये चतुर्थप्रपाठके चतुस्त्रिंशोऽनुवाकः ॥ ३४ ॥

१ प. ंरमभृ°

अथ चतुर्थे पञ्चत्रिंशोऽनुवाकः।

अथ शकुनिविषयमनुवाकमाह—

प्रसार्य सक्थ्यौ पतसि । सव्यमक्षि निपेपिं
च । मेह कस्यचनाममत्, इति ।
इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठके
पञ्चत्रिंशोऽनुवाकः ॥ ३५ ॥

ग्रामगमनादौ शुभाशुभसूचकः पक्षी शकुनिः । हे शकुने **सक्थ्यौ** प्रसार्योरू प्रसृतौ कृत्वेह **पतसि** । **सव्यमक्षि** वामं चक्षुर्निपेपि च पुनः पुनर्निमीलयसि च । तेन दोषेणेहास्मिन्देशे **कस्यचन** कस्यापि पुरुषस्य **माऽममत्**, रोगो मा भवतु ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये चतुर्थप्रपाठके पञ्चत्रिंशोऽनुवाकः ॥ ३५ ॥

अथ चतुर्थे षट्त्रिंशोऽनुवाकः।

कल्पः—" यदि घर्मधुक्क्रिमिणा स्यात्, अत्रिणा त्वा क्रिमे हन्मीत्यनुवाकेनास्याः क्रिमीन्हन्यात्। अपि वा सार्वत्रिकमेतत्प्रायश्चित्तं क्रियेत[1] " इति। पाठस्तु—

अत्रिणा त्वा क्रिमे हन्मि । कण्वेन जमदग्निना । विश्वावसोर्ब्रह्मणा हतः । क्रिमीणाꣳ राजा । अप्येषाꣳ स्थपतिर्हतः । अथो माताऽथो पिता । अथो स्थूरा अथो क्षुद्राः । अथो कृष्णा अथो श्वेताः । अथो आशातिका हताः । श्वेताभिः सह सर्वे हताः, इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठके
षट्त्रिंशोऽनुवाकः ॥ ३६ ॥

हे **क्रिमे** घर्मधुगादिवर्तिन्**अत्रिणा कण्वेन जमदग्निना** च महर्षिणाऽनुगृहीतोऽहं त्वां **हन्मि**। **विश्वावसोर्ब्रह्मणा** विश्वावसुसंज्ञकस्यैं गन्धर्वस्य मन्त्रेण **क्रिमीणां राजा** स्वामी **हतः**। **अपि चैषां** क्रिमीणां **स्थपतिर्**न्योऽपि राजन्यतिरिक्तः प्रभुर्**हतः**। अपि च तव **माता हता**। तव **पिता** [हतः]। अन्येऽपि क्रिमयः **स्थूलाः क्षुद्राः कृष्णाः श्वेताश्च** नानाविधा **हताः**। अपि चाऽऽशातिका आगत्य शात्यमाना

---

१ क. क्रियेत । ग. घ. ङ. च. क्रिमे । ग. । २ क. ग. ङ. स्य म°।

अस्माभिरेव बाध्यमाना गवाश्वादिशरीरेषु वर्तमाना दंशयूकादयः सर्वेऽपि श्वेताभिः क्रिमिजातिभिः सह मारिताः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयारण्यकभाष्ये चतुर्थप्रपाठके षट्त्रिंशोऽनुवाकः ॥ ३६ ॥

अथ चतुर्थे सप्तत्रिंशोऽनुवाकः ।

कल्पः—" यमभिचरेत्तस्य लोहितमवदानं कृत्वाऽऽहरावद्य शृतस्येत्यनुवाकेन जुहुयात् " इति । पाठस्तु—

आहरावद्य । शृतस्य हविषो यथा । तत्सत्यं
यदमुं यमस्य जम्भयोः । आदधामि
तथा हि तत् । खण्फण्म्रसि, इति ।
इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठके
सप्तत्रिंशोऽनुवाकः ॥ ३७ ॥

यथा यागकाले **शृतस्य हविषः** पक्वं हविरवद्यावदा*य जुहु इति (जुहुयामिति) । तथा हे शत्रो लोहितं द्वितीयमाहराऽऽनय । **अमुं** शत्रुं **यमस्य जम्भयोर्दन्तयोर्मध्य आदधामि** स्थापयामीति **यत्तत्सत्यम्** । तत्कार्यं **तथा हि** तथैवास्तु । दंशनध्वनेरनुकरणरूपौ **खण्फण्**शब्दौ तौ यथा भवतस्तथा शत्रो मारितोऽसि ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये चतुर्थप्रपाठके सप्तत्रिंशोऽनुवाकः ॥ ३७ ॥

अथ चतुर्थेऽष्टात्रिंशोऽनुवाकः ।

कल्पः—" यमभिव्याहरिष्यन्स्यात्त्रिरात्रावरं ब्रह्मचर्यं चरित्वा गत्वैनमभिव्याहरेत्, ब्रह्मणा त्वा शपामीत्यनुवाकेन " इति । पाठस्तु—

ब्रह्मणा त्वा शपामि । ब्रह्मणस्त्वा शपथेन
शपामि । घोरेण त्वा भृगूणां चक्षुषा प्रेक्षे ।

---

* एतदादितावित्यन्तो ग्रन्थस्त्रुटितः क. ख. पुस्तकयोः ।

---

१ ग. त्वाऽऽगत्यैन° ।

रौद्रेण त्वाऽङ्गिरसां मनसा ध्यायामि । अघस्य त्वा धारया विध्यामि । अधरो मत्पद्यस्वासौ, इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठकेऽष्टात्रिंशोऽनुवाकः ॥ ३८ ॥

हे शत्रो त्वां देवदत्तनामानं ब्रह्मणा मन्त्रेण शपामि शापयुक्तं करोमि । ब्रह्मणः परमात्मवस्तुनः शपथेन शापसामर्थ्येन त्वां शपामि । भृगूणां महर्षीणां संबन्धिना घोरेणोग्रेण चक्षुषा त्वां प्रेक्षे । अङ्गिरसां महर्षीणां संबन्धिना रौद्रेणोग्रेण मनसा त्वां ध्यायामि । अघस्य पापरूपस्य क्रूरस्याऽऽयुधस्य खड्गरूपस्य धारया त्वां विध्यामि । असौ हे देवदत्तरूप त्वं मदभिचरितुः पुरुषादधरः पद्यस्वार्वाचीनः पतितो भव ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये चतुर्थप्रपाठकेऽष्टात्रिंशोऽनुवाकः ॥ ३८ ॥

अथ चतुर्थ एकोनचत्वारिंशोऽनुवाकः ।

कल्पः— "यं द्विष्यात्तस्य गोष्ठे[1] स्वयमौषधीं निखनेत्, उत्तुद शिमिजावरीत्यनुवाकेन । अपि वा गोष्ठस्यैवादक्षिणं द्वार्बाहुमेतेनैव विचालयेत्[2]" इति । पाठस्तु—

उत्तुद शिमिजावरि । तल्पेजे तल्प उत्तुद ।
गिरीँरनुप्रवेशय । मरीचीरुप संनुद । यावदितः पुरस्तादुदयाति सूर्यः । तावदितोऽमुं नाशय । योऽस्मान्द्वेष्टि । यं च वयं द्विष्मः, इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठक एकोनचत्वारिंशोऽनुवाकः ॥ ३९ ॥

कृषिमन्तरेण स्वयमेवोत्पन्ना शिमिजावरी । हे तथाविधौषध उत्तुद शत्रुमुत्कृत्य व्यथितं कुरु । हे तल्पेजे तस्य शयनस्थाने समुत्पन्न ओषधे तदीये तल्पे प्रविश्य तमुत्तुद । ततो गृहाद्भ्रष्टं कृत्वा गिरीननुप्रवेशय । ततो मरीचीर्दावाग्निरश्मीनुप

---

१ ब. त्वां ब्र° । २ ग. °ष्ठेऽक्षतमो° । ३ क. ख °मौष° । ४ क ङ. °स्यैव दक्षिणां द्वा° ।

प्रापय्य **संनुद** सम्यङ्निराकुरु । **सूर्यो** यावता कालेनेतो देशात्पुरस्तात्पूर्वस्यां दिश्युदेति **तावता** कालेनेतो देशादमुं द्वेष्टारं द्वेष्यं च **नाशय** ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये चतुर्थप्रपाठक एकोनचत्वारिंशोऽनुवाकः ॥ ३९ ॥

अथ चतुर्थे चत्वारिंशोऽनुवाकः ।

कल्पः—"यद्युद्गाता पुरुषः सामं न गायेत्, अध्वर्युरेवैतेन साम्नोद्गायेत् । भूर्भुवः सुवरित्यनुवाकेन" इति । पाठस्तु—

भूर्भुवः सुवो भूर्भुवः सुवो भूर्भुवः सुवः ।
भुवोऽद्धायि[2] भुवोऽद्धायि भुवोऽद्धायि । नृम्णायि
नृम्णं नृम्णायि नृम्णं नृम्णायि नृम्णम् ।
निधाय्योऽवायि[3] निधाय्योऽवायि[4] निधाय्योऽ-
वायि । ए अस्मे अस्मे । सुवर्नज्योतीः[5], इति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठके चत्वारिंशोऽनुवाकः ॥ ४० ॥

एते सर्वे स्तोभविशेषाः । ऋचमन्तरेण स्तोभैरेव स्वरविशिष्टैः साम गायेत् । गानार्था तत्र तत्राऽऽवृत्तिः । भूरादयस्त्रयो लोका इष्टार्थप्रदाः सन्तु । विशेषतो **भुवः** सकाशादधायि सर्वमिष्टं संपादितम् । नृभिर्मनुष्यैर्मन्यतेऽभीष्टत्वेन स्मर्यत इति **नृम्णं** सुखम् । नृम्णे सुखे सत्यपि पुनर्नृम्णं सुखमस्तु । **निधाय्यो** नितरां संपादनीयो भागः, **अवायि** प्राप्तः । गत्यर्थो वातिधातुः । **ए**कारो देवतासंबोधनार्थः । हे देवतेऽस्मे अस्मासु **सुवर्णज्योतिः** सुवर्णसमानं ज्योतिः संपद्यताम् ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये चतुर्थप्रपाठके चत्वारिंशोऽनुवाकः ॥ ४० ॥

---

१ ग. °म गा° । २ ग. °वोऽधायि भुवोऽधायि भुवोऽधायि । नृ° । ३ ग. °वापि नि° । ४ ग. °वापि नि° । ५ ग. °वापि । ए° । ६ ख. सुवर्ज्योतिः । ग सुवर्गज्योतिः । ७ ग. °वापि प्राप्तम् । ग° ।

अथ चतुर्थ एकचत्वारिंशोऽनुवाकः ।

सूत्रेऽवान्तरदीक्षां व्याख्यास्याम इत्युपक्रम्याभिहितम्—"चतस्र औदुम्बरीः समिधो घृतान्वक्ता अभ्यादधाति पृथिवी समिदित्येतैर्मन्त्रैः" इति । तत्र प्रथमं मन्त्रमाह—

पृथिवी समित् । तामग्निः समिन्धे । साऽग्निꣳ
समिन्धे । तामहꣳ समिन्धे । सा मा समिद्धा ।
आयुषा तेजसा । वर्चसा श्रिया । यशसा ब्रह्म-
वर्चसेन । अन्नाद्येन समिन्ताꣳ स्वाहा, इति ।

पृथिवी देवता सम्यग्दीप्यमानत्वात्समिदित्युच्यते । **तां** पृथिव्याख्यां समिधम-**ग्निर्देवः समिन्धे** सम्यग्दीपितवान् । **सा** च पृथिव्याख्या समिदग्निं देवं **समिन्धे** सम्यग्दीपयति । **तां** पृथिवीरूपां समिधमहं **समिन्धे** सम्यक्प्रकाशयामि । **सा च** देवता मया **समिद्धा** सती मामायुरादिभिः **समिन्तां** सम्यक्प्रकाशयतु । **तेजः** शरीर-कान्तिः । **वर्चो** बाह्यदीप्तिः ।

अथ द्वितीयतृतीयमन्त्रावाह—

अन्तरिक्षꣳ समित् (१) । तां वायुः समिन्धे ।
सा वायुꣳ समिन्धे । तामहꣳ समिन्धे । सा मा
समिद्धा । आयुषा तेजसा । वर्चसा श्रिया ।
यशसा ब्रह्मवर्चसेन । अन्नाद्येन समिन्ताꣳ स्वाहा ।
द्यौः समित् । तामादित्यः समिन्धे (२) ।
साऽऽदित्यꣳ समिन्धे । तामहꣳ समिन्धे । सा मा
समिद्धा । आयुषा तेजसा । वर्चसा श्रिया । यशसा
ब्रह्मवर्चसेन । अन्नाद्येन समिन्ताꣳ स्वाहा, इति ।

पूर्ववद्व्याख्येयौ ।

चतुर्थं मन्त्रमाह—

प्राजापत्या मे समिदसि सपत्नक्षयणी ।
भ्रातृव्यहा मेऽसि स्वाहा, इति ।

हे समित्त्वं **प्राजापत्या** प्राजापतिसंबन्धिनी **सपत्नक्षयणी** वैरिविनाशनी **मे**

समिदसि सम्यग्दीपिकाऽसि । तस्मान्मे मम भ्रातृव्यहाऽसि शत्रुघातिनी भवसि । स्वाहुतमिदमस्तु ।

कल्पः—"अथ देवता उपतिष्ठते, अग्ने व्रतपते व्रतं चरिष्यामि" इति । पाठस्तु—

अग्ने व्रतपते व्रतं चरिष्यामि (३) । तच्छकेयं तन्मे राध्यताम् । वायो व्रतपत आदित्य व्रत पते । व्रतानां व्रतपते व्रतं चरिष्यामि । तच्छकेयं तन्मे राध्यताम् , इति ।

हे व्रतपतेऽन्तरदीक्षारूपस्य व्रतस्य पालकाग्ने व्रतमिदमहं चरिष्यामि । त्वत्प्रसादात्तद्व्रतं कर्तुं शकेयं शक्तो भूयासम् । मे मदीयं तद्व्रतं राध्यतां सम्यग्द्धिं गच्छतु । वायो व्रतपत इत्येतस्मिन्नुत्तरस्मिंश्च व्रतं चरिष्यामीत्यादिकमनुषज्यते । एतदर्थमेव चतुर्थमन्त्रे पुनराम्नातम् । व्रतपत इत्युक्तस्य पुनरपि व्रतानामित्युक्तिः कृत्स्नव्रतस्वीकारार्था ।

कल्पः—"आवृत्तैर्मन्त्रैः समिध आधायाऽऽवृत्तैर्देवता उपस्थाय" इति । पाठस्तु—

द्यौः समित् । तामादित्यः समिन्धे । साऽऽदित्य[१]ꣳसमिन्धे । तामह[१]ꣳसमिन्धे । सा मा समिद्धा । आयुषा तेजसा (४) । वर्चसा श्रिया । यशसा ब्रह्मवर्चसेन । अन्नाद्येन समिन्ता[१] स्वाहा । अन्तरिक्ष[१]ꣳसमित् । तां वायुः समिन्धे । सा वायु[१]ꣳसमिन्धे । तामह[१]ꣳसमिन्धे । सा मा समिद्धा । आयुषा तेजसा । वर्चसा श्रिया (५) । यशसा ब्रह्मवर्चसेन । अन्नाद्येन समिन्ता[१] स्वाहा । पृथिवी समित् । तामग्निः समिन्धे । साऽग्नि[१]ꣳसमिन्धे । तामह[१]ꣳसमिन्धे । सा मा समिद्धा । आयुषा तेजसा । वर्चसा श्रिया । यशसा ब्रह्मवर्चसेन (६) । अन्नाद्येन समिन्ता[१] स्वाहा । प्राजापत्या मे समिदसि सपत्नक्षयणी । भ्रातृव्यहा मेऽसि स्वाहा । आदित्य व्रतपते व्रतमचारिषम् । तदशकं तन्मेऽराधि । वायो व्रतपतेऽग्ने व्रतपते । व्रतानां व्रत-

---

१ क. ख. हे प्रजाप° । २ ग. °न । अ° ।

पते व्रतमचारिषम्। तदशकं तन्मेऽराधि (७), इति।
समित्समिन्धे व्रतं चरिष्यामि तेजसा श्रियां यशसा
ब्रह्मवर्चसेनाष्टौ च ॥
इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठक
एकचत्वारिंशोऽनुवाकः ॥ ४१ ॥

व्रतावसाने कर्तव्यत्वादचारिषमित्यादिभूतार्थवाचिशब्दप्रयोगः। तद्धि चतुर्षु वेदव्रतेषु सौम्यव्रतमित्यभिधीयते। एतस्य प्रवर्ग्याङ्गत्वाभावेऽपि शुक्रियकाण्डोक्तमन्त्रसापेक्षत्वादत्राऽऽम्नातम्। एतच्च सूत्रकारेण दर्शितम्—"अथैनं सर्वेषामनुवाकानां प्रभृतीरभिव्याहारयति, प्रथमोत्तमयोर्वोत्तमेनानुवाकेन शान्तिं कृत्वा" इति ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये चतुर्थप्रपाठक एकचत्वारिंशोऽनुवाकः॥ ४१ ॥

अथ चतुर्थे द्विचत्वारिंशोऽनुवाकः।

कल्पः—"गामवसृज्य मदन्तीरुपस्पृश्योत्तमेनानुवाकेन शान्तिं कुर्वन्ति, एवं सायं प्रातः प्रवर्ग्योपसद्भ्यां चरन्ति" इति। तस्मिन्नुवाके प्रथमं मन्त्रमाह—

शं नो वातः पवतां मातरिश्वा शं नस्तपतु सूर्यः। अहानि
शं भवन्तु नः शꣳ रात्रिः प्रतिधीयताम्, इति।

मातरिश्वाऽन्तरिक्षनिवासी वातो नोऽस्माकं शं सुखं यथा भवति तथा पवताम्। सूर्योऽपि तथैव तपतु। अहान्यपि नोऽस्माकं सुखकराणि भवन्तु। रात्रिश्च सुखकरी संपद्यताम्।

द्वितीयं मन्त्रमाह—

शमुषा नो व्युच्छतु शमादित्य उदेतु नः। शिवा नः शंतमा
भव सुमृडीका सरस्वति। मा ते व्योम संदृशि, इति।

उषा देवी नोऽस्माकं सुखकरी प्रभातं करोतु आदित्यश्चास्माकं सुखेकर उदेतु। हे सरस्वति त्वं नोऽस्मान्प्रति शिवाऽनुकूला शंतमाऽतिशयेन सर्वोपद्रवशमनी सुमृडीका सुष्ठु सुखकरी च भव। ते संदृशि तव कटाक्षे सति व्योम सुखशून्यत्वं मा भूत्।

---

१ ग. ॥ ६ ॥ २ घ. °या ब्र° । ३ क. ख. तच्च । ४ क. ख. °खकार्युदे° ।

तृतीयं मन्त्रमाह—

इडायै वास्त्वसि वास्तुमद्वास्तुमन्तो भूयास्म मा वास्तोरिछत्स्म
ह्यवास्तुः स भूयाद्योऽस्मान्द्वेष्टि यं च वयं द्विष्मः, इति ।

हे भूमे त्वमिडायै धेनुरूपाया इडादेव्या **वास्त्वसि** निवासस्थानमसि । सर्वं जगत्त्वत्प्रसादाद्वास्तुमन्निवासस्थानयुक्तं भवतु । वयमपि त्वत्प्रसादाद्वास्तुमन्तो निवासस्थानयुक्ता **भूयास्म** । वास्तोर्निवासस्थानान्मा छित्स्म विच्छिन्ना मा भूयास्म । हि यस्माद्वयमेवंविधास्तस्मादस्माकं विपरीतो यो द्वेष्टा यश्च द्वेष्यः सोऽयमवास्तुर्निवासस्थानरहितो भूयात् ।

अथ चतुर्थं मन्त्रमाह—

प्रतिष्ठाऽसि प्रतिष्ठावन्तो भूयास्म मा प्रतिष्ठायारिछत्स्म
ह्यप्रतिष्ठः स भूयाद्योऽस्मान्द्वेष्टि यं च वयं द्विष्मः, इति ।

प्रतिष्ठाऽऽधारः । अन्यत्पूर्ववत् ।

अथ पञ्चमं मन्त्रमाह—

आ वात वाहि भेषजं वि वात वाहि यद्रपः ।
त्वꣳ हि विश्वभेषजो देवानां दूत ईयसे, इति ।

हे **वात** वायो मे **भेषजं** यथा भवति तथाऽऽवाहि । अस्मान्प्रति सर्वतो वातं कुरु । हे **वात यद्रपः** पापमस्ति तद्विवाहि विश्लेष्य गच्छ । यस्मात्त्वं **विश्वभेषज** इति विश्वस्य चिकित्सको **देवानां दूतश्च** सन्नीयसे गच्छसि ।

अथ षष्ठं मन्त्रमाह—

द्वाविमौ वातौ वात आसिन्धोरापरावतः (१)।
दक्षं मे अन्य आवातु पराऽन्यो वातु यद्रपः, इति ।

इमौ लोके दृश्यमानौ द्वौ वातावासिन्धोः समुद्रसहिते प्रदेश **आपरावतो** दूरवर्तिलोकयुक्ते देशे **वातः** संचरतः । शान्तो वायुरेकस्तीव्रोऽपरः । तयोर्मध्येऽन्य एकः शान्तो मे मम **दक्षमावातु** सुखं संपादयतु । अन्यस्तीव्रो वायुर्यद्रपो मम यत्पापमस्ति तत्परावातु विनाशयतु ।

अथ सप्तमं मन्त्रमाह—

यददो वात ते गृहेऽमृतस्य निधिर्हितः । ततो नो देहि जीवसे

---

१ क. ख. °हरमाहि वि°।

ततो नो धेहि भेषजम् । ततो नो मह आवह, इति ।

हे वात ते गृहे यददो योऽसावमृतस्य **निधिर्हितः** स्थापितः, **ततो** निधेः सकाशा-**न्नोऽस्माकं जीवसे** जीवनाय **देहि** कियदप्यमृतं प्रयच्छ । **ततोऽमृता**न्नोऽस्माकं **भेषजं दे (धे) हि,** औषधं संपादय । **ततस्तस्मान्नोऽस्माकं मह आवह** तेजः संपादय ।

अथाष्टमं मन्त्रमाह—

वात आवातु भेषजꣳ शंभूर्मयोभूर्नो
हृदे । प्र ण आयूꣳषि तारिषत्, इति ।

अयं **वातो भेषजं** यथा भवति तथाऽऽवातु । **नोऽस्माकं हृदे** मनसे **शंभूरनिष्ट-शान्तिं भावयन्मयोभूः** सुखं च भावयन्वर्तताम् । **नोऽस्माकमायूंषि** चिरकालजीवनानि **प्रतारिषत्**प्रकर्षेण वर्धयतु ।

अथ नवमं मन्त्रमाह—

इन्द्रस्य गृहोऽसि तं त्वा प्रपद्ये सगुः
साश्वः । सह यन्मे अस्ति तेन, इति ।

अत्रेन्द्रशब्देन परमैश्वर्ययोगादादित्य उच्यते । तथा च ब्राह्मणम्—" असौ वा आदित्य इन्द्र एष प्रजापतिः " इति । हे आदित्यमण्डल त्वमिन्द्रस्य **गृहोऽसि,** आदि-त्यस्य निवासस्थानमसि । **तं** तादृशमादित्यगृहं **त्वां प्रपद्ये** प्राप्नोमि । कीदृशोऽहम् । **सगुर्गोसहितः** । **साश्वोऽश्वसहितः** । अन्यदपि मे यद्वस्तु विद्यते **तेन सह** त्वां प्रविशामि ।

अथ दशमं मन्त्रमाह—

भूः प्रपद्ये भुवः प्रपद्ये सुवः प्रपद्ये भूर्भुवः सुवः प्रपद्ये
वायुं प्रपद्येऽनार्तां[1] देवतां प्रपद्येऽश्मानमाखणं प्रपद्ये
प्रजापतेर्ब्रह्मकोशं ब्रह्म प्रपद्य ॐ प्रपद्ये, इति ।

भूः प्रपद्ये भूर्लोकदेवतां प्रपन्नोऽस्मि । एवमुत्तरत्रापि । यथा व्यस्तानां प्रपत्ति-स्तथा समस्तानामपि प्रपत्तिः । **अनार्तेत्यनेनाऽऽरोग्यकरी** देवतोच्यते । **आखणं** खनि-तुमशक्यमश्मानं दृढं पाषाणं **प्रपद्ये** । पाषाणवद्दार्ढ्यं ममास्त्वित्यर्थः । **प्रजापतेः**

---

१ घ. आयुꣳषि . २ ग. °नार्तामित्य° । ३ ग. °द्दार्ढ्यमयास्वित्य° ।

संबन्धि **ब्रह्मकोशं** सर्वमन्त्राधारभूतं **ब्रह्म** वेदस्वरूपं प्रपद्ये । ओंकारेण परमात्मोच्यते, तमपि **प्रपद्ये** ।

अथैकादशं[1] मन्त्रमाह—

अन्तरिक्षं म उर्वन्तरं बृहदग्नयः पर्वताश्च यया वातः
स्वस्त्या स्वस्ति मां तया स्वस्त्या स्वस्ति मानसानि, इति ।

यदिदमन्तरिक्षमस्ति तन्मे मदर्थमुर्वन्तरं विस्तीर्णावकाशो[2] **भूयात्** । तस्मिन्नन्तरिक्षेऽग्नयो गार्हपत्यादयः **पर्वता** मेर्वादयश्च **बृहदधिकं** सुखं यथा भवति तथा वर्तता(न्ता)मिति शेषः । अत्रान्तरिक्षे संचरन्वातो **यया स्वस्त्या** क्षेमहेतुभूतया क्रियया **मां** प्रति **स्वस्ति** क्षेमं[3] करोतीति शेषः । **तया स्वस्त्या** क्षेमहेतुभूतया क्रियया **मानसान्यस्मदीयान्यन्तःकरणानि स्वस्ति** क्षेमं प्रापयत्विति शेषः ।

अथ द्वादशं[4] मन्त्रमाह—

प्राणापानौ मृत्योर्मा पातं प्राणापानौ मा मा हासिष्टम्,—इति ।

हे प्राणापानदेवौ **मृत्योः** सकाशान्मां **पातं** रक्षतम् । हे **प्राणापानौ** युवां मां कदाचिदपि **मा हासिष्टं**[5] मा परित्यजतम् ।

अथ त्रयोदशं मन्त्रमाह—

मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु मयि मेधां
मयि प्रजां मयीन्द्र इन्द्रियं दधातु मयि मेधां मयि प्रजां
मयि सूर्यो भ्राजो दधातु (२), इति ।

ग्रन्थतदर्थधारणशक्तिर्मेधा, प्रजा पुत्रादिः, तेजः शरीरकान्तिः, तत्सर्वमग्निर्मयि संपादयतु । इन्द्रियं चक्षुरादिपाटवम् । भ्राजो दीप्तिजातम् । अन्यत्पूर्ववत् ।

अथ चतुर्दशं मन्त्रमाह—

द्युभिरक्तुभिः परिपातमस्मानरिष्टेभिरश्विना
सौभगेभिः । तन्नो मित्रो वरुणो मामहन्ता-
मदितिः सिन्धुः पृथिवी उत द्यौः, इति ।

हेऽश्विनौ **सौभगेभिः** सौभाग्यैः (सौभाग्यापादकैः) **सूक्तैरस्मान्पातम्** । कीदृशैः । **द्युभिर्द्योतमानैः** । **अक्तुभिरञ्जनहेतुघृतादिद्रव्ययुक्तैश्च** । **अरिष्टेभिर्विना-**

---

१ ग. °दशम° । २ ख. °स्तीर्णोऽव° । ३ ग. °मं प्रापयति । ४ क. दशम° । ५ ग. °त्यक्षत° ।

शरहितैः। नोऽस्माकं तदश्विनोः पालनं मित्रादयो मामहन्तामतिशयेन पूजयन्तु। सिन्धुः समुद्रः।

अथ पञ्चदशं मन्त्रमाह—

कया नश्चित्र आभुवदूती सदावृधः
सखा। कया शचिष्ठया वृता, इति।

कस्य प्रजापतेः संबन्धिनीत्यस्मिन्नर्थे केति शब्दः स्त्रीलिङ्गो वर्तते। ऊतीशब्दो रक्षावाची। कयोत्या प्रजापतिसंबन्धिना रक्षणेन चित्र आभुवत्, चित्रोऽयं यज्ञो नोऽस्मान्प्रत्यागतः। कीदृशो यज्ञः। सदावृधः सर्वदा वर्धमानः। सखा सखिवत्प्रियतमः। स च यज्ञः कया प्रजापतिसंबन्धिन्या शचिष्ठयाऽतिशयितया शक्त्या वृता वर्तते।

अथ षोडशं मन्त्रमाह—

कस्त्वा सत्यो मदानां मꣳहिष्ठो मत्स-
दन्धसः। दृढाचिदारुजे वसु, इति।

हे प्रवर्ग्य त्वां कः प्रजापतिर्मत्सन्मदयतु हर्षयतु। कीदृशः प्रजापतिः। सत्यः परमार्थभूतः। मदानां हर्षकारणानामायुरादीनामन्धसोऽन्नस्य च मंहिष्ठोऽतिशयेन वर्धयिता। आरुजे सर्वतोऽनिष्टभङ्गार्थं वस्वपेक्षितं धनं दृढाचिद्दृढमेव करोत्विति शेषः।

अथ सप्तदशं मन्त्रमाह—

अभी षु णः सखीनामविता जरि-
तॄणाम्। शतं भवास्यूतिभिः, इति।

हे प्रजापते जरितॄणां जरणशीलानां सखीनां सखिवत्प्रियाणां नोऽस्माकं शतमूतिभिः शतसंख्याकैः रक्षणैः, अभी षु सर्वतः सुष्ठु आविता भवासि रक्षिता भव।

अथाष्टादशं मन्त्रमाह—

वयः सुपर्णा उपसेदुरिन्द्रं प्रियमेधा ऋषयो
नाधमानाः। अप ध्वान्तमूर्णुहि पूर्धि चक्षुर्मु-
मुग्ध्यस्मान्निधयेव बद्धान् (३), इति।

केचिदृषय इन्द्रमुपसेदुः। कार्यार्थी प्राप्तिरुपसत्तिः। कीदृशा ऋषयः। वयः

पक्षिमूर्तिधारिणः । अत एव **सुपर्णाः** शोभनपक्षोपेताः । **प्रियमेधा** अधीतस्य श्रुतस्य धारणशक्तिर्मेधा तस्यां प्रीतियुक्ताः । **नाधमानाः** किंचित्कार्यं याचमानाः । स एव याच्ञाप्रकारः स्पष्टी क्रियते । हे इन्द्र **ध्वान्तमज्ञानलक्षणमन्धकारमपोर्णुहि,** अपसारय । **चक्षुर्ज्ञानलक्षणां दृष्टिं पूर्धि** पूरय । **निधयेव** शृङ्खलयेवाज्ञानेन **बद्धानस्मान्मुमुग्धि** तस्मादज्ञानाद्बन्धनान्मोचय ।

अथैकोनविंशं मन्त्रमाह—

शं नो देवीरभिष्टय आपो भवन्तु
पीतये । शं योरभिस्रवन्तु नः, इति ।

आपो देव्यो **नोऽस्माकमभिष्टये पीतये**ऽभीष्टाय पानाय **शं** सुखहेतवो **भवन्तु** । किं च **नोऽस्माकं शं** सुखं यथा भवति तथा, योर्दुःखवियोगो यथा भवति **तथाऽभिस्रवन्तु** सर्वतः प्रवहन्तु ।

अथ विंशं मन्त्रमाह—

ईशाना वार्याणां क्षयन्तीश्चर्षणीनाम् ।
अपो याचामि भेषजम्, इति ।

अहमपो देवीः प्रति **भेषजं** पापविनाशकारणमौषधं **याचामि** । कीदृशीरपः । **वार्याणां** वरणीयानां कामानामीशाना दातुं समर्थाः । **चर्षणीनां** मनुष्याणां **क्षयन्ती**र्निवासहेतुभूता इति ।

अथैकविंशं मन्त्रमाह —

सुमित्रा न आप ओषधयः सन्तु दुर्मित्रास्तस्मै
भूयासुर्योऽस्मान्द्वेष्टि यं च वयं द्विष्मः, इति ।

आप ओषधयश्चेत्येता द्विविधा देवता **नोऽस्मान्प्रति सुमित्राः** सुष्ठु स्निग्धाः **सन्तु । योऽस्मदीयः** शत्रुस्तस्मै **दुर्मित्रा** दुर्हृदया विध्वंसिन्यः **सन्तु** ।

अथ द्वाविंशं मन्त्रमाह—

आपो हि ष्ठा मयोभुवस्ता न ऊर्जे
दधातन । महे रणाय चक्षसे, इति ।

हिशब्द एवकारार्थः प्रसिद्ध्यर्थो वा । हे **आपो** यूयमेव **मयोभुवः स्थ** सुखस्य

---

१ क. °तधा° । २ क. ख. ध्वान्तं स्वाज्ञा° । ३ म. °चामीति । की° । ४ ग. °भूना: । अ° । ५ ग. °विरोधिनः ।

भावयित्र्यो भवत। स्नानपानादिहेतुत्वेन सुखोत्पादकत्वं प्रसिद्धम्। तास्तादृश्यो यूयं नोऽस्मानूर्जे रसाय भवदीयरसानुभवार्थं दधातन स्थापयत। किंच महे महते रणाय रमणीयाय चक्षसे दर्शनीयाय दधातन। अस्मान्परतत्त्वसाक्षात्कारयोग्यान्कुरुतेत्यर्थः।

अथ त्रयोविंशं मन्त्रमाह—

यो वः शिवतमो रसस्तस्य भाजय-
तेह नः। उशतीरिव मातरः, इति।

वो युष्माकं शिवतमः शान्ततमः सुखैकहेतुर्यो रसोऽस्ति, इहास्मिन्कर्मणि नोऽस्मांस्तस्य भाजयत रसं प्रापयत। तत्र दृष्टान्तः—उशतीरिव मातर इति। कामयमानाः प्रीतियुक्ता मातरो यथा स्वकीयस्तन्यरसं प्रापयन्ति तद्वत्।

अथ चतुर्विंशं मन्त्रमाह—

तस्मा अरं गमाम वो यस्य क्षयाय
जिन्वथ (४)। आपो जनयथा च नः, इति।

यस्य रसस्य क्षयाय क्षयेण निवासेन जिन्वथ यूयं प्रीता भवथ तस्मै रसाय वो युष्मानरं गमाम, अलं भृशं प्राप्नुमः। किंच हे आपो यूयं नोऽस्माञ्जनयथ प्रजोत्पादकान्कुरुत।

अथ पञ्चविंशं मन्त्रमाह—

पृथिवी शान्ता साऽग्निना शान्ता सा
मे शान्ता शुचꣳ शमयतु, इति।

येयं पृथिवी देवता सेयं शान्ता सर्वोपद्रवशमनयुक्ता। न केवलं स्वयमेव किं त्वग्निना देवेन सह शान्ता। तादृशी शान्ता देवता मे मम शुचं शोकं शमयतु शान्तं करोतु।

अथ षड्विंशसप्तविंशौ मन्त्रावाह—

अन्तरिक्षꣳ शान्तं तद्वायुना शान्तं तन्मे
शान्तꣳ शुचꣳ शमयतु। द्यौः शान्ता साऽऽदित्येन
शान्ता सा मे शान्ता शुचꣳ शमयतु, इति।

पृथिवीमन्त्रवद्व्याख्येयम्।

---

१ क. °तरः। का°। २ ग. °ति। अन्तर्द्यौः शान्ता मन्त्रद्वयं पृ°।

अथाष्टाविंशं मन्त्रमाह —

पृथिवी शान्तिरन्तरिक्षꣳ शान्तिर्द्यौः शान्तिर्दिशः
शान्तिरवान्तरदिशाः शान्तिरग्निः शान्तिर्वायुः
शान्तिरादित्यः शान्तिश्चन्द्रमाः शान्तिर्नक्षत्राणि
शान्तिरापः शान्तिरोषधयः शान्तिर्वनस्पतयः
शान्तिर्गौः शान्तिरजा शान्तिरश्वः शान्तिः
पुरुषः शान्तिर्ब्रह्म शान्तिर्ब्राह्मणः शान्तिः
शान्तिरेव शान्तिः शान्तिर्मे अस्तु शान्तिः, इति ।

पृथिव्यादयः सर्वदेवता अस्मदनिष्टशमनहेतुत्वाच्छान्तिदेवतारूपाः । **ब्रह्म** वेदः । पृथिव्यादीनामुपचरितं शान्तिदेवतारूपत्वम् । या तु शान्त्यभिमानिनी देवता सा **शान्तिरेव** मुख्यमेव तस्याः शान्तित्वम्, अतः सा शान्तिदेवता **मे शान्तिरस्तु** सर्वानिष्टशमनहेतुरस्तु ।

अथैकोनत्रिंशं मन्त्रमाह—

तयाऽहꣳ शान्त्या सर्वशान्त्या मह्यं द्विपदे चतुष्पदे
च शान्तिं करोमि शान्तिर्मे अस्तु शान्तिः, इति ।

अहं यजमानः **सर्वशान्त्या** सर्वानिष्टशमनहेतुतया पूर्वोक्तगुणविशिष्टया **शान्त्या** शान्तिदेवतया **मह्यं** मच्छरीरार्थं **द्विपदे** मदीयाय मनुष्यार्थं **चतुष्पदे** मदीयाय पश्वर्थं **च शान्तिं** सर्वानिष्टशमनं **करोमि** । अतः शान्तिदेवता **मे** मदर्थं **शान्तिः** सर्वानिष्टशमनहेतुरस्तु ।

अथ त्रिंशं मन्त्रमाह—

एह श्रीश्च ह्रीश्च धृतिश्च तपो मेधा प्रतिष्ठा
श्रद्धा सत्यं धर्मश्चैतानि मोत्तिष्ठन्तमनूत्तिष्ठन्तु
मा माꣳ श्रीश्च ह्रीश्च धृतिश्च तपो मेधा प्रतिष्ठा
श्रद्धा सत्यं धर्मश्चैतानि मा मा हासिषुः, इति ।

श्रीप्रभृतयो धर्मान्ता या देवताः सन्ति, **एतानि** देवशरीराणीह कर्मसमाप्तावुत्तिष्ठन्तं **मामन्वा** समन्तादुत्तिष्ठन्तु । यानि श्रीप्रभृतीनां स्वरूपाण्येतानि **मा** [मां] **मा हासिषुर्मा** परित्यजन्तु । पुनरपि **मा मा हासिषुः**, द्विरुक्तिरादरार्था ।

अथैकत्रिंशं मन्त्रमाह—

उदायुषा स्वायुषोदोषधीनाꣳ रसेनोत्पर्ज-
न्यस्य शुष्मेणोदस्थाममृताꣳ अनु, इति।

अहममृतान्देवाननुलक्ष्याऽऽयुरादिविशेषणविशिष्टेन सोमेन सहोदस्थामुत्तिष्ठामि। चिरजीवनमायुः, तत्रापि रोगाद्युपद्रवरहितं स्वायुः। तदुभयप्रदत्वाद्रसस्य तद्रूपत्वम्। ओषधीनां पर्जन्यस्य च रसः सारम्। चतुर्भिर्विशेषणैः पृथक्क्रियापदमन्वेतुं चत्वार उच्छब्दाः।

अथ द्वात्रिंशं मन्त्रमाह—

तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्। पश्येम शरदः
शतं जीवेम शरदः शतं नन्दाम शरदः शतं
मोदाम शरदः शतं भवाम शरदः शतꣳ
शृणवाम शरदः शतं प्रब्रवाम शरदः शतमजीताः
स्याम शरदः शतं ज्योक्च सूर्यं दृशे, इति।

पुरस्तात्पूर्वस्यां दिश्युच्चरदुदयं गच्छच्छुक्रं ज्योतिःस्वरूपं देवहितं सर्वेभ्यो देवेभ्यो हितकारि चक्षुर्दृष्टेरनुग्राहकं तदादित्यमण्डलं शरदः शतं शतसंख्याकान्संवत्सरान्सर्वदा पश्येम। तत्प्रसादाज्जीवनादिव्यापारांश्च प्राप्नवाम। नन्दाम द्रव्यैः समृद्धा भूयास्म। मोदाम तद्भोगेन हृष्टाः स्म। भवाम स्वस्थाने निवसाम। शृणवाम वेदशास्त्ररहस्यं गुरुमुखादवगच्छाम। प्रब्रवाम शिष्येभ्यः प्रकर्षेण कथयाम। अजीताः शत्रुणा केनाप्यजिताः। किंच ज्योग्दीर्घं कालं सूर्यं दृशे द्रष्टुं समर्था भूयास्म।

अथ त्रयस्त्रिंशं मन्त्रमाह—

य उदगान्महतोऽर्णवाद्विभ्राजमानः सरि-
रस्य मध्यात्स मा वृषभो लोहिताक्षः
सूर्यो विपश्चिन्मनसा पुनातु, इति।

यः सूर्यो महतः प्रौढादर्णवात्पूर्वसमुद्रात्तत्रापि विशेषतः सरिरस्य जलस्य मध्याद्विभ्राजमानो विशेषेण दीप्यमान उदगादुदयं गच्छति, स सूर्यो मनसा मां पुनातु शोधयतु। कीदृशः सूर्यः। वृषभः कामानां वर्षयिता। लोहिताक्षो रक्तवर्णाक्षियुक्तः। विपश्चित्सर्वज्ञः।

---

१ ध. °शे ॥ ५ ॥ २ क. ख. स्थले। ३ ख. ग. °गच्छेम।

अथ चतुस्त्रिंशं मन्त्रमाह—

ब्रह्मणः श्रोतन्यसि ब्रह्मण आणी स्थो ब्रह्मण आव-
पनमसि धारितेयं पृथिवी ब्रह्मणा मही धारितमनेन
महदन्तरिक्षं दिवं दाधार पृथिवीꣳ सदेवां यदहं
वेद तदहं धारयाणि मा मद्वेदोऽधि विस्रंसत्, इति ।

अत्र वेदः संबोध्यते । हे श्रुते त्वं **ब्रह्मणः** परमात्मवस्तुनः **श्रो(श्रो)तनी** श्र(स्र)वणहेतुभूताऽसि ब्रह्मतत्त्वं बोधयसीत्यर्थः । हे मदीये श्रोत्रे युवां **ब्रह्मणो** वेदस्याऽऽणी **स्थो** नेतृणी भवथः, वेदं शृणुथ इत्यर्थः । हे मनो* **ब्रह्मणो** वेदस्याऽऽवपनं धारणस्थानमसि । इयं **मही** महती **पृथिवी ब्रह्मणा** वेदप्रतिपाद्येन परमात्मना **धारिता** । महत्प्रौढमन्तरिक्षमनेन परमात्मना धारितम् । **पृथिवीं** विस्तीर्णां **सदेवां** देवसहितां **दिवं दाधार** परमात्मा धृतवान् । **यत्** परमात्मतत्त्वं तत्प्रतिपादकं वेदवाक्यं वाऽहं यजमानो **वेद** जानामि । **तदुभयमहं** सर्वदा मनसि **धारयाणि** । स वेदो **मन्मत्तः** सकाशादध्याधिक्येन **मा विस्रंसत्**, विस्रस्तो मा भूत् ।

अथ पञ्चत्रिंशं मन्त्रमाह—

मेधामनीषे माऽऽविंशतां समीची भूतस्य भव्य-
स्यावरुद्ध्यै सर्वमायुरयाणि सर्वमायुरयाणि, इति ।

मेधा धारणशक्तिः, **मनीषा** ग्रहणशक्तिः, ते उभे **समीची** अनुकूले सत्यौ **मां** यजमानमाविशतां सर्वतः प्रविशताम् । किमर्थम् । **भूतस्य** पूर्वमधीतस्य **भव्यस्या**ध्येष्यमाणस्य चावरुद्ध्यै स्वीकारार्थम् । एतत्सिद्ध्यर्थमेव **सर्वमायुरयाणि** प्राप्नवानि । द्विरुक्तिरादरार्था ।

अथ षट्त्रिंशं मन्त्रमाह—

आभिर्गीर्भिर्यदतो न ऊनमाप्याययय हरिवो वर्धमानः । यदा
स्तोतृभ्यो महि गोत्रा रुजासि भूयिष्ठभाजो अधं ते स्याम, इति ।

हे **हरिवो**ऽश्वयुक्तेन्द्राऽऽभिर्गीर्भिरस्मदीयस्तुतिभिर्वर्धमानस्त्वमतोऽस्मत्कर्मणा **ऊनमङ्गं** नोऽस्मदर्थमाप्याययाभिवर्धय । **यदा** यस्मिन्काले **स्तोतृभ्यः** स्तोत्रनुग्र-

---

* एतदन्तो ग्रन्थो भाष्ये त्रुटितः क. ख. पुस्तकयोः ।

---

१ ग. °ह्मणश्रोत° ।

हार्थं महि गोत्रा महतो मेघान्रुजासि भग्नान्करोषि । अध तदा वयं ते तवानुग्रहाद्भूयिष्ठभाजः स्याम प्रभूतधनानां लब्धारो भूयास्म ।

अथ सप्तत्रिंशं मन्त्रमाह—

ब्रह्म प्रावादिष्म तन्नो मा हासीत् । ॐ
शान्तिः शान्तिः शान्तिः (५) , इति ॥
परावतो दधातु बद्धाञ्जिन्वथं दृशे सप्त च ॥
इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठके
द्वाचत्वारिंशोऽनुवाकः ॥ ४२ ॥

एवमुक्तेन प्रकारेण ब्रह्म परमात्मप्रतिपादकमन्त्रजातं प्रावादिष्म प्रकर्षेण वयं कथितवन्तः । तद्ब्रह्मतत्त्वं तस्य प्रतिपादकं वाक्यं च नोऽस्मान्मा हासीत्, कदाचिदपि मा परित्यजतु । हे प्रणवप्रतिपाद्य परमात्मन्, आध्यात्मिकानां ज्वरशिरोव्यथादिकृतानां विघ्नानां शान्तिरस्तु आधिभौतिकानां चोरव्याघ्रादिकृतानां विघ्नानां शान्तिरस्तु । आधिदैविकानां यक्षराक्षसादिकृतानां विघ्नानां शान्तिरस्तु ।

अथ नमो वाच इत्यारभ्य शं नो वातः पवतामित्यन्तैरनुवाकैः संपाद्यं प्रवर्ग्यं स्तोतुं तस्य प्रवर्ग्यस्य नामानि दर्शयति—

प्रजापतिः संभ्रियमाणः । सम्राट्संभूतः । घर्मः प्रवृक्तः ।
महावीर उद्भासितः । असौ खलु वावैष आदित्यः ।
यत्प्रवर्ग्यः । स एतानि नामान्यकुरुत, इति ।
(प्रपा० ५ । अनु० ११ । विभा० १)

अस्य प्रवर्ग्यस्य तत्तदवस्थाभेदेन प्रजापत्यादीनि नामानि संपद्यन्ते । यदा मृद्वराहविहतवल्मीकवपादिसंभारैः संभ्रियमाणत्वदशापन्नो भवति तदा प्रजापतिरित्येतस्य नाम । सर्वात्मना संभृतत्वदशापन्नस्य सम्राडिति नाम । प्रवृञ्जनदशापन्नस्य घर्म इति नाम । उद्भासनदशापन्नस्य महावीर इति नाम । एताभिर्दशाभिरवस्थावत्स्वरूपं तेन रूपेणाऽऽदित्य इति नाम । स प्रवर्ग्य एवमेतानि नामान्यकुरुत संपादितवान् ।

नामवेदनं प्रशंसति—

य एवं वेद । विदुरेनं नाम्ना, इति ।
(प्रपा० ५ । अनु० ११ । विभा० २)

देवदत्तोपाध्याय इत्येवं तदीयं नाम सर्वैर्ज्ञातं भवति ।

---

१ घ. ॥ ६ ॥ । २ क. ख. ग. ज्वरादिशि° । ३ क. ग. °त्यादिना° । ४ ख. °णद° । ५ ग. °त्येवास्य । ६ ख. °तद° । ७ क. घ. प्रवर्ग्य ।

अथ नामविशेषव्यवहारप्रदर्शनेन प्रशंसति—

ब्रह्मवादिनो वदन्ति (१)। यो वै वसीयाꣳसं यथानाममुपचरति। पुण्यार्तिं वै स तस्मै कामयते। पुण्यार्तिमस्मै कामयन्ते। य एवं वेद। तस्मादेवं विद्वान्। घर्म इति दिवाऽऽचक्षीत। सम्राडिति नक्तम्। एते वा एतस्य प्रिये तनुवौ। एते अस्य प्रिये नामनी। प्रिययैवैनं तनुवा (२)। प्रियेण नाम्ना समर्धयति। कीर्तिरस्य पूर्वा गच्छति जनतामायतः, इति।

(प्रपा० ५। अनु० ११। विभा० ३)

यो वै यः कोऽपि पुमान्भृत्यो **वसीयाꣳसमतिशयेन** वसुमन्तं धनिकं राजानमामात्यादिकं वा **यथानामं** तदीयं नामानतिक्रम्य नामकरणकाले संपादितेनैव **नाम्नोपचरति,** अधिपते स्वामिन्नित्यादिशब्दैर्विना भो देवदत्तेत्यादिकेनैव मुख्येन नाम्ना तमाह्वयति। **स** भृत्यस्तस्मै धनिकाय **पुण्यार्तिं वै** भाग्यहानिमेव **कामयते**। उत्तमोपचारयोग्ये नीचव्यवहारात्। अथवा **स** धनिको राजादिस्तस्मै स्वाभाविकनाम्ना व्यवहरते भृत्याय **पुण्यार्तिं** धनादिहानिं **कामयते** दण्डयितुमिच्छति। न केवलं राजादिरेव किंतु **यो मूढ एवं वेद** स्वाभाविकनाम्नैव व्यवहारं निश्चिनोति, **अस्मै** मूढाय राजादिप्रभुपारिसरवर्तिनः सर्वेऽपि पुरुषाः **पुण्यार्तिं** ताडनधनहान्यादिकं **कामयन्ते**। एवं **ब्रह्मवादिन** आहुः। यस्मादेवं **तस्मादेवं विद्वान्**नामान्तरेणैव प्रभुर्व्यवहरणीय इत्येवं जानन्पुरुषः प्रवर्ग्यं प्रत्यहनि **घर्म** इति नाम्ना व्यवहरेत्। रात्रौ तु **सम्राडिति** नाम्ना। तत्र घर्मशब्देनोच्यमाना दीप्यमाना या तनूः सम्राट्शब्देनोच्यमाना सम्यग्राजमाना या तनूरेते उभे अप्येतस्य प्रवर्ग्यस्य **प्रिये** शरीरे। **एते** घर्मसम्राट्शब्दरूपे **अस्य** प्रवर्ग्यस्य **प्रिये नामनी**। तस्मादेताभ्यां शब्दाभ्यां व्यवहरन्पुरुषः **प्रिययैव तनुवा** देवादिरूपेण **प्रियेण** च **नाम्ना** तच्छरीरोचितेनैव प्रवर्ग्यं समृद्धं करोति। तथा सति **जनतामायतो** जनसमूहं सभां प्रत्यागच्छतोऽस्य घर्मादिनामभिर्व्यवहारिणः पुरुषस्य **कीर्तिः पूर्वाऽस्मादपि** पुरुषात्पूर्वभाविनी **गच्छति**। अस्य पुरुषस्याऽऽगमनात्प्रागेव सर्वेऽपि सभानिष्ठाः यतचित्ता(त्तोऽ)भिज्ञोऽयं महात्मेत्येवमेनं प्रशंसन्ति।

घर्मादिनामविशेषद्वारा प्रवर्ग्यस्य प्रशंसां कृत्वा गायत्रीछन्दोगतसंख्यासाम्येनापि प्रशंसति—

गायत्री देवेभ्योऽपाक्रामत्। तां देवाः प्रवर्ग्येणैवानुव्यभवन्। प्रवर्ग्येणाऽऽप्नुवन्। यच्चतुर्विꣳशतिकृत्वः प्रवर्ग्यं

---

१ क. ख. °रणे पुरु°। २ ग. °ष्ठा जना रुचिताभि°। ३ क. ख. °भिज्ञायं°।

प्रवृणक्ति । गायत्रीमेव तदनु विभवति । गायत्रीमाप्नोति । पूर्वोऽस्य जनं यतः कीर्तिर्गच्छति, इति ।

(प्रपा० ५ । अनु० ११ । विभा० ४)

पुरा कदाचिदपरक्ता सती **गायत्री** देवी **देवेभ्यः** सकाशादपाक्रामत् । तदा **देवाः** प्रवर्ग्यमनुष्ठाय **तेनैव प्रवर्ग्येण** तां गायत्रीमनुव्यभवन्, अन्वेष्टुं विभवः समर्था अभवन् । अन्विष्य च तेन **प्रवर्ग्येण तां** गायत्रीं **प्राप्नुवन्** । अतो यदि द्वादशसु दिनेष्वेकैकस्मिन्दिने द्विर्द्विरित्येवं **चतुर्विंशतिकृत्वः प्रवर्ग्यमनुतिष्ठेत्, तत्तदा गायत्रीमेवानुगन्तुं** समर्थो भवति । चतुर्विंशतिसंख्याया गायत्र्यक्षरानिदत्वात् । अतः संख्यासामान्याद्गायत्रीं **प्राप्नोति । जनं यतः** सभां गच्छतोऽस्य चतुर्विंशतिवारं प्रवर्ग्यानुष्ठायिनः पुरुषस्य **कीर्तिस्तस्मादपि** पूर्वभाविनी सती सभां प्राप्नोति ।

पुनरपि प्रकारान्तरेणावस्थाविशेषगतैर्नामभिः प्रशंसति—

दैश्वदेवः सꣳसन्नः (३) । वसवः प्रवृक्तः । सोमोऽभिकीर्यमाणः । आश्विनः पयस्यानीयमाने । मारुतः क्वथन् । पौष्ण उदन्तः । सारस्वतो विष्यन्दमानः । मैत्रः शरो गृहीतः । तेज उद्यतो वायुः । हरियमाणः प्रजापतिः । हूयमानो वाग्घुतः (४) । असौ खलु वावैष आदित्यः । यत्प्रवर्ग्यः । स एतानि नामान्यकुरुत, इति ।

(प्रपा० ५ । अनु० ११ विभा० ५)

संसन्नः सम्यगासादनदशां प्राप्तो यः प्रवर्ग्यस्तस्य **वैश्वदेव** इति नाम, तेन हि विश्वे देवास्तुष्यन्ति । प्रवृक्तनदशांपन्नस्य **वसव** इति नाम, वसूनां प्रीतिहेतुत्वात् । प्रवृक्तने सति पात्रस्यान्तेर इतस्ततश्चलनमभिकीर्यमाणत्वं तद्दशापन्नस्य **सोम** इति नाम, तत्प्रीतिहेतुत्वात् । आनीयमानक्षीरत्वदशापन्नस्याऽऽश्विन इति नाम, तेन ह्यश्विनौ तृप्यतः । पयसा सह क्वथनदशापन्नस्य **मारुत** इति नाम । पात्रस्यान्तपर्यन्तमुद्गमन**मुदन्तः**, तदवस्थापन्नस्य **पौष्ण** इति नाम । पात्रादप्युन्नतत्वं विष्यन्दनं तद्दशापन्नस्य **सारस्वत** इति नाम । पचनबाहुल्येन घनीभावात्प्रतीयमानः **शरः** शराकारग्रहणदशापन्नस्य **मैत्र** इति नाम । शफाभ्यां खरादुद्यमनदशापन्नस्य **तेज** इति नाम । आहवनीयं प्रति ह्रियमाणत्वदशापन्नस्य **वायुरि**ति नाम । आहवनीये हूयमानत्वदशापन्नस्य **प्रजापतिरि**ति नाम । हुतत्वदशापन्नस्य **वागि**ति नाम । इत्येताभिर्दशा-

---

१ ख. °शतिःकृ° । २ घ. °ष्णमुद° । ३ क. ग. °विष्यन्द° । ४ क. ख. °शायां तस्य । ५ ख. °न्तरे निवसतश्चल° । ६ ग. °रद° । ७ क. °त्वं निष्प° । ८ ग विष्यन्द° । ९ क. ख. °म. वाकेन वा° । १० ख. ग. °भाववत्प° । ११ ग. °म एना° ।

भिरवस्थावान्यः **प्रवर्ग्यस्तस्याऽऽदित्य** इति नाम । **स** प्रवर्ग्य एवं तत्तद्देवताप्रीतिहेतुत्वात्स्वस्यैतानि **नामान्यकुरुत** संपादितवान् ।

नामवेदनं प्रशंसति—

य एवं वेद । विदुरेनं नाम्ना, इति ।

(प्रपा० ५ । अनु० ११ । विभा० ६)

अथ प्रश्नोत्तराभ्यां +मृन्मयस्य महावीरस्य होमसाधनत्वमुपपादयति—

ब्रह्मवादिनो वदन्ति । यन्मृन्मयमाहुतिं नाश्नुतेऽथ । कस्मादेषोऽश्नुत इति । वागेष इति ब्रूयात् । वाच्येव वाचं दधाति (५) । तस्मादश्नुते, इति ।

(प्रपा० ५ । अनु० ११ । विभा० ७)

दारुमयस्य होमसाधनत्वं सर्वत्र दृष्टं न तु क्वचिदपि मृन्मयस्य । अत एव साकंप्रस्थायीयप्रकरणे समाम्नायते—"दारुपात्रेण जुहोति नहि मृन्मयमाहुतिमानशे" इति । एवं सत्यत्र कस्मात्कारणादेव महावीर आहुतिसाधनत्वं प्राप्नोतीति ब्रह्मवादिनां प्रश्नः । तत्राभिज्ञः पुरुषो **वागेष** इत्युत्तरं **ब्रूयात्** । **एष** महावीरो मन्त्रैर्निष्पादितत्वाद्वागात्मकः । अतोऽनेन होमे सति वाचि मन्त्रनिष्पन्ने महावीर **एव वाचं** मन्त्रनिष्पादितामाहुतिं संपादयति । **तस्मात्**कारणान्मृन्मयोऽप्ययं महावीर आहुतिमर्हति ।

प्रकारान्तरेण द्वादशधा विभागमुपजीव्य प्रशंसति—

प्रजापतिर्वा एष द्वादशधा विहितः । यत्प्रवर्ग्यः । यत्प्रागवकाशेभ्यः । तेन प्रजा असृजत । अवकाशैर्देवासुरानसृजत । यदूर्ध्वमवकाशेभ्यः । तेनान्नमसृजत । अन्नं प्रजापतिः । प्रजापतिर्वावैषः (६), इति ।

(प्रपा० ५ । अनु० ११ । विभा० ८)

वदन्ति तनुवा सꣳसन्नो हूयमानो वाग्घुतो दधात्येषः ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके पञ्चमप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

योऽयं प्रवर्ग्यः स एष द्वादशधा विभक्तः **प्रजापतिरेव** । तत्कथमिति तदुच्यते । अवकाशमन्त्रेभ्यः प्राचीनो यो भागस्तेन भागेन प्रजापतिः **प्रजाः** सृष्टवान् । अपश्यं गोपामित्यनुवाके समाम्नाता दश मन्त्रा अवकाशनामकाः । एतच्च तद्ब्राह्मणे समाम्नातम्—"नवैतेऽवकाशा भवन्ति पत्नियै दशमः" इति । नमो युञ्जत इत्यादिभिः षड्भिरनुवाकैरुक्तो मन्त्रसमूहोऽवकाशेभ्यः प्राचीनो भागस्तेन प्रजासृष्टिः । अवका-

* अग्नाग्ने च ग. पुस्तके मृण्मयेतिमूर्धन्यघटित एव पाठ उपलभ्यते ।

१ ग. वाचो । २ क. ग. °काः । ततश्च तद्ब्रा° ।

शाख्यैस्तु दशभिर्मन्त्रैर्देवासुरानसृजत देवस्य त्वा सवितुः प्रसव इत्यादिकोऽवकाशेभ्य ऊर्ध्वो मन्त्रभागः, **तेन** प्रजापतिरन्नमसृजत। एवं पूर्वोत्तरभागौ द्वौ, मध्ये दशावकाशा इति द्वादशप्रकारो मन्त्रसंग्रहः प्रजापतिस्वरूपः। **अन्नं** च प्रजापतिसृष्टत्वात्प्रजापतिस्वरूपम्। तादृशः **प्रजापतिरेवैष** प्रवर्ग्यरूपः। एवमस्य प्रशस्तत्वं द्रष्टव्यम्।

अथ दिनविशेषेषु फलविशेषकथनेन प्रवर्ग्यं प्रशंसति—

सविता भूत्वा प्रथमेऽहन्प्रवृज्यते। तेन कामाꣳ एति। यद्द्वितीयेऽहन्प्रवृज्यते। अग्निर्भूत्वा देवानेति। यत्तृतीयेऽहन्प्रवृज्यते। वायुर्भूत्वा प्राणानेति। यच्चतुर्थेऽहन्प्रवृज्यते। आदित्यो भूत्वा रश्मीनेति। यत्पञ्चमेऽहन्प्रवृज्यते। चन्द्रमा भूत्वा नक्षत्राण्येति (१)। यत्षष्ठेऽहन्प्रवृज्यते। ऋतुर्भूत्वा संवत्सरमेति। यत्सप्तमेऽहन्प्रवृज्यते। धाता भूत्वा शाक्करीमेति। यदष्टमेऽहन्प्रवृज्यते। बृहस्पतिर्भूत्वा गायत्रीमेति। यन्नवमेऽहन्प्रवृज्यते। मित्रो भूत्वा त्रिवृत इमाँल्लोकानेति। यद्दशमेऽहन्प्रवृज्यते। वरुणो भूत्वा विराजमेति (२)। यदेकादशेऽहन्प्रवृज्यते। इन्द्रो भूत्वा त्रिष्टुभमेति। यद्द्वादशेऽहन्प्रवृज्यते। सोमो भूत्वा सुत्यामेति, इति।

(प्रपा० ५। अनु० १२। विभा० १)

प्रथमे दिवसे **प्रवृज्यत** इति **यत्तेनानुष्ठानेनायं सवितृदेवो भूत्वा कामान्प्राप्नोति।** एवमुत्तरेष्वपि वाक्येषु योजनीयम्।

द्वादशादिनानुष्ठानं प्रशस्योपसद्व्रतः प्राचीनप्रतीचीनकालानुष्ठाने **प्रशंसति**—

यत्पुरस्तादुपसदां प्रवृज्यते। तस्मादितः पराङ्मूँल्लोकाꣳस्तपन्नेति। यदुपरिष्टादुपसदां प्रवृज्यते। तस्मादमुतोऽर्वाङिमाँल्लोकाꣳस्तपन्नेति, इति।

(प्रपा० ५। अनु० १२। विभा० २)

प्रवर्ग्य आदित्यस्वरूपः। उपसदो लोकस्वरूपाः। तथा सति प्रतिदिनं प्रवर्ग्यानुष्ठानात्पश्चादुपसदोऽनुष्ठानादादित्योऽधोभागवर्ती **पराङूर्ध्वाभिमुखः सन्नितोऽप्युपरितनानमून्स्वर्गादिलोकांस्तपन्नेति** प्रकाशयन्संचरति। तथा पूर्वपूर्वदिनगतेभ्य **उपसद्व्रत** उत्तरोत्तरदिनगतः प्रवर्ग्य **उपरिष्टाद्वर्तते। तस्मादसावादित्य** ऊर्ध्वलोकवर्ती **सन्नमुतोऽर्वाङ्स्वर्गलोकादधोमुखो भूत्वेमान्भूरादीँल्लोकान्प्रकाशयन्संचरति।**

---

१ क. ख. °सुरांश्चासु° । २ ग. मध्यदेशोऽवकाश इ° । ३ क. ख. °वृञ्चत । ४ क. ख. °नका° । ५ क. ज. °यन्नच° ।

वेदनं प्रशंसति—

य एवं वेद । ऐव तपति (३) , इति ।
(प्रपा० ५ । अनु० १२ । विभा० ३)

नक्षत्राण्येति विराजमेति तपति ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके पञ्चमप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

देवा वै सत्रꣳ सावित्रं परिश्रिते ब्रह्मन्प्रचरिष्यामोऽ-
ग्निष्ट्वा शिरो ग्रीवा देवस्य रशनां विश्वा आशा घर्म या ते
प्रजापतिꣳशुक्रं प्रजापतिः संभ्रियमाणः सविता द्वादश (१२)।
देवा वै सत्रꣳस खदिरः परिश्रितेऽभिपूर्वमथो
रक्षसां ग्रैष्मावेव ब्रह्म वै देवानामश्विना घर्मं
प्राणो वा इन्द्रतमोऽग्निर्वृषा हरिर्यो वै वसीयाꣳसं
यथानाममष्टोत्तरशतम् (१०८) ।
शं नः०तन्नो मा हासीत् ।
ॐ शान्तिः शान्तिः शान्तिः ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके पञ्चमप्रपाठकः समाप्तः ।

हरिः ॐ

यः पुमानेवमुक्तेन प्रकारेण प्रवर्ग्यस्याधस्तादुपरिष्टाच्चावस्थानं जानाति सोऽयं सर्वतः प्रकाशि(शी?)त **एव** । तदेवं ब्राह्मणगताभ्यामेका*दशद्वादशानुवाकाभ्यां द्विचत्वारिंशदनुवाकोक्तमन्त्रैरनुष्ठेयः प्रवर्ग्यः प्रशस्तः ।

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये चतुर्थप्रपाठके द्विचत्वारिंशोऽनुवाकः ॥ ४२ ॥

नमो युञ्जते वृष्णो अश्वस्य ब्रह्मन्प्रवर्ग्येण ब्रह्मन्प्रचरिष्यामो दश प्राचीरपश्यं गोपां देवस्य समुद्रायेषे पीपिहि घर्म या ते महीनां चत्वार्यस्कान्या पुरस्तात्सप्त सप्त प्राणाय त्रीणि पूष्णे चत्वार्युदस्यैकादश यास्ते सप्ताग्निर्ध्रुवः सीदैकोनविꣳशतिर्भूरूर्ध्वस्त्रिꣳशद्धर्मयि षोडश यास्ते घोरा नव स्त्रिक्चाष्टौ धुनिश्च द्वे उग्रश्च त्रीण्यहोरात्रे पञ्च खदत्रीणि विगाः सप्तदशासृङ्मुखश्चत्वारि यदेतदृक्सः पञ्च यदीषितश्चत्वारि दीर्घमुखि त्रीणीत्था चत्वारि यदेतद्भूतानि षट्प्रसार्य त्रीण्यत्रिणा दशाऽऽहरावद्य

---

* अत्राऽऽदर्शपुस्तकेषु "एकादशद्वादशानुवाकगताभ्याम्" इत्येव पाठ उपलभ्यते ।

१ क. ख. °द्वाऽव° ।

ब्रह्मणा षट्षडुत्तुदाष्टौ भूः षट्पृथिव्यष्टषष्टिः शं नः सप्तपञ्चाश-
द्द्विचत्वारिꣳशत् ।

नमो युञ्जते *ब्रह्मन्प्रवर्ग्येण मयि रुगन्तरिक्षेण घर्म या ते प्राणाय
स्विक्चेत्था दक्षं मे पञ्चाशीतिः ॥ ८५ ॥

नमो वाचे या चोदिता या चानुदिता तस्यै वाचे नमो नमो वाचे नमो वाचस्पतये नम ऋषिभ्यो मन्त्रकृद्भ्यो मन्त्रपतिभ्यो मा मामृषयो मन्त्रकृतो मन्त्रपतयः परादुर्माऽहमृषीन्मन्त्रकृतो मन्त्रपतीन्परादां वैश्वदेवीं वाचमुद्यासꣳ शिवामद्स्तां जुष्टां देवेभ्यः शर्म मे द्यौः शर्म पृथिवी शर्म विश्वमिदं जगत् । शर्म चन्द्रश्च सूर्यश्च शर्म ब्रह्मप्रजापती । भूतं वदिष्ये भुवनं वदिष्ये तेजो वदिष्ये यशो वदिष्ये तपो वदिष्ये ब्रह्म वदिष्ये सत्यं वदिष्ये तस्मा अहमिदमुपस्तरणमुपस्तृण उपस्तरणं मे प्रजायै पशूनां भूयादुपस्तरणमहं प्रजायै पशूनां भूयासं प्राणापानौ मृत्योर्मा पातं प्राणापानौ मा मा हासिष्टं मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासꣳ

---

* ब्रह्मन्प्रचरिष्यामोऽपश्यं गोपां समुद्राय वयमनुकामाम पूष्णे धुनिꣳ यदेतद्धु-
तानि तच्छंकेयमष्टाशीतिः ॥ ८८ ॥ इति पाठो ग. पुस्तके ।

---

१ ग. °त् यु° ।

शुश्रूषेण्यां मनुष्येष्वस्तं मा देवा अवन्तु शोभायै पितरोऽनुमदन्तु ।

ॐ शान्तिः शान्तिः शान्तिः ।

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके चतुर्थप्रपाठकः समाप्तः ॥ ४ ॥

चतुर्थपञ्चमाभ्यां प्रपाठकाभ्यां प्रपञ्चितः ।
मन्त्रब्राह्मणरूपाभ्यां प्रवर्ग्योऽयमशेषतः ॥
वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्वीरबुक्कणसाम्राज्यधुरंधरश्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये चतुर्थप्रपाठकः समाप्तः ॥ ४ ॥

चतुर्थप्रपाठकेन सह पञ्चमप्रपाठकोऽपि समाप्तः ।

अथ कृष्णयजुर्वेदीयतैत्तिरीयारण्यके पञ्चमप्रपाठकस्याऽऽरम्भः ।

तत्र प्रथमोऽनुवाकः ।

हरिः ॐ ।

*शं नः० तन्नो मा हांसीत् ।

ॐ शान्तिः शान्तिः शान्तिः ।

ॐ देवा वै सत्रमासत । ऋद्धिंपरिमितं यशस्कामाः । तेऽब्रुवन् । यन्नः प्रथमं यश ऋच्छात् । सर्वेषां नस्तत्सहासदिति । तेषां कुरुक्षेत्रं वेदिरासीत् । तस्यै खाण्डवो दक्षिणार्ध आसीत् । तूघ्नमुत्तरार्धः । परीणद्ध्वनार्धः । मरवं उत्करः (१) । तेषां मरवं वैष्णवं यश आर्च्छत्(१+)

तत्कर्यकामयत । तेनार्पाक्रामत् । तं देवा अन्वायन् । यशोऽवरुरुत्समानाः । तस्यान्वागतस्य । सव्याद्धनुरजायत । दक्षिणादिषवः । तस्मादिषुधन्वं पुण्यजन्म । यज्ञजन्मा हि (२) । तमेकꣳ सन्तम् । बहवो नाभ्यधृष्णुवन् । तस्मादेकमिषुधन्विनम् । बहवोऽनिषुधन्वा नाभिधृष्णुवन्ति (२) ।

सोऽस्मयत् । एकं मा सन्तं बहवो नाभ्यधर्षिषुरिति । तस्य सिष्मियाणस्य तेजोऽपाक्रामत् । तद्देवा ओषधीषु न्यमृजुः । ते श्यामाकाः अभवन् । स्मयाका वै नामैते (३) । तत्स्मयाकानाꣳ स्मयाकत्वम् । तस्मादीक्षितेनापिपृष्ठ्यं स्मेतव्यम् । तेजसो धृत्यै (३) ।

---

* चतुर्थप्रपाठकस्यान्तिमोऽनुवाक एतत्प्रपाठकस्य शान्तिरिति बोध्यम् । अत्र चानतिविस्तराय तदाद्यन्तौ लिखितौ । + लघ्वायसाक्षरैर्मुद्रितोऽयमङ्कश्चतुर्थप्रपाठकेन सहैतत्प्रपाठकव्याख्यानावसरे भाष्यकृत्कृतानामेतत्प्रपाठकस्थतत्तदनुवाकवाक्यविभागानां संख्याबोधकः । चतुर्थप्रपाठके मुद्रितमेतत्प्रपाठकमूलमप्यनेनाङ्केनान्वितमस्ति ।

१ प्रथमविभागस्य भाष्यं २१९ पृष्ठे द्रष्टव्यम् ।
२ द्वितीयविभागस्य भाष्यं २१९ पृष्ठे द्रष्टव्यम् ।
३ तृतीयविभागस्य भाष्यं २२० पृष्ठे द्रष्टव्यम् ।

स धनुः प्रतिष्कभ्यातिष्ठत्। ता उपदीकां अब्रुवन्वरं वृणामहै। अथ व इमꣳ रन्धयाम। यत्र क्व च खनाम। तदपोऽभितृणदामेति। तस्मादुपदीका यत्र क्व च खनन्ति। तदपोऽभितृन्दन्ति (४)। वारे वृतꣳ ह्यासाम्। तस्य ज्यामप्यादन्। तस्य धनुर्विप्रवमाणꣳ शिर उदवर्तयत्। तद्द्यावापृथिवी अनुप्रावर्तेत। यत्प्रावर्तेत। तत्प्रवर्ग्यस्य प्रवर्ग्यत्वम्। यद्द्याꣳ३ इत्यपतत्। तद्घर्मस्य घर्मत्वम्। महतो वीर्यमपप्तदिति। तन्महावीरस्य महावीरत्वम् (५)। यदस्याः समभरन्। तत्सम्राजः सम्राट्त्वम् (४)

तꣳ स्तृतं देवतास्त्रेधा व्यगृह्णत। अग्निः प्रातःसवनम्। इन्द्रो माध्यंदिनꣳ सवनम्। विश्वे देवास्तृतीयसवनम्। तेनार्पशीर्ष्णा यज्ञेन यजमानाः। नाऽऽशिषोऽवारुन्धत। न सुवर्गं लोकमभ्यजयन् (५)।

ते देवा अश्विनावब्रुवन् (६)। भिषजौ वै स्थः। इदं यज्ञस्य शिरः प्रतिधत्तमिति। तावब्रूतां वरं वृणावहै। ग्रहं एव नावत्रापि गृह्यतामिति। ताभ्यामेतमाश्विनमगृह्णन्। तावेतद्यज्ञस्य शिरः प्रत्यधत्ताम्। यत्प्रवर्ग्यः। तेन सशीर्ष्णा यज्ञेन यजमानाः। अवाऽऽशिषोऽरुन्धत। अभि सुवर्गं लोकमजयन् (६)।

यत्प्रवर्ग्यं प्रब्रूणक्ति। यज्ञस्यैव तच्छिरः प्रतिदधाति। तेन सशीर्ष्णा यज्ञेन यजमानः। अवाऽऽशिषो रुन्धे। अभि सुवर्गं लोकं जयति। तस्मादेष

---

४ चतुर्थविभागस्य भाष्यं २२० पृष्ठे द्रष्टव्यम्।

५ पञ्चमविभागस्य भाष्यं २२१ पृष्ठे द्रष्टव्यम्।

६ षष्ठविभागस्य भाष्यं २२२ पृष्ठे द्रष्टव्यम्।

आश्विनमश्वया इव। यत्प्रवर्ग्यः (७) (७)।
उत्करो होते तृन्दन्ति महावीरत्वमब्रुवन्नजयन्सप्त च ॥
इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके पञ्चमप्रपाठके
प्रथमोऽनुवाकः ॥ १ ॥

अथ पञ्चमे द्वितीयोऽनुवाकः।

सावित्रं जुहोति प्रसूत्यै (१)।

चतुर्गृहीतेन जुहोति। चतुष्पादः पशवः। पशूनेवावरुन्धे। चतस्रो दिशः। दिक्ष्वेव प्रतितिष्ठति (२)।

छन्दाꣳसि देवेभ्योऽपाक्रामान्। न वो भागानि हव्यं वक्ष्याम इति। तेभ्य एतच्चतुर्गृहीतमधारयन्। पुरोनुवाक्यायै याज्यायै (१)। देवतायै वषट्काराय। यच्चतुर्गृहीतं जुहोति। छन्दाꣳस्येव तत्प्रीणाति। तान्यस्य प्रीतानि देवेभ्यो हव्यं वहन्ति (३)।

ब्रह्मवादिनो वदन्ति। होतव्यं दीक्षितस्य गृहाऽइ न होतव्याऽइमिति। हविर्वै दीक्षितः। यज्जुहुयात्। हविष्कृतं यजमानमग्नौ प्रदध्यात्। यन्न जुहुयात् (२) (४)।

यज्ञपरुरन्तरियात्। यजुरेव वदेत्। न हविष्कृतं यजमानमग्नौ प्रदधाति। न यज्ञपरुरन्तरेति (५)।

गायत्री छन्दाꣳस्यत्यमन्यत। तस्यै वषट्कारोऽभ्यघ्न्य शिरोऽच्छिनत्। तस्यै द्वेधा रसः परापतत्। पृथिवी-

---

७ सप्तमविभागस्य भाष्यं २२२ पृष्ठे द्रष्टव्यम्।
१ प्रथमविभागस्य भाष्यं २२३ पृष्ठे द्रष्टव्यम्।
२ द्वितीयविभागस्य भाष्यं २२३ पृष्ठे द्रष्टव्यम्।
३ तृतीयविभागस्य भाष्यं २२३ पृष्ठे द्रष्टव्यम्।
४ चतुर्थविभागस्य भाष्यं २२४ पृष्ठे द्रष्टव्यम्।
५ पञ्चमविभागस्य भाष्यं २२४ पृष्ठे द्रष्टव्यम्।

मर्धः प्राविशत्। पशूनर्धः। यः पृथिवीं प्राविशत् (३)। स खदिरोऽभवत्। यः पशून्। सोऽजाम्। यत्खादिर्यश्रिर्भवति। छन्दसामेव रसेन यज्ञस्य शिरः संभरति(६)।

यदौदुम्बरी। ऊर्वा उदुम्बरः। ऊर्जैव यज्ञस्य शिरः संभरति। यद्वैणवी। तेजो वै वेणुः (४)। तेजसैव यज्ञस्य शिरः संभरति। यद्वैकङ्कती। भा एवावरुन्धे(७)।

देवस्य त्वा सवितुः प्रसव इत्यभिमादत्ते प्रसूत्यै। अश्विनोर्बाहुभ्यामित्याह। अश्विनौ हि देवानामध्वर्यू आस्ताम्। पूष्णो हस्ताभ्यामित्याह यत्यै (८)।

वज्र इव वा एषा। यदभ्रिः। अभ्रिरसि नारिरसीत्याह शान्त्यै (५) (९)।

अध्वरकृद्देवेभ्य इत्याह। यज्ञो वा अध्वरः। यज्ञकृद्देवेभ्य इति वावैतदाह (१०)।

उत्तिष्ठ ब्रह्मणस्पत इत्याह। ब्रह्मणैव यज्ञस्य शिरोऽच्छैति (११)।

प्रैतु ब्रह्मणस्पतिरित्याह। प्रेत्यैव यज्ञस्य शिरोऽच्छैति (१२)

प्रदेव्येतु सूनृतेत्याह। यज्ञो वै सूनृता (१३)।

अच्छा वीरं नर्यं पङ्क्तिराधसमित्याह (६) पाङ्क्तो हि यज्ञः (१४)।

---

६ षष्ठविभागस्य भाष्यं २२५ पृष्ठे द्रष्टव्यम्।
७ सप्तमविभागस्य भाष्यं २२५ पृष्ठे द्रष्टव्यम्।
८ अष्टमविभागस्य भाष्यं २२५ पृष्ठे द्रष्टव्यम्।
९ नवमविभागस्य भाष्यं २२६ पृष्ठे द्रष्टव्यम्।
१० दशमविभागस्य भाष्यं २२६ पृष्ठे द्रष्टव्यम्।
११ एकादशविभागस्य भाष्यं २२६ पृष्ठे द्रष्टव्यम्।
१२ द्वादशविभागस्य भाष्यं २२७ पृष्ठे द्रष्टव्यम्।
१३ त्रयोदशविभागस्य भाष्यं २२७ पृष्ठे द्रष्टव्यम्।
१४ चतुर्दशविभागस्य भाष्यं २२७ पृष्ठे द्रष्टव्यम्।

देवा यज्ञं नयन्तु न इत्याह। देवानेव यज्ञनियः कुरुते (१५)।

देवी द्यावापृथिवी अनु मेऽमꣳसाथामित्याह। आभ्यामेवानुमतो यज्ञस्य शिरः संभरति (१६)।

ऋध्यासमद्य मखस्य शिर इत्याह। यज्ञो वै मखः। ऋध्यासमद्य यज्ञस्य शिर इति वावैतदाह (१७)।

मखाय त्वा मखस्य त्वा शीर्ष्ण इत्याह। निर्दिश्यैवैनद्धरति (७)। (१८)।

त्रिर्हरति। त्रय इमे लोकाः। एभ्य एव लोकेभ्यो यज्ञस्य शिरः संभरति। तूष्णीं चतुर्थꣳ हरति। अपरिमितादेव यज्ञस्य शिरः संभरति (१९)

मृत्खनादग्रे हरति। तस्मान्मृत्खनः कारुण्यतमः (२०)।

इयत्यग्र आसीरित्याह। अस्यामेवाक्षꣳवट्टारं यज्ञस्य शिरः संभरति (२१)।

ऊर्जं वा एतꣳरसं पृथिव्या उपदीका उद्धिहन्ति (८)। यद्वल्मीकम्। यद्वल्मीकवपासंभारो भवति। ऊर्जमेव रसं पृथिव्या अवरुन्धे। अथो श्रोत्रमेव। श्रोत्रꣳ ह्येतत्पृथिव्याः। यद्वल्मीकः (२२)।

अबधिरो भवति। य एवं वेद (२३)।

---

१५ पञ्चदशविभागस्य भाष्यं २२७ पृष्ठे द्रष्टव्यम्।
१६ षोडशविभागस्य भाष्यं २२७ पृष्ठे द्रष्टव्यम्।
१७ सप्तदशविभागस्य भाष्यं २२८ पृष्ठे द्रष्टव्यम्।
१८ अष्टादशविभागस्य भाष्यं २२८ पृष्ठे द्रष्टव्यम्।
१९ एकोनविंशविभागस्य भाष्यं २२८ पृष्ठे द्रष्टव्यम्।
२० विंशतितमविभागस्य भाष्यं २२८ पृष्ठे द्रष्टव्यम्।
२१ एकविंशतितमविभागस्य भाष्यं २२९ पृष्ठे द्रष्टव्यम्।
२२ द्वाविंशतितमविभागस्य भाष्यं २३० पृष्ठे द्रष्टव्यम्।
२३ त्रयोविंशतितमविभागस्य भाष्यं २३० पृष्ठे द्रष्टव्यम्।

इन्द्रो वृत्राय वज्रमुदयच्छत्। स यत्र यत्र पराक्रमत (९)। तन्नाध्रियत। स पूतीकस्तम्बे पराक्रमत। सोऽध्रियत। सोऽब्रवीत्। ऊतिं वै मे धा इति। तदूतीकानामूतीकत्वम्। यदूतीका भवन्ति। यज्ञायैवोतिं दधति (२४)।

अग्निजा असि प्रजापते रेत इत्याह। य एव रसः पशून्प्राविशत् (१०)। तमेवावरुन्धे (२५)।

पञ्चैते संभारा भवन्ति। पाङ्क्तो यज्ञः। यावानेव यज्ञः। तस्य शिरः संभरति (२६)।

यदग्राम्याणां पशूनां चर्मणा संभरेत्। ग्राम्यान्पशून्छुचार्पयेत्। कृष्णाजिनेन संभरति। आरण्यानेव पशून्छुचार्पयति। तस्मात्समावत्पशूनां प्रजायमानानाम् (११)। आरण्याः पशवः कनीयसः। शुचा ह्यृताः (२७)।

लोमतः संभरति। अतो ह्यस्य मेध्यम् (२८)।

परिगृह्याऽऽयन्ति। रक्षसामपहत्यै। बहवो हरन्ति। अपचितिमेवास्मिन्दधति। उद्धते सिकतोपोप्ते परिश्रिते निदधति शान्त्यै (२९)।

मदन्तीभिरुपसृजति (१२)। तेज एवास्मिन्दधाति (३०)।

मधु त्वा मधुला करोत्वित्याह। ब्रह्मणैवास्मिन्तेजो दधाति (३१)।

---

२४ चतुर्विंशतितमविभागस्य भाष्यं २३० पृष्ठे द्रष्टव्यम्।
२५ पञ्चविंशतितमविभागस्य भाष्यं २३१ पृष्ठे द्रष्टव्यम्।
२६ षड्विंशतितमविभागस्य भाष्यं २३१ पृष्ठे द्रष्टव्यम्।
२७ सप्तविंशतितमविभागस्य भाष्यं २३२ पृष्ठे द्रष्टव्यम्।
२८ अष्टाविंशतितमविभागस्य भाष्यं २३२ पृष्ठे द्रष्टव्यम्।
२९ एकोनत्रिंशत्तमविभागस्य भाष्यं २३२ पृष्ठे द्रष्टव्यम्।
३० त्रिंशत्तमविभागस्य भाष्यं २३३ पृष्ठे द्रष्टव्यम्।
३१ एकत्रिंशत्तमविभागस्य भाष्यं २३३ पृष्ठे द्रष्टव्यम्।

यद्ग्राम्याणां पात्राणां कपालैः सꣳसृजेत्। ग्राम्याणि पात्राणि शुचार्पयेत्। अर्मकपालैः सꣳसृजति। एतानि वा अनुपजीवनीयानि। तान्येव शुचार्पयति (३२)। शर्कराभिः सꣳसृजति धृत्यै। अथो शंत्वाय (३३)। अजलोमैः सꣳसृजति। एषा वा अग्नेः प्रिया तनूः। यदजा। प्रिययैवैनं तनुवा सꣳसृजति। अथो तेजसा (३४)। कृष्णाजिनस्य लोमभिः सꣳसृजति। यज्ञो वै कृष्णाजिनम्। यज्ञेनैव यज्ञꣳ सꣳसृजति (१३)। (३५)। याज्यायै न जुहुयादविशद्वेणुः शान्त्यै पङ्क्तिरांधसमित्याह हरति दिहन्ति पराक्रमताऽऽविशत्प्रजायमानानाꣳ सृजति शंत्वायाष्टौ च॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके पञ्चमप्रपाठके द्वितीयोऽनुवाकः॥ २॥

अथ पञ्चमे तृतीयोऽनुवाकः।

परिश्रिते करोति। ब्रह्मवर्चसस्य परिगृहीत्यै (१)। न कुर्वन्नभिप्राण्यात्। यत्कुर्वन्नभिप्राण्यात्। प्राणाञ्छुचार्पयेत्। अपहाय प्राणिति। प्राणानां गोपीथाय (२)। न प्रवर्ग्यं चाऽऽदित्यं चान्तरेयात्। यदन्तरेयात्। दुश्चर्मा स्यात् (१)। तस्मान्नान्तराप्यम्। आत्मनो गोपीथाय (३)।

३२ द्वात्रिंशत्तमविभागस्य भाष्यं २३३ पृष्ठे द्रष्टव्यम्।
३३ त्रयस्त्रिंशत्तमविभागस्य भाष्यं २३३ पृष्ठे द्रष्टव्यम्।
३४ चतुस्त्रिंशत्तमविभागस्य भाष्यं २३४ पृष्ठे द्रष्टव्यम्।
३५ पञ्चत्रिंशत्तमविभागस्य भाष्यं २३४ पृष्ठे द्रष्टव्यम्।
१ प्रथमविभागस्य भाष्यं २३४ पृष्ठे द्रष्टव्यम्।
२ द्वितीयविभागस्य भाष्यं २३४ पृष्ठे द्रष्टव्यम्।
३ तृतीयविभागस्य भाष्यं २३५ पृष्ठे द्रष्टव्यम्।

वेणुना करोति । तेजो वै वेणुः । तेजः प्रवर्ग्यः । तेजसैव तेजः समर्धयति (४) ।

मखस्य शिरोऽसीत्याह । यज्ञो वै मखः । तस्यैतच्छिरः । यत्प्रवर्ग्यः (२) । तस्मादेवमाह (५) ।

यज्ञस्य पदे स्थ इत्याह । यज्ञस्य ह्येते पदे । अथो प्रतिष्ठित्यै (६) ।

गायत्रेण त्वा छन्दसा करोमीत्याह । छन्दोभिरेवैनं करोति (७) ।

त्र्युद्धिं करोति । त्रय इमे लोकाः । एषां लोकानामाप्त्यै (८) ।

छन्दोभिः करोति (३) । वीर्यं वै छन्दाꣳसि । वीर्येणैवैनं करोति (९) ।

यजुषा बिलं करोति व्यावृत्त्यै (१०) ।

इयन्तं करोति । प्रजापतिना यज्ञमुखेन संमितम् (११) ।

इयन्तं करोति । यज्ञपुरुषा संमितम् (१२) ।

इयन्तं करोति । एतावद्वै पुरुषे वीर्यम् । वीर्यसंमितम् (४) (१३) ।

अपरिमितं करोति । अपरिमितस्यावरुद्ध्यै (१४) ।

---

४ चतुर्थविभागस्य भाष्यं २३५ पृष्ठे द्रष्टव्यम् ।
५ पञ्चमविभागस्य भाष्यं २३५ पृष्ठे द्रष्टव्यम् ।
६ षष्ठविभागस्य भाष्यं २३५ पृष्ठे द्रष्टव्यम् ।
७ सप्तमविभागस्य भाष्यं २३६ पृष्ठे द्रष्टव्यम् ।
८ अष्टमविभागस्य भाष्यं २३६ पृष्ठे द्रष्टव्यम् ।
९ नवमविभागस्य भाष्यं २३६ पृष्ठे द्रष्टव्यम् ।
१० दशमविभागस्य भाष्यं २३७ पृष्ठे द्रष्टव्यम् ।
११ एकादशविभागस्य भाष्यं २३७ पृष्ठे द्रष्टव्यम् ।
१२ द्वादशविभागस्य भाष्यं २३७ पृष्ठे द्रष्टव्यम् ।
१३ त्रयोदशविभागस्य भाष्यं २३७ पृष्ठे द्रष्टव्यम् ।
१४ चतुर्दशविभागस्य भाष्यं २३७ पृष्ठे द्रष्टव्यम् ।

परिग्रीवं करोति धृत्यै (१५)।

सूर्यस्य हरसा श्रायेत्याह। यथा यजुरेवैतत् (१६)।

अश्वशकेन धूपयति। प्राजापत्यो वा अश्वः सयोनित्वाय (१७)।

वृष्णो अश्वस्य निष्पदसीत्याह। असौ वा आदित्यो वृषाश्वः। तस्य छन्दाꣳसि निष्पत् (९)। छन्दोभिरेवैनं धूपयति (१८)।

अर्चिषे त्वा शोचिषे त्वेत्याह। तेज एवास्मिन्दधाति (१९)।

वारुणोऽभीद्धः। मैत्रियोपैति शान्त्यै (२०)।

सिद्ध्यै त्वेत्याह। यथा यजुरेवैतत् (२१)।

देवस्त्वा सवितोद्वपत्वित्याह। सवितृप्रसूत एवैनं ब्रह्मणा देवताभिरुद्वपति (२२)।

अपद्यमानः पृथिव्यामाशा दिश आपृणेत्याह (६)। तस्मादग्निः सर्वा दिशोऽनुविभाति (२३)।

उत्तिष्ठ बृहन्भवोर्ध्वस्तिष्ठ ध्रुवस्त्वमित्याह प्रतिष्ठित्यै (२४)।

ईश्वरो वा एषोऽन्धो भवितोः। यः प्रवर्ग्यमन्वी-

---

१५ पञ्चदशविभागस्य भाष्यं २३८ पृष्ठे द्रष्टव्यम्।
१६ षोडशविभागस्य भाष्यं २३८ पृष्ठे द्रष्टव्यम्।
१७ सप्तदशविभागस्य भाष्यं २३९ पृष्ठे द्रष्टव्यम्।
१८ अष्टादशविभागस्य भाष्यं २३९ पृष्ठे द्रष्टव्यम्।
१९ एकोनविंशतितमविभागस्य भाष्यं २३९ पृष्ठे द्रष्टव्यम्।
२० विंशतितमविभागस्य भाष्यं २४० पृष्ठे द्रष्टव्यम्।
२१ एकविंशतितमविभागस्य भाष्यं २४० पृष्ठे द्रष्टव्यम्।
२२ द्वाविंशतितमविभागस्य भाष्यं २४० पृष्ठे द्रष्टव्यम्।
२३ त्रयोविंशतितमविभागस्य भाष्यं २४१ पृष्ठे द्रष्टव्यम्।
२४ चतुर्विंशतितमविभागस्य भाष्यं २४१ पृष्ठे द्रष्टव्यम्।

क्षते। सूर्यस्य त्वा चक्षुषाऽन्वीक्ष इत्याह। चक्षुषो गोपीथाय (२५)।

ऋजवे त्वा साधवे त्वा सुक्षित्यै त्वा भूत्यै त्वेत्याह। इयं वा ऋजुः। अन्तरिक्षꣳ साधु। असौ सुक्षितिः (७)। दिशो भूतिः। इमानेवास्मै लोकान्कल्पयति। अथो प्रतिष्ठित्यै (२६)।

इदमहममुमामुष्यायणं विशा पशुभिर्ब्रह्मवर्चसेन पर्यूहामीत्याह। विशैवैनं पशुभिर्ब्रह्मवर्चसेन पर्यूहति (२७)।

विशेति राजन्यस्य ब्रूयात्। विशैवैनं पर्यूहति। पशुभिरिति वैश्यस्य। पशुभिरेवैनं पर्यूहति (२८)।

असुर्यं पात्रनाच्छृण्णम् (८)। आच्छृणत्ति। देवत्राऽकः (२९)।

अजक्षीरेणाऽऽच्छृणत्ति। परमं वा एतत्पयः। यदजक्षीरम्। परमेणैवैनं पयसाऽऽच्छृणत्ति (३०)।

यजुषा व्यावृत्त्यै (३१)।

छन्दोभिराच्छृणत्ति। छन्दोभिर्वा एष क्रियते। छन्दोभिरेव छन्दाꣳस्याच्छृणत्ति (३२)।

छृन्धि वाचमित्याह। वाचमेवावरुन्धे। छृन्ध्यूर्जमित्याह। ऊर्जमेवावरुन्धे। छृन्धि हविरित्याह। हविरेवाकः (३३)।

---

२५ पञ्चविंशतितमविभागस्य भाष्यं २४१ पृष्ठे द्रष्टव्यम्।
२६ षड्विंशतितमविभागस्य भाष्यं २४२ पृष्ठे द्रष्टव्यम्।
२७ सप्तविंशतितमविभागस्य भाष्यं २४२ पृष्ठे द्रष्टव्यम्।
२८ अष्टाविंशतितमविभागस्य भाष्यं २४२ पृष्ठे द्रष्टव्यम्।
२९ एकोनत्रिंशत्तमविभागस्य भाष्यं २४३ पृष्ठे द्रष्टव्यम्।
३० त्रिंशत्तमविभागस्य भाष्यं २४३ पृष्ठे द्रष्टव्यम्।
३१ एकत्रिंशत्तमविभागस्य भाष्यं २४३ पृष्ठे द्रष्टव्यम्।
३२ द्वात्रिंशत्तमविभागस्य भाष्यं २४३ पृष्ठे द्रष्टव्यम्।
३३ त्रयस्त्रिंशत्तमविभागस्य भाष्यं २४३ पृष्ठे द्रष्टव्यम्।

देवं पुनश्चर सध्यासं त्वेत्याह । यथा यजुरेवैतत् (९)(३४)।

स्याद्यत्पवर्ग्यश्छन्दोभिः करोति वीर्यं समितं छन्दाꣳसि निष्पत्पृणेत्याह सुक्षितिरनाच्छृण्णं छन्दाꣳ स्याच्छृणत्त्यष्टौ च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके पञ्चमप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

अथ पञ्चमे चतुर्थोऽनुवाकः ।

ब्रह्मन्प्रचरिष्यामो होतर्धर्ममभिष्टुहीत्याह । एष वा एतर्हि बृहस्पतिः । यद्ब्रह्मा । तस्मा एव प्रतिप्रोच्य प्रचरति । आत्मनोऽनार्त्यै (१)।

यमाय त्वा मखाय त्वेत्याह । एता वा एतस्य देवताः । ताभिरेवैनꣳ समर्धयति (२)।

मदन्तीभिः प्रोक्षति । तेज एवास्मिन्दधाति (१)(३)।

अभिपूर्वं प्रोक्षति । अभिपूर्वमेवास्मिन्तेजो दधाति (४)।

त्रिः प्रोक्षति । त्र्यावृद्धि यज्ञः । अथो मेध्यत्वाय (५)।

होताऽन्वाह । रक्षसामपहत्यै (६)।

अनवानम् । प्राणानाꣳ संतत्यै (७)।

त्रिष्टुभः सतीर्गायत्रीरिवान्वाह (२)। गायत्रो हि प्राणः । प्राणमेव यजमाने दधाति (८)।

---

३४ चतुस्त्रिंशत्तमविभागस्य भाष्यं २४४ पृष्ठे द्रष्टव्यम् ।

१ प्रथमविभागस्य भाष्यं २४६ पृष्ठे द्रष्टव्यम् ।

२ द्वितीयविभागस्य भाष्यं २४६ पृष्ठे द्रष्टव्यम् ।

३ तृतीयविभागस्य भाष्यं २४६ पृष्ठे द्रष्टव्यम् ।

४ चतुर्थविभागस्य भाष्यं २४६ पृष्ठे द्रष्टव्यम् ।

५ पञ्चमविभागस्य भाष्यं २४७ पृष्ठे द्रष्टव्यम् ।

६ षष्ठविभागस्य भाष्यं २४७ पृष्ठे द्रष्टव्यम् ।

७ सप्तमविभागस्य भाष्यं २४७ पृष्ठे द्रष्टव्यम् ।

८ अष्टमविभागस्य भाष्यं २४७ पृष्ठे द्रष्टव्यम् ।

संतंतमन्वाह । प्राणानामन्नाद्यस्य संतत्यै । अथो रक्षसामपहत्यै (९) ।

यत्परिमिता अनुब्रूयात् । परिमितमवरुन्धीत । अपरिमिता अन्वाह । अपरिमितस्यावरुद्ध्यै (१०) ।

शिरो वा एतद्यज्ञस्य (३) । यत्प्रवर्ग्यः । ऊर्ङ्मुञ्जाः । यन्मौञ्जो वेदो भवति । ऊर्जैव यज्ञस्य शिरः समर्धयति (११) ।

प्राणाहुतीर्जुहोति । प्राणानेव यजमाने दधाति (१२)

सप्त जुहोति । सप्त वै शीर्षण्याः प्राणाः । प्राणानेवास्मिन्दधाति (१३ ।

देवस्त्वा सविता मध्वाऽनक्त्वित्यन्वाह (४) । तेजसैवैनमनक्ति (१४) ।

पृथिवीं तपसस्त्रायस्वेति हिरण्यमुपास्यति । अस्या अनातिदाहाय (१५) ।

शिरो वा एतद्यज्ञस्य । यत्प्रवर्ग्यः । अग्निः सर्वा देवताः । प्रलवानादीप्योपास्यति । देवतास्वेव यज्ञस्य शिरः प्रतिदधाति (१६) ।

अप्रतिशीर्णाग्रं भवति । एतद्वै हिर्ङ्मौषः (५) । (१७) ।

अर्चिरसि शोचिरसीत्याह । तेज एवास्मिन्ब्रह्मवर्चसं दधाति (१८) ।

---

९ नवमविभागस्य भाष्यं २४७ पृष्ठे द्रष्टव्यम् ।

१० दशमविभागस्य भाष्यं २४८ पृष्ठे द्रष्टव्यम् ।

११ एकादशविभागस्य भाष्यं २४८ पृष्ठे द्रष्टव्यम् ।

१२ द्वादशविभागस्य भाष्यं २४८ पृष्ठे द्रष्टव्यम् ।

१३ त्रयोदशविभागस्य भाष्यं २४९ पृष्ठे द्रष्टव्यम् ।

१४ चतुर्दशविभागस्य भाष्यं २४९ पृष्ठे द्रष्टव्यम् ।

१५ पञ्चदशविभागस्य भाष्यं २४९ पृष्ठे द्रष्टव्यम् ।

१६ षोडशविभागस्य भाष्यं २४९ पृष्ठे द्रष्टव्यम् ।

१७ सप्तदशविभागस्य भाष्यं २५० पृष्ठे द्रष्टव्यम् ।

१८ अष्टादशविभागस्य भाष्यं २५० पृष्ठे द्रष्टव्यम् ।

सꣳसीदस्व महाꣳअसीत्याह। महान्ह्येषः (१९)।
ब्रह्मवादिनो वदन्ति। एते वाव त ऋत्विजः। ये दर्शपूर्णमासयोः। अथ कथा होता यजमानायाऽऽशिषो नाऽऽशास्त इति। पुरस्तादाशीः खलु वा अन्यो यज्ञः। उपरिष्टादाशीरन्यः (६) (२०)।
अनाधृष्या पुरस्तादिति यदेतानि यजूꣳष्याह। शीर्षत एव यज्ञस्य यजमान आशिषोऽवरुन्धे (२१)।
आयुः पुरस्तादाह। प्रजां दक्षिणतः। प्राणं पश्चात्। श्रोत्रमुत्तरतः। विधृतिमुपरिष्टात्। प्राणानेवास्मै समीचो दधाति (२२)।
ईश्वरो वा एष दिशोऽनून्मादितोः। यं दिशोऽनुव्यास्थापयन्ति (७)। मनोरश्वाऽसि भूरिपुत्रेतीमामभिमृशति। इयं वै मनोरश्वा भूरिपुत्रा। अस्यामेव प्रतितिष्ठत्यनून्मादाय (२३)।
सूपसदा मे भूया मा मा हिꣳसीरित्याहाहिꣳसायै (२४)।
चितः स्थ परिचित इत्याह। अपचितिमेवास्मिन्दधाति (२५)।
शिरो वा एतद्यज्ञस्य। यत्प्रवर्ग्यः। असौ खलु वा आदित्यः प्रवर्ग्यः। तस्य मरुतो रश्मयः (८)। स्वाहा मरुद्भिः परिश्रयस्वेत्याह। अमुमेवाऽऽदित्यꣳ रश्मिभिः

---

१९ एकोनविंशविभागस्य भाष्यं २९० पृष्ठे द्रष्टव्यम्।
२० विंशतितमविभागस्य भाष्यं २९१ पृष्ठे द्रष्टव्यम्।
२१ एकविंशतितमविभागस्य भाष्यं २९२ पृष्ठे द्रष्टव्यम्।
२२ द्वाविंशतितमविभागस्य भाष्यं २९२ पृष्ठे द्रष्टव्यम्।
२३ त्रयोविंशविभागस्य भाष्यं २९३ पृष्ठे द्रष्टव्यम्।
२४ चतुर्विंशविभागस्य भाष्यं २९३ पृष्ठे द्रष्टव्यम्।
२५ पञ्चविंशविभागस्य भाष्यं २९४ पृष्ठे द्रष्टव्यम्।

पर्यूहति । तस्मादसावादित्योऽमुष्मिँल्लोके रश्मिभिः पर्यूढः । तस्माद्राजा विशा पर्यूढः । तस्माद्ग्रामणीः संजातैः पर्यूढः (२६) ।

अग्नेः सृष्टस्य यतः । विकङ्कतं वा आच्छैत् । यद्वैकङ्कताः परिधयो भवन्ति । वा एवावरुन्धे (२७) ।

द्वादश भवन्ति (९) । द्वादश मासाः संवत्सरः । संवत्सरमेवावरुन्धे (२८) ।

अस्ति त्रयोदशो मास इत्याहुः । यत्त्रयोदशः परिधिर्भवति । तेनैव त्रयोदशं मासमवरुन्धे (२९) ।

अन्तरिक्षस्यान्तर्धिरसीत्याह व्यावृत्त्यै (३०) ।

दिवं तपसस्त्रायस्वेत्युपरिष्टाद्धिरण्यमधि निदधाति । अमुष्या अनतिदाहाय । अथो आभ्यामेवैनमुभयतः परिगृह्णाति (३१) ।

अर्हन्बिभर्षि सायकानि धन्वेत्याह (१०) । स्तौत्येवैनमेतत् (३२) ।

गायत्रमसि त्रैष्टुभमसि जागतमसीति पवित्राण्यादत्ते । छन्दोभिरेवैनान्यादत्ते (३३) ।

मधु मध्वितिं धूनोति । प्राणो वै मधु । प्राणमेव यजमाने दधाति (३४) ।

---

२६ षड्विंशविभागस्य भाष्यं २५४ पृष्ठे द्रष्टव्यम् ।
२७ सप्तविंशविभागस्य भाष्यं २५५ पृष्ठे द्रष्टव्यम् ।
२८ अष्टाविंशविभागस्य भाष्यं २५५ पृष्ठे द्रष्टव्यम् ।
२९ एकोनत्रिंशविभागस्य भाष्यं २५५ पृष्ठे द्रष्टव्यम् ।
३० त्रिंशविभागस्य भाष्यं २५५ पृष्ठे द्रष्टव्यम् ।
३१ एकत्रिंशविभागस्य भाष्यं २५६ पृष्ठे द्रष्टव्यम् ।
३२ द्वात्रिंशविभागस्य भाष्यं २५७ पृष्ठे द्रष्टव्यम् ।
३३ त्रयस्त्रिंशविभागस्य भाष्यं २५७ पृष्ठे द्रष्टव्यम् ।
३४ चतुस्त्रिंशविभागस्य भाष्यं २५८ पृष्ठे द्रष्टव्यम् ;

त्रिः परियन्ति । त्रिवृद्धि प्राणः (३५) ।

त्रिः परियन्ति । त्र्यावृद्धि यज्ञः (३६) । अथो रक्षसामपहत्यै (३६) ।

त्रिः पुनः परियन्ति । षट्संपद्यन्ते । षड्वा ऋतवः । ऋतुष्वेव प्रतितिष्ठन्ति (३७) ।

यो वै घर्मस्य प्रियां तनुवमाक्रामति । दुश्चर्मा वै स भवति । एष ह वा अस्य प्रियां तनुवमाक्रामति । यस्त्रिः परीत्य चतुर्थं पर्येति । एतꣳ ह वा अस्योग्रदेवो राजनिराचक्राम (३८) । ततो वै स दुश्चर्माऽभवत् । तस्मात्त्रिः परीत्य न चतुर्थं परीयात् । आत्मनो गोपीथाय (३८) ।

प्राणा वै धवित्राणि (३९) ।

अव्यतिषङ्गं धून्वन्ति । प्राणानामव्यतिषङ्गाय कल्पत्यै (४०)।

विनिषद्य धून्वन्ति । दिक्ष्वेव प्रतितिष्ठन्ति (४१) ।

ऊर्ध्वं धून्वन्ति । सुवर्गस्य लोकस्य समष्टयै (४२) ।

सर्वतो धून्वन्ति । तस्मादयꣳ सर्वतः पवते (४३) । (४३)।

दधात्तीवान्वाह यज्ञस्याऽऽहैष उपरिष्टादाशीरन्यो व्यास्थापयन्ति रश्मयो भवन्ति धन्वेत्याह यज्ञश्चक्राम समष्टयै द्वे च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके पञ्चमप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

---

३५ पञ्चत्रिंशविभागस्य भाष्यं २५८ पृष्ठे द्रष्टव्यम् ।

३६ षट्त्रिंशविभागस्य भाष्यं २५८ पृष्ठे द्रष्टव्यम् ।

३७ सप्तत्रिंशविभागस्य भाष्यं २५३ पृष्ठे द्रष्टव्यम् ।

३८ अष्टात्रिंशविभागस्य भाष्यं २५८ पृष्ठे द्रष्टव्यम् ।

३९ एकोनचत्वारिंशविभागस्य भाष्यं २५९ पृष्ठे द्रष्टव्यम् ।

४० चत्वारिंशविभागस्य भाष्यं २५९ पृष्ठे द्रष्टव्यम् ।

४१ एकचत्वारिंशविभागस्य भाष्यं २५९ पृष्ठे द्रष्टव्यम् ।

४२ द्विचत्वारिंशविभागस्य भाष्यं २५९ पृष्ठे द्रष्टव्यम् ।

४३ त्रिचत्वारिंशविभागस्य भाष्यं २५९ पृष्ठे द्रष्टव्यम् ।

अथ पञ्चमे पञ्चमेऽनुवाकः ।

अग्निष्ट्वा वसुभिः पुरस्ताद्रोचयतु गायत्रेण छन्दसेत्याह । अग्निरेवैनं वसुभिः पुरस्ताद्रोचयति गायत्रेण छन्दसा (१)।

स मा रुचितो रोचयेत्याह । आशिषमेवैतामाशास्ते(२)।

इन्द्रस्त्वा रुद्रैर्दक्षिणतो रोचयतु त्रैष्टुभेन छन्दसेत्याह । इन्द्र एवैनꣳ रुद्रैर्दक्षिणतो रोचयति त्रैष्टुभेन छन्दसा। स मा रुचितो रोचयेत्याह । आशिषमेवैतामाशास्ते । वरुणस्त्वाऽऽदित्यैः पश्चाद्रोचयतु जागतेन छन्दसेत्याह । वरुण एवैनमादित्यैः पश्चाद्रोचयति जागतेन छन्दसा (१)। स मा रुचितो रोचयेत्याह । आशिषमेवैतामाशास्ते । द्युतानस्त्वा मारुतो मरुद्भिरुत्तरतो रोचयत्वानुष्टुभेन छन्दसेत्याह । द्युतान एवैनं मारुतो मरुद्भिरुत्तरतो रोचयत्यानुष्टुभेन छन्दसा । स मा रुचितो रोचयेत्याह । आशिषमेवैतामाशास्ते । बृहस्पतिस्त्वा विश्वैर्देवैरुपरिष्टाद्रोचयतु पाङ्क्तेन छन्दसेत्याह। बृहस्पतिरेवैनं विश्वैर्देवैरुपरिष्टाद्रोचयति पाङ्क्तेन छन्दसा। स मा रुचितो रोचयेत्याह। आशिषमेवैतामाशास्ते (२)(३)।

रोचितस्त्वं देव घर्म देवेष्वसीत्याह । रोचितो ह्येष देवेषु । रोचिषीयाहं मनुष्येष्वित्याह । रोचत एवैष मनुष्येषु (४)।

सम्राड् घर्म रुचितस्त्वं देवेष्वायुष्मान्मयि तेजस्वी ब्रह्म-

---

१ प्रथमविभागस्य भाष्यं २६० पृष्ठे द्रष्टव्यम् ।
२ द्वितीयविभागस्य भाष्यं २६० पृष्ठे द्रष्टव्यम् ।
३ तृतीयविभागस्य भाष्यं २६१ पृष्ठे द्रष्टव्यम् ।
४ चतुर्थविभागस्य भाष्यं २६१ पृष्ठे द्रष्टव्यम् ।

वर्चस्यसीत्याह । रुचितो ह्येष देवेष्वायुष्मा॒ꣳस्तेजस्वी ब्रह्मवर्चसी । रुचितोऽहं मनुष्येष्वायुष्मा॒ꣳस्तेजस्वी ब्रह्मवर्चसी भूयासमित्याह। रुचित एवैष मनुष्येष्वायुष्मा॒ꣳस्तेजस्वी ब्रह्मवर्चसी भवति (५)।

रुगसि रुचं मयि धेहि मयि रुगित्याह । आशिषमेवैतामाशास्ते (६)।

तं यदेतैर्यजुर्भिररोचयित्वा । रुचितो घर्म इति ब्रूयात् । अरोचुकोऽध्वर्युः स्यात् । अरोचुको यजमानः । अथ यदेनमेतैर्यजुर्भी रोचयित्वा । रुचितो घर्म इति प्राह। रोचुकोऽध्वर्युर्भवति । रोचुको यजमानः (३) (७)।

पश्चाद्रोचयति जागतेन छन्दसा स मा रुचितो रोचयेत्याहाऽऽशिषमेवैतामाशास्ते शास्तेऽष्टौ च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके पञ्चमप्रपाठके पञ्चमोऽनुवाकः ॥ ९ ॥

अथ पञ्चमे षष्ठोऽनुवाकः ।

शिरो वा एतद्यज्ञस्य । यत्प्रवर्ग्यः । ग्रीवा उपसदः । पुरस्तादुपसदां प्रवर्ग्यं प्रवृणक्ति । ग्रीवास्वेव यज्ञस्य शिरः प्रतिदधाति (१)।

त्रिः प्रवृणक्ति । त्रय इमे लोकाः । एभ्य एव लोकेभ्यो यज्ञस्य शिरोऽवरुन्धे (२)।

---

५ पञ्चमविभागस्य भाष्यं २६२ पृष्ठे द्रष्टव्यम्।
६ षष्ठविभागस्य भाष्यं २६२ पृष्ठे द्रष्टव्यम्।
७ सप्तमविभागस्य भाष्यं २६३ पृष्ठे द्रष्टव्यम्।
१ प्रथमविभागस्य भाष्यं २६४ पृष्ठे द्रष्टव्यम्।
२ द्वितीयविभागस्य भाष्यं २६४ पृष्ठे द्रष्टव्यम्।

षट् संपद्यन्ते । षड्वा ऋतवः (१) । ऋतुभ्य एव यज्ञस्य शिरोऽवरुन्धे (३) ।

द्वादशकृत्वः प्रवृणक्ति । द्वादश मासाः संवत्सरः । संवत्सरादेव यज्ञस्य शिरोऽवरुन्धे (४) ।

चतुर्विंशतिः संपद्यन्ते । चतुर्विंशतिरर्धमासाः । अर्धमासेभ्य एव यज्ञस्य शिरोऽवरुन्धे (५) ।

अथो खलु । सकृदेव प्रवृज्यः । एकꣳ हि शिरः (२) (६) ।

अग्निष्टोमे प्रवृणक्ति । एतावान्वै यज्ञः । यावानग्निष्टोमः । यावानेव यज्ञः । तस्य शिरः प्रतिदधाति (७) ।

नोक्थ्ये प्रवृञ्जयात् । प्रजा वै पशव उक्थानि । यदुक्थ्ये प्रवृञ्जयात् । प्रजां पशूनस्य निर्दहेत् (८) ।

विश्वजिति सर्वपृष्ठे प्रवृणक्ति (३) । पृष्ठानि वा अच्युतं च्यावयन्ति । पृष्ठैरेवास्मा अच्युतं च्यावयित्वाऽवरुन्धे (९) ।

अपश्यं गोपामित्याह । प्राणो वै गोपाः । प्राणमेव प्रजासु वियातयति (१०) ।

अपश्यं गोपामित्याह । असौ वा आदित्यो गोपाः । स हीमाः प्रजा गोपायति । तमेव प्रजानां गोप्तारं कुरुते (११) ।

---

३ तृतीयविभागस्य भाष्यं २६५ पृष्ठे द्रष्टव्यम् ।
४ चतुर्थविभागस्य भाष्यं २६५ पृष्ठे द्रष्टव्यम् ।
५ पञ्चमविभागस्य भाष्यं २६५ पृष्ठे द्रष्टव्यम् ।
६ षष्ठविभागस्य भाष्यं २६५ पृष्ठे द्रष्टव्यम् ।
७ सप्तमविभागस्य भाष्यं २६६ पृष्ठे द्रष्टव्यम् ।
८ अष्टमविभागस्य भाष्यं २६६ पृष्ठे द्रष्टव्यम् ।
९ नवमविभागस्य भाष्यं २६६ पृष्ठे द्रष्टव्यम् ।
१० दशमविभागस्य भाष्यं २६६ पृष्ठे द्रष्टव्यम् ।
११ एकादशविभागस्य भाष्यं २६७ पृष्ठे द्रष्टव्यम् ।

अनिपद्यमानमित्याह (४)। न ह्येष निपद्यते (१२)।

आ च परा च पथिभिश्चरन्तमित्याह । आ च ह्येष परा च पथिभिश्चरति (१३)।

स सध्रीचीः स विषूचीर्वसान इत्याह। सध्रीचीश्च ह्येष विषूचीश्च वसानः प्रजा अभिविपश्यति (१४)।

आवरीवर्ति भुवनेष्वन्तरित्याह। आ ह्येष वरीवर्ति भुवनेष्वन्तः (१५)।

अत्र प्रावीर्मधुमाध्वीभ्यां मधुमाधूचीभ्यामित्याह । वासन्तिकावेवास्मा ऋतू कल्पयति (१६)।

समग्निरग्निना गतेत्याह (५) ग्रैष्मावेवास्मा ऋतू कल्पयति (१७)।

समग्निरग्निना गतेत्याह । अग्निर्ह्येवैषोऽग्निना संगच्छते (१८)।

स्वाहा समग्निस्तपसा गतेत्याह। पूर्वमेवोदितम्। उत्तरेणाभिगृणाति (१९)

धर्ता दिवो विभासि रजसः पृथिव्या इत्याह। वार्षिकावेवास्मा ऋतू कल्पयति (२०)।

हृदे त्वा मनसे त्वेत्याह। शारदावेवास्मा ऋतू कल्पयति (६) (२१)।

---

१२ द्वादशविभागस्य भाष्यं २६७ पृष्ठे द्रष्टव्यम्।
१३ त्रयोदशविभागस्य भाष्यं २६७ पृष्ठे द्रष्टव्यम्।
१४ चतुर्दशविभागस्य भाष्यं २६७ पृष्ठे द्रष्टव्यम्।
१५ पञ्चदशविभागस्य भाष्यं २६७ पृष्ठे द्रष्टव्यम्।
१६ षोडशविभागस्य भाष्यं २६८ पृष्ठे द्रष्टव्यम्।
१७ सप्तदशविभागस्य भाष्यं २६८ पृष्ठे द्रष्टव्यम्।
१८ अष्टादशविभागस्य भाष्यं २६८ पृष्ठे द्रष्टव्यम्।
१९ एकोनविंशविभागस्य भाष्यं २६९ पृष्ठे द्रष्टव्यम्।
२० विंशतितमविभागस्य भाष्यं २६९ पृष्ठे द्रष्टव्यम्।
२१ एकविंशतितमविभागस्य भाष्यं २७० पृष्ठे द्रष्टव्यम्।

दिवि देवेषु होत्रा यच्छेत्याह । होत्राभिरेवेमाल्लोकान्त्संदधाति (२२) ।

विश्वासां भुवां पत इत्याह । हैमन्तिकावेवास्मा ऋतू कल्पयति (२३) ।

देवश्रूस्त्वं देव घर्घ देवान्पाहीत्याह । शैशिरावेवास्मा ऋतू कल्पयति (२४) ।

तपोजां वाचमस्मे नियच्छ देवायुवमित्याह । या वै मेध्या वाक् । सा तपोजाः । तामेवावरुन्धे (७) । (२५) ।

गर्भो देवानामित्याह । गर्भो ह्येष देवानाम् (२६) ।

पिता मतीनामित्याह । प्रजा वै मतयः । तासामेष एव पिता । यत्प्रवर्ग्यः । तस्मादेवमाह (२७) ।

पतिः प्रजानामित्याह । पतिर्ह्येष प्रजानाम् (२८) ।

मतिः कवीनामित्याह (८) । मतिर्ह्येष कवीनाम् (२९) ।

सं देवो देवेन सवित्राऽयतिष्ट स९ सूर्येणारुक्षत्याह । अमुं चैवाऽऽदित्यं प्रवर्ग्यं च स९ शास्ति (३०) ।

आयुर्दास्त्वमस्मभ्यं घर्म वर्चोदा असीत्याह । आशिषमेवैतामाशास्ते (३१) ।

पिता नोऽसि पिता नो बोधेत्याह । बोधयत्येवैनम् (३२) ।

---

२२ द्वाविंशतितमविभागस्य भाष्यं २७० पृष्ठे द्रष्टव्यम् ।

२३ त्रयोविंशविभागस्य भाष्यं २७० पृष्ठे द्रष्टव्यम् ।

२४ चतुर्विंशविभागस्य भाष्यं २७० पृष्ठे द्रष्टव्यम् ।

२५ पञ्चविंशतितमविभागस्य भाष्यं २७१ पृष्ठे द्रष्टव्यम् ।

२६ षड्विंशतितमविभागस्य भाष्यं २७१ पृष्ठे द्रष्टव्यम् ।

२७ सप्तविंशतितमविभागस्य भाष्यं २७१ पृष्ठे द्रष्टव्यम् ।

२८ अष्टाविंशतितमविभागस्य भाष्यं २७२ पृष्ठे द्रष्टव्यम् ।

२९ एकोनत्रिंशत्तमविभागस्य भाष्यं २७२ पृष्ठे द्रष्टव्यम् ।

३० त्रिंशत्तमविभागस्य भाष्यं २७२ पृष्ठे द्रष्टव्यम् ।

३१ एकत्रिंशत्तमविभागस्य भाष्यं २७२ पृष्ठे द्रष्टव्यम् ।

३२ द्वात्रिंशत्तमविभागस्य भाष्यं २७३ पृष्ठे द्रष्टव्यम् ।

नवैतेऽवकाशा भवन्ति। पत्निंयै दशमः। नव वै पुरुषे प्राणाः (९) नाभिर्दशमी। प्राणानेव यजमाने दधाति। अथो दशाक्षरा विराट्। अन्नं विराट्। विराजैवान्नाद्यमवरुन्धे (३३)।

यज्ञस्य शिरोऽच्छिद्यत। तद्देवा होत्राभिः प्रत्यदधुः। ऋत्विजोऽवेक्षन्ते। एता वै होत्राः। होत्राभिरेव यज्ञस्य शिरः प्रतिदधाति (१०) (३४)।

रुचितमवेक्षन्ते। रुचिताद्वै प्रजापतिः प्रजा असृजत। प्रजानाꣳसृष्ट्यै (३५)।

रुचितमवेक्षन्ते। रुचिताद्वै पर्जन्यो वर्षति। वर्षुकः पर्जन्यो भवति। सं प्रजा एधन्ते (३६)।

रुचितमवेक्षन्ते। रुचितं वै ब्रह्मवर्चसम्। ब्रह्मवर्चसिनो भवन्ति (११) (३७)।

अधीयन्तोऽवेक्षन्ते। सर्वमायुरियन्ति (३८)।

न पत्न्यवेक्षेत। यत्पत्न्यवेक्षेत प्रजायेत। प्रजां त्वस्यै निर्दहेत्। यन्नावेक्षेत। न प्रजायेत। नास्यै प्रजां निर्दहेत्। तिरस्कृत्य यजुर्वाचयति। प्रजायते। नास्यै प्रजां निर्दहति (३९)।

त्वष्टीमती ते सपेयेत्याह। सपाद्धि प्रजाः प्रजायन्ते (१२) ४०।

---

३३ त्रयस्त्रिंशत्तमविभागस्य भाष्यं २७४ पृष्ठे द्रष्टव्यम्।
३४ चतुस्त्रिंशत्तमविभागस्य भाष्यं २७४ पृष्ठे द्रष्टव्यम्।
३५ पञ्चत्रिंशत्तमविभागस्य भाष्यं २७५ पृष्ठे द्रष्टव्यम्।
३६ षट्त्रिंशविभागस्य भाष्यं २७५ पृष्ठे द्रष्टव्यम्।
३७ सप्तत्रिंशविभागस्य भाष्यं २७५ पृष्ठे द्रष्टव्यम्।
३८ अष्टात्रिंशविभागस्य भाष्यं २७५ पृष्ठे द्रष्टव्यम्।
३९ एकोनचत्वारिंशविभागस्य भाष्यं २७६ पृष्ठे द्रष्टव्यम्।
४० चत्वारिंशविभागस्य भाष्यं २७६ पृष्ठे द्रव्यष्टम्।

गायत्रोऽसि त्रैष्टुभोऽसि जागतमसीति शफोपयमानादत्ते। छन्दोभिरेवैनानादत्ते (१८)।

सहोर्जो भागेनोपमेहीत्याह। ऊर्ज एवैनं भागमकः (१९)।

अश्विनौ वा एतद्यज्ञस्य शिरः प्रतिदधतावब्रूताम्। आवाभ्यामेव पूर्वाभ्यां वषट्क्रियाता इति। इन्द्राश्विना मधुनः सारघस्येत्याह। अश्विभ्यामेव पूर्वाभ्यां वषट्करोति। अथो अश्विनावेव भागधेयेन समर्धयति (५),(२०)।

घर्मं पात वसवो यजता वडित्याह। वसूनेव भागधेयेन समर्धयति (२१)।

यद्वषट्कुर्यात्। यातयामाऽस्य वषट्कारः स्यात्। यन्न वषट्कुर्यात्। रक्षाꣳसि यज्ञꣳ हन्युः। वडित्याह। परोक्षमेव वषट्करोति। नास्य यातयामा वषट्कारो भवति। न यज्ञꣳ रक्षाꣳसि घ्नन्ति (६) (२२)।

स्वाहा त्वा सूर्यस्य रश्मये वृष्टिवनये जुहोमीत्याह। यो वा अस्य पुण्यो राश्मिः। स वृष्टिवनिः। तस्मा एवैनं जुहोति (२३)।

मधु हविरसीत्याह। स्वदयत्येवैनम् (२४)।

सूर्यस्य तपस्तपेत्याह। यथा यजुरेवैतत् (२५)।

---

१८ अष्टादशविभागस्य भाष्यं २८२ पृष्ठे द्रष्टव्यम्।
१९ एकोनविंशविभागस्य भाष्यं २८२ पृष्टे द्रष्टव्यम्।
२० विंशविभागस्य भाष्यं २८३ पृष्ठे द्रष्टव्यम्।
२१ एकविंशविभागस्य भाष्यं २८३ पृष्ठे द्रष्टव्यम्।
२२ द्वाविंशविभागस्य भाष्यं २८३ पृष्ठे द्रष्टव्यम्।
२३ त्रयोविंशविभागस्य भाष्यं २८४ पृष्ठे द्रष्टव्यम्।
२४ चतुर्विंशविभागस्य भाष्यं २८४ पृष्ठे द्रष्टव्यम्।
२५ पञ्चविंशविभागस्य भाष्यं २८४ पृष्ठे द्रष्टव्यम्।

द्यावापृथिवीभ्यां त्वा परिगृह्णामीत्याह । द्यावापृथिवीभ्यामेवैनं परिगृह्णाति (७),(२६)।

अन्तरिक्षेण त्वोपयच्छामीत्याह । अन्तरिक्षेणैवैनमुपयच्छति । न वा एतं मनुष्यो भर्तुमर्हति (२७)।

देवानां त्वा पितृणामनुमतो भर्तुꣳ शकेयमित्याह । देवैरेवैनं पितृभिरनुमत आदत्ते (२८)।

वि वा एनमेतदर्धयन्ति । यत्पश्चात्प्रवृज्य पुरो जुह्वति । तेजोऽसि तेजोऽनुप्रेहीत्याह । तेज एवास्मिन्दधाति (२९)।

दिविस्पृङ्मा मा हिꣳसीरन्तरिक्षस्पृङ्मा मा हिꣳसीः पृथिविस्पृङ्मा मा हिꣳसीरित्याहाहिꣳसायै (८), (३०)।

सुवरसि सुवर्मे यच्छ दिवं यच्छ दिवो मा पाहीत्याह । आशिषमेवैतामाशास्ते (३१)।

शिरो वा एतद्यज्ञस्य यत्प्रवर्ग्यः । आत्मा वायुः । उद्यत्यवातनामान्याह । आत्मन्नेव यज्ञस्य शिरः प्रतिदधाति (३२)।

अनवानम् । प्राणानाꣳ संतत्यै (३३)।

पञ्चाऽऽह (९)। पाङ्क्तो यज्ञः । यावानेव यज्ञः । तस्य शिरः प्रतिदधाति (३४)।

---

२६ षड्विंशविभागस्य भाष्यं २८९ पृष्ठे द्रष्टव्यम्।
२७ सप्तविंशविभागस्य भाष्यं २८९ पृष्ठे द्रष्टव्यम्।
२८ अष्टाविंशविभागस्य भाष्यं २८९ पृष्ठे द्रष्टव्यम्।
२९ एकोनत्रिंशविभागस्य भाष्यं २८६ पृष्ठे द्रष्टव्यम्।
३० त्रिंशविभागस्य भाष्यं २८६ पृष्ठे द्रष्टव्यम्।
३१ एकत्रिंशविभागस्य भाष्यं २८६ पृष्ठे द्रष्टव्यम्।
३२ द्वात्रिंशविभागस्य भाष्यं २८७ पृष्ठे द्रष्टव्यम्।
३३ त्रयस्त्रिंशविभागस्य भाष्यं २८८ पृष्ठे द्रष्टव्यम्।
३४ चतुस्त्रिंशविभागस्य भाष्यं २८८ पृष्ठे द्रष्टव्यम्।

अग्नये त्वा वसुमते स्वाहेत्याह । असौ वा आदित्योऽग्निर्वसुमान् । तस्मा एवैनं जुहोति (३९) ।

सोमाय त्वा रुद्रवते स्वाहेत्याह । चन्द्रमा वै सोमो रुद्रवान् । तस्मा एवैनं जुहोति । वरुणाय त्वाऽऽदित्यवते स्वाहेत्याह (१०) । अप्सु वै वरुण आदित्यवान् । तस्मा एवैनं जुहोति । बृहस्पतये त्वा विश्वदेव्यावते स्वाहेत्याह । ब्रह्म वै देवानां बृहस्पतिः । ब्रह्मण एवैनं जुहोति (३६) ।

सवित्रे त्वर्भुमते विभुमते प्रभुमते वाजवते स्वाहेत्याह । संवत्सरो वै सवितर्भुमान्विभुमान्प्रभुमान्वाजवान् । तस्मा एवैनं जुहोति (३७) ।

यमाय त्वाऽङ्गिरस्वते पितृमते स्वाहेत्याह । प्राणो वै यमोऽङ्गिरस्वान्पितृमान् (११) तस्मा एवैनं जुहोति (३८) ।

एताभ्य एवैनं देवताभ्यो जुहोति (३९) ।

दश संपद्यन्ते । दशाक्षरा विराट् । अन्नं विराट् । विराजैवान्नाद्यमवरुन्धे (४० ।

रौहिणाभ्यां वै देवाः सुवर्गं लोकमायन् । तद्रौहिणयोः रौहिणत्वम् । यद्रौहिणौ भवतः । रौहिणाभ्यामेव तद्यजमानः सुवर्गं लोकमेति (४१) ।

अहर्ज्योतिः केतुना जुषताꣳ सुज्योतिर्ज्योतिषाꣳ

---

३९ पञ्चत्रिंशविभागस्य भाष्यं २८८ पृष्ठे द्रष्टव्यम् ।

३६ षट्त्रिंशविभागस्य भाष्यं २८८ पृष्ठे द्रष्टव्यम् ।

३७ सप्तत्रिंशविभागस्य भाष्यं २८८ पृष्ठे द्रष्टव्यम् ।

३८ अष्टात्रिंशविभागस्य भाष्यं २८८ पृष्ठे द्रष्टव्यम् ।

३९ एकोनचत्वारिंशविभागस्य भाष्यं २८८ पृष्ठे द्रष्टव्यम् ।

४० चत्वारिंशविभागस्य भाष्यं २८९ पृष्ठे द्रष्टव्यम् ।

४१ एकचत्वारिंशविभागस्य भाष्यं २८९ पृष्ठे द्रष्टव्यम् ।

स्वाहा रात्रिज्योतिः केतुना जुषताꣳ सुज्योतिर्ज्योतिषाꣳ स्वाहेत्याह । आदित्यमेव तदमुष्मिँल्लोकेऽधा परस्ताद्धा-धार । रात्रिया अवस्तात् । तस्मादसावादित्योऽमुष्मिँल्लोकेऽहोरात्राभ्यां धृतः (१२),(४२) ॥

मनुष्यनामानि पशवः सीदत्वित्याहेन्द्रायेत्याहार्धयन्ति घ्नन्ति गृह्णात्यहिꣳसायै पञ्चाऽऽहाऽऽदित्यवते स्वाहेत्याह पितृमानेति चत्वारि च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके पञ्चमप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

अथ पञ्चमेऽष्टमोऽनुवाकः ।

विश्वा आशा दक्षिणसदित्याह । विश्वानेव देवान्पीणाति । अथो दुरिष्ट्या एवैनं पाति (१) ।

विश्वान्देवानयाडिहेत्याह । विश्वानेव देवान्भागधेयेन समर्धयति (२) ।

स्वाहाकृतस्य घर्मस्य मधोः पिबतमश्विनेत्याह । अश्विनावेव भागधेयेन समर्धयति (३) ।

स्वाहाऽग्नेय यज्ञियाय शं यजुर्भिरित्याह । अभ्येवैनं धारयति । अथो हविरेवाकः (१), (४) ।

अश्विना घर्मं पातꣳ हार्दिवानमहार्दिवाभिरूतिभिरित्याह । अश्विनावेव भागधेयेन समर्धयति । (५) ।

---

४२ द्विचत्वारिंशविभागस्य भाष्यं २८९ पृष्ठे द्रष्टव्यम् ।
१ प्रथमविभागस्य भाष्यं २९० पृष्ठे द्रष्टव्यम् ।
२ द्वितीयविभागस्य भाष्यं २९० पृष्ठे द्रष्टव्यम् ।
३ तृतीयविभागस्य भाष्यं २९० पृष्ठे द्रष्टव्यम् ।
४ चतुर्थविभागस्य भाष्यं २९० पृष्ठे द्रष्टव्यम् ।
५ पञ्चमविभागस्य भाष्यं २९१ पृष्ठे द्रष्टव्यम् ।

अनु वां द्यावापृथिवी मꣳसातामित्याहानुमत्यै (६)।

स्वाहेन्द्राय स्वाहेन्द्रावडित्याह। इन्द्राय हि पुरो हूयते (७)।

आश्राव्याऽऽह घर्मस्य यजेति। वषट्कृते जुहोति। रक्षसामपहत्यै। अनुयजति स्वगाकृत्यै (८)।

घर्मꣳपातमश्विनेत्याह (२)। पूर्वमेवोदितम्। उत्तरेणाभिगृणाति (९)।

अनु वां द्यावापृथिवी अमꣳसातामित्याहानुमत्यै (१०)।

तं प्राच्यं यथावण्णमो दिवे नमः पृथिव्या इत्याह। यथा यजुरेवैतत्॥ (११)।

दिवि धा इमं यज्ञं यज्ञमिमं दिवि धा इत्याह। सुवर्गमेवैनं लोकं गमयति (१२)।

दिवं गच्छान्तरिक्षं गच्छ पृथिवीं गच्छेत्याह। एष्वेवैनं लोकेषु प्रतिष्ठापयति (१३)।

पञ्च प्रदिशो गच्छेत्याह (३)। दिक्ष्वेवैनं प्रतिष्ठापयति। देवान्घर्मपान्गच्छ पितॄन्घर्मपान्गच्छेत्याह। उभयेष्वेवैनं प्रतिष्ठापयति (१४)।

यत्पिन्वते। वर्षुकः पर्जन्यो भवति। तस्मात्पिन्वमानः पुण्यः (१५)।

---

६ षष्ठविभागस्य भाष्यं २९१ पृष्ठे द्रष्टव्यम्।

७ सप्तमविभागस्य भाष्यं २९१ पृष्ठे द्रष्टव्यम्।

८ अष्टमविभागस्य भाष्यं २९१ पृष्ठे द्रष्टव्यम्।

९ नवमविभागस्य भाष्यं २९२ पृष्ठे द्रष्टव्यम्।

१० दशमविभागस्य भाष्यं २९३ पृष्ठे द्रष्टव्यम्।

११ एकादशविभागस्य भाष्यं २९३ पृष्ठे द्रष्टव्यम्।

१२ द्वादशविभागस्य भाष्यं २९३ पृष्ठे द्रष्टव्यम्।

१३ त्रयोदशविभागस्य भाष्यं २९३ पृष्ठे द्रष्टव्यम्।

१४ चतुर्दशविभागस्य भाष्यं २९३ पृष्ठे द्रष्टव्यम्।

१५ पञ्चदशविभागस्य भाष्यं २९४ पृष्ठे द्रष्टव्यम्।

यत्प्राङ्पिन्वते। तद्देवानाम्। यद्दक्षिणा। तत्पितॄणाम् (४)। यत्प्रत्यक्। तन्मनुष्याणाम्। यदुदक्। तद्रुद्राणाम् (१६)।

प्राञ्चमुदञ्चं पिन्वयति। देवत्राऽकः (१७)।

अथो खलु। सर्वा अनु दिशः पिन्वयति। सर्वा दिशः समेधन्ते (१८)।

अन्तःपरिधि पिन्वयति (५)। तेजसोऽस्कन्दाय (१९)।

इषे पीपिह्यूर्जे पीपिहीत्याह। इषमेवोर्जं यजमाने दधाति (२०)।

यजमानाय पीपिहीत्याह। यजमानायैवैतामाशिषमाशास्ते (२१)।

मह्यं ज्यैष्ठ्याय पीपिहीत्याह। आत्मन एवैतामाशिषमाशास्ते (२२)।

त्विष्यै त्वा द्युम्नाय त्वेन्द्रियाय त्वा भूत्यै त्वेत्याह। यथा यजुरेवैतत् (२३)।

धर्मोऽसि सुधर्मा मे न्यस्मे ब्रह्माणि धारयेत्याह (६)। ब्रह्मन्नेवैनं प्रतिष्ठापयति (२४)।

नेत्त्वा वातः स्कन्दयादिति (२५)।

---

१६ षोडशविभागस्य भाष्यं २९४ पृष्ठे द्रष्टव्यम्।
१७ सप्तदशविभागस्य भाष्यं २९४ पृष्ठे द्रष्टव्यम्।
१८ अष्टादशविभागस्य भाष्यं २९४ पृष्ठे द्रष्टव्यम्।
१९ एकोनविंशविभागस्य भाष्यं २९४ पृष्ठे द्रष्टव्यम्।
२० विंशविभागस्य भाष्यं २९५ पृष्ठे द्रष्टव्यम्।
२१ एकविंशविभागस्य भाष्यं २९५ पृष्ठे द्रष्टव्यम्।
२२ द्वाविंशविभागस्य भाष्यं २९५ पृष्ठे द्रष्टव्यम्।
२३ त्रयोविंशविभागस्य भाष्यं २९५ पृष्ठे द्रष्टव्यम्।
२४ चतुर्विंशविभागस्य भाष्यं २९६ पृष्ठे द्रष्टव्यम्।
२५ पञ्चविंशविभागस्य भाष्य २९६ पृष्ठे द्रष्टव्यम्।

यद्यभिचरेत्। अमुष्य त्वा प्राणे सादयाम्यमुना सह निरृथं गच्छेति ब्रूयाद्यं द्विष्यात्। यमेव द्वेष्टि। तेनैनꣳ सह निरृथं गमयति (२६)।

पूष्णे शरसे स्वाहेत्याह। या एव देवता हुतभागाः। ताभ्य एवैनं जुहोति (२७)।

ग्रावभ्यः स्वाहेत्याह। या एवान्तरिक्षे वाचः (७)। ताभ्य एवैनं जुहोति (२८)।

प्रतिरेभ्यः स्वाहेत्याह। प्राणा वै देवाः प्रतिराः। तेभ्य एवैनं जुहोति (२९)।

द्यावापृथिवीभ्याꣳ स्वाहेत्याह। द्यावापृथिवीभ्यामेवैनं जुहोति (३०)।

पितृभ्यो घर्मपेभ्यः स्वाहेत्याह। ये वै यज्वानः। ते पितरो घर्मपाः। तेभ्य एवैनं जुहोति (८),(३१)।

रुद्राय रुद्रहोत्रे स्वाहेत्याह। रुद्रमेव भागधेयेन समर्धयति (३२)।

सर्वतः समनक्ति। सर्वत एव रुद्रं निरवदयते (३३)।

उदञ्चं निरस्यति। एषा वै रुद्रस्य दिक्। स्यामेव दिशि रुद्रं निरवदयते (३४)।

अप उपस्पृशति मेध्यत्वाय (३५)।

---

२६ षड्विंशविभागस्य भाष्यं २९६ पृष्ठे द्रष्टव्यम्।
२७ सप्तविंशविभागस्य भाष्यं २९७ पृष्ठे द्रष्टव्यम्।
२८ अष्टाविंशविभागस्य भाष्यं २९७ पृष्ठे द्रष्टव्यम्।
२९ एकोनत्रिंशविभागस्य भाष्यं २९७ पृष्ठे द्रष्टव्यम्।
३० त्रिंशविभागस्य भाष्यं २९७ पृष्ठे द्रष्टव्यम्।
३१ एकत्रिंशविभागस्य भाष्यं २९७ पृष्ठे द्रष्टव्यम्।
३२ द्वात्रिंशविभागस्य भाष्यं २९८ पृष्ठे द्रष्टव्यम्।
३३ त्रयस्त्रिंशविभागस्य भाष्यं २९८ पृष्ठे द्रष्टव्यम्।
३४ चतुस्त्रिंशविभागस्य भाष्यं २९८ पृष्ठे द्रष्टव्यम्।
३५ पञ्चत्रिंशविभागस्य भाष्यं २९८ पृष्ठे द्रष्टव्यम्।

नान्वीक्षेत। यदन्वीक्षेत (९)। चक्षुरस्य प्रमायुकꣳ स्यात्। तस्मान्नान्वीक्ष्यः (३६)।

अपीपरो माऽह्नो रात्रिये मा पाह्येषा ते अग्ने समित्तया समिध्यस्वाऽऽयुर्मे दा वर्चसा माऽऽज्ञीरित्याह। आयुरेवास्मिन्वर्चो दधाति। अपीपरो मा रात्रिया अह्नो मा पाह्येषा ते अग्ने समित्तया समिध्यस्वाऽऽयुर्मे दा वर्चसा माऽऽज्ञीरित्याह। आयुरेवास्मिन्वर्चो दधाति (३७)।

अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेत्याह। यथा यजुरेवैतत् (३८)।

ब्रह्मवादिनो वदन्ति। होतव्यमग्निहोत्रं३ न होतव्या३मिति (१०)। यद्यजुषा जुहुयात्। अथयथापूर्वमाहुती जुहुयात्। यन्न जुहुयात्। अग्निः पराभवेत्। भूः स्वाहेत्येव होतव्यम्। यथापूर्वमाहुती जुहोति। नाग्निः पराभवति (३९)।

हुतꣳ हविर्मधु हविरित्याह। स्वदयत्येवैनम् (४०)।

इन्द्रतमेऽग्नावित्याह (११)। प्राणो वा इन्द्रतमोऽग्निः। प्राण एवैनमिन्द्रतमेऽग्नौ जुहोति (४१)।

पिता नोऽसि मा मो हिꣳसीरित्याहाहिꣳसायै। (४२)।

अश्याम ते देव घर्म मधुमतो वाजवतः पितुमत इत्याह। आशिषमेवैतामाशास्ते (४३)।

---

३६ षड्त्रिंशविभागस्य भाष्यं २९८ पृष्ठे द्रष्टव्यम्।

३७ सप्तत्रिंशविभागस्य भाष्यं २९९ पृष्ठे द्रष्टव्यम्।

३८ अष्टात्रिंशविभागस्य भाष्यं ३०० पृष्ठे द्रष्टव्यम्।

३९ एकोनचत्वारिंशविभागस्य भाष्यं ३०० पृष्ठे द्रष्टव्यम्।

४० चत्वारिंशविभागस्य भाष्यं ३०१ पृष्ठे द्रष्टव्यम्।

४१ एकचत्वारिंशविभागस्य भाष्यं ३०१ पृष्ठे द्रष्टव्यम्।

४२ द्विचत्वारिंशविभागस्य भाष्यं ३०१ पृष्ठे द्रष्टव्यम्।

४३ त्रिचत्वारिंशविभागस्य भाष्यं ३०१ पृष्ठे द्रष्टव्यम्।

स्वधाविनोऽशीमहि त्वा मा मा हिꣳसीरित्याहाहिꣳसायै (४४)।

तेजसा वा एते व्यृध्यन्ते। ये प्रवर्ग्येण चरन्ति। प्राश्नन्ति। तेज एवात्मन्दधते (१२), (४५)।

संवत्सरं न माꣳसमश्नीयात्। न रामामुपेयात्। न मृन्मयेन पिबेत्। नास्य राम उच्छिष्टं पिबेत्। तेज एव तत्सꣳशयति (४६)।

देवासुराः संयत्ता आसन्। ते देवा विजयमुपयन्तः। विभ्राजि सौर्ये ब्रह्म संन्यदधत। यत्किंच दिवाकीर्त्यम्। तदेतेनैव व्रतेनागोपायत्। तस्मादेतद्व्रतं चार्यम्। तेजसो गोपीथाय। तस्मादेतानि यजूꣳषि विभ्राजः सौर्यस्येत्याहुः (४७)।

स्वाहा त्वा सूर्यस्य रश्मिभ्य इति प्रातः सꣳसादयति। स्वाहा त्वा नक्षत्रेभ्य इति सायम्। एता वा एतस्य देवताः। ताभिरेवैनꣳ समर्धयति (१३),(४८)॥

अक्करश्मिनेत्याह प्रदिशो गच्छेत्याह पितृणामन्तः परिधि पिन्वयति धारयेत्याह वाचो घर्मपास्तेभ्य एवैनं जुहोत्यन्वीक्षेत होतव्या३मित्यग्नावित्याह दधतेऽगोपायत्सप्त च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके पञ्चमप्रपाठकेऽष्टमोऽनुवाकः ॥ ८ ॥

---

४४ चतुश्चत्वारिंशविभागस्य भाष्यं ३०१ पृष्ठे द्रष्टव्यम्।
४५ पञ्चचत्वारिंशविभागस्य भाष्यं ३०१ पृष्ठे द्रष्टव्यम्।
४६ षट्चत्वारिंशविभागस्य भाष्यं ३०२ पृष्ठे द्रष्टव्यम्।
४७ सप्तचत्वारिंशविभागस्य भाष्यं ३०२ पृष्ठे द्रष्टव्यम्।
४८ अष्टाचत्वारिंशविभागस्य भाष्यं ३०३ पृष्ठे द्रष्टव्यम्।

अथ पञ्चमे नवमोऽनुवाकः।

घर्मो वा ते दिवि शुगिति तिस्र आहुतीर्जुहोति। छन्दोभिरेवास्यैभ्यो लोकेभ्यः शुचमवयजते (१)।

इयत्यग्रे जुहोति। अथेयत्यथेयति। त्रय इमे लोकाः। एभ्य एव लोकेभ्यः शुचमवयजते (२)।

अनु नोऽद्यानुमतिरित्याहानुमत्यै (३)।

दिवस्त्वा परस्पाया इत्याह। दिव एवेमाँल्लोकान्दाधार (४)।

ब्रह्मणस्त्वा परस्पाया इत्याह (१)। एष्वेव लोकेषु प्रजा दाधार (५)।

प्राणस्य त्वा परस्पाया इत्याह। प्रजास्वेव प्राणान्दाधार (६)।

शिरो वा एतद्यज्ञस्य। यत्प्रवर्ग्यः। असौ खलु वा आदित्यः प्रवर्ग्यः। तं यद्दक्षिणा प्रत्यञ्चमुदञ्चमुदासेयेत्। छिन्नं यज्ञस्य शिरो हरेत्। प्राञ्चमुदासयति। पुरस्तादेव यज्ञस्य शिरः प्रतिदधाति (२)। प्राञ्चमुदासयति। तस्मादसावादित्यः पुरस्तादुदेति (७)।

शफोपयमान्धवित्राणि धृष्टी इत्यन्ववहरन्ति। सात्मानमेवैनꣳ सतनुं करोति (८)।

---

१ प्रथमविभागस्य भाष्यं ३०४ पृष्ठे द्रष्टव्यम्।
२ द्वितीयविभागस्य भाष्यं ३०४ पृष्ठे द्रष्टव्यम्।
३ तृतीयविभागस्य भाष्यं ३०५ पृष्ठे द्रष्टव्यम्।
४ चतुर्थविभागस्य भाष्यं ३०५ पृष्ठे द्रष्टव्यम्।
५ पञ्चमविभागस्य भाष्यं ३०६ पृष्ठे द्रष्टव्यम्।
६ षष्ठविभागस्य भाष्यं ३०६ पृष्ठे द्रष्टव्यम्।
७ सप्तमविभागस्य भाष्यं ३०६ पृष्ठे द्रष्टव्यम्।
८ अष्टमविभागस्य भाष्यं ३०६ पृष्ठे द्रष्टव्यम्।

सात्माऽमुष्मिँल्लोके भवति । य एवं वेद (९) ।

औदुम्बराणि भवन्ति । ऊर्ग्वा उदुम्बरः । ऊर्जमेवावरुन्धे (१०) ।

वर्त्मना वा अन्वित्य (३) । यज्ञꣳ रक्षाꣳसि जिघाꣳसन्ति । साम्ना प्रस्तोताऽन्ववैति । साम वै रक्षोहा । रक्षसामपहत्यै (११) ।

त्रिर्निधनमुपैति । त्रय इमे लोकाः । एभ्य एव लोकेभ्यो रक्षाꣳस्यपहन्ति (१२) ।

पुरुषः पुरुषो निधनमुपैति । पुरुषः पुरुषो हि रक्षस्वी । रक्षसामपहत्यै (४) (१३) ।

यत्पृथिव्यामुद्वासयेत् । पृथिवीꣳ शुचार्पयेत् । यदप्सु । अपः शुचार्पयेत् । यदोषधीषु । ओषधीः शुचार्पयेत् । यद्वनस्पतिषु । वनस्पतीञ्छुचार्पयेत् । हिरण्यं निधायोद्वासयति । अमृतं वै हिरण्यम् (५) । अमृत एवैनं प्रतिष्ठापयति (१४) ।

वल्गुरसि शंयुधाया इति त्रिः परिषिञ्चन्पर्येति । त्रिवृद्वा अग्निः । यावानेवाग्निः । तस्य शुचꣳ शमयति (१५)

त्रिः पुनः पर्येति । षट्संपद्यन्ते । षड्वा ऋतवः । ऋतुभिरेवास्य शुचꣳ शमयति (१६) ।

---

९ नवमविभागस्य भाष्यं ३०७ पृष्ठे द्रष्टव्यम् ।
१० दशमविभागस्य भाष्यं ३०७ पृष्ठे द्रष्टव्यम् ।
११ एकादशविभागस्य भाष्यं ३०७ पृष्ठे द्रष्टव्यम् ।
१२ द्वादशविभागस्य भाष्य ३०७ पृष्ठे द्रष्टव्यम् ।
१३ त्रयोदशविभागस्य भाष्यं ३०८ पृष्ठे द्रष्टव्यम् ।
१४ चतुर्दशविभागस्य भाष्यं ३०८ पृष्ठे द्रष्टव्यम् ।
१५ पञ्चदशविभागस्य भाष्यं ३०८ पृष्ठे द्रष्टव्यम् ।
१६ षोडशविभागस्य भाष्यं ३०९ पृष्ठे द्रष्टव्यम् ।

चतुःस्रक्तिर्नाभिर्ऋतस्येत्याह (६)। इयं वा ऋतम्। अस्या एष एव नाभिः। यत्प्रवर्ग्यः। तस्मादेवमाह(१७)।

सदो विश्वायुरित्याह। सदो ह्ययम् (१८)।

अप द्वेषो अप ह्वर इत्याह भ्रातृव्यापनुत्त्यै (१९)।

घर्मस्तत्तेऽन्नमेतत्पुरीषमिति दध्ना मधुमिश्रेण पूरयति।

ऊर्ग्वा अन्नाद्यं दधि। ऊर्जैवैनमन्नाद्येन समर्धयति (७) (२०)।

अनशनायुको भवति। य एवं वेद (२१)।

रन्तिर्नामासि दिव्यो गन्धर्व इत्याह। रूपमेवास्यैतन्महिमानꣳ रन्तिं बन्धुतां व्याचष्टे (२२)।

समहमायुषा सं प्राणेनेत्याह। आशिषमेवैतामाशास्ते (२३)।

व्यसौ योऽस्मान्द्वेष्टि यं च वयं द्विष्म इत्याह। अभिचार एवास्यैषः (२४)।

अचिक्रदद्वृषा हरिरित्याह। वृषा ह्येषः (८)। वृषा हरिः (२५)।

महान्मित्रो न दर्शत इत्याह। स्तौत्येवैनमेतत् (२६)।

चिदसि समुद्रयोनिरित्याह। स्वामेवैनं योनिं गमयति (२७)।

---

१७ सप्तदशविभागस्य भाष्यं ३०९ पृष्ठे द्रष्टव्यम्।
१८ अष्टादशविभागस्य भाष्यं ३०९ पृष्ठे द्रष्टव्यम्।
१९ एकोनविंशविभागस्य भाष्यं ३०९ पृष्ठे द्रष्टव्यम्।
२० विंशविभागस्य भाष्यं ३१० पृष्ठे द्रष्टव्यम्।
२१ एकविंशविभागस्य भाष्यं ३१० पृष्ठे द्रष्टव्यम्।
२२ द्वाविंशविभागस्य भाष्यं ३१० पृष्ठे द्रष्टव्यम्।
२३ त्रयोविंशविभागस्य भाष्यं ३११ पृष्ठे द्रष्टव्यम्।
२४ चतुर्विंशविभागस्य भाष्यं ३११ पृष्ठे द्रष्टव्यम्।
२५ पञ्चविंशविभागस्य भाष्यं ३११ पृष्ठे द्रष्टव्यम्।
२६ षड्विंशविभागस्य भाष्यं ३१२ पृष्ठे द्रष्टव्यम्।
२७ सप्तविंशविभागस्य भाष्यं ३१२ पृष्ठे द्रष्टव्यम्।

नमस्ते अस्तु मा मा हिꣳसीरित्याहाहिꣳसायै (२८)। विश्वावसुꣳ सोमगन्धर्वमित्याह । यदेवास्य क्रियमाणस्यान्तर्यन्ति । तदेवास्यैतेनाऽऽप्याययति (२९)। विश्वावसुरभि तन्नो गृणात्वित्याह (९) । पूर्वमेवोदितम् । उत्तरेणाभिगृणाति ॥ (३०)।

धियो हिन्वानो धिय इन्नो अव्यादित्याह । ऋतूनेवास्मै कल्पयति (३१)।

प्राऽऽसां गन्धर्वो अमृतानि वोचदित्याह । प्राणा वा अमृताः । प्राणानेवास्मै कल्पयति (३२)।

एतत्त्वं देव घर्म देवो देवानुपागा इत्याह । देवो ह्येष सन्देवानुपैति (३३)।

इदमहं मनुष्यो मनुष्यानित्याह (१०) । मनुष्यो हि । एष सन्मनुष्यानुपैति (३४)।

ईश्वरो वै प्रवर्ग्यमुद्वासयन्। प्रजां पशून्त्सोमपीथमनूद्वासः सोमपीथानुमेहि । सह प्रजया सह रायस्पोषेणेत्याह । प्रजामेव पशून्त्सोमपीथमात्मन्धत्ते (३५)।

सुमित्रा न आप ओषधयः सन्त्वित्याह । आशिषमेवैतामाशास्ते (३६)।

---

२८ अष्टाविंशविभागस्य भाष्यं ३१२ पृष्ठे द्रष्टव्यम्।
२९ एकोनत्रिंशविभागस्य भाष्यं ३१३ पृष्ठे द्रष्टव्यम्।
३० त्रिंशविभागस्य भाष्यं ३१३ पृष्ठे द्रष्टव्यम्।
३१ एकत्रिंशविभागस्य भाष्यं ३१४ पृष्ठे द्रष्टव्यम्।
३२ द्वात्रिंशविभागस्य भाष्यं ३१४ पृष्ठे द्रष्टव्यम्।
३३ त्रयस्त्रिंशविभागस्य भाष्यं ३१४ पृष्ठे द्रष्टव्यम्।
३४ चतुस्त्रिंशविभागस्य भाष्यं ३१५ पृष्ठे द्रष्टव्यम्।
३५ पञ्चत्रिंशविभागस्य भाष्यं ३१५ पृष्ठे द्रष्टव्यम्।
३६ षट्त्रिंशविभागस्य भाष्यं ३१५ पृष्ठे द्रष्टव्यम्।

दुर्मित्रास्तस्मै भूयासुर्योऽस्मान्द्वेष्टि यं च वयं द्विष्म इत्याह। अभिचार एवास्यैषः (३७)।

प्र वा एषोऽस्माल्लोकाच्च्यवते। यः प्रवर्ग्यमुद्वासयति। उदु त्यं चित्रमिति सौरीभ्यामृग्भ्यां पुनरेत्य गार्हपत्ये जुहोति। अयं वै लोको गार्हपत्यः। अस्मिन्नेव लोके प्रतितिष्ठति। असौ खलु वा आदित्यः सुवर्गो लोकः। यत्सौरी भवतः। तेनैव सुवर्गाल्लोकान्नैति (११)(३८)॥

ब्रह्मणस्त्वा परस्पाया इत्याह दधात्यन्वित्यं रक्षस्वी रक्षसामपहत्यै वै हिरण्यमाहार्धयति ह्येष गृणात्वित्याह मनुष्यानित्याहास्यैषोऽष्टौ च॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके पञ्चमप्रपाठके नवमोऽनुवाकः॥ ९॥

अथ पञ्चमे दशमोऽनुवाकः।

प्रजापतिं वै देवाः शुक्रं पयोऽदुहन्। तदेभ्यो नव्यभवत्। तदग्निर्व्यकरोत्। तानि शुक्रियाणि सामान्यभवन्। तेषां यो रसोऽत्यक्षरत्। तानि शुक्रयजूंष्यभवन्। शुक्रियाणां वा एतानि शुक्रियाणि। सामपयसं वा एतयोरन्यत्। देवानामन्यत्पयः। यद्गोः पयः (१)। तत्साम्नः पयः। यदजायै पयः। तद्देवानां पयः। तस्माद्यत्रैतैर्यजुर्भिश्चरन्ति। तत्पयसा चरन्ति प्रजापतिमेव तद्देवान्पयसाऽन्नाद्येन समर्धयन्ति (१)।

३७ सप्तत्रिंशविभागस्य भाष्यं ३१६ पृष्ठे द्रष्टव्यम्।
३८ अष्टात्रिंशविभागस्य भाष्यं ३१६ पृष्ठे द्रष्टव्यम्।
१ प्रथमविभागस्य भाष्यं ३१७ पृष्ठे द्रष्टव्यम्।

एष ह त्वै साक्षात्प्रवर्ग्यं भक्षयति । यस्यैवं विदुषः प्रवर्ग्यः प्रवृज्यते (२) ।

उत्तरवेद्यामुद्वासयेत्तेजस्कामस्य । तेजो वा उत्तरवेदिः (२) । तेजः प्रवर्ग्यः । तेजसैव तेजः समर्धयति (३) ।

उत्तरवेद्यामुद्वासयेदन्नकामस्य । शिरो वा एतद्यज्ञस्य । यत्प्रवर्ग्यः । मुखमुत्तरवेदिः । शीर्ष्णैव मुखꣳ संदधात्यन्नाद्याय । अन्नाद एव भवति (४) ।

यत्र खलु वा एतमुद्वासितं वयाꣳसि पर्यासते । परि वै ताꣳ समां प्रजा वयाꣳस्यासते (३) । तस्मादुत्तरवेद्यामेवोद्वासयेत् । प्रजानां गोपीथाय (५) ।

पुरो वा पश्चाद्वोद्वासयेत् । पुरस्ताद्वा एतज्ज्योतिरुदेति । तत्पश्चान्निम्रोचति । स्वामेवैनं योनिमनूद्वासयति (६) ।

अपां मध्य उद्वासयेत् । अपां वा एतन्मध्याज्ज्योतिरजायत । ज्योतिः प्रवर्ग्यः । स्व एवैनं योनौ प्रतिष्ठापयति (४) (७) ।

यं द्विष्यात् । यत्र स स्यात् । तस्यां दिश्युद्वासयेत् । एष वा अग्निर्वैश्वानरः । यत्प्रवर्ग्यः । अग्निनैवैनं वैश्वानरेणाभिप्रवर्तयति (८) ।

औदुम्बर्याꣳ शाखायामुद्वासयेत् । ऊर्वा उदुम्बरः ।

---

२ द्वितीयविभागस्य भाष्यं ३१७ पृष्ठे द्रष्टव्यम् ।
३ तृतीयविभागस्य भाष्यं ३१८ पृष्ठे द्रष्टव्यम् ।
४ चतुर्थविभागस्य भाष्यं ३१८ पृष्ठे द्रष्टव्यम् ।
५ पञ्चमविभागस्य भाष्यं ३१८ पृष्ठे द्रष्टव्यम् ।
६ षष्ठविभागस्य भाष्यं ३१८ पृष्ठे द्रष्टव्यम् ।
७ सप्तमविभागस्य भाष्यं ३१९ पृष्ठे द्रष्टव्यम् ।
८ अष्टमविभागस्य भाष्यं ३१९ पृष्ठे द्रष्टव्यम् ।

अन्नं प्राणः। शुग्घर्मः (५)। इदमहममुष्याऽऽमुष्यायणस्य शुचा प्राणमपि दहामीत्याह। शुचैवास्य प्राणमपि दहति। ताजगार्तिमार्च्छति (९)।

यत्र दर्भा उपदीकसंतताः स्युः। तदुद्वासयेद्वृष्टिकामस्य। एता वा अपामनुज्झावर्यो नाम। यद्दर्भाः। असौ खलु वा आदित्य इतो वृष्टिमुदीरयति। असावेवास्मा आदित्यो वृष्टिं नियच्छति। ता आपो नियता धन्वना यन्ति (६) (१०)॥

गोः पयं उत्तरवेदिरासते स्थापयति घर्मो यन्ति॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके पञ्चमप्रपाठके दशमोऽनुवाकः॥ १०॥

अथ पञ्चम एकादशोऽनुवाकः।

प्रजापतिः संभ्रियमाणः। सम्राट्संभृतः। घर्मः प्रवृक्तः। महावीर उद्वासितः। असौ खलु वावैष आदित्यः। यत्प्रवर्ग्यः। स एतानि नामान्यकुरुत (१)।

य एवं वेद। विदुरेनं नाम्ना (२)।

ब्रह्मवादिनो वदन्ति (१)। यो वै वसीयाꣳसं यथानाममुपचरति। पुण्यार्तिं वै स तस्मै कामयते। पुण्यार्तिमस्मै कामयन्ते। य एवं वेद। तस्मादेवं विद्वान्। घर्म इति दिवाऽऽचक्षीत। सम्राडिति नक्तम्। एते वा एतस्य प्रिये तनुवौ। एते अस्य प्रिये नामनी। प्रियये-

---

९ नवमविभागस्य भाष्यं ३१९ पृष्ठे द्रष्टव्यम्।
१० दशमविभागस्य भाष्यं ३१९ पृष्ठे द्रष्टव्यम्।
१ प्रथमविभागस्य भाष्यं ३९९ पृष्ठे द्रष्टव्यम्।
२ द्वितीयविभागस्य भाष्यं ३९९ पृष्ठे द्रष्टव्यम्।

वैनं तनुवा (२) । प्रियेण नाम्ना समर्धयति । कीर्तिरस्य पूर्वा गच्छति जनतामायतः (३) ।

गायत्री देवेभ्योऽपाक्रामत् । तां देवाः प्रवर्ग्येणैवानुव्यभवन् । प्रवर्ग्येणाऽऽप्नुवन् । यच्चतुर्विंशतिःकृत्वः प्रवर्ग्यं प्रवृणक्ति । गायत्रीमेव तदनु विभवति । गायत्रीमाप्नोति । पूर्वोऽस्य जनं यतः कीर्तिर्गच्छति (४) ।

वैश्वदेवः सꣳसन्नः (३) । वसवः प्रवृक्तः । सोमोऽभिक्रीयमाणः । आश्विनः पर्यस्यानीयमाने । मारुतः क्रथन् । पौष्ण उदन्तः । सारस्वतो विष्यन्दमानः । मैत्रः शरो गृहीतः । तेज उद्यतो वायुः । ह्रियमाणः प्रजापतिः । हूयमानो वाग्घुतः (४) । असौ खलु वावैष आदित्यः । यत्प्रवर्ग्यः । स एतानि नामान्यकुरुत (५) ।

य एवं वेद । विदुरेनं नाम्ना (६) ।

ब्रह्मवादिनो वदन्ति । यन्मृन्मयमाहुतिं नाश्नुतेऽथ । कस्मादेषोऽश्नुत इति । वागेष इति ब्रूयात् । वाचैव वाचं दधाति (५) । तस्मादश्नुते (७) ।

प्रजापतिर्वा एष द्वादशधा विहितः । यत्प्रवर्ग्यः । यत्प्रागवकाशेभ्यः । तेन प्रजा असृजत । अवकाशैर्देवासुरानसृजत । यदूर्ध्वमवकाशेभ्यः । तेनान्नमसृजत । अन्नं प्रजापतिः । प्रजापतिर्वावैषः (६) । (८) ॥

---

३ तृतीयविभागस्य भाष्यं ३९६ पृष्ठे द्रष्टव्यम् ।
४ चतुर्थविभागस्य भाष्यं ३९६ पृष्ठे द्रष्टव्यम् ।
५ पञ्चमविभागस्य भाष्यं ३९७ पृष्ठे द्रष्टव्यम् ।
६ षष्ठविभागस्य भाष्यं ३९८ पृष्ठे द्रष्टव्यम् ।
७ सप्तमविभागस्य भाष्यं ३९८ पृष्ठे द्रष्टव्यम् ।
८ अष्टमविभागस्य भाष्यं ३९८ पृष्ठे द्रष्टव्यम् ।

वदन्ति तनुवा सꣳसन्नो हूयमानो वाग्घुतो दधात्येषः ॥
इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके पञ्चमप्रपाठक
एकादशोऽनुवाकः ॥ ११ ॥

अथ पञ्चमे द्वादशोऽनुवाकः ।

सविता भूत्वा प्रथमेऽहन्प्रवृज्यते । तेन कामाꣳ एति । यद्द्वितीयेऽहन्प्रवृज्यते । अग्निर्भूत्वा देवानेति । यत्तृतीयेऽहन्प्रवृज्यते । वायुर्भूत्वा प्राणानेति । यच्चतुर्थेऽहन्प्रवृज्यते । आदित्यो भूत्वा रश्मीनेति । यत्पञ्चमेऽहन्प्रवृज्यते । चन्द्रमा भूत्वा नक्षत्राण्येति (१) । यत्षष्ठेऽहन्प्रवृज्यते । ऋतुर्भूत्वा संवत्सरमेति । यत्सप्तमेऽहन्प्रवृज्यते । धाता भूत्वा शक्करीमेति । यदष्टमेऽहन्प्रवृज्यते । बृहस्पतिर्भूत्वा गायत्रीमेति । यन्नवमेऽहन्प्रवृज्यते । मित्रो भूत्वा त्रिवृत इमाल्लोकानेति । यद्दशमेऽहन्प्रवृज्यते । वरुणो भूत्वा विराजमेति (२) । यदेकादशेऽहन्प्रवृज्यते । इन्द्रो भूत्वा त्रिष्टुभमेति । यद्द्वादशेऽहन्प्रवृज्यते । सोमो भूत्वा सुत्यामेति (१) ।

यत्पुरस्तादुपसदां प्रवृज्यते । तस्मादितः परामूमाल्लोकाꣳस्तपन्नेति । यदुपरिष्टादुपसदां प्रवृज्यते । तस्मादमुतोऽर्वाङिमाल्लोकाꣳस्तपन्नेति (२) ।

य एवं वेद । ऐव तपति (३) । (३) ॥

नक्षत्राण्येति विराजमेति तपति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके पञ्चमप्रपाठके द्वादशोऽनुवाकः ॥१२॥

---

१ प्रथमविभागस्य भाष्यं ३५९ पृष्ठे द्रष्टव्यम् ।
२ द्वितीयविभागस्य भाष्यं ३५९ पृष्ठे द्रष्टव्यम् ।
३ तृतीयविभागस्य भाष्यं ३६० पृष्ठे द्रष्टव्यम् ।

देवा वै सत्रꣳ सावित्रं परिश्रिते ब्रह्मन्प्रचरिष्यामोऽग्निष्टा शिरो ग्रीवा देवस्य रशनां विश्वा आशा घर्म या ते प्रजापतिꣳ शुक्रं प्रजापतिः संभ्रियमाणः सविता द्वादश ॥ १२ ॥

देवा वै सत्रꣳ स खादिरः परिश्रितेऽभिपूर्वमथो रक्षसां ग्रैष्मावेव ब्रह्म वै देवानामश्विना घर्मौ प्राणो वा इन्द्रतमोऽग्निर्वृषा हरिर्यो वै वसीयाꣳसं यथानाममष्टोत्तरशतम् ॥ १०८ ॥

शं नः ० तन्नो मा हासीत् ॥

ॐ शान्तिः शान्तिः शान्तिः ।

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके पञ्चमप्रपाठकः समाप्तः ॥ ५ ॥

---

१ ग. 'मौ पातं मा° ।

अथ कृष्णयजुर्वेदीयतैत्तिरीयारण्यके षष्ठप्रपाठकस्याऽऽरम्भः ।

(तत्र प्रथमोऽनुवाकः)

हरिः ॐ ।

सं त्वा सिञ्चामि यजुषा प्रजामायुर्धनं च ॥

ॐ शान्तिः शान्तिः शान्तिः ॐ ॥

यस्य निश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ १ ॥
प्रवर्ग्यब्राह्मणं प्रोक्तं पञ्चमे हि प्रपाठके ।
पितृमेधस्य मन्त्रास्तु दृश्यन्तेऽस्मिन्प्रपाठके ॥ २ ॥

तेषां च पितृमेधमन्त्राणां विनियोगो भरद्वाजकल्पे बौधायनकल्पे चाभिहितः । तत्राऽऽहिताग्नेर्मरणेसंशये दहनदेशं जोषयते दक्षिणाप्रत्यक्प्रवणमित्यारभ्य भरद्वाज आह—" अन्वारब्धे मृत आहवनीये स्रुगाहुतिं जुहोति परे युवाऽसम् " इति । बौधायनोऽप्येवमेवाऽऽह—" अथ गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वा प्रेतस्य दक्षिणं बाहुमन्वारभ्य जुहोति परे युवाऽसम् " इति । पाठस्तु—

परे युवाऽसं प्रवतो महीरनु बहुभ्यः पन्थाम-
नपस्पशानम् । वैवस्वतꣳ संगमनं जनानां
यमꣳ राजानꣳ हविषा दुवस्यत, इति ।

हे पितृमेधकर्तारः पितॄणां **राजानं यमं हविषा दुवस्यत** प्रीणयत । कीदृशम् । **प्रवतः** प्रकृष्टकर्मवतो भूलोकवर्तिभोगसाधनं पुण्यमनुष्ठितवतः पुरुषान्गृहीत्वर्त्तद्भोगोचितभूप्रदेशविशेषाननु **परे युवाऽसं** क्रमेण मरणादूर्ध्वं प्रापितवन्तम् । तथा **बहुभ्यः** स्वर्गार्थिभ्यः पुण्यकृद्भ्यः पुण्यकृतामर्थे **पन्थां** स्वर्गस्योचितं मार्गमनपस्पशानमबाधमानम् । पापिन एव पुरुषान्स्वर्गमार्गबाधेन नरकं प्रापयति नतु पुण्यकृत इत्यर्थः । **वैवस्वतं** विवस्वतः सूर्यस्य पुत्रम् । **जनानां संगमनं** पापिनां गन्तव्यस्थानरूपम् ।

कल्पः—"औदुम्बर्यामासन्द्यां कृष्णाजिनं दक्षिणाग्रीवमधरलोमाऽऽस्तीर्य तस्मिन्नेनमुत्तानं निपात्योपान्तदशेनाहतेन वाससा प्रोर्णोतीदं त्वा वस्त्रम् " इति । पाठस्तु—

---

१ क. ख. °गो भार° । २ ख. °णसमये । ३ क. ख. भार° । ४ क. ख. स्रुगाहु° । ५ क. °हीत्वा । ६ ग. °त्तद्भागो° । ७ क. ख. °पात्य यत्तो६° ।

इदं त्वा वस्त्रं प्रथमं न्वागन् इति ।

हे प्रेत त्वामिदं **वस्त्रं प्रथमं नु** प्रथममेवाऽऽगन्नागच्छंतु ।

कल्पः—" अथास्येतरदुपादत्तेऽपैतदूहेति तत्पुत्रो भ्राता वाऽन्यो वा प्रत्यासन्नबन्धुः प्रतीतः परिधाय " इति । पाठस्तु—

अपैतदूह यदिहाबिभः पुरा । इष्टापूर्तमनुसंपश्य
दक्षिणां यथा ते दत्तं बहुधा वि बन्धुषु, इति।

हे प्रेत **यद्वस्त्रं पुरा** त्वमबिभर्धारितवानसि, एतदपोहापसारय । **इष्टापूर्तं** त्वयाऽनुष्ठितं श्रौतं स्मार्तं च यत्कर्म तदनुसंपश्यानुक्रमेण स्मर । **दक्षिणां** च ब्राह्मणेभ्यो दत्तामनुसंपश्य । ते त्वदीयं धनं **बन्धुषु** प्रीतिदानरूपेण **बहुधा यथा** विशेषेण **दत्तं** तमपि प्रकारमनुसंपश्य । ततस्तदनुरूपं पुण्यलोकं गच्छेत्यभिप्रायः ।

इमौ युनज्मि ते वह्नी असुनीथाय वोढवे । याभ्यां
यमस्य सादनꣳ सुकृतां चापि गच्छतात् ।

कल्पः—" अथैनमेतयाऽऽसन्द्या सह तैत्संस्थेन कटेन वा संवेष्टच दासाः प्रवयसो वहेयुरथैनमनसा वहन्तीत्येकेषामनश्चेद्युञ्ज्यात्—इमौ युनज्मि ते वह्नी असुनीथाय वोढवे । याभ्यां यमस्य सादनꣳ सुकृतां चापि गच्छतात् " इति । हे प्रेत ते तवा**सुनीथाय** प्राणसदृशस्य शरीरस्य नयनाय वोढवे शकटं वोढुं **वह्नी** वोढारावि**मौ** बलीवर्दौ **युनज्मि** शकटे योजयामि । **याभ्यां** बलीवर्दाभ्यां यमस्य **सादनं** स्थानं **सुकृतां चापि** पुण्यकृतां पुरुषाणामपि स्थानं **गच्छतात्**गमिष्यसि । तादृशौ **युनज्मी**त्यन्वयः ।

पूषा त्वेतश्च्यावयतु प्र विद्वाननष्टपशुर्भुवनस्य गोपाः ।
स त्वैतेभ्यः परिददात्पितृभ्योऽग्निर्देवेभ्यः सुविदत्रेभ्यः ।

कल्पः—अथैनमाददत आदीयमानमनुमन्त्रयते—पूषा त्वेतश्च्यावयतु प्र विद्वाननष्टपशुर्भुवनस्य गोपाः । स त्वैतेभ्यः परिददात्पितृभ्योऽग्निर्देवेभ्यः सुविदत्रेभ्य इति तृतीयमेतस्याध्वनो गत्वा निदधाति " इति । हे प्रेत **पूषा** योऽयं पोषको देवः सोऽयं त्वामितो **देशात्प्रच्यावयतु** प्रचालयतु । कीदृशः । **विद्वान्**गन्तव्यमार्गाभिज्ञः । **अनष्टपशुः** । वाहका मनुष्या द्विपात्पशवः । अनड्वाहौ चतुष्पात्पशू । अनष्टा अनुपद्रुताः पशवो यस्यासावनष्टपशुः, वाहकोपद्रवराहित्येन नेतुं समर्थः । **भुवनस्य गोपाः** सर्वस्य लोकस्य रक्षकः । **स** तादृशः पूषा त्वामेतेभ्यः पूर्वसिद्धेभ्यः **पितृभ्यः**

---

१ ख. च्छत् । क° । २ ग. तत्तल्पेन ।

परिददात्प्रयच्छतु । योऽग्निस्तव दाहं करिष्यति सोऽग्निः सुविदत्रेभ्यः सुष्ठु त्वदनुष्ठितं कर्म जानद्भ्यो देवेभ्यस्त्वां प्रयच्छतु ।

पूषेमा आशा अनुवेद सर्वाः सो अस्माꣳ अभयतमेन नेषत् । स्वस्तिदा अघृणिः सर्ववीरोऽप्रयुच्छन्पुर एतु प्रविद्वान् (१) ।

कल्पः—" अथैनमाददत आदीयमानमनुमन्त्रयते—पूषेमा आशा अनुवेद सर्वाः सो अस्माꣳ अभयतमेन नेषत् । स्वस्तिदा अघृणिः सर्ववीरोऽप्रयुच्छन्पुर एतु प्रविद्वानित्यर्धमस्याध्वनो गत्वा निदधाति " इति । योऽयं पूषा देवः सोऽयमिमाः सर्वा आशा दिशोऽनुवेदेयमनुकूला दिगिति जानाति । स देवोऽस्मानत्यन्तं भयरहितेन मार्गेण नेषन्नयतु । कीदृशः पूषा स्वस्तिदाः क्षेमप्रदः । अघृणिरदीप्तः, अस्मास्वनुग्राही । सर्ववीरः सर्वेभ्यः प्रतिकूलेभ्योऽत्यन्तं शूरः । स तादृशोऽसावप्रयुच्छन्प्रमादमकुर्वन्प्रविद्वान्मार्गं प्रकर्षेण जानन्नस्माकं पुरत एतु गच्छतु ।

आयुर्विश्वायुः परिपासति त्वा पूषा त्वा पातु प्रपथे पुरस्तात् । यत्राऽऽसते सुकृतो यत्र ते ययुस्तत्र त्वा देवः सविता दधातु ।

कल्पः—" अथैनमाददत आदीयमानमनुमन्त्रयते—आयुर्विश्वायुः परिपासति त्वा पूषा त्वा पातु प्रपथे पुरस्तात् । यत्राऽऽसते सुकृतो यत्र ते ययुस्तत्र त्वा देवः सविता दधात्विति समस्तमेतस्याध्वनो गत्वा निदधाति " इति । विश्वस्मिन्कर्मण्यागच्छतीति विश्वायुरग्निः । स चाऽऽयुरायुष्मन्तमागतवन्तं त्वां प्रेतं परिपासति परिपालयितुमिच्छति, दहनार्थमागच्छन्तं त्वां प्रतीक्षत इत्यर्थः । अयं पूषा प्रपथे प्रकृष्टे मार्गे त्वां पुरस्तात्पातु पुरतो गच्छन्प्रतिबन्धकेभ्यो रक्षोभ्यः पालयतु । यत्र यस्मिन्नुत्तमलोके सुकृतः पूर्वे पुण्यकृत आसते यत्र च मार्गे ते पुण्यकृतो ययुः सविता देवस्तत्र त्वां दधातु स्थापयतु ।

कल्पः—" अत्र राजगवीमुपाकरोति भुवनस्य पत इति जरतीं मैल्यां तज्जघन्यां कृष्णां कृष्णाक्षीं कृष्णवालां कृष्णखुरामपि वाँऽक्षिवालखुरमेव कृष्णं स्यात् " इति । पाठस्तु—

भुवनस्य पत इदꣳ हविः, इति ।

---

१ क. णिरागतदीप्तिः । अस्यानु° । २ ख. 'दीप्तिः, अस्यानु° । ३ क. ख. मू ि । ४ ख. वाऽजगामे° । ग. वाऽजां वा° । ५ ख. कृष्णां । ग. कृष्णमेवं स्या° ।

हे भुवनस्य पते पालक देव तवेदं राजगवीरूपं हविरुपाकरोमीति शेषः ।

अग्नये रयिमते स्वाहा ।

अथास्य हविषः स्वकाले प्राप्तो होमः कर्तव्यः । तद्धोममन्त्रोऽत्रैव प्रसङ्गादाम्नातः । कल्पः—तत्रैतद्धविरिडापात्र्या चमसेन वा जुहोति, " अग्नये रयिमते स्वाहा " इति । रयिमते धनवतेऽग्नये स्वाहुतमिदमस्तु ।

कल्पः—"तां घ्नन्त्युत्सृजन्ति वा यदि विघ्नन्ति तस्यां निहन्यमानायां सन्यानि जानून्यनुनिघ्नन्तः पांसूनवमृजन्ते पुरुषस्य " इति । पाठस्तु—

पुरुषस्य सयावर्यपेदघानि मृज्महे । यथा नो
अत्र नापरः पुरा जरस आयति, इति ।

सह यातुं गन्तुं शीलं यस्या राजगव्याः सा सयावरी । पुरुषस्य मृतस्य संबन्धिनि हे सयावर्यघानि पापान्यपेदपनीयैव मृज्महेऽस्माञ्शोधयामः । नोऽस्माकं जरसो वयोहानेः पुराऽपरः पाप्मा काश्चिदपि यथा नाऽऽयति नाऽऽगच्छति तथा मृज्मह इति पूर्वत्रान्वयः ।

पुरुषस्य सयावरि वि ते प्राणमसिस्रसम् । शरीरेण
महीमिहि स्वधयेहि पितृनुप प्रजयाऽस्मानिहाऽऽवह ।

कल्पः—" अथास्याः प्राणान्विस्रंसमाननुमन्त्रयते—पुरुषस्य सयावरि वि ते प्राणमसिस्रसम् । शरीरेण महीमिहि स्वधयेहि पितृनुप प्रजयाऽस्मानिहाऽऽवह " इति । हे पुरुषस्य सयावरि राजगवि ते तव प्राणं व्यसिस्रसं विस्रस्तं शिथिलं कृतवानस्मि । त्वं शरीरेण महीं भूमिमिहि प्राप्नुहि । स्वधयाऽन्नेन हविःस्वरूपेण । यद्वाऽमृतवाची स्वधाशब्दः । अमृतेन जीवरूपेण पितृनुपेहि । इहास्मिँल्लोके प्रजया पुत्रादिकया सहास्मानावह क्षेमं प्रापय ।

मैवं माऽस्ता प्रियेऽहं देवी सती पितृलोकं
यदैषि । विश्ववारा नभसा संव्ययन्त्युभौ
नो लोकौ पयसाऽभ्यावर्तस्व (२)।

कल्पः—" उपोत्थाय पाꣳसूनवमृशन्ते मैवं माऽस्ता प्रियेऽहं देवी सती पितृलोकं यदैषि । विश्ववारा नभसा संव्ययन्त्युभौ नो लोकौ पयसाऽभ्यावर्तस्व " इति । हे प्रिये

---

१ क. प्राप्ते । २ क. °ल्पः । अत्रे° । ३ क. °रिडसूनेन च° । ४ क. ख. °थास्यै प्रा° । ५ क. °मानोन° । ६ ग. यदेषि ।

राजगवि अहमेवं हताऽस्मीति मा मा ऽस्ता मनसि मननं मा कार्षीः । यद्यस्मात्कारणात्त्वं देवी देवतात्मिका सती पितृलोकं प्रैत्यैषि आगच्छसि । विश्ववारा सर्वैर्वरणीया प्रार्थनीया । नभसाऽऽकाशमार्गेण संव्ययन्ती द्युलोकं संवृण्वती । हे राजगवि तथाविधा त्वं नोऽस्माकमुभौ लोकावेतल्लोकपरलोकौ पयसा क्षीरेणाभ्यावर्तस्वाभित आवृत्तौ कुरु क्षीरपूर्णौ कुर्वित्यर्थः ।

इयं नारी पतिलोकं वृणाना निपद्यत
उप त्वा मर्त्य प्रेतम् । विश्वं पुराणमनुपालयन्ती तस्यै प्रजां द्रविणं चेह धेहि ।

कल्पः—"अथास्य भार्यामुपसंवेशयति—इयं नारी पतिलोकं वृणाना निपद्यत उप त्वा मर्त्य प्रेतम् । विश्वं पुराणमनुपालयन्ती तस्यै प्रजां द्रविणं चेह धेहि" इति । हे मर्त्य मनुष्य या नारी मृतस्य तव भार्या सा पतिलोकं वृणाना कामयमाना प्रेतं मृतं त्वामुपनिपद्यते समीपे नितरां प्राप्नोति । कीदृशी । पुराणं विश्वमनादिकालप्रवृत्तं कृत्स्नं स्त्रीधर्ममनुक्रमेण पालयन्ती । पतिव्रतानां स्त्रीणां पत्या सहैव वासः परमो धर्मः । तस्यै धर्मपत्न्यै त्वमिह लोके निवासार्थमनुज्ञां दत्त्वा प्रजां पूर्वं विद्यमानां पुत्रादिकां द्रविणं धनं च धेहि संपादय, अनुजानीहीत्यर्थः ।

उदीर्ष्व नार्यभि जीवलोकमितासुमेतमुपशेष एहि ।
हस्तग्राभस्य दिधिषोस्त्वमेतत्पत्युर्जनित्वमभिसंबभूव ।

कल्पः—"तां प्रति गतः सव्ये प्राणावभिपाद्योत्थापयति—उदीर्ष्व नार्यभि जीवलोकमितासुमेतमुपशेष एहि । हस्तग्राभस्य दिधिषोस्त्वमेतत्पत्युर्जनित्वमभिसंबभूव" इति । हे नारि त्वमितासुं गतप्राणमेतं पतिमुपशेष उपेत्य शयनं करोषि । उदीर्ष्वास्मात्पतिसमीपादुत्तिष्ठ । जीवलोकमभि जीवन्तं प्राणिसमूहमभिलक्ष्यैहि आगच्छ । त्वं हस्तग्राभस्य पाणिग्राहवतो दिधिषोः पुनर्विवाहेच्छोः पत्युरेतज्जनित्वं जायात्वमभिसंबभूवाऽऽभिमुख्येन सम्यक्प्राप्नुहि ।

सुवर्णꣳ हस्तादाददाना मृतस्य श्रियै ब्रह्मणे तेजसे बलाय । अत्रैव त्वमिह वयꣳ सुशेवा विश्वा स्पृधो अभिमातीर्जयेम ।

कल्पः—"सुवर्णेन हस्तौ संमार्ष्टि—सुवर्णꣳ हस्तादाददाना मृतस्य श्रियै ब्रह्मणे

---

१ ग प्रत्येषि । २ क. ख. °या । न° ।

तेजसे बलाय । अत्रैव त्वमिह वयꣳ सुशेवा विश्वा स्पृधो अभिमातीर्जयेम" इति । हे नारि त्वं **श्रियै** संपदर्थं **ब्रह्मणे** ब्राह्मणजात्यर्थं **तेजसे** कान्त्यर्थं **बलाय** शरीरबलार्थं **मृतस्य** पुरुषस्य **हस्तान्सुवर्णमाददाना** सत्यत्रैव लोके तिष्ठ । **वयमपीह** लोके **सुशेवाः** सुखं सेवमानाः सन्तः **स्पृधोऽस्माभिः** सह स्पर्धमाना **विश्वा अभिमातीः** सर्वान्शत्रून्**जयेम** ।

धनुर्हस्तादाददाना मृतस्य श्रियै क्षत्रायौजसे
बलाय । अत्रैव त्वमिह वयꣳ सुशेवा विश्वा स्पृधो
अभिमातीर्जयेम । मणिꣳ हस्तादाददाना मृतस्य
श्रियै विशे पुष्टये बलाय । अत्रैव त्वमिह वयꣳ
सुशेवा विश्वा स्पृधो अभिमातीर्जयेम (३) ।

कल्पः—" धनुर्हस्तादाददाना मृतस्य श्रियै क्षत्रायौजसे बलाय । अत्रैव त्वमिह वयꣳ सुशेवा विश्वा स्पृधो अभिमातीर्जयेमेति राजन्यस्य । मणिꣳ हस्तादाददाना मृतस्य श्रियै विशे पुष्टयै बलाय । अत्रैव त्वमिह वयꣳ सुशेवा विश्वा स्पृधो अभिमातीर्जयेमेति वैश्यस्य " इति । एतौ मन्त्रौ पूर्वोक्तब्राह्मणमन्त्रवद्व्याख्येयौ ।

इममग्ने चमसं मा विजीह्वरः प्रियो देवानामुत सोम्यानाम् ।
एष यश्चमसो देवपानस्तस्मिन्देवा अमृता मादयन्ताम् ।

कल्पः[3]—" कथमु खल्वस्य पात्राणि प्रथुञ्ज्यादिति दध्ना सर्पिर्मिश्रेण पूरयित्वा मुखेऽग्निहोत्रहवणीं नासिकयोः स्रुवावक्ष्णोर्हिरण्यशकलावाज्यस्रुवौ वा प्रत्यस्य कर्णयोः प्राशित्रहरणं भित्त्वा शिरसि कपालानि ललाट एककपालं शिरस्तः प्रणीताप्रणयनं चमसं निदधाँति—इममग्ने चमसं मा विजीह्वरः प्रियो देवानामुत सोम्यानाम् । एष यश्चमसो देवपानस्तस्मिन्देवा अमृता मादयन्ताम्" इति । हेऽग्न **इमं चमसं मा विजीह्वरः** कुटिलं मा कुरु, मा नाशयेत्यर्थः । **एष** चमसो **देवानां प्रियः**, देवाश्चमसेन सोमरसं पातुं वाञ्छन्ति । **उतापि** च **सोम्यासां** सोमयोग्यानामृत्विग्यजमानानां **प्रियः** । **यश्चमसो देवपानो** देवानां पानहेतुस्तस्मिंश्चमसेऽमृता देवा **मादयन्तां** यजमानं हर्षयन्ताम् ।

अग्नेर्वर्म परि गोभिर्व्ययस्व संप्रोर्णुष्व मेदसा पीवसा च ।
नेत्त्वा धृष्णुर्हरसा जर्हृषाणो दधद्विधक्ष्यन्पर्यङ्ख्याते ।

---

१ क. ख. सुस्वेन २ ग. °ल्पः । अथ मुखादिष्वस्य । ३ ग. °णि नियु° । ४ ग. °धातीति ।

कल्पः—" अथैनं चर्मणा सशीर्षबालपादेनोत्तरलोम्ना प्रोर्णोति—अग्नेर्वर्म परि गोभिर्व्ययस्व संप्रोर्णुष्व मेदसा पीवसा च। नेत्त्वा धृष्णुर्हरसा जर्हृषाणो दधद्विधक्ष्यन्पर्यङ्क्ष्यातै " इति। हे वर्म कवचस्थानीय चर्मविशेषाग्नेर्गोभी रश्मिभिः परितो व्ययस्वैनं प्रेतं संवृतं कुरु। पीवसा स्थूलेन मेदसा च त्वदीयावयवेन मेदोभिधेन प्रोर्णुष्व सम्यगाच्छादय। धृष्णुर्धार्ष्ण्यं (ष्टर्चे) नोपेतोऽयमग्निस्त्वा दधद्धे चर्म त्वां धारयन्हरसा स्वकीयेन तेजसा जर्हृषाणो हर्तुमिच्छन्विधक्ष्यन्विशेषेण दग्धुमिच्छन्नुद्युक्तो नेत्पर्यङ्क्ष्यातै परितो नैव चालयतु तवापसारणं मा करोतु।

मैनमग्ने विदहो माऽभिशोचो माऽस्य
त्वचं चिक्षिपो मा शरीरम्। यदा शृतं
करवो जातवेदोऽथेमेनं प्रहिणुतात्पितृभ्यः।

कल्पः— " अथैनमादीपयत्यादीप्यमानमनुमन्त्रयते—मैनमग्ने विदहो माऽभिशोचो माऽस्य त्वचं चिक्षिपो मा शरीरम्। यदा शृतं करवो जातवेदोऽथेमेनं प्रहिणुतात्पितृभ्यः " इति। हेऽग्न एनं प्रेतं मा विदहो विशेषेण दग्धं मषीरूपं मा कुरु। माऽभिशोचोऽभितः शोकेन संतापेन युक्तं मा कुरु। अस्य त्वचं मा चिक्षिपेतस्ततो विक्षिप्तां मा कुरु। शरीरमपि विक्षिप्तं मा कुरु। हे जातवेदो यदा शरीरं शृतं पक्वं करवोऽथेमेनमनन्तरमेवैनं प्रेतं पुरुषं पितृभ्यः प्रहिणुतात्पितृसमीपे प्रेरय।

शृतं यदाऽकरसि जातवेदोऽथेमेनं परिदत्तात्पितृभ्यः।
यदा गच्छात्यसुनीतिमेतामथा देवानां वशनीर्भवाति।

कल्पः—" प्रज्वलितमनुमन्त्रयते—शृतं यदाऽकरसि जातवेदोऽथेमेनं परिदत्तात्पितृभ्यः। यदा गच्छात्यसुनीतिमेतामथा देवानां वशनीर्भवाति " इति। हे जातवेदो यदा तच्छरीरं शृतं पक्वमकः कृतवानसि तदानीमेवैनं पितृभ्यः परिदत्तात्प्रयच्छ। यदाऽयं प्रेत एतामग्निना त्वया कृतामसुनीतिं प्राणस्य नयनं प्राणप्रेरणं गच्छाति प्राप्नोति, अथानन्तरं देवानां वशनीर्भवाति वशं प्राप्तो भवति।

सूर्यं ते चक्षुर्गच्छतु वातमात्मा द्यां च गच्छ
पृथिवीं च धर्मणा। अपो वा गच्छ यदि तत्र
ते हितमोषधीषु प्रतितिष्ठा शरीरैः।

कल्पः—" अत्र षड्होतारं व्याचष्टे—सूर्यं ते चक्षुर्गच्छतु वातमात्मा द्यां च गच्छ पृथिवीं च धर्मणा। अपो वा गच्छ यदि तत्र ते हितमोषधीषु प्रतितिष्ठा शरीरैः " इति।

सूर्यं त इत्यादिमन्त्रस्य षड्होतेति नामधेयम्। हे प्रेत ते त्वदीयं चक्षुरिन्द्रियं सूर्यं गच्छतु। आत्मा प्राणो बाह्यवायुं गच्छतु। त्वमपि धर्मणा सुकृतेन तत्फलं भोक्तुं द्युलोकं भूलोकं च गच्छ, अपो वा गच्छ। चक्षुरादीन्द्रियसामर्थ्यं पुनर्देहग्रहणपर्यन्तं तत्तदधिष्ठातृदेवता [गतं] त्वया द्युलोकादिषु शरीरे स्वीकृते पश्चात्त्वामेव प्राप्स्यति। यत्र (दि) यस्मिल्लोके ते तव हितं सुखमस्ति तत्र गत्वौषधीषु प्रविश्य तद्द्वारा पितृदेहमातृदेहौ प्रविश्य तत्र तत्रोचितानि शरीराणि स्वीकृत्य तैः शरीरैः प्रतिष्ठितो भव।

अजोऽभागस्तपसा तं तपस्व तं ते शोचिस्त-
पतु तं ते अर्चिः। यास्ते शिवास्तनुवो जात-
वेदस्ताभिर्वहेमꣳ सुकृतां यत्र लोकाः।

कल्पः—" तत्रैतमजं चित्यन्तेऽबलेन शुल्बेन तीजं बध्नाति—अजोऽभागस्तपसा तं तपस्व तं ते शोचिस्तपतु तं ते आर्चिः। यास्ते शिवास्तनुवो जातवेदस्ताभिर्वहेमꣳ सुकृतां यत्र लोकाः " इति। यत्र (तत्र) चितेः पश्चिमभागे समीपे केनचिदबलेन शुल्बेनाजं बध्नीयात् (बध्नाति), ज्वालया संतप्तः स (* तेजसा सह शुल्बो) यथा न द्रवति तथा बध्नीयात्, तदानीमजोऽभाग इत्येतं मन्त्रं पठेत्। हेऽग्नेऽयमजो भागरहितः। तमजं तपसा त्वदीयेन तापेन तपस्व तप्तं कुरु। तथा ते शोचिः शोकहेतुज्वालाविशेषः, तं तपतु। तथाऽर्चिर्भासको ज्वालाविशेषः, तमजं तपतु। तपःशोचिरार्चिःशब्दानां संतापतारतम्येन भेदः। हे जातवेदस्ते तव यास्तनुवः शिवाः सुखहेतवो नतु तापप्रदास्ताभिरिमं प्रेतं वह यत्र यस्मिल्लोके सुकृतां पुण्यकृतां लोकाः सन्ति तत्र प्रापय।

अयं वै त्वमस्मादधि त्वमेतदयं वै तदस्य योनि-
रासि। वैश्वानरः पुत्रः पित्रे लोककृज्जातवेदो
वहेमꣳ सुकृतां यत्र लोकाः (४) ॥
विद्वानग्नावव्वृत्स्वाभिमातीर्जयेम शरीरैश्चत्वारि च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके षष्ठप्रपाठके
प्रथमोऽनुवाकः ॥ १ ॥

---

* धनुश्चिह्नान्तर्गतमधिकमिव भाति।

---

१ ग. °च्छ वा जलं ग°। २ ख. °श्चात्त्वरे°। ३ क. प्र प्यन्ति। ख. प्राप्स्यसि। ४ क. ख. यथा। ५ ग. °था द्र°।

कल्पः—"अथान्यां जुहोति—अयं वै त्वमस्मादधि त्वमेतदयं वै तदस्य योनिरसि । वैश्वानरः पुत्रः पित्रे लोककृज्जातवेदो वहेमꣳ सुकृतां यत्र लोकाः" इति । उपरितनानुवाकोक्तैर्नवभिर्मन्त्रैर्नव हुत्वाऽथानन्तरमन्यामेतामृचं जुहुयात् । हे **जातवेदोऽयमेव प्रेतः पुरुषस्त्वं** न तस्य तव च भेदोऽस्ति । **अस्मादध्यस्य** प्रेतस्य शरीरस्योपरि **त्वमग्निरेतत्प्रत्यक्षं** यथा भवति तथा वर्तसे । **तत्तस्मादत्यन्तभेदाभावात्कारणादस्य** प्रेतस्यायमेव **वैश्वानरस्त्वं योनिरसि** स्थानप्रदोऽसि । सर्वत्र हि **पुत्रः पित्रे लोककृद्भवति** । पुंनाम्नो नरकात्त्रायत इति व्युत्पत्तेः । अयं च पुरा यजमानत्वदशायां नानाविधैः कर्मभिरग्नेः पालनात्तव पिता । ततो हे **जातवेदो यत्र सुकृतां** पुण्यकृतां **लोकाः** स्थानानि सन्ति तत्रेमं प्रेतं पुरुषं **वह** प्रापय ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये षष्ठप्रपाठके प्रथमोऽनुवाकः ॥ १ ॥

अथ षष्ठे द्वितीयोऽनुवाकः ।

कल्पः—"पर्णमयेन स्रुवेणोपघातं जुहोति— य एतस्य पथो गोप्तारस्तेभ्यः स्वाहेति नव स्रुवाहुतीः" इति । उपघातमुपहत्योपहत्य सकृत्सकृदवदायेत्यर्थः । पाठस्तु—

य एतस्य पथो गोप्तारस्तेभ्यः स्वाहा य एतस्य पथो रक्षितारस्तेभ्यः स्वाहा य एतस्य पथोऽभिरक्षितारस्तेभ्यः स्वाहा ख्यात्रे स्वाहाऽपाख्यात्रे स्वाहाऽभिलालपते स्वाहाऽपलालपते स्वाहाऽग्नये कर्मकृते स्वाहा यमत्र नाधीमस्तस्मै स्वाहा, इति ।

एतस्य पथो मृतेन गन्तव्यस्य स्वर्गमार्गविषयस्य मार्गस्य रक्षका देवास्त्रिविधा गोप्तृरक्षित्रभिरक्षितृनामकाः, ते च क्रमेण त्रिषु स्थानेषु तिष्ठन्ति । तादृशा ये सन्ति **तेभ्यः** स्वाहुतमिदमस्तु । यजमानकीर्तेः प्रकटयिता कश्चिद्देवः **ख्याता** तस्मै स्वाहुतमिदमस्तु । सहि तुष्टः सन्देवलोके ख्यातिं करिष्यति । अपकीर्तेः प्रकटयिता कश्चिदपाख्याता तस्मै स्वाहुतमिदमस्तु । स च तुष्टोऽपकीर्तिं वर्जयति । देवानामग्रे सुकृतं साकल्येन यः कथयति **सोऽभिलालपन्** । तद्योऽपलपति **सोऽपलालपन्** । ताभ्यां स्वाहुतमिदमस्तु । पूर्ववदिष्टप्राप्त्यनिष्टपरिहारौ योजनीयौ । पूर्वानुष्ठितकर्मणामेतस्य च कर्मणो निष्पादको योऽग्निस्तस्मै **कर्मकृते** स्वाहुतमिदमस्तु यं वाऽन्यदेवमत्रोपयुक्तं वयं **नाधीमो** न स्मरामस्तस्मै स्वाहुतमिदमस्तु ।

अनन्तरभाविनोर्मन्त्रयोर्विनियोगो भरद्वाजबौधायनाभ्यामनुक्तत्वाद्ग्रन्थान्तरे द्रष्टव्यः। प्रकरणबलात्तु होमार्थता प्रतीयते। तत्र प्रथमं मन्त्रमाह—

यस्ते इध्मं जभरत्सिष्विदानो मूर्धानं वा ततपते
त्वाया। दिवो विश्वस्मात्सीमघायत उरुष्यः, इति।

हेऽग्ने यो राक्षसादिस्ते तवेध्मं जभरद्पहरति। अथवा त्वाया त्वदीयस्य दग्धव्यस्य प्रेतस्य मूर्धानं स्वयं सिष्विदानः स्वेदं प्राप्तः संस्ततपतेऽतिशयेन तापं करोति। शास्त्रीयदहनसाधनस्येध्मस्यापहारेण वा स्वकीयस्वेदेन मूर्धानं द्रवीकुर्वन्वा शास्त्रीयदाहं विनाश्य स्वर्गं विहन्ति। दिवः स्वर्गस्याघायतोऽघं पापं विघ्नं य इच्छति तस्माद्विश्वस्मात्सीं सर्वस्मादपि राक्षसादेरुरुष्योऽयं प्रेतो रक्षणीयः।

अथ द्वितीयं मन्त्रमाह—

अस्मात्त्वमधि जातोऽसि त्वदयं जायतां पुनः। अग्नये
वैश्वानरायं सुवर्गाय लोकाय स्वाहा (१), इति॥
य एतस्य त्वत्पश्चं॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके षष्ठप्रपाठके
द्वितीयोऽनुवाकः॥ २॥

हेऽग्नेऽस्माद्यजमानात्प्रेतात्त्वमधिजातोऽसि। अयं हि कर्मानुष्ठानेन त्वां स्वामिनं संपादितवान्। अतः फलदशायामयं पुनस्त्वत्तोऽधिजायतां त्वमेव स्वर्गलोके यजमानमुत्पादय। तत्सिद्ध्यर्थं वैश्वानराय सर्वपुरुषहितायाग्नये तुभ्यमिदं स्वाहुतमस्तु॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये षष्ठप्रपाठके द्वितीयोऽनुवाकः॥ २॥

अथ षष्ठे तृतीयोऽनुवाकः।

कल्पः—"अथैनं नवर्चेन याम्येन सूक्तेनोपतिष्ठते प्र केतुना" इति। तत्र प्रथमामाह—

प्र केतुना बृहता भात्यग्निरा विश्वा रोदसी भानुना वीति। दिवश्चिदन्तादुपमामुदानडपामुपस्थे महिषो ववर्ध, इति।

---

१ क. ख. विहितं ह्[2]। २ ख. ग. होतत्वम।

अयमग्निर्बृहता प्रौढेन **केतुना** ध्वजस्थानीयेन ज्वालाविशेषेण **प्रभाति** प्रकर्षेण भासते। स चाऽऽविर्भूतो **वृषभः** कामानां वर्षकः **सन्विश्वानि** फलान्युद्दिश्य **रोरवीति** अतिशयेन ध्वनिं करोति। दिवोऽन्ताच्चित्स्वर्गस्यावसानदेशादप्युपेत्य **मां** मदीयं यजमानं प्रेतमुदानट्, उत्कर्षेण व्याप्तवान्। स्वर्गस्योपरि स्वयं पूर्वमवस्थितोऽपि मदीयं प्रेतमनुग्रहीतुमेवात्राऽऽगतवानित्यर्थः। स चाग्निरपां प्राप्तव्यानां फलानामुपस्थे समीपे **महिषो ववर्धात्यधिको** यथा भवति तथा वृद्धिं प्राप्तवान्।

अथ द्वितीयामाह—

इदं त एकं पर ऊ त एकं तृतीयेन ज्योतिषा संविशस्व। संवेशनस्तनुवै चारुरेधि प्रियो देवानां परमे सधस्थे, इति।

हेऽग्ने ते तव स्वाभाविकमिदमेकं ज्योतिः। ऊ अपि च **परः** परस्तात्प्रेतशरीरे स्थितं **ते** त्वदीयमेकं ज्योतिः। तदुभयमपि **तृतीयेन ज्योतिषा** परमात्मरूपेण **संविशस्व** संयोजयस्व। **तनुवै** स्वकीयस्य शरीरस्य **संवेशनः** परमात्मज्योतिषा संयोजयिता **देवानां प्रियस्त्वं चारुरेधि** रमणीयो भव। कुत्रेति तदुच्यते—**परम** उत्कृष्टे **सधस्थे** सहोपवेशनस्थाने।

अथ तृतीयामाह—

नाके सुपर्णमुप यत्पतन्त्र्ं हृदा वेनन्तो अभ्यचक्षत त्वा। हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ शकुनं भुरण्युम्, इति।

हेऽग्ने त्वामृत्विजो **हृदा** स्वकीयेन मनसा **वेनन्तः** कामयमाना **यद्यदाऽभ्यचक्षत** ताभितः स्थापितवन्तः, तदा त्वं तुष्टो भवेति शेषः। कीदृशं त्वाम्—**नाके** स्वर्गं **उपपतन्तं** समीपे प्रतिगच्छन्तम्। अत एव **सुपर्णं** शोभनपक्षोपेतम्। **हिरण्यपक्षं** सुवर्णमयपक्षोपेतम्। **वरुणस्य दूतं** वरुणेन प्रेर्यमाणम्। **यमस्य योनौ** स्थानविशेषे **भुरण्युं** भरणशीलं भोगसंपादकमित्यर्थः। **शकुनं** पक्ष्याकारम्।

अथ चतुर्थीमाह—

अतिद्रव सारमेयौ श्वानौ चतुरक्षौ शबलौ साधुना पथा। अथा पितॄन्त्सुविदत्रा्ं अपीहि यमेन ये सधमादं मदन्ति, इति।

हेऽग्ने **साधुना पथा** समीचीनेन मार्गेण **श्वानावुभावतिद्रवातिक्रम्य** गच्छ। यमसंबन्धिनौ यौ श्वानौ प्रेतस्य बाधकौ तौ परित्यज्य समीचीनेन मार्गेण प्रेतं नयेत्यर्थः। कीदृशौ श्वानौ। **सारमेयौ** सरमा नाम काचित्प्रसिद्धा शुनी तस्याः पुत्रौ **चतुरक्षौ** चतुर्षु परिभागे पुनरप्यक्षिद्वयं ययोस्तादृशौ। **अथ** शोभनमार्गेण गमनानन्तरं **ये** पितरो

यमेन सधमादं सहहर्षं मदन्ति प्राप्नुवन्ति तान्सुविदत्रान्सुष्ठ्वभिज्ञान्पितृनपीहि प्राप्नुहि ।

अथ पञ्चमीमाह—

यौ ते श्वानौ यम रक्षितारौ चतुरक्षौ पथिरक्षी
नृचक्षसा । ताभ्यां राजन्परिदेह्येनꣳ स्वस्ति
चास्मा अनमीवं च धेहि (१), इति ।

हे यम ते त्वदीयौ श्वानौ यौ विद्येते ताभ्यां श्वभ्यां हे राजन्यमैनं प्रेतं परिदेहि प्रयच्छ । कीदृशौ श्वानौ । रक्षितारौ यमगृहस्य रक्षकौ । चतुरक्षावक्षिचतुष्टययुक्तौ । पथिरक्षी मार्गस्य रक्षकौ । नृचक्षसा मनुष्यैः ख्याप्यमानौ, श्रुतिस्मृतिपुराणाभिज्ञाः पुरुषास्तौ प्रख्यापयन्ति ताभ्यां श्वभ्यां दत्त्वाऽस्मै प्रेताय स्वस्ति च क्षेममपि अनमीवं च रोगाभावमपि धेहि संपादय ।

अथ षष्ठीमाह—

उरुणसावसुतृपावलुंबलौ यमस्य दूतौ चरतोऽवशाꣳ अनु ।
तावस्मभ्यं दृशये सूर्याय पुनर्दत्तावसुमद्येह भद्रम्, इति ।

हे यमसंबन्धिनौ दूताववशानस्वाधीनान्प्राणिनोऽनुलक्ष्य सर्वत्र चरतः । कीदृशौ उरुणसौ दीर्घनासिकायुक्तौ, असुतृपौ प्राणिनामसून्स्वीकृत्य तैस्तृप्यन्तौ । उलुंबलौ प्रभूतबलयुक्तौ । तावुभौ दूतौ सूर्याय दृशये सूर्यस्य दर्शनार्थमद्य दिन इह कर्मणि भद्रमसुं समीचीनं प्राणं पुनरप्यस्मभ्यं दत्तौ प्रयच्छताम्

अथ सप्तमीमाह—

सोम एकेभ्यः पवते घृतमेक उपासते । येभ्यो मधु
प्रधावति ताꣳश्चिदेवापि गच्छतात्, इति ।

एकेभ्यः केषांचिद्यजमानानामर्थे सोमः पवते वस्त्रेण शोधितः पूतो भवति । एकेऽन्ये केचिद्यजमाना घृतमुपासते घृतद्रव्योपलक्षितं हविर्यज्ञमनुतिष्ठन्ति । येभ्यो येषामर्थे मधु प्रधावति 'असौ वा आदित्यो देवमधु' इत्यादिका मधुविद्या प्रवर्तते, यदथर्वाङ्गिरसो मधोः कूल्या इत्यादिमधुप्राप्तिफलको ब्रह्मयज्ञो येषामर्थे प्रवर्तते, ताꣳश्चित्सर्वानप्ययं प्रेतोऽपिगच्छतादेव सर्वथा प्राप्नोत्वेव । सोमयाजिनां दर्शपूर्णमासादियाजिनां ब्रह्मयज्ञमधुविद्याद्यनुष्ठातृणां यः पुण्यलोकः सोऽयमस्य भवत्वित्यर्थः ।

---

१ म. सहर्षं । २ क. हे दूतौ स्थूलानासिकौ प्राणिनो° । ख. हे दूतौ स्थूलानसून्स्वा° । ३ ग. °पौ स्वकीयान्प्राणान्स्वी° । ४ ख. ग. ब्राह्मणश्च ।

अथाष्टमीमाह—

ये युध्यन्ते प्रधनेषु शूरासो ये तनुत्यजः। ये वा
सहस्रदक्षिणास्ताꣳश्चिदेवापि गच्छतात्, इति।

ये क्षत्रियाः **प्रधनेषु** प्रकृष्टधननिमित्तेषु संग्रामेषु युध्यन्ते युद्धं कुर्वन्ति। तत्रापि ये **शूरासः** शूरा भटास्तनुत्यजो युद्धाभिमुख्येन शरीरं त्यजन्ति। अथवा ये पुरुषाः **सहस्रदक्षिणा** विश्वजिदादिक्रतुषु सहस्रदक्षिणायुक्ताः। तांश्चिदित्यादि पूर्ववत्। युद्धाभिमुख्येन मृतस्योत्तमलोकः स्मर्यते—

" द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ।
परिव्राड्योगयुक्तश्च रणे चाभिमुखे हतः " इति।
" धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न विद्यते " इति च।

अथ नवमीमाह—

तपसा ये अनाधृष्यास्तपसा ये सुवर्गताः तपो
ये चक्रिरे महत्ताꣳश्चिदेवापि गच्छतात्, इति।

ये पुरुषा अस्मिँल्लोके **तपसा** युक्ताः सन्तोऽनाधृष्याः केनाप्यतिरस्कार्या वर्तन्ते। ये चान्ये स्वानुष्ठितेन **तपसा** स्वर्गं **गताः**। ये चान्ये **महत्तपश्चक्रिरे**। अनेन तपस्वित्वमात्रमुक्तम्। अनाधृष्या इत्यनेनाणिमादिसिद्धिपर्यन्तं तपो विवक्षितम्। ताꣳश्चिदित्यादि पूर्ववत्।

कल्पः—" जघनेन दहनदेशमुदीचीस्तिस्रः कर्षूः खात्वाऽश्मभिः सिकताभिश्च प्रकीर्यायुग्मैरुदकुम्भैरपः परिष्ठाप्य तासु ज्ञातयः संगाहन्ते, अश्मन्वती रेवतीरिति " [इति]। पाठस्तु—

अश्मन्वती रेवतीः सꣳरभध्वमुत्तिष्ठत प्रतरता
सखायः। अत्रा जहाम ये असन्नशेवाः
शिवान्वयमभि वाजानुत्तरेम (२), इति।

कर्षूः कुल्याः, तत्रत्यास्वप्स्ववगाहनाय ज्ञातयः परस्परं संबोध्यन्ते—**हे सखायोऽश्मन्वतीः** पाषाणयुक्ता **रेवतीर्**धनहेतुभूता अपः **संरभध्वं** प्रविशत। **उत्तिष्ठतो**त्साहवन्तः सन्तः प्रत्युद्गच्छत। अनेन क्रमेण **प्रतरत** कुल्यात्रयं प्रकर्षेण तरत। **अत्रास्मिन्दहनदेशेऽशेवाः** सेवितुमशक्या दुःखविशेषा ये केचिदसन्पूर्वमासंस्तान्स-

---

१ ग. °म। इ°। २ क. ख. °ध्वं निविशतेति शेषः। उ°। ३ क. ख. °न्तः प्र°।

वाञ्छहाम परित्यजाम । शिवान्सुखहेतून्वाजान्नातिविशेषानन्नविशेषान्वाऽभिलक्ष्य वयमुत्तरेमोत्तीर्णा भवाम ।

यद्वै देवस्य सवितुः पवित्रꣳ सहस्रधारं विततमन्तरिक्षे ।
येनापुनादिन्द्रमनार्तमार्त्यै तेनाहं माꣳ सर्वतनुं पुनामि ।

कल्पः—"जघनेन कर्षूः पर्णशाखे निहत्याबलेन शुल्बेन बद्ध्वा विनिःसर्पन्ति—यद्वै देवस्य सवितुः पवित्रꣳ सहस्रधारं विततमन्तरिक्षे । येनापुनादिन्द्रमनार्तमार्त्यै तेनाहं माꣳ सर्वतनुं पुनामि" इति । सवितुः प्रेरकस्य सूर्यस्य देवस्य संबन्धि पवित्रं शुद्धिकारणं यद्वै यदेव शुल्बं सहस्रधारं बहुसंधिकमन्तरिक्षे विततं प्रसृतं येन सूर्यरूपेण शुल्बेन पुराऽऽर्त्यै आर्तेः सकाशादिन्द्रमनार्तमपुनादार्तो यथा न भवति तथा शोधितवान् । तेन शुल्बेनाहं प्रेतस्य ज्ञातिं मां मद्रूपां सर्वतनुं कृत्स्नशरीरं पुनामि शोधयामि ।

या राष्ट्रात्पन्नादपयन्ति शाखा अभिमृता नृपतिमिच्छमानाः । धातुस्ताः सर्वाः पवनेन पूताः
प्रजयाऽस्मान्रय्या वर्चसा सꣳसृजाथ ।

कल्पः—"जघन्यो व्युदस्यति— या राष्ट्रात्पन्नादपयन्ति शाखा अभिमृता नृपतिमिच्छमानाः । धातुस्ताः सर्वाः पवनेन पूताः प्रजयाऽस्मान्रय्या वर्चसा सꣳसृजाथ" इति । शुल्बस्याधस्ताद्ये ज्ञातयो निर्गच्छन्ति तेषां मध्ये पश्चान्निर्गच्छन्दहनकर्ता पुरुषः शाखाद्वयमनेन मन्त्रेण व्युदस्येत् । अभिमृता अनुक्रमेण पूर्वं मृताः पुरुषा नृपतिमिच्छमाना मनुष्याणां पालकं स्वामिनमिच्छन्तः पन्नात्प्राप्ताद्राष्ट्राद्याः शाखा अपयन्त्यपसारयन्ति ताः सर्वाः शाखा धातुः संबन्धिना पवनेन शुद्धिहेतुना पूताः शोधिताः । तादृश्यो हे शाखा अस्मान्प्रजादिभिः[1] सꣳसृजाथ संयोजयत ।

कल्पः—"उद्वयं तमसस्परीत्यादित्यमुपस्थाय" इति । पाठस्तु—

उद्वयं तमसस्परिपश्यन्तो ज्योतिरुत्तरम् । देवं
देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् , इति ।

वयं तमस उत्तरं ज्योतिस्तमसो विनाशकत्वेनोत्कृष्टं सूर्यसंबद्धं ज्योतिरुत्परिपश्यन्त उत्कर्षेण सर्वतोऽवलोकयन्तो देवत्रा देवेषु मध्ये सूर्यं देवमुत्तमं ज्योतीरूपमगन्म प्राप्ताः स्मः ।

---

१ क. ख. [2]न बद्ध्वाऽऽर्त्यै । २ ख. ग. [2]भिः संयो° । ३ क. सूर्यसंबन्धं ।

धाता पुनातु सविता पुनातु । अग्नेस्ते-
जसा सूर्यस्य वर्चसा (१) ॥
धेह्युत्तरेमाष्टौ च ॥
इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके षष्ठप्रपाठके
तृतीयोऽनुवाकः ॥ ३ ॥

कल्पः—" अनवेक्षमाणा अपोऽवगाहन्ते—धाता पुनातु सविता पुनातु " इति । अग्नेस्तेजसा सूर्यस्य वर्चसेति मन्त्रशेषः । **धाता** जगतः स्रष्टा प्रजापतिरग्निसंबन्धेन **तेजसा पुनातु** शोधयतु । **सविता** प्रेरको देवः सूर्यसंबन्धिना **तेजसा पुनातु** ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयारण्यकभाष्ये षष्ठप्रपाठके तृतीयोऽनुवाकः ॥ ३ ॥

अथ षष्ठे चतुर्थोऽनुवाकः ।

कल्पः—" अपरेद्युस्तृतीयस्यां पञ्चम्यां सप्तम्यां वाऽस्थीनि संचिन्वन्ति, क्षीरोत्सिक्तेनोदकेनोदुम्बरशाखया प्रक्काथयञ्शरीराण्यवोक्षति—यं ते अग्निममन्थामेति पञ्चभिः " इति । तत्र प्रथमामाह—

यं ते अग्निममन्थाम वृषभायेव पक्तवे । इमं तꣳ
शमयामसि क्षीरेण चोदकेन च, इति ।

हे प्रेतशरीर ते तव **पक्तवे** पाकार्थं **वृषभायेव** यथा पशवे तथा **यमग्निममन्थाम** । पशुबन्धेषु हि पशोः पाकार्थमग्निर्मथ्यते निर्मन्थ्यं[२] वा कुर्यादिति श्रुतेः । **तमिममग्निमनेन क्षीरेण चोदकेन च शमयामसि** शान्तं कुर्मः ।

अथ द्वितीयामाह—

यं त्वमग्ने समदहस्त्वमु निर्वापया पुनः । क्याम्बू-
रत्र जायतां पाकदूर्वाव्यल्कशा, इति ।

हेऽग्ने त्वं यं प्रेतदेहं **समदहः** सम्यग्दग्धवानसि । **त्वमु** तादृशस्त्वमेव **पुनर्निर्वापयेतः** स्थानात्पुनरपि निःसारय । अत्र देशे **क्याम्बूः** कियताऽप्यम्बुना युक्ता काचिदोषधिः **पाकदूर्वाऽल्पया** दूर्वया युक्ता **व्यल्कशा** विविधशाखायुक्ता **जायतामुत्पद्यताम्** ।

---

१ ग. (२) । २ ग. निर्मध्यं । ख. निर्मथ्यं ।

अथ तृतीयामाह—

शीतिके शीतिकावति ह्लादुके ह्लादुकावति
मण्डूक्यासु संगमयेमꣳ स्वग्निꣳ शमय, इति ।

शीतेन जलेन युक्ता भूमिः शीतिका, ह्लादकारिणा क्षीरेण युक्ता भूमिर्ह्लादुका । हे **शीतिके** भूमे **शीतिकावति** शीतिकाभूमियुक्ते स्थाने[1], हे **ह्लादुके ह्लादुकावति** ह्लादुकायुक्ते स्थानविशेषे **मण्डूक्यासु** मण्डूकप्लवनयोग्यास्वप्सु **संगमयेमं** प्रेतदेहं प्रापय । **अग्निं च सुष्ठु शमय** ।

अथ चतुर्थीमाह—

शं ते धन्वन्या आपः शमु ते सन्त्वनूक्याः । शं
ते समुद्रिया आपः शमु ते सन्तु वर्ष्याः, इति ।

धन्वनि मरुदेशे भवा **धन्वन्यास्तादृश्य आपो** हे प्रेतदेह[2] ते तव **शं सन्तु** सुखहेतवो भवन्तु । अनूपदेशे भवा **अनूक्या** आपः [ते] शं (शमु) **सन्तु** सुखहेतव एव भवन्तु । तथा समुद्रे भवाः **समुद्रिया** वर्षे भवा **वर्ष्यास्ताः** सर्वा अपि **ते** सुखहेतवो भवन्तु ।

अथ पञ्चमीमाह—

शं ते स्रवन्तीस्तनुवे शमु ते सन्तु कूप्याः । शं ते
नीहारो वर्षतु शमु पृष्वाऽवशीयताम् (१), इति ।

स्रवन्तीर्नदीगता आपो हे प्रेत ते **तनुवे** शं सुखहेतवो भवन्तु । कूपे भवाः **कूप्याः**, ताश्च ते सुखहेतवो भवन्तु । **नीहारो** हिमरूपस्ते सुखार्थं **वर्षतु** वृष्टिवत्स्रवतु । **पृष्वा** जलबिन्दुः **शमु** सुखार्थमेवावशीयतामधः पततु ।

कल्पः—" अत एवाङ्गारान्दक्षिणां निर्वर्त्य तिस्रः स्रुवाहुतीर्जुहोति—अवसृजेति प्रतिमन्त्रम् " इति । तत्र प्रथमामाह—

अवसृज पुनरग्ने पितृभ्यो यस्त आहुतश्चरति स्वधाभिः ।
आयुर्वसान उपयातु शेषꣳ संगच्छतां तनुवा जातवेदः, इति ।

हेऽग्ने **यः** प्रेतः पुमानाहुतश्चितौ मन्त्रेण समर्पितः **सन्स्वधाभिः** स्वधाकारसमर्पितैरुदकादिभिः सह **चरति** । तं प्रेतं **पितृभ्यः** पितृप्राप्त्यर्थं **पुनरवसृज** भूयः प्रेरय ।

---

१ ख. ग. °ने मण्डूक्यासु मण्डूकप्लवनयोग्यास्वप्सु संगमय प्रापय । हे । २ क. ख. देह । ३ ग. पृष्टाऽव° । ४ म. पृष्ठा । ५ ख. ग. °णाग्निर्व° ।

अयं प्रेत **आयुर्वसान** आच्छादयन्नायुषा युक्त इत्यर्थः । **शेषं** भोगमुपयातु प्राप्नोतु । हे **जातवेदः** सोऽयं प्रेतस्तनुवा **संगच्छतां** शरीरेण संगतो भवतु ।

अथ द्वितीयामाह—

संगच्छस्व पितृभिः सꣳ स्वधाभिः समिष्टापूर्तेन
परमे व्योमन् । यत्र भूम्यै वृणसे तत्र गच्छ
तत्र त्वा देवः सविता दधातु, इति ।

हे प्रेत त्वं **पितृभिः संगच्छस्व** संगतो भव । **स्वधाभिः** स्वधाकारसमर्पितैर्द्रव्यैः संगतो भव । **परमे व्योमन्नुत्कृष्टे** स्वर्गे **इष्टापूर्तेन** श्रौतस्मार्तकर्मफलेन संगतो भव । **भूम्यै** भूम्यां **यत्र** यस्मिन्देशविशेषे **वृणसे** जन्म प्रार्थयसे **तत्र गच्छ** । **सविता देव**स्त्वां तत्र **दधातु** स्थापयतु ।

अथ तृतीयामाह—

यत्ते कृष्णः शकुन आतुतोद पिपीलः सर्प उत वा श्वापदः ।
अग्निष्टद्विश्वादनृणं कृणोतु सोमश्च यो ब्राह्मणमाविवेश, इति ।

हे प्रेत तव देहे **कृष्णः शकुनः** पक्षिविशेषो **यदङ्गमातुतोदे**षद्व्यथितमकरोत् । **पिपीलः** पिपीलिका वा **सर्पो** वा **यदङ्गमातुतोद** । **उत वा**ऽथवा **श्वापदो**ऽन्योऽपि जीवो व्यापत्तिहेतुरातुतोद । अयमग्निर्देवस्तदङ्गं **विश्वात्**सर्वस्मादुपद्रवाद**नृण**मृणरहितमुपद्रवरहितं **कृणोतु** करोतु । **यश्च सोमो ब्राह्मण** ए (णमे) तदीये ब्राह्मणशरीर **आविवेश** यागकाले प्रविष्टवान्सोऽप्यनृणं करोतु ।

उत्तिष्ठातस्तनुवꣳ संभरस्व मेह गात्रमवहा मा शरीरम् ।
यत्र भूम्यै वृणसे तत्र गच्छ तत्र त्वा देवः सविता दधातु ।

कल्पः—" अथैनदादग्धमुदकुम्भैः स्ववोक्षितमवोक्ष्य याऽस्य स्त्रीणां मुख्या सा सव्ये पाणौ नीललोहिताभ्यां सूत्राभ्यां विग्रथ्याश्मानमन्वास्थायापामार्गेण सकृदुपमृज्य दतः शिरस्तो वाऽस्थि गृह्णाति—उत्तिष्ठातस्तनुवꣳ संभरस्व मेह गात्रमवहा मा शरीरम् । यत्र भूम्यै वृणसे तत्र गच्छ तत्र त्वा देवः सविता दधात्विति, इदं त एकमिति द्वितीयं पर ऊ त एकमिति तृतीयं तृतीयेन ज्योतिषा संविशस्वेति चतुर्थं संवेशनस्तनुवै चारुरेधीति पञ्चमं प्रियो देवानां परमे सधस्थ इति षष्ठम्" इति । हे प्रेतातोऽस्माद्दहनदेशादुत्तिष्ठ । तनुवं शरीरं **संभरस्व** संपादय, इह दहनदेशे **गात्रमङ्गमेकमपि माऽवहा** मा परित्यज । **शरीरमपि माऽवहा** मा परित्यज । यत्रेत्यादि पूर्ववत् ।

---

१ क. ख. °स्माच्छ्मशानदे° ।

इदं त एकं पर ऊ त एकं तृतीयेन ज्योतिषा संविशस्व ।
संवेशनस्तनुवे चारुरेधि प्रियो देवानां परमे सधस्थे, इति ।

हे प्रेत ते तव संबन्धीदमेकमस्थि ऊ अपि च **परः** परस्तात्ते तव संबन्ध्येकमस्थि हे प्रेतैतदस्थिरूपेण पूर्वद्वयापेक्षया **तृतीयेन** ज्योतिषा प्रकाशेन **संविशस्व** संयुक्तो भव। **तनुवै** शरीरसिद्ध्यर्थं **संवेशनः** सर्वेषामस्थ्नां योजयिता **चारुरेधि** रमणीयो भव। **परमे सधस्थ** उत्कृष्टे सहोपवेशनस्थाने **देवानां प्रियो** भव।

उत्तिष्ठ प्रेहि प्रद्रवौकः कृणुष्व परमे व्योमन् ।
यमेन त्वं यम्या संविदानोत्तमं नाकमधिरोहेमम् ।

कल्पः—" अथैतान्यस्थीन्यद्भिः प्रक्षाल्य कुम्भे वा सते वा कृत्वाऽऽदायोपोत्तिष्ठति—उत्तिष्ठ प्रेहि प्रद्रवौकः कृणुष्व परमे व्योमन्। यमेन त्वं यम्या संविदानोत्तमं नाकमधिरोहेमम्" इति । हे प्रेतास्मात्स्थानादुत्तिष्ठ । उत्थाय च **प्रेहि** प्रकर्षेण गच्छ । गमनकालेऽपि **प्रद्रव** शीघ्रं गच्छ । गत्वा च **परमे व्योमन्नुत्कृष्टे** स्वर्गे **ओकः कृणुष्व** स्थानं कुरु । कृत्वा च **त्वं यमेन यम्या** च स्त्रीपुरुषाभ्यामुभाभ्यां सह **संविदाना** संविदान ऐकमत्यं प्राप्तः सन्निममुत्तमं **नाकं** स्वर्गभोगमधिरोह प्राप्नुहि ।

कल्पः—" शम्यां पलाशे वा कुम्भं निधाय जघनेन कुम्भं कर्ष्वादिसमानमा स्नानान्मृदा स्नातीत्येके" इति । तत्र पूर्वोक्तानां मन्त्राणां प्रतीकानि दर्शयति—

अश्मन्वती रेवतीर्यद्वै देवस्य सवितुः पवित्रं या राष्ट्रा-
त्पन्नादुद्वयं तमसस्परि धाता पुनातु , इति ।

सोमयाजिनस्तु पुनर्दहनं कर्तव्यं पुनर्दहनान्तं सोमयाजिन इति सूत्रेऽभिहितत्वात् । तत्प्रकारस्तु कल्पे दर्शितः—"अथ यदि पुनर्धक्ष्यन्तः स्युरत एवाङ्गारान्दक्षिणां निर्वर्त्य तिस्रो रात्रीरिद्ध्वा दहनवदवकाशं जोषयित्वाऽग्निमुपसमाधाय संपरिस्तीर्यापरेणाग्निं दर्भान्संस्तीर्य तेषु कृष्णाजिने शम्यायां दृषदुपलाभ्यामवाञ्चनं(?) शरीराणि सुसंपिष्टानि पेषयित्वाऽऽज्यकुम्भे समुदायुत्याग्निहोत्रहवण्या जुहोत्यस्मात्त्वमधिजातोऽसि" इति । पाठस्तु—

अस्मात्त्वमधिजातोऽस्ययं त्वदधिजायताम् । अग्नये
वैश्वानराय सुवर्गाय लोकाय स्वाहा (२), इति ॥

अवशीयताꣳ सधस्थे पञ्च च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके षष्ठप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

१ क. ख. युक्तो । २ ग. °णाग्निर्वं° । ३ ग. °भ्यामेवा° ।

द्वितीयानुवाके व्याख्यातो मन्त्रः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये षष्ठप्रपाठके चतुर्थोऽनुवाकः ॥ ४ ॥

अथ षष्ठे पञ्चमोऽनुवाकः।

आयातु देवः सुमनाभिरूतिभिर्यमो ह वेह प्रयताभिरक्ता ।
आसीदताꣳ सुप्रयते ह बर्हिष्यूर्जाय जात्यै मम शत्रुहत्यै ।

पञ्चमेऽनुवाके यमयज्ञोऽभिधीयते। स च कल्पसूत्र एवमुपक्रान्तः—

" यज्ञमयं स्वयं प्रोक्तं प्रवक्ष्ये बलिमुत्तमम्।
मासि मासि तु कर्तव्योऽन्तकाय तु बलिस्तथा " इति।

तत्र मन्त्रविनियोग एवमभिहितः—"आयातु देवः सुमनाभिरूतिभिर्यमो ह वेह प्रयताभिरक्ता। आसीदताꣳ सुप्रयते ह बर्हिष्यूर्जाय जात्यै मम शत्रुहत्योमिति यममावाहयति" [इति]। तत्राऽऽवाहनार्थः प्रणवोऽभ्याहृतः। मन्त्रे हशब्दः प्रसिद्ध्यर्थः, वाशब्दः समुच्चये। प्रसिद्धो यमो देवः सुमनाभिः सौमनस्ययुक्तै(क्ताभि)रूतिभिरस्मदीयरक्षणैः सहित इह यमयज्ञाख्ये कर्मण्यायातु। तथा प्रयताभिर्नियताभिरूतिभिरक्ता संबद्धा यमी चाऽऽयातु। मम यजमानस्योर्जायान्नसिद्धये जात्या उत्तमजातिसिद्धये शत्रुहत्यै शत्रुवधाय च सुप्रयते सुष्ठुनियते बर्हिषि। ह प्रसिद्धौ। एतौ दंपती आसीदतामुपविशताम्।

कल्पः—" यमे इव यतमाने यदैतामिति च " इति। आवाहयतीत्यनुवर्तते। पाठस्तु—

यमे इव यतमाने यदैतं प्र वां भरन्मानुषा देवयन्तः। आसीदतꣳ स्वमु लोकं विदाने स्वासस्थे भवतमिन्दवे नः, इति।

इवशब्द एवकारार्थः। यद्यदा यतमाने प्रयत्नं कुर्वाणे यमे इव यमो यमी चेत्येते एष युवामैतमस्मिन्कर्मण्यागच्छतम्। तदानीं देवयन्तो देवानात्मन इच्छन्तो मानुषा यजमाना वां युवां प्रभरन्प्रकर्षेण भरन्तु पोषयन्तु। स्वमु लोकं स्वोचितमेव स्थानं विदाने जानत्यौ युवामासीदतमुपविशतम्। नोऽस्माकमिन्दव आह्लादाय स्वासस्थे सुखासनस्थाने भवतं तिष्ठतम्।

१ क. ख. °हत्या इति। २ क. ख. °मस्मत्कर्म° ।

यमाय॒ सोम॑ꣳ सुनुत॒ यमा॑य॒ जुहुता॒ हवि॑: ।
यम॒ꣳ ह॑ य॒ज्ञो ग॑च्छ॒त्य॒ग्नि॒दू॒तो अ॑रं॒कृत॑: ।

कल्प:—"मध्यमस्या(माया)मुत्तरवेद्यां यमाय हविर्निवेदयन्ते -यमाय सोमꣳ सुनुत यमाय जुहुता हवि: । यमꣳह यज्ञो गच्छत्यग्निदूतो अरंकृत:" इति । हे ऋत्विजो यमदेवार्थं **सोमं सुनुत** लतात्मकं सोममभिषुणुत । तथा यमार्थं **हविर्जुहुत** । अग्निर्दूतो यस्मिन्यज्ञे सोऽयमग्निदूत: । अग्नेर्दूतत्वमन्यत्राऽऽम्नातम्—"अग्निर्देवानां दूत आसीत्" इति । **अरंकृतो** बहुभिर्द्रव्यैरलंकाररूपैर्युक्त:, तादृशो **यज्ञो यमं ह** यममेव [**गच्छति**] गच्छतु । (*ओंकारस्त्वध्याहृत:) ।

यमाय॑ घृ॒तव॑द्ध॒विर्जु॑होत प्र च॑ तिष्ठत ।
स नो॑ देवेष्वा॒यम॒द्दीर्घ॒मायु॑: प्र॒जीव॑से ।

कल्प: —" प्रतीच्यामुत्तरवेद्याम्—यमाय घृतवद्धविर्जुहोत प्र च तिष्ठत । स नो देवेष्वायमद्दीर्घमायु: प्रजीवसे" इति । ह ऋत्विजो यमार्थं घृतयुक्तं **हविर्जुहोत** । यूयं **च** प्रकर्षेण **तिष्ठत** । देवेषु मध्ये यो यमो देव: **स प्रजीवसे** प्रकृष्टजीवनार्थं **नोऽ**स्माकं **दीर्घमायुरायमत्प्रयच्छतु** ।

यमाय॑ मधु॒मत्त॑मꣳ रा॒ज्ञे ह॒व्यं जु॑होतन । इ॒दं न॒म
ऋषि॑भ्य: पू॒र्वजे॑भ्य: पू॒र्वेभ्य॑: प॒थिकृ॑द्भ्य॑: (१) ।

कल्प:—"प्राच्यामुत्तरवेद्याम्—यमाय मधुमत्तमꣳ राज्ञे हव्यं जुहोतन । इदं नम ऋषिभ्य: पूर्वजेभ्य: पूर्वेभ्य: पथिकृद्भ्यॅ:" इति । ह ऋत्विजो **यमाय राज्ञे मधुमत्त**ममतिशयेन मधुरं **हव्यं जुहोतन** जुहुत । **पूर्वजेभ्य:** सृष्ट्यादावुत्पन्नेभ्योऽत एव **पूर्वे**भ्योऽस्मत्त: पूर्वभाविभ्य: **पथिकृद्भ्य:** शोभनमार्गकारिभ्य **ऋषिभ्य इदं** प्रत्यक्षं यथा भवति तथा **नमो**ऽस्तु ।

कल्प:—"योऽस्य कौष्ठ्येति तिसृभिर्यमगाथाभिस्रि: प्रदक्षिणं परिगायन्ति" इति । तत्र प्रथमामाह—

योऽस्य॑ कौष्ठ्य॒ जग॑त: पार्थि॒वस्यै॑क इद्व॒शी । य॒मं
भ॑ङ्ग्यश्रवो गा॒य यो राजा॑ऽनपरोध्य॑:, इति ।

---

* एतच्चिह्नान्तर्गतमधिकमिव भाति ।

---

१ ग. °च्छत्वग्नि° । २ ग °च्छत्वग्नि° । ३ ख. ग. °वसे ओमिति । ४ ख. ग. °द्भ्य ओमिति ।

को(कौ)ष्ठं[1] धनमर्हतीति **कौष्ठ्यः**, तादृशो **यो यम एक** इदेक एव **पार्थिवस्य** पृथिव्यां भवस्यास्य सर्वस्य **जगतो वशी** वशेन युक्तः सर्वं जगत्तदधीनमित्यर्थः। **यश्च यमो राजाऽनपरोध्यः** केनाप्यपरोद्धुमशक्यः। **तं यमं** प्रति **भङ्क्त्यश्रव** एतन्नामकं गीतं हे पुरुष **गाय**। भङ्क्तिः रीतिः। संगीतशास्त्रोक्तां भङ्क्तिमर्हतीति **भङ्क्त्यम्**। श्रवणीयं श्रवः। भङ्क्त्यं च तच्छ्रवश्चेति **भङ्क्त्यश्रवः**। शास्त्रीयलक्षणोपेतत्वाच्छ्रोत्रसुखकैरमित्यर्थः।

अथ द्वितीयामाह—

यमं गायं भङ्क्त्यश्रवो यो राजाऽनपरोध्यः। येनाऽऽपो
नद्यो धन्वानि येन द्यौः पृथिवी दृढा, इति।

यो यमो **राजा** केनाप्यपरोद्धुमशक्यः। **येन** यमेनाऽऽपो धृता इति शेषः। तथा **नद्यो** येन धृताः। **धन्वानि** मरुस्थलानि येन धृतानि। **द्यौर्येन** धृता। **दृढा पृथिवी** च येन धृता। तादृशं **यमं** प्रति पूर्वोक्तं **भङ्क्त्यश्रवो गाय**।

अथ तृतीयामाह—

हिरण्यकक्ष्यान्त्सुधुरान्हिरण्याक्षानयःशफान्।
अश्वानंनःशतो दानं यमो राजाऽभितिष्ठति, इति।

अनसां शकटानां रथानां शतं यस्य यमस्य सोऽयमनःशतः। तादृशो **यमो राजा दानं** फलप्रदानमुद्दिश्यात्र समागच्छतु। *अश्वानभितिष्ठति रथेषु योजयति। कीदृशानश्वान्। **हिरण्यकक्ष्यान्**सौवर्णाभरणैर्युक्ताः कक्ष्याप्रदेशा येषां ते **हिरण्यकक्ष्यास्तान्**। + शोभनं धुरं रथवहनस्थानं येषां ते **सुधुरास्तान्**। शृङ्गारार्थं हिरण्यनिर्मिते अक्षिणी येषां ते **हिरण्याक्षास्तान्**। पाषाणयुक्तमार्गेषु रक्षार्थं निर्मितैरयोमयैर्वलयैर्युक्ताः शफा येषां तेऽयःशफास्तान्[2]। अनश(श्य)त इति पाठे नाशरहितानश्वानिति व्याख्येयम्।

कल्पः— "यमो दाधारेत्यनुवाकशेषेण हविरुद्धरन्ति" इति। तत्र प्रथमामाह—

यमो दाधार पृथिवीं यमो विश्वमिदं जगत्।
यमाय सर्वमित्तस्थे यत्प्राणद्वायुरक्षितम्, इति।

---

* अत्र यो यम इत्यनुषञ्जनीयम्। + शोभना धूरिति पठितुं युक्तम्।

---

१ ग °ष्ठं संपूर्णं ध°। २ क. ख. ग. 'ङ्क्तीरिति सं°। ३ क. ख. ग. करोऽयमि'। ४ क. ख. °ननश्यतो। ५ क. ख. °न्। अयोयुक्ताः खुरा ये°। ६ क ख. °न्। यममाहात्म्यसूचकाः सप्त मन्त्राः, तत्र। ७ क. ख. 'मित्रस्थे।

पृथिवीं सर्वां **यमो दाधार** धृतवान्। तथा **विश्वं** सर्वमिदं **जगद्यमो** धृतवान्। **यत्प्राणदस्मिञ्जगति** श्वासयुक्तं यदस्ति यदप्यन्यद्वायुना **रक्षितं** वस्त्वस्ति **सर्वमित्सर्वमेव यमाय** यमार्थं **तस्थे** तस्थाववस्थितम्।

अथ द्वितीयामाह—

यथा पञ्च यथा षड्यथा पञ्चदशर्षयः। यमं यो
विद्यात्स ब्रूयाद्यथैक ऋषिर्विजानते (२), इति।

पञ्च भूतानि **यथा** वर्तन्ते, **षड्ऋतवो यथा** वर्तन्ते, **पञ्चदश** तिथयो **यथा** वर्तन्ते, **ऋषयश्च** वसिष्ठादयो यथा वर्तन्ते, तं प्रकारं सर्वं **स** पुमान्**ब्रूयाद्वक्तुं शक्तः**। कः पुमानिति स उ(तदु)च्यते—**यो यमं** वेद स पुमान्ब्रूयादित्यन्वयः। यमो हि नियन्तृत्वेन भूतर्तुतिथ्यादिकं सर्वं जगद्यथायथं प्रवर्तयति। अतो यमस्य माहात्म्यं विद्वानिदमित्थमिति सर्वं वक्तुं शक्नोति। **यथा** वैक ऋषिरेक एव सर्वज्ञः परमेश्वरो **विजानते** विशेषेण जगज्जानाति तम(द)पि प्रकारान्तरं यममाहात्म्याभिज्ञ एवं वक्तुमुत्सहते।

अथ तृतीयामाह—

त्रिकद्रुकेभिः पतति षळुर्वीरेकमिद्बृहत्। गायत्री
त्रिष्टुप्छन्दांस्यसि सर्वा ता यम आहिता, इति।

त्रिकद्रुकेभिर्ज्योतिर्गौरायुरिति त्रिकद्रुका इति **सूत्रकारेणोक्तत्वात्ते** त्रयो यागास्त्रिकद्रुकास्तैर्यागैः **षळुर्वीर्**[1]भूमीः **पतति** प्राप्नोति। ताश्चोर्व्यः **शाखान्तरमन्त्रे** समाम्नाताः—"षण्मोर्वीरुरुहसस्पान्तु द्यौश्च पृथिवी चाऽऽपश्चौषधयश्चोर्क्च सूनृता च" इति। **बृहत्परं ब्रह्मैकमिदेकमेव। गायत्र्यादीनि तु च्छन्दांसि** च्छन्दोरूपेण व्यवस्थितानि। एवं नानाविधं यज्जगदस्ति **सर्वा ता** तत्सर्वं जगद्**यम आहिता** यमे प्रतिष्ठितम्। नियामकत्वादेव जगद्व्यवस्थाहेतुत्वं यमस्य युक्तमित्यर्थः।

अथ चतुर्थीमाह—

अहरहर्नयमानो गामश्वं पुरुषं जगत्। वैव-
स्वतो न तृप्यति पञ्चभिर्मानवैर्यमः, इति।

अयं **वैवस्वतः** सूर्यस्य पुत्रो **यमः पञ्चभिर्मानवैः** पञ्चसंख्याकैर्मुख्यैर्दूतविशेषैः सहितः सन्नहरहः प्रतिदिनं गवादी**न्नयमानो** यमलोके प्रापयन्न **तृप्यति**। अलमेतावतेत्येवं तृप्तिं न प्राप्नोति। प्राणिनो नेतुमालस्यरहित इत्यर्थः।

---

१ क ख. °व जानाति व°। २ घ. षड्वीं°। ३ ग. षड्वीं°।

अथ पञ्चमीमाह—

वैवस्वते विविच्यन्ते यमे राजनि ते जनाः ।
ये चेह सत्येनेच्छन्ते य उ चानृतवादिनः, इति ।

इह लोके ये च पुरुषाः सत्येन वर्तितुमिच्छन्ति येऽपि चान्ये पुरुषा अनृतवादिनस्ते द्विविधा अपि जना वैवस्वते सूर्यस्य पुत्रे यमे राजनि स्थिते सति तद्भृत्यैर्विविच्यन्ते । तत्र सत्यवादिन स्वर्गं नयन्ति, अनृतवादिनो नरकं नयन्तीत्येवं तद्विवेकः ।

अथ षष्ठीमाह—

ते राजन्निह विविच्यन्तेऽथा यन्ति त्वामुप । देवाश्च
ये नमस्यन्ति ब्राह्मणाश्चापचित्यति, इति ।

ये च पुरुषा इह लोके देवान्नमस्यन्त्युपासते येऽपि चान्ये ब्राह्मणानपचित्यति सुवर्णदानान्नदानादिना पूजयन्ति ते द्विविधा अपि हे राजन्निह त्वदीये लोके विविच्यन्ते । तत्रोपासका ब्रह्मलोके नीयन्ते दानादिकर्मनिष्ठास्तु स्वर्गलोके नीयन्त इति तद्विवेकः । अथ यस्मादेवं तस्मात्सर्वेऽपि हे यम त्वामुपयन्ति ।

अथ सप्तमीमाह—

यस्मिन्वृक्षे सुपलाशे देवैः संपिबते यमः । अत्रा नो
विश्पतिः पिता पुराणा अनुवेनति (३), इति ॥
पथिकृद्भ्यो विजानतेऽनुवेनति ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके षष्ठप्रपाठके
पञ्चमोऽनुवाकः ॥ ५ ॥

यमो राजा देवैरन्यैः सह सुपलाशे शोभनपर्णोपेते यस्मिन्वृक्षे सोमसवननामके । तदश्वत्थः सोमसवन इति श्रुत्यन्तरात् । संपिबते संभूय सोमपानं करोति । अत्रास्मिन्वृक्षे विश्पतिः प्रजानां स्वामी नोऽस्माकं पिता पुराणाः पुरातनान्देवाननुवेनति अनुगच्छति । त एते सप्तापि मन्त्रा यममाहात्म्यप्रतिपादकाः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयारण्यकभाष्ये षष्ठप्रपाठके पञ्चमोऽनुवाकः ॥ ५ ॥

अथ षष्ठे षष्ठोऽनुवाकः ।

पूर्वानुवाके पितृमेधगतयमविशेषमन्त्रप्रसङ्गादबुद्धिस्थो यमयज्ञोऽभिहितः । स च स्वतन्त्रः पुरुषार्थो ननु पितृमेधाङ्गभूतः । अथ प्रासङ्गिकं परिसमाप्य प्रकृतः पितृमेधशेष एवोच्यते । चयनान्तमग्निचित इति सूत्रेऽभिहितत्वादग्निचिद्विषयं लोष्टचयनमुच्यते । कल्पः—" अग्निमुपसमाधाय जघनेनाग्निं तिस्रः पालाश्यो मेध्यो निहत्य तासामन्तरेणास्थिकुम्भं निधाय तदुपरिष्टाच्छंतातृण्णामध्युद्यम्य दध्ना मधुमिश्रेण पूरयति— वैश्वानरे हविरिदं जुहोमि " इति । पाठस्तु—

वैश्वानरे हविरिदं जुहोमि साहस्रमुत्सꣳ शतधारमेतम् । तस्मिन्नेष पितरं पितामहं प्रपितामहं बिभरत्पिन्वमाने, इति ।

वैश्वानरेऽग्निसदृशे कुम्भ इदं वाजिनमिश्रदधिरूपं **हविर्जुहोमि** । कीदृशं हविः । **साहस्रं** सहस्रसंख्योपेतम् । **उत्सं** प्रवाहरूपम् । **शतधारं** शतच्छिद्रेषु पतन्तीभिर्धाराभिर्युक्तम् । **एष** वैश्वानरो देवः **पिन्वमाने** वर्धमाने पूर्यमाणे कुम्भ **एतमस्मदीयं पितरं पितामहं प्रपितामहं** च **बिभरद्भिभर्तु** ।

कल्पः—" विक्षरन्तमभिमन्त्रयते—द्रप्सश्चस्कन्देमं समुद्रमिति द्वाभ्याम् " इति । तत्र प्रथमामाह—

द्रप्सश्चस्कन्द पृथिवीमनु द्यामिमं च योनिमनु यश्च पूर्वः ।
तृतीयं योनिमनु संचरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः, इति ।

द्रप्सो बिन्दुः स **पृथिवीमनु चस्कन्द** । पृथिव्यां पतित इत्यर्थः । स च द्रप्सो हुतः सन्स्थानत्रयेऽनुसंचरति द्युलोकेऽन्तरिक्षलोके भूलोके च । तदेतदभिप्रेत्य स्मर्यते—

" अग्नौ प्रास्ताऽऽहुतिः सम्यगादित्यमुपतिष्ठते ।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः " इति ।

सोऽयमर्थो द्यामित्यादिनाऽभिधीयते—**द्यामिमं च योनिमनु** । अन्तरिक्षरूपमिदं स्थानमनुसंचरति । **यश्च पूर्वो** योऽपि पूर्वः पृथिवीमनुचस्कन्देति पूर्वोक्तस्थानविशेषस्तमप्यनुसंचरति । **तृतीयं योनिं** द्युलोकरूपमादित्यस्थानमनुसंचरति । तमिमं त्रिषु स्थानेष्वनुसंचरन्तं **द्रप्सं जुहोमि** मनसा हुतमिव भावयामि । कुत्र होम इति तदुच्यते—**अनु सप्त होत्रा** इति । यस्यां दिशि द्रप्सः पतितस्तद्व्यतिरिक्ता होमयोग्याः

---

१ ख. मेध्यो । २ ख. निमथ्य । ३ ग. °च्छं तृण्याम° । ४ क. ख. °र्वो यश्च पूर्वं पृ° ।

सप्त दिशो याः सन्ति तास्वनुक्रमेण जुहोमि। यथाऽयं द्रप्सो हुत आदित्यादिस्थानत्रयेषु सं(ये सं)चरन्नुपकरोति तथा भावयामीत्यर्थः।

अथ द्वितीयामाह—

इमꣳ समुद्रꣳ शतधारमुत्सं व्यच्यमानं भुवनस्य मध्ये। घृतं दुहानामदितिं जनायाग्ने मा हिꣳसीः परमे व्योमन्, इति।

हेऽग्न इमं कुम्भं जनाय प्रेतपुरुषार्थं मा हिꣳसीर्हिंसितं मा कुरु। किंतु परमे व्योमन्नुत्तमे विधिरक्षणे स्थितं कुरु। कीदृशमिमम्। समुद्रं समुद्रवत्प्रभूतम्। शतधारं शतसंख्याकधारोपेतम्। उत्सं प्रस्रवणयुक्तम्। भुवनस्य मध्ये व्यच्यमानं सेव्यमानमभिव्यज्यमानं वा घृतं दुहानां घृतकारणं दधि दुहानम्। अदितिमखण्डनीयम्।

कल्पः—"व्य(व्यु)ष्टायां हरिण्या पलाशशाखया शमीशाखया वा श्मशानायतनं संमार्ष्टि—अपेत वीत" इति। पाठस्तु—

अपेत वीत वि च सर्पतातो येऽत्र स्थ पुराणा ये च नूतनाः।
अहोभिरद्भिरक्तुभिर्व्यक्तं यमो ददात्ववसानमस्मै, इति।

यमेन नियुक्ताः पुरुषाः पुरातना नूतनाश्च सर्वस्यां भूमौ व्याप्य वर्तन्ते, तान्संबोध्येदमुच्यते—हे यमदूता यूयं पुराणा अत्राग्निक्षेत्रे स्थ पूर्वं स्थिता ये च नूतना यूयमत्र स्थ ते सर्वे यूयमपेतारमात्स्थानादपगच्छत। वीत परस्परं वियुज्य गच्छत, अतो विसर्पतास्मात्स्थानाद्विदूरं गच्छत। अहोभिर्दिवसैरक्तुभी रात्रिभिश्चाद्भिर्जलैश्च व्यक्तं विशेषेण संबद्धमवसानमिदं स्थानमस्मै यजमानाय यमो ददातु।

कल्पः—"सवितैतानि शरीराणीति सीरं युनक्ति, षड्गवं द्वादशगवं चतुर्विंशतिगवं वा" इति। पाठस्तु—

सवितैतानि शरीराणि पृथिव्यै मातुरुपस्थ
आदधे। तेभिर्युज्यन्तामघ्नियाः (१), इति।

सविता प्रेरकः परमेश्वरो मातुर्मातृस्थानीयायाः पृथिव्या उपस्थ उत्सङ्ग एतानि शरीराणि शरीरावयवस्वरूपाण्यस्थीन्यादधे स्थापितवान्। तेभिस्तैर्निमित्तभूतैरघ्निया गावो बलीवर्दा युज्यन्तां लाङ्गलेन संबध्यन्ताम्।

---

१ क. ख. °मन्वर्तसे वि°। २ क. हिरण्या। ख. हिरण्यां।

कल्पः—"शुनं वाहा इति द्वाभ्यां प्रसव्यावृत्ताः षट्पराचीः सीताः कृषति" इति। तत्र प्रथमामाह—

शुनं वाहाः शुनं नराः शुनं कृषतु लाङ्गलम्। शुनं वरत्रा बध्यन्ताꣳ शुनमष्ट्रामुदिङ्गय शुनासीरा शुनमस्मासु धत्तम्, इति।

लाङ्गलं वहन्तीति **वाहा** बलीवर्दाः, ते **शुनं** सुखं यथा भवति तथा वहन्त्विति शेषः। न(ना)रा बलीवर्दानां प्रेरका मनुष्याः **शुनं** सुखं यथा भवति तथा प्रेरयन्त्विति शेषः। **लाङ्गलं** च शुनं सुखं यथा भवति तथा **कृषतु**। **वरत्राश्चर्ममय्यो** रज्जवोऽपि शुनं सुखं यथा भवति तथा **बध्यन्ताम्**। अष्ट्रामारां तीक्ष्णाग्रलोहयुक्तं बलीवर्दप्रेरकं दण्डं **चोदिङ्गय** हे कीनाश बलविर्दप्रेरणार्थमुद्यतां कुरु। **शुनासीरा** हे वाय्वादित्यौ **शुनं** सुखमस्मासु **धत्तं** संपादयतम्।

अथ द्वितीयामाह—

शुनासीराविमां वाचं यदिवि चक्रथुः पयः। तेनेमामुपसिञ्चतम्, इति।

शुनो वायुः सीर आदित्यः। हे **शुनासीरौ** वाय्वादित्यौ **विमां** पूर्वोक्तां शुनमस्मासु धत्तमित्येतादृशीं **वाचं** श्रुत्वा **दिव्यन्तरिक्षे यत्पय** उदकं **चक्रथुः** संपादितवन्तौ **तेनोदकेनेमां** भूमिमुपसिञ्चतं सिक्तां कुरुतम्।

कल्पः—"उद्यम्य लाङ्गलं सीते वन्दामहे इति सीताः प्रत्यवेक्षते" इति पाठस्तु—

सीते वन्दामहे त्वाऽर्वाची सुभगे भव। यथा नः सुभगा ससि यथा नः सुफला ससि, इति।

लाङ्गलपद्धतिः सीता। हे **सीते** त्वां **वन्दामहे** नमस्कुर्मः। हे **सुभगे** सौभाग्ययुक्ते सीतेऽर्वाच्यधः प्रसृता **भव**। नोऽस्मान्प्रति **यथा** येन प्रकारेण **सुभगा** सौभाग्ययुक्ता **ससि** भवसि यथा च **सुफला** ससि शोभनफलोपेता भवसि। तथाऽर्वाची भवेति पूर्वत्रान्वयः।

कल्पः—"सवितैतानि शरीराणीति मध्ये कृष्टस्यास्थिकुम्भं निदधाति" इति। पाठस्तु—

सवितैतानि शरीराणि पृथिव्यै मातुरुपस्थ आदधे। तेभिरदिते शं भव, इति।

---

१ ख. ग. °षः। ब°।

सवितेत्यादिः पूर्ववत् । तेभिरस्थिभिर्निमित्तभूतैर्हेऽदिते भूमे शं सुखहेतुर्भव ।

कल्पः—"विमुच्यध्वमघ्निया देवयाना इति दक्षिणेऽसे बलीवर्दान्विमुच्य" इति । पाठस्तु—

विमुच्यध्वमघ्निया देवयाना अतारिष्म तमसस्पारमस्य । ज्योतिरापाम सुवरगन्म (*२), इति ।

हेऽघ्निया बलीवर्दा विमुच्यध्वं विमुक्ता भवत । देवयाना देवान्प्रति गमनवन्तो वयमस्य मनुष्यजन्मरूपस्य तमसोऽन्धकारस्य पारं परभागं प्रत्यतारिष्म तारितवन्तः । ज्योतिः स्वर्गमार्गप्रकाशकं सुकृतरूप साधनमापाम प्राप्नवाम । सुवः स्वर्गमगन्म वयं प्राप्तवन्तः ।

कल्पः—"उदपात्रेणोदुम्बरशाखया वोक्षति प्र वाता वान्ति" इति । पाठस्तु—

प्र वाता वान्ति पतयन्ति विद्युत उदोषधीर्जिहते पिन्वते सुवः । इरा विश्वस्मै भुवनाय जायते यत्पर्जन्यः पृथिवीꣳ रेतसाऽवति , इति ।

वाताः पुरोवायवः प्रवान्ति प्रकर्षेण गच्छन्ति । तेन वायवो विद्युतः पतयन्ति पतिताः कुर्वन्ति । ओषधीरोषधयश्चोज्जिहत उद्गच्छन्ति । सुवस्तन्निमित्तं सुखं पिन्वते वर्धते । विश्वस्मै भुवनाय सर्वप्राण्युपकारार्थमिराऽन्नं जायते । यद्यस्मात्कारणात्पर्जन्यो मेघः पृथिवीं रेतसा स्वकीयेनोदकेनावति रक्षति । तस्मात्पूर्वोक्तमन्नादिकमुपपन्नम् ।

कल्पः—"पात्र्यां सर्वौषधीः संयुत्याऽऽवपति—यथा यमाय" इति । पाठस्तु—

यथा यमाय हार्म्यमवपन्पञ्च मानवाः । एवं वपामि हार्म्यं यथाऽसाम जीवलोके भूरयः, इति।

यथा यमलोके पञ्च मानवाः पञ्चसंख्याका मनुष्यरूपा मुख्या यमदूता हार्म्यं हर्म्यस्य योग्यं गृहोपकरणजातमवपन्संपादितवन्तः । एवमहमपि हार्म्यं हर्म्यस्य गृहस्य योग्यं गृहोपकरणभूतमोषधिजातं वपामि प्रक्षिपामि । यथा येन प्रकारेण जीवलोके जनसमूहे भूरयः प्रभूता वयमसाम भवाम तथा कुर्म इति शेषः ।

---

* अत्र ग. पुस्तकेऽङ्करहितः पाठः ।

---

१ क. ख. गच्छन्ती । २ क. °तमौष° । ख. °तमौषधजा° ।

कल्पः—"चितः स्थ परिचित इत्यपरिमिताभिः शर्कराभिः परिश्रित्य" इति। पाठस्तु—

चितः स्थ परिचितं ऊर्ध्वचितः श्रयध्वं पितरो
देवता। प्रजापतिर्वः सादयतु तया देवतया, इति।

हे शर्करा यूयं **चितः स्थ** संपादिता भवथ। **परिचितः स्थ** परितः स्थापिता भवथ। **ऊर्ध्वचितः** सर्वाभ्य इष्टकाभ्य ऊर्ध्वं संपादिताः **स्थ***। तादृशीनां युष्माकं **पितरो देवता** पितृदेवत्या यूयम्। **प्रजापतिर्देवस्तादृशीर्वो** युष्मान्**सादयतु अत्र** स्थापयतु। **तया** प्रजापतिरूपया **देवतया**ऽङ्गिरस्वद्ध्रुवाः सीदतेति शेषः। अङ्गिरोभिः स्थापितौ यथा ध्रुवास्तथाऽत्रापि ध्रुवाः सत्यस्तिष्ठत।

कल्पः—"आप्यायस्व समेतु त इति सिकता व्यूहति, उत्तरया ग्रिष्टुभा राजन्यस्य" इति। उभयोः प्रतीके दर्शयति—

आप्यायस्व, सं ते (३), इति॥
अग्निया अगन्म सप्त चं॥
इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके षष्ठप्रपाठके
षष्ठोऽनुवाकः॥ ६॥

आप्यायस्व समेतु ते सं ते पयाꣳसि समु यन्तु वाजा इति मन्त्रद्वयं मा नो हिꣳसीर्जनितेत्यनुवाके व्याख्यातम्॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये षष्ठप्रपाठके षष्ठोऽनुवाकः॥ ६॥

अथ षष्ठे सप्तमोऽनुवाकः।

कल्पः— "लोष्टान्प्रतिदिशमनन्वीक्षमाण उपदधाति—उत्ते तभ्नोमीत्येतैः प्रतिमन्त्रम्" इति। तत्र प्रथमामाह—

उत्ते तभ्नोमि पृथिवीं त्वत्परीमं लोकं निदधन्मो
अहꣳ रिषम्। एताꣳ स्थूणां पितरो धार-

---

* श्रयध्वमित्यस्य व्याख्यानमेतत्।

---

१ ख. ग. °तः सं°। २ क. ख. °दृश्यो वो यु°। ३ क. ख. °ता ध्रुवा यथा तथाऽ°। ४ ग. (२)। ५ ग. °मन्वी°।

यन्तु तेऽत्रा यमः सादनात्ते मिनोतु, इति।

हे लोष्ट ते त्वदर्थं पृथिवीमुत्तभ्नोमि, उत्कर्षेण स्तब्धां करोमि। हे पृथिवि त्वत्परि तवोपरीमं लोकं लोक्यते दृश्यत इति लोको लोष्टस्तं निदधत्स्थापयन्नहं मो रिषं तव हिंसां मा करोमि। एतां लोष्टरूपां स्थूणां स्तम्भं ते तव भारो यथा न भवति तथा पितरो धारयन्तु। अत्रास्मिन्देशे यमो देवो हे लोष्ट ते तव सादनात्स्थापननिमित्तं मिनोतु स्थानं करोतु।

अथ द्वितीयामाह—

उपसर्प मातरं भूमिमेतामुरुव्यचसं पृथिवीꣳ सुशेवाम्। ऊर्णम्रदा युवतिर्दक्षिणावत्येषा त्वा पातु निर्ऋत्या उपस्थे, इति।

हे लोष्टैतां भूमिमुपसर्प प्राप्नुहि। कीदृशीम्, मातरं मातृस्थानीयाम्, उरुव्यचसं बहुविस्ताराम्, पृथिवीं प्रथितां प्रसिद्धाम्, सुशेवां सुष्ठु सेवितुं योग्याम्। ऊर्णम्रदा कम्बलवन्मृदुभूता युवतिर्नित्यतरुणी दक्षिणावती कौशलयुक्ता सैषा पृथिवी, उपस्थे स्वोत्सङ्गे *निर्ऋत्याः +पापदेवतायाः सकाशाद्धे लोष्ट त्वां पातु।

अथ तृतीयामाह—

उच्छ्रमञ्चस्व पृथिवि मा विबाधिथाः सूपायनाऽस्मै भव सूपवञ्चना। माता पुत्रं यथा सिचाऽभ्येनं भूमि वृणु, इति।

हे पृथिवि लोष्टमेनमुच्छ्रमञ्चस्वोत्कर्षेण सुखयुक्तं कुरु। मा विबाधिथा अस्य बाधां मा कार्षीः। अस्मै लोष्टाय सूपायनं निवासस्थानं भोग्यद्रव्यं वा यस्याः सा सूपायना। सुष्ठूपवञ्चनं स्वेच्छागमनं यस्याः सा सूपवञ्चना। तादृशी भव। यथा लोके माता पुत्रं सिचा वस्त्रेण प्रावृणोति तथैनं लोष्टमभिवृणु, अस्य प्रावरणं कुरु।

अथ चतुर्थीमाह—

× उच्छ्रमञ्चमाना पृथिवी हि तिष्ठसि सहस्रं मित उप हि श्रयन्ताम्। ते गृहासो मधु-

---

* ऋग्भाष्येऽत्र निर्ऋतिपदस्य मृत्युदेवतेत्यर्थः कृतोऽस्ति। + अग्ने नवमानुवाके वरणो वारयादिति मन्त्रे निर्ऋतिपदव्याख्यानुरोधेनायं पाठः कल्पितः। दृश्यते तु सर्वत्राऽऽदर्शपुस्तकेषु पादेवतया इति। × अत्र हिङ्कर्तव्ये तत्रैकस्य व्याख्यानं न स्पष्टतयोल्लिखितं दृश्यते। एतं वेति वाशब्देन ध्वनितं तु स्यात्।

---

१ क. ख °त्याः स°।

श्रुतो विश्वाहाऽस्मै शरणाः सन्त्वत्र, इति ।

हे पृथिवि हि यस्मादुच्छ्रमञ्चमानोत्कर्षेण सुखं कुर्वाणा तिष्ठसि । तस्मात्कारणान्मितो मीयमानाः सहस्रं लोष्टा उपश्रयन्तां त्वामाश्रयन्तु । एतं वा मुख्यं लोष्टमाश्रयन्तु । ते सर्वे लोष्टा मधुश्रुतो माधुर्यरसस्राविणो गृहा भूत्वा विश्वाहा सर्वेष्वप्यहःस्वस्मै स्थाप्यमानलोष्टाय शरणा अत्र रक्षितारः सन्तु ।

कल्पः—"तिलमिश्राभिर्धानाभिस्त्रिरपसव्यं परिकिरति—एणीर्धानाः" इति । पाठस्तु—

एणीर्धाना हरिणीरर्जुनीः सन्तु धेनवः । तिलवत्सा ऊर्जमस्मै दुहाना विश्वाहा सन्त्वनपस्फुरन्तीः (१), इति ।

या धानाः सन्ति ता एणीर्मिश्रवर्णा हरिणीर्हरितवर्णा अर्जुनीः श्वेतवर्णाश्च धेनवः सन्तु । तिला वत्सस्थानीया यासां तास्तिलवत्साः, तादृश्यो धाना अस्मै प्रेतायोर्जमन्नरसं दुहाना विश्वाहा सर्वेष्वहःस्वनपस्फुरन्तीरपस्फुरणेन प्रातिकूल्यप्रतिभासेन रहिताः सन्तु ।

कल्पः—"अभिवान्यायै दुग्धस्यार्धशरावे मन्थस्त्रिः प्रसव्योपमथित आमपात्रस्थस्तं दक्षिणत उपदधाति—एषा ते यमसादने" इति । पाठस्तु—

एषा ते यमसादने स्वधा निधीयते
गृहे । अक्षितिर्नाम ते असौ, इति ।

हे प्रेत ते तव यमसादने यमस्य स्थाने गृह एषा मन्थरूपा स्वधाऽन्नात्मिका निधीयते स्थाप्यते । असौ हे देवदत्तनामक प्रेत ते तवाक्षितिर्नाम क्षयरहिता खलु ।

कल्पः— "समूलं बर्हिर्दक्षिणा स्तृणाति—इदं पितृभ्यः प्रभरेम बर्हिः" इति । पाठस्तु—

इदं पितृभ्यः प्रभरेम बर्हिर्देवेभ्यो जीवन्त
उत्तरं भरेम । तत्त्वमारोहासो मेध्यो भव
यमेन त्वं यम्या संविदानः, इति ।

इदं बर्हिः पितृभ्यः पित्रर्थं प्रभरेम प्रकर्षेण स्तृणीम । वयं तु जीवन्त एव तत्त्वमारोहासः परमार्थतत्त्वमारोढुकामा देवेभ्यो देवार्थमुत्तरमुद्ततरमतिशयेनोत्कृ-

---

१ ग. °न्थस्त्रिरप° । २ म. मेध्यो । ३ ग. भव ।

ष्टतरं बर्हिर्भरेम संपादयाम। हे प्रेत त्वं **यमेन यम्या** च **संविदान** ऐकमत्यं गतो **मेध्यो भव** [म्]। अमृतसेवनयोग्यो भव।

कल्पः—" पालाशान्पारिधीन्पारिदधाति—मा त्वा वृक्षाविति पूर्वापरावुत्तरया दक्षिणोत्तरौ " इति। तत्र प्रथमामाह—

मा त्वा वृक्षौ संबाधिष्टां मा माता पृथिवि त्वम्।
*** पितृन्ह्यत्र गच्छास्येधांसं यमराज्ये, इति।**

हे प्रेत त्वां **वृक्षौ** पूर्वापरपरिधिरूपावेतौ **मा संबाधिष्टां** बाधितं मा कुरुत(ता)म्। हे **पृथिवि त्वमपि माता** मातृस्थानीया सती मा बाधिष्ठाः। **हि** प्रसिद्धान्**पितॄनत्र** स्थाने **गच्छासि** हे प्रेत प्राप्नुहि। **यमराज्ये** यमस्य देशे **एधास**मेधस्व वर्धस्व।

अथ द्वितीयामाह—

मा त्वा वृक्षौ संबाधेथां मा माता पृथिवी मही।
वैवस्वतꣳ हि गच्छासि यमराज्ये विराजसि, इति।

हे प्रेत त्वां **वृक्षौ** दक्षिणोत्तरपरिधिरूपावेतौ **मा संबाधेथां** संबाधितं मा कुरुताम्। **माता** मातृस्थानीया **मही** महती **पृथिवी** मा बाधिष्ट। **हि** प्रसिद्धं **वैवस्वतं** सूर्यपुत्रं यमं **गच्छासि** प्राप्नुहि। **यमराज्ये** यमस्य देशे **विराजसि** विशेषेण राजमानो भव।

कल्पः—" मध्ये नलेषीकान्निदधाति—नꣳळं प्लवम् " इति। पाठस्तु—

नꣳळं प्लवमारोहैतं नꣳळेन पथोऽन्विहि। स त्वं
नꣳळप्लवो भूत्वा संतर प्रतरोत्तर (२), इति।

नꣳळशब्देन जलमध्ये समुत्पन्नस्तृणविशेष उच्यते। हे प्रेत त्वं नꣳळं प्लवं तृणविशेषरूपं प्लवनहेतुमेतमारोह। तेन **नलेन पथो** मार्गानन्विहि त्वमनुक्रमेण प्राप्नुहि। **स** तादृशस्त्वं **नल(ळ)प्लवो** नꣳळरूपेण प्लवेन युक्तो **भूत्वा संतर** पितृलोकमार्गरूपं समुद्रं सम्यक्तर। **प्रतर** प्रकर्षेण तर। **उत्तर**ोत्कर्षेण तर। मार्गे नानाविधोपद्रवपरिहाराभिप्रायेण नानाविधं तरणमुच्यते।

कल्पः—" पुराणेन सर्पिषा शरीराणि सुसंतृप्तानि संतर्प्योत्तरत आसीनोऽनन्वीक्षमाणो दर्भेषु निवपति—सवितैतानि शरीराणि " इति। पाठस्तु—

---

* " पितॄन्हि। यत्र " इत्यपि पाठो वैदिकानां प्रसिद्धः।

---

१ ग. मेध्यो। २ ग. नलं। ३ ग. नलं। ४ ग. नलेन। ५ ग. नलप्लु°। ६ ग. नलश°। ७ ख. ग. नलं। ८ ख. ग. नलरू°।

सवितैतानि शरीराणि पृथिव्यै मातुरुपस्थ
आदधे। तेभ्यः पृथिवि शं भव, इति ।

एतानि शरीराणि शरीरावयवरूपाण्यस्थीनि मातृस्थानीयायाः पृथिव्या **उपस्थ** उत्सङ्गे **सविता** प्रेरको देव **आदधे** सर्वतः स्थापयति। हे **पृथिवि** **तेभ्योऽस्थिभ्यः** शं सुखहेतुर्भव।

षड्ढोता सूर्यं ते चक्षुर्गच्छतु वातमात्मा द्यां च
गच्छ पृथिवीं च धर्मणा। अपो वा गच्छ यदि तत्र
ते हितमोषधीषु प्रतितिष्ठा शरीरैः, इति ।

कल्पः—" अथैनमुपतिष्ठते—षड्ढोता सूर्यं ते चक्षुर्गच्छतु वातमात्मा द्यां च गच्छ पृथिवीं च धर्मणा। अपो वा गच्छ यदि तत्र ते हितमोषधीषु प्रतितिष्ठा शरीरैः[२]" इति। षड्ढोतृसंज्ञको मन्त्राभिमानी देवोऽस्ति तदनुग्रहेण हे प्रेत त्वदीयं **चक्षुः सूर्यं गच्छत्विति** योजनीयम्। अयं च मन्त्रः प्रथमानुवाके व्याख्यातः।

कल्पः—" भुक्तभोगेन वाससाऽस्थिकुम्भं निमृज्योपर्युपरि शिरो दक्षिणा व्युदस्यति—परं मृत्यो अनुपरेहि पन्थामिति, अथास्य कपालानि सुसंभिन्नानि संभिनत्ति यथैषूदकं न तिष्ठेत् " इति। पाठस्तु—

परं मृत्यो अनुपरेहि पन्थां यस्ते स्व इतरो
देवयानात्। चक्षुष्मते शृण्वते ते ब्रवीमि मा नः
प्रजाꣳ रीरिषो मोत वीरान्, इति ।

हे **मृत्यो देवयानादितरो** यः पन्थास्ते **स्व**स्तव स्वभूतः, तं **परं पन्थां** देवयानादितरं तं मार्गमनुपरेहि अनुक्रमेण प्राप्नुहि। **चक्षुष्मते** साधुदर्शिने **शृण्वते**ऽस्मद्विज्ञप्तीनां श्रोत्रे ते तुभ्यमेकं वचनं **ब्रवीमि**। नोऽस्मदीयां **प्रजां** पुत्रादिरूपां **मा रीरिषो** मा विनाशय। **उत**अपि च **वीरा**ञ्शूरान्मृत्यानपि मा रीरिषः।

कल्पः—" भुक्तभोगेन वाससा शरीराणि प्रच्छाद्योदपात्रेणोदुम्बरशाखया वोक्षति—शं वातः " इति। पाठस्तु—

शं वातः शꣳ हि ते घृणिः शमु ते सन्त्वोष-
धीः। कल्पन्तां मे दिशः शग्माः, इति ।

---

१ ग. °ष्ठन्ते ष°। २ ग. °ति। यः ष°।

वातो वायुस्ते तव **शं** सुखं करोतु । घृणिर्दीप्यमान आदित्यो हि प्रसिद्धस्ते तव **शं** सुखं करोतु । ओषध्यश्च ते तव **शं** सुखहेतवः **सन्तु** । **दिशः** सर्वा **मे** मम **शग्माः** सुखप्रापिकाः **कल्पन्तां** समर्था भवन्तु ।

कल्पः—"इष्टकाः प्रतिदिशमनन्वीक्षमाण उपदधाति—पृथिव्यास्त्वा लोके सादयामीत्येतैः प्रतिमन्त्रं प्रतिदिशं मध्ये पञ्चमीं तां दक्षिणेन षष्ठीम्" इति । तत्र प्रथममन्त्रमाह[1]—

पृथिव्यास्त्वा लोके सादयाम्यमुष्य शर्मासि पितरो देवता । प्रजापतिस्त्वा सादयतु तया देवतया, इति ।

हे इष्टके त्वां **पृथिव्या लोके** स्थाने स्थापयामि सादयामि । **अमुष्य** प्रेतस्य **शर्मासि** सुखहेतुरसि । **पितरस्तव देवताः** स्वामिभूताः । **प्रजापतिर्देवस्त्वामत्र सादयतु** स्थापयतु । **तया** प्रजापतिदेवतया स्थापिता सती ध्रुवा सीद यथाऽङ्गिरोभिः स्थापिता तद्वत् । अत्राङ्गिरस्वद्ध्रुवा सीदेत्येतावदध्याहर्तव्यम् ।

अथ द्वितीयादीन्षष्ठान्तान्पञ्च मन्त्रानाह—

अन्तरिक्षस्य त्वा दिशस्त्वा दिशां त्वा नाकस्य त्वा पृष्ठे ब्रध्नस्य त्वा विष्टपे सादयाम्यमुष्य शर्मासि पितरो देवता । प्रजापतिस्त्वा सादयतु तया देवतया (३), इति ।

अनपस्फुरन्तीरुत्तर देवतया द्वे च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके षष्ठप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

हे द्वितीयेष्टके त्वामन्तरिक्षस्य लोके सादयामीत्यनुषज्य पूर्ववद्व्याख्येयम् । हे तृतीयेष्टके त्वां **दिवो** लोके सादयामि । हे चतुर्थेष्टके त्वां **दिशां** लोके सादयामि । हे पञ्चमेष्टके त्वां **नाकस्य पृष्ठे** स्वर्गस्योपरि सादयामि । हे षष्ठेष्टके त्वां **ब्रध्नस्याऽऽदित्यस्य विष्टपे** स्थाने **सादयामि** । सर्वत्रानुषङ्गद्योतनाय सादयामीत्यादेः पुनः पाठः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-तैत्तिरीयारण्यकभाष्ये षष्ठप्रपाठके सप्तमोऽनुवाकः ॥ ७ ॥

---

१ ग. सुखं प्रति हे° । २ क. ख. °श्चमी तां । ३ क. ख. °न्त्रपाठस्तु—पृ° ।

अथ षष्ठेऽष्टमोऽनुवाकः ।

कल्पः—"एवं चरूनपूपवानिति प्रतिमन्त्रम्" इति । तत्र प्रथममन्त्रमाह—

अपूपवान्घृतवाꣳश्चरुरेह सीदतूत्तभ्नुवन्पृथिवीं द्यामुतोपरि । योनिकृतः पथिकृतः सपर्यत ये देवानां घृतभागा इह स्थ । एषा ते यमसादने स्वधा निधीयते गृहेऽसौ । दशाक्षरा ताꣳ रक्षस्व तां गोपायस्व तां ते परिददामि तस्यां त्वा मा दभन्पितरो देवता । प्रजापतिस्त्वा सादयतु तया देवतया, इति ।

पक्वा भक्ष्याः पिष्टविकारा अपूपाः, ते यस्य चरोः सन्ति सोऽयमपूपवान् । तथा घृतवान्प्रभूतघृतयुक्तः । तादृशश्चरुरिहास्मिन्स्थाने पूर्वस्यां दिश्यासीदतु, उपविशतु । किं कुर्वन् । पृथिवीमेतामुत्तभ्नुवन्नूर्ध्वं स्तब्धां कुर्वन् । उतापि च द्यां द्युलोकमुपर्यूर्ध्वभाग उत्तभ्नुवन् । देवानां मध्ये ये देवविशेषा यूयमिहास्मिन्नुपधाने घृतभागाः स्थ घृतसेविनो भवथ, ये(ते) यूयं योनिकृतः स्थानकारिणः पथिकृतो मार्गकारिणश्च सन्तः सपर्यत परिचरत । असौ देवदत्तादिनामक हे प्रेत ते तव यमसादने यमस्य स्थाने गृह एषा स्वधैतच्चरुरूपमन्नं निधीयते नितरां स्थाप्यते । दशसंख्याकान्यक्षराणि मन्त्रविशेषरूपेण प्रतिपादकानि यस्याश्चरुरूपायाः स्वधायाः सन्ति सेयं दशाक्षरा तादृशी या स्वधा विद्यते तां स्वधां हे प्रेत रक्षस्व । तां गोपायस्व । स्वरूपस्योपद्रवाभावो रक्षणम् । भोगदशायामप्युपद्रवाभावो गोपायस्वेत्यनेनोच्यते । तां तादृशीं स्वधां ते तुभ्यं परिददामि । अत्र देवतारूपा ये पितरस्ते सर्वे तस्यां स्वधायां त्वां प्रेतं मा दभन्हिंसितं मा कुर्वन्तु । प्रजापतिरित्यादि पूर्ववत् ।

अथ दक्षिणादिमध्यमान्तचतुर्दिक्षु चरूपधानविषयान्मन्त्रानाह—

अपूपवाञ्शृतवान्क्षीरवान्दधिवान्मधुमाꣳश्चरुरेह सीदतूत्तभ्नुवन्पृथिवीं द्यामुतोपरि । योनिकृतः पथिकृतः सपर्यत ये देवानाꣳ शृतभागाः क्षीरभागा दधिभागा मधुभागा इह स्थ । एषा

---

१ ग. °मध्यान्त° ।

तं यमसादने स्वधा निधीयते गृहेऽसौ। शताक्षरा सहस्राक्षराऽऽयुताक्षराऽऽच्युताक्षरा ताꣳ रक्षस्व तां गोपायस्व तां ते परिददामि तस्यां त्वा मा दभन्पितरो देवता। प्रजापतिस्त्वा सादयतु तया देवतया (१), इति।

अपूपवानसौ दर्शः॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके षष्ठप्रपाठकेऽष्टमोऽनुवाकः॥ ८॥

अत्र शृतवानित्यादिपदचतुष्टयेन मन्त्रभेदो द्रष्टव्यः। शृतभागा इत्यादीन्यपि चत्वारि पदानि शताक्षरेत्यादीन्यपि चत्वारि पदानि चतुर्ष्वपि मन्त्रेषु विभज्य योजनीयानि। शृतं सम्यक्पक्वं पयः, क्षीरं पयोमात्रम्। अन्यत्पूर्ववत्॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये षष्ठप्रपाठकेऽष्टमोऽनुवाकः॥ ८॥

अथ षष्ठे नवमोऽनुवाकः।

कल्पः—"तिलमिश्राभिर्धानाभिस्त्रिः प्रसव्यं परिकिरत्येतास्ते स्वधा अमृताः करोमि" इति। पाठस्तु—

एतास्ते स्वधा अमृताः करोमि यास्ते धानाः परिकिराम्यत्र।
तास्ते यमः पितृभिः संविदानोऽत्र धेनूः कामदुघाः करोतु, इति।

हे प्रेत ते त्वदर्थमत्रास्यां चितौ या धाना भृष्टतण्डुलरूपाः परिकिरामि परितो विक्षिपामि। एता धानास्ते त्वदर्थममृता विनाशरहिताः स्वधा अन्नरूपाः करोमि। यमो देवस्ते त्वदर्थं पितृभिः संविदान ऐकमत्यं गतः संस्ता धाना अत्र स्थाने कामदुघाः कामप्रापिका धेनूर्धेनुरूपाः करोतु।

कल्पः—"ओषधिस्तम्बान्प्रतिदिशमनन्वीक्षमाण उपदधाति—त्वामर्जुनेति प्रतिमन्त्रम्" इति। तत्र प्रथमामाह—

त्वामर्जुनौषधीनां पयो ब्रह्माण इद्विदुः। तासां

---

१ ग. तिलाभिमि°। २ ग. °मन्वी°।

त्वा मध्यादादंदे चरुभ्यो अपिधातवे, इति ।

तेषु मन्त्रेष्वर्जुनदूर्वाकाशदर्भशब्दास्तृणविशेषवाचिनः प्रसिद्धाः । हेऽर्जुनाख्यतृण त्वां ब्रह्माणोऽभिज्ञा विप्रा ओषधीनां पय इत्सर्वासामोषधीनां सारमेव विदुर्जानन्ति । तासामोषधीनां मध्यात्सकाशात्त्वामादंद आनीय स्थापयामि । किमर्थम्, चरुभ्योऽपिधातवे चरूणामपिधानार्थम् ।

अथ द्वितीयामाह—

दूर्वाणा॰ स्तम्बमाहरैतां प्रियतमां मम । इमां
दिशं मनुष्याणां भूयिष्ठाऽनु विरोहतु, इति ।

हे प्रेत दूर्वाणां संबन्धिनं स्तम्बमाहर स्वी कुरु । एतां दूर्वां मम स्वस्य प्रियतमां विद्धीति शेषः । मनुष्याणां संबन्धिनीमिमां दक्षिणां दिशमनु सा दूर्वा भूयिष्ठा प्रभूता विरोहतु विविधमङ्कुरमुत्पादयतु ।

अथ तृतीयामाह—

काशानां॰ स्तम्बमाहर रक्षसामपहत्यै । य एतस्यै
दिशः पराभवन्नघायवो यथा ते नाभवान्पुनः, इति ।

हे प्रेत काशाख्यानां तृणानां स्तम्बमाहर स्वी कुरु । किमर्थम्—रक्षसामपहत्यै । एतस्यै पश्चिमाया दिशोऽघायवोऽघं पापमुपद्रवमिच्छन्तो ये वैरिणः पराभवन्पराभवकर्तार आसन् । ते वैरिणो यथा पुनर्नाभवन्न भविष्यन्ति तथा काशस्तम्बं स्वी कुरु ।

अथ चतुर्थीमाह—

दर्भाणा॰ स्तम्बमाहर पितृणामोषधीं प्रियाम् ।
अन्वस्यै मूलं जीवादनु काण्डमथो फलम्, इति ।

हे प्रेत दर्भसंबन्धिनं स्तम्बं स्वी कुरु । इमामोषधीं पितृणां प्रियां विद्धीति शेषः । अस्यै दर्भरूपाया ओषध्या मूलमनुजीवादनुक्रमेण जीवतु । तथा काण्डं फलं चानुक्रमेण जीवतु वर्धतामित्यर्थः ।

कल्पः—"लोकं पृणेति लोकंपृणा उपदधाति, उत्तरया पुरीषेणानुविकिरति" इति । तयोर्मन्त्रयोः प्रतीके दर्शयति—

लोकं पृण ता अस्य सूदंदोहसः, इति ।

---

१ ग. °दधे च° । २ ख. ग. °दध आ° । ३ ग. °भवन्यु° । ४ ख. ग. °राक्° ।

लोकं पृण च्छिद्रं पृणेत्येको मन्त्रः । ता अस्येति द्वितीयः । एतौ चोभावपेत वीतेत्यनुवाके व्याख्यातौ ।

कल्पः—"उदपात्रेणोदुम्बरशाखया वोक्षति—शं वातः" इति । पाठस्तु—

शं वातः शꣳ हिते घृणिः शमु ते सन्त्वोषधीः । कल्पन्तां ते दिशः सर्वाः, इति ।

अयं मन्त्रः सप्तमानुवाके व्याख्यातः । ते सर्वा इत्येतावानेव विशेषः ।

कल्पः—"उपतिष्ठत इदमेव" इति । पाठस्तु—

इदमेव मेतोऽपरामार्तिमाराम कांचन । तथा तदश्विभ्यां कृतं मित्रेण वरुणेन च, इति ।

इदानीं वर्तमानमिदमेवैकं कष्टं संपन्नम् । इतोऽपरां कांचिदप्यार्तिं माऽऽराम मा प्राप्नवाम । तदस्मदभीष्टमश्विभ्यां देवाभ्यां मित्रेण वरुणेन च तथा कृतं संपादितम् ।

कल्पः—"वैरणशाखां पुरस्तान्निदधाति—वैरणो वारयात्" इति । पाठस्तु—

वैरणो वारयादिदं देवो वनस्पतिः । आर्त्यै निर्ऋत्यै द्वेषाच्च वनस्पतिः, इति ।

अयं वैरणाख्यो वनस्पतिर्देव इदं कष्टं वारयान्निवारयतु । तथा स वनस्पतिरार्त्यै अन्यस्या अपि बाधाया निर्ऋत्यै पापदेवताया द्वेषाच्च वैरिकृतात्पालयत्विति शेषः ।

कल्पः—"विधृतिलोष्टमुत्तरतो विधृतिरसि" इति । पाठस्तु—

विधृतिरसि विधारयास्मद्घा द्वेषाꣳसि, इति ।

हे लोष्ट त्वं विधृतिर्विधारकोऽसि । अतोऽस्मत्तः सकाशाद्घा पापानि द्वेषांसि वैराणि च विधारय वियुज्यान्यत्र स्थापय ।

कल्पः—"शमीशाखां पश्चाच्छमि शमय" इति । पाठस्तु—

शमि शमयास्मद्घा द्वेषाꣳसि, इति ।

हे शमि एतन्नामकवृक्ष, अस्मदस्मत्तोऽघा पापानि द्वेषांसि वैराणि च शमय ।

---

१ क. ख. °ल्पः । उपस्थानेनोप° । २ ग. राष्ट्रं । ३ ग. वारुग° । ४ ग. वरुणो । ५ ग. वरुणो । ६ ग. वरुणा° ।

कल्पः—"यवं दक्षिणतो यव यवय" इति । पाठस्तु—

यव यवयास्मद्घा द्वेषाꣳसि, इति ।

पूर्ववद्व्याख्येयम् ।

कल्पः—"अथैनमुपतिष्ठते पृथिवीम्" इति । पाठस्तु—

पृथिवीं गच्छान्तरिक्षं गच्छ दिवं गच्छ दिशो
गच्छ सुवर्गच्छ सुवर्गच्छ दिशो गच्छ दिवं
गच्छान्तरिक्षं गच्छ पृथिवीं गच्छापो वा गच्छ यदि
तत्र ते हितमोषधीषु प्रतितिष्ठा शरीरैः, इति ।

आरोहावरोहाभ्यां पृथिव्यादिस्वर्गपर्यन्तप्राप्तिवाक्यानि स्पष्टानि । अपो वेत्यादिस्तु प्रथमानुवाके व्याख्यातः ।

कल्पः—"जघनेन चितिं कर्ष्वादि समानम्" इति । तन्मन्त्राणां प्रतीकानि दर्शयति—

अश्मन्वती रेवतीर्यद्वै देवस्य सवितुः पवित्रं या
राष्ट्रात्पन्नादुद्वयं तमसस्परि धाता पुनातु (२), इति ।
अथो फलं[1] पुनातु ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके षष्ठप्रपाठके
नवमोऽनुवाकः ॥ ९ ॥

एते च मन्त्रास्तृतीयानुवाके व्याख्याताः ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये षष्ठप्रपाठके नवमोऽनुवाकः ॥ ९ ॥

---

१ ग. °लं धाता° पुं° ।

अथ षष्ठे दशमोऽनुवाकः।

कल्पः—" नवम्यां व्युष्टायां यज्ञोपवीत्यन्तरा ग्रामं श्मशानं चाग्निमुपसमाधाय संपरिस्तीर्यापरेणाग्निं रोहितं चर्माऽऽनडुहं प्राचीनग्रीवमुत्तरलोमाऽऽस्तीर्य तद्वेतसमालिनो ज्ञातीनारोहयति—आरोहत " इति। पाठस्तु—

आरोहताऽऽयुर्जरसं गृणाना अनुपूर्वं यतमाना यतिष्ठ। इह त्वष्टा सुजनिमा सुरत्नो दीर्घमायुः करतु जीवसे वः, इति।

हे ज्ञातयो यूयं **जरसं गृणाना** जरावस्थां प्रार्थयमाना **आयुरायुषो** हेतुभूतं चर्माऽऽरोहत। **अनुपूर्वं** ज्येष्ठमनु कनिष्ठो यथा भवति तथा **यतमानाः** प्रयत्नं कुर्वन्तो **यतिष्ठाऽऽरोहणप्रयत्नं** कुरुत। **इह** कर्मणि **त्वष्टा** हविषां पापानां [च] तनूकर्ताऽयमग्निः **सुजनिमा** शोभनजन्मा **सुरत्नो** भक्तेभ्यो देयैः शोभनै रत्नैरुपेतो **वो** युष्मभ्यं **दीर्घमायुः** करोतु। **जीवसे** जीवनाय।

कल्पः—" अथैताननुपूर्वान्प्रकल्पयति—यथाऽहानि " इति। पाठस्तु—

यथाऽहान्यनुपूर्वं भवन्ति यथर्तवं ऋतुभिर्यन्ति क्लृप्ताः। यथा न पूर्वमपरो जहात्येवा धातरायूंषि कल्पयैषाम्, इति।

यथा लोकेऽहानि दिनान्यनुपूर्वं भवन्ति, प्रतिपद्द्वितीया तृतीया चेत्येवमनुक्रमेणैव वर्तन्ते। **यथा** च वसन्ताद्यृतव ऋतुभिरुत्तरोत्तरैः **क्लृप्ताः** संबद्धा **यन्ति** गच्छन्ति प्रवर्तन्ते। **यथा** च पूर्वं पितरं ज्येष्ठं वाऽपरः पुत्रः कनिष्ठो वा **न जहाति** न परित्यजति। हे **धातः** प्रजापत **एवैवमनेनैव** प्रकारेणैषां ज्ञातीनामायूंषि कल्पय संपादय।

न हि ते अग्ने तनुवं क्रूरं चकार मर्त्यः। कपिर्बभस्ति तेजनं पुनर्जरायु गौरिव। अप नः शोशुचदघमग्ने शुशुग्ध्या रयिम्। अप नः शोशुचदघं मृत्यवे स्वाहा।

---

१ ग. लोहितं। २ क. ख. °माना यतिष्ठ यावन्तः स्थ ते सर्व आरोहतेति। इ°। ३ ग. वर्तन्ते। ४ घ. हि अ°। ५ °युर्गौरि°।

कल्पः—" अथ वारणस्रुवेण वारण्यां स्रुचि चतुर्गृहीतमाज्यं गृहीत्वा जुहोति—न हि ते अग्ने तनुवै क्रूरं चकार मर्त्यः । कपिर्बभस्ति तेजनं पुनर्जरायु गौरिव । अप नः शोशुचदघमग्ने शुशुध्या रयिम् । अप नः शोशुचदघं मृत्यवे स्वाहा " इति । हेऽग्ने ते तव तनुवै शरीरार्थं मर्त्यो मनुष्यः क्रूरमुग्रं व्यापारं न हि चकार । कपिः कपिवच्चेष्टाकारी मनुष्यः पुनस्तेजनमुत्तेजनं यथा भवति तथा बभस्ति दीपयति । तत्र दृष्टान्तः—गौरिव जरायु । यथा गौः स्वर्गभस्य रक्षार्थं जरायुपटं संपादयति न तु क्रूरं करोति तद्वत् । नोऽस्मदीयमघं पापमपशोशुचत्, अपगतं यथा भवति तथा दीप्यतां दह्यताम् । हेऽग्ने रयिं धनं शुशुध्यातिशयेन शुद्धं कुरु । पुनरपि नोऽस्माकं पापमपगतं यथा भवति तथा दह्यताम् । तदर्थं मृत्यवे देवाय स्वाहुतमिदमस्तु ।

कल्पः—" उत्तरेणाग्निं रोहितोऽनड्वान्प्राङ्मुखोऽवस्थितो भवति तं ज्ञातयोऽन्वारभन्तेऽनड्वाहम् " इति । पाठस्तु—

अनड्वाहमन्वारभामहे स्वस्तये । स न इन्द्र इव
देवेभ्यो वह्निः संपारणो भव (१), इति ।

स्वस्तये क्षेमायैतमनड्वाहं वयमन्वारभामहे हस्तेन स्पृशामहे । हेऽनड्वन्स त्वं देवेभ्यो देवार्थमिन्द्र इव नोऽस्मदर्थं वह्निर्वाहकः संपारणः सम्यक्पारं प्रति नेता च भव ।

कल्पः—"प्राञ्चो गच्छन्तीमे जीवाः" इति । पाठस्तु—

इमे जीवा वि मृतैराववर्तिन्नभूद्भद्रा देवहूतिं
नो अद्य । प्राञ्चोऽगामा नृतये हसाय
द्राघीय आयुः प्रतरां दधानाः, इति ।

इमे जीवा ज्ञातयो मृतैर्वियुज्याऽऽववर्तिन्नावृत्ताः । केनाभिप्रायेणेति तदुच्यते—अद्यास्मिन्दिने नोऽस्माकं भद्रा कल्याणरूपा देवहूतिर्देवानामाह्वानक्रियाऽभूद्भवति । नृतये मनुष्यक्षयनिमित्तं हसाय हास्यार्थं हर्षार्थमित्यर्थः । प्राञ्चः प्राञ्चः प्राङ्मुखाः सन्तोऽगाम वयं गच्छामः । कीदृशा वयं, द्राघीय आयुरत्यन्तं दीर्घमायुः प्रतरामतिप्रकर्षेण दधाना धारयन्तः ।

कल्पः—"जघन्यः शमीशाखया पदानि लोपयते—मृत्योः पदम्" इति । पाठस्तु—

मृत्योः पदं योपयन्तो यदैम द्राघीय आयुः—

---

१ ग. वारुणेन स्रु । २ ग. वारुण्यां । ३ ख. °ग्ने तनु° । ४ क. ते तनु° । ५ ग. जरायुः । ६ ग. °ह्निर्वाहि° । ७ क. ख. पदं यो° ।

प्रतरां दधानाः । आप्यायमानाः प्रजया
धनेन शुद्धाः पूता भवथ यज्ञियासः, इति ।

मृत्योर्मृत्युरूपस्यानडुहः पदं स्थानं योपयन्तो लोपयन्तो यदैम गच्छामस्तदा* वयं पूर्ववद्द्राघीय आयुः प्रतरां (रा)[मति]प्रकर्षेण दधानाः प्रजया धनेन चाऽऽप्यायमाना वर्धमानाः सन्तः, यज्ञियासो यज्ञयोग्याः शुद्धाः शरीरशुद्धियुक्ताः पूता द्रव्यशुद्धियुक्ताश्च भवथ । हे ज्ञातय इति द्रष्टव्यम् ।

कल्पः—"अथैभ्योऽध्वर्युर्दक्षिणतोऽश्मानं परिधिं दधाति—इमं जीवेभ्यः परिधिं दधामि" इति । पाठस्तु—

इमं जीवेभ्यः परिधिं दधामि मा नोऽनुगाद-
परो अर्धमेतम् । शतं जीवन्तु शरदः पुरूची-
स्तिरो मृत्युं दधहे पर्वतेन , इति ।

इममश्मानं जीवेभ्यो जीवानामर्थे परिधिं परिधानहेतुं दधामि स्थापयामि । नोऽस्माकं मध्येऽपरो यः कोऽप्येतमर्धमायुषो भागं माऽनुगान्माऽनुगच्छतु । किंतु पुरूचीर्विस्तृतिं गताः शरदः संवत्सराञ्शतं जीवन्तु । पर्वतेन पर्वतसदृशेन पाषाणेन मृत्युं तिरो दधहे तिरोभूतं कुर्मः ।

कल्पः—"अथैताः पत्नयो नयने सर्पिषा संमृशन्तीमा नारीः" इति । पाठस्तु—

इमा नारीरविधवाः सुपत्नीराञ्जनेन
सर्पिषा संमृशन्ताम् । अनश्रवो अनमीवाः
सुशेवा आरोहन्तु जनयो योनिमग्रे, इति ।

इमा नारीरेताः स्त्रियोऽविधवा वैधव्यरहिताः सुपत्नीः शोभनपतियुक्ताः सत्य आञ्जनेनाञ्जनहेतुना सर्पिषा संमृशन्तां चक्षुषी संस्पृशन्तु । अनश्रवोऽश्रुरहिता अनमीवा रोगरहिताः सुशेवाः सुष्ठु सेवितुं योग्या जनयो जाया अग्र इतः परं योनिं स्वस्थानमारोहन्तु प्राप्नुवन्तु ।

कल्पः—"कुशतरुणकैस्त्रैककुदेनाञ्जनेनाङ्क्ते—यदाञ्जनम्" इति । पाठस्तु—

यदाञ्जनं त्रैककुदं जातꣳ हिमवतस्परि ।

---

* अत्र वयं पूर्ववदिति पदद्वयमधिकं भाति ।

---

१ क. ख. मृत्योः पदं । २ ग. °न्तो रजसा प्रच्छाद्यमानाः सन्तो यदै° । ३ क. ख. °च्छामो द्राघी° । ४ क. ख. °स्तृतग° । ५ क. ख. 'रीरवि° । ६ क. ख. °अनं त्रै° ।

तेनामृतस्य मूलेनारातीर्जम्भयामसि, इति ।

हिमवतस्परि हिमवत्पर्वतस्योपरि जातमुत्पन्नं त्रैककुदं त्रिककुत्पर्वतसंबन्धि यदाञ्जनं विद्यते । अमृतस्य मूलेन सुखस्य कारणेन तेनाञ्जनेनारातीर्जम्भयामसि शत्रून्विनाशयामः ।

कल्पः—"अथैतानि कुशतरुणकानि समुच्छ्रित्य दर्भस्तम्बे निदधाति—यथा त्वम्" इति । पाठस्तु—

यथा त्वमुद्भिनत्स्योषधे पृथिव्या अधि । एवमिम
उद्भिन्दन्तु कीर्त्या यशसा ब्रह्मवर्चसेन, इति ।

हे ओषधे दर्भस्तम्ब पृथिव्या उपरि यथा त्वमुद्भिनत्सि, उत्पद्यसे । एवमिमे कुशाः कीर्त्यादिभिः सहोद्भिन्दन्तूत्पद्यन्ताम् । कीर्तियशसोर्लोकद्वयगतत्वेन भेदः ।

कल्पः—"अजं चैतदहः पचते यवोदनं च—अजोऽसीत्यजस्य प्राश्नीयात्" इति । पाठस्तु—

अजोऽस्यजास्मदघा द्वेषांऽसि, इति ।

हे पक्वद्रव्य त्वमजोऽस्यजसंबन्ध्यसि । अतोऽस्मत्सकाशादघा पापानि द्वेषांसि वैराणि चाजापगमय ।

कल्पः—" यवोदनस्य च प्राश्नाति—यवोऽसि " इति । पाठस्तु—

यवोऽसि यवयास्मदघा द्वेषांऽसि (२), इति ।
संपारणो भव जम्भयामसि त्रीणि च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके षष्ठप्रपाठके
दशमोऽनुवाकः ॥ १० ॥

हे ओदन त्वं यवोऽसि यवसंबन्ध्यसि । अतोऽस्मत्तः सकाशादघा पापानि द्वेषांसि वैराणि च यवय पृथक्कुरु ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये षष्ठप्रपाठके दशमोऽनुवाकः ॥ १० ॥

---

१ क. ख. त्वमु° । २ क. ख. पचन्ति । ३ क. ख. °ति । अ° । ४ क. ख. यवोऽसीति । ५ क. ख. °ति यवोदनस्य च प्राश्नाति य° ।

अथ षष्ठ एकादशोऽनुवाकः ।

पूर्वानुवाके मृत्यवे स्वाहेति यो होम उक्तस्तदनन्तरमेवैतैर्मन्त्रैर्द्वादश स्रुवाहुतीर्जुहुयात् । तत्र प्रथमं मन्त्रमाह—

अप॑ नः शोशुचद॒घमग्ने॑ शुशु॒ग्ध्या
र॒यिम्। अप॑ नः शोशुचद॒घम्, इति।

पूर्वानुवाके व्याख्यातो मन्त्रः ।

अथ द्वितीयमाह—

सु॒क्षे॒त्रिया॑ सु॒गात॒या व॑सू॒या च॑ यजा-
महे । अप॑ नः शोशुचद॒घम्, इति।

सुक्षेत्रिया शोभनक्षेत्रयोग्यया **सुगातुया** शोभनगतियोग्यया **वसूया च** धनप्राप्तिहेतुभूतयाऽप्यनयाऽऽहुत्या **यजामहे** पूजयामः । अप न इत्यादि पूर्ववत् ।

अथ तृतीयमाह—

प्र यद्भन्दि॑ष्ठ॒ एषां॒ प्रास्माका॑सश्च
सू॒र॒यः। अप॑ नः शोशुचद॒घम्, इति।

यद्यदैषां ज्ञातीनां **भन्दिष्ठो**ऽतिशयेन भद्रः पुरुषार्थः प्राप्यते, तदानीमा**स्माकासो**ऽस्मत्संबन्धिनः **सूरयश्च** विद्वांसोऽपि पुत्रपौत्रादयः प्राप्यन्ताम् ।

अथ चतुर्थमाह—

प्र यद॒ग्नेः सह॑स्वतो॒ विश्व॑तो यन्ति
सू॒र॒यः। अप॑ नः शोशुचद॒घम्, इति।

यच्छब्दः प्रसिद्धिवाची । यत्प्रसिद्धाः **सूरयो** विद्वांसः **सहस्वतो** बलवतोऽग्नेः सकाशात्**प्रयन्ति** प्रकर्षेण प्राप्नुवन्ति ।

अथ पञ्चममाह—

प्र यत्ते॑ अग्ने सू॒रयो॑ जाय॒ेमहि॒ प्र ते॑
व॒यम्। अप॑ नः शोशुचद॒घम्(१), इति ।

*हेऽग्ने ये वयं ते तव सूरयः स्तोतृनामैतत् । प्रकर्षेण स्तोतारः । यच्छब्दश्रुतेस्त-

---

* हेऽग्ने वयं ते तव यत्प्रसिद्धाः सूरयस्ते त्वदीयाः प्राप्ताः, अतो वयमपि ते त्वदीयाः प्रजायेमहि प्रकर्षेण भूयास्म, इति ग. पुस्तकस्थो भाष्यपाठः ।

च्छब्दोऽध्याहर्तव्यः । ते वयं प्रजायेमहि प्रजां प्राप्नुयाम तव प्रसादेन तव स्वभूताः ।

अथ षष्ठमाह—

त्वꣳ हि विश्वतोमुख विश्वतः परि-
भूरसि । अप नः शोशुचदघम्, इति ।

हे विश्वतोमुख सर्वतो ज्वालायुक्ताग्ने त्वं विश्वतः सर्वत्र परिभूरसि वैरिणां परिभविताऽसि ।

अथ सप्तममाह—

द्विषो नो विश्वतो मुखाऽति नावेव पारय ।
अप नः शोशुचदधम्, इति ।

हेऽग्ने नोऽस्माकं द्विषो द्वेषिणो मुखा मुखानि विश्वतः सर्वस्मादेशादतिपारया-तीत्य परतो नय । तत्र दृष्टान्तः—नावेव यथा नावा परतस्तार (तः प्राप)यन्ति तद्वत् । यद्वा हे विश्वतोमुखाग्ने द्विषः शत्रूनतिपारयेति व्याख्येयम् ।

अथाष्टममाह—

स नः सिन्धुमिव नावयाऽतिपर्षा
स्वस्तये । अप नः शोशुचदघम्, इति ।

हेऽग्ने स त्वं नोऽस्माकं स्वस्तये क्षेमायातिपर्ष दुःखजातमतीत्य परतः प्रापय । तत्र दृष्टान्तः—नावया सिन्धुमिव यथा लोके नावा समुद्रं तारयन्ति तद्वत् ।

अथ नवममाह—

आपः प्रवणादिव यतीरपास्मत्स्यन्दता-
मघम् । अप नः शोशुचदघम्, इति ।

प्रवणान्निम्नदेशान्निमित्तभूताद्यतीर्निर्गता आप इवास्मत्तः सकाशादघं पापम-पेत्य स्यन्दतां प्रवाहरूपेण गच्छतु ।

अथ दशममाह—

उद्वनादुदकानीवापास्मत्स्यन्दतामघम् ।
अप नः शोशुचदघम्, इति ।

---

१ ग. परिभवसि । २ क. ख. °त् । अथा° । ३ ख. °णान्नम्रदे° । ४ ग. °तीर्गच्छन्त्य आ° ।

उद्वनादुन्नतप्रदेशस्थाद्वनात्सकाशात्कुल्यया समागतान्युदकानि यथा निम्नदेशं प्रति स्यन्दन्ते तथाऽस्मत्तः सकाशादघमपेत्य स्यन्दताम् ।

अथैकादशमाह—

आनन्दाय प्रमोदाय पुनरागाꣳ स्वान्गृ-
हान् । अपं नः शोशुचदघम्, इति ।

आनन्दाय मरणाभावनिमित्तसंतोषाय, प्रमोदाय विषयभोगनिमित्तप्रकृष्टहर्षाय, पुनरपि स्वकीयान्गृहान्प्रत्यागामागतोऽस्मि ।

अथ द्वादशमाह—

न वै तत्र प्रमीयते गौरश्वः पुरुषः पशुः । यत्रेदं ब्रह्म
क्रियते परिधिर्जीवनाय कमपं नः शोशुचदघम् (२), इति ॥

अघमर्षं चत्वारिं च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके षष्ठप्रपाठक
एकादशोऽनुवाकः ॥ ११ ॥

यत्र यस्मिन्देशे इदं ब्रह्म पूर्वोक्तं होममन्त्रजातं जीवनाय जीवनार्थं कं सुखं यथा भवति तथा परिधिः परिधानं क्रियते । तत्र देशे गौरश्वो वा पुरुषोऽन्यो वा पशुर्नैव प्रमीयते सर्वथा न म्रियते । अतस्तदर्थं नोऽस्मदीयमघमपशोशुचत् । अपेत्य दग्धं भवतु ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये षष्ठप्रपाठक एकादशोऽनुवाकः ॥ ११ ॥

अथ षष्ठे द्वादशोऽनुवाकः ।

राजगव्या हननमुत्सर्गश्चेति द्वौ पक्षौ, तत्र हननपक्षे मन्त्राः पूर्वमेवोक्ताः । अथोत्सर्गपक्षे मन्त्रा उच्यन्ते । कल्पः—" यद्युत्सृजन्त्यपश्याम युवतिमाचरन्तीं सचस्वा नः स्वस्तय इत्यन्ताभिस्तिसृभिः प्रसव्यं राजगवीमग्नीन्प्रेतं दारुचितिं च पारिणीय " इति । तत्र प्रथमामाह—

अपश्याम युवतिमाचरन्तीं मृतायं जीवां पारिणीयमानाम् ।

१ ग. °शादधः कुल्य° । २ क. ख. गौर्वाऽश्वो । ३ क. ख. °सृभिरप्स° । ४ घ. °वतीवा° ।

अन्धेन या तमसा प्रावृताऽसि प्राचीमवाचीमवयन्नरिष्ट्यै, इति ।

मृताय मृतपुरुषार्थं परिणीयमानां जीवां जीवन्तीं युवतीं(तिं) यौवनवत्पुष्टाङ्गीं युवतित्वेन भावितां वा वृद्धामाचरन्तीमागच्छन्तीं राजगवीं वयमपश्याम । या राजगवी त्वमन्धेन तमसा जरातिशयेन मरणभीत्या वा दृष्टिप्रसारणाभावे सत्यत्यन्तनिबिडेन तमसा प्रावृता भवसि । अरिष्ट्या अहिंसार्थं प्राचीं प्राङ्मुखीमवाचीमवाङ्मुखीं तां राजगवीमवयन्वयमवैमो जानीमः ।

अथ द्वितीयामाह—

मयैतां मा॑ऽस्तां म्रियमा॑णा देवी सती
पितृलोकं यदैषि । विश्वबा॑रा॒ नभसा संव्यय-
यन्त्युभौ नो॑ लोकौ पयसाऽऽवृणीहि, इति ।

मया म्रियमाणा॑ पोष्यमाणा राजगवी, एतां रक्षितां त्वां(स्वां) मा॑ऽस्तां मन्यताम् । अहमनेन रक्षिता नतु मरिष्यामीत्येवं निश्चिनोत्वित्यर्थः । हे राजगवि यद्यस्मात्कारणादनेनोपाकरणमात्रेण देवी देवतात्मिका सती पितृलोकं प्रत्यैष्यागच्छसि । विश्वबारा सर्वैर्वरणीया प्रार्थनीया नभसाऽऽकाशमार्गेण संव्ययन्ती द्युलोकं संवृण्वती हे राजगवि तथाविधा त्वं नोऽस्माकमुभौ लोकावेतल्लोकपरलोकौ पयसा क्षीरेणाभ्यावृ(णाऽऽवृ)णीह्यावृतौ कुरु । क्षीरपूर्णौ कुर्वित्यर्थः ।

अथ तृतीयामाह—

रयिष्ठामग्निं मधुमन्तमूर्मिणमूर्जः॑सन्तं त्वा
पयसोपस॑ꣳसदेम । स॑ꣳ रय्या समु
वर्चसा सꣳसृजा॑ नः स्वस्तये, इति ।

हेऽग्ने वयं त्वामग्निं पयसा पयोमुख्यभोग्यद्रव्यनिमित्तमुपस॑ꣳसदेम समीपे सम्यक्प्राप्नुयाम । कीदृशमग्निम् । रयिष्ठां धनेऽवस्थितं धनप्रदमित्यर्थः । मधुमन्तं मधुरद्रव्ययुक्तमूर्मिणमुत्कर्षयुक्तमूर्जस्व(र्जः स?)न्तं बलवन्तम् । हेऽग्ने स्वस्तये क्षेमार्थं नोऽस्मान्रय्या धनेन संसृजस्व सम्यग्योजय वर्चसा कान्त्याऽपि संसृजस्व ।

कल्पः—" ये जीवा इत्यभिमन्त्र्य " इति पाठस्तु—

ये जीवा ये च॑ मृता ये जाता ये च॒ जन्त्याः ।

---

१ क. ख. °न्तीं यौ° । २ क. ख. °मसाऽन्धकारा° । ३ ग. °वेमात्यन्त° । ४ ग. °णा प्पो° । ५ ख. °नोपकार° । ६ ग. °मूर्जस्वन्तं ।

तेभ्यो घृतस्य धारयितुं मधुधारा व्युन्दती, इति ।

ये जीवा अस्मत्कुले जीवन्तो ये पुरुषाः सन्ति **ये च मृताः** सन्ति येऽपीदानीं **जाता** उत्पन्ना **ये च जन्त्या** इतः परं जनयितव्याः, **तेभ्यो धारयितुं** तान्सर्वान्पोषयितुं **घृतस्य** संबन्धिनी **मधुधारा** मधुररसोपेता [धारा] तया धारया **व्युन्दती** विशेषेण क्लेदनयुक्ता [राजगवी] वर्तते ।

कल्पः—" माता रुद्राणामिति द्वाभ्यामुत्सृजन्ति " इति । तत्र प्रथमामाह—

माता रुद्राणां दुहिता वसूनाꣳ स्वसाऽऽदित्या-
नाममृतस्य नाभिः । प्र णु वोचं चिकितुषे
जनाय मा गामनागामदितिं वधिष्ट, इति ।

इयं राजगवी **रुद्राणा**मेकादशसंख्याकानां **माता** मातृस्थानीया । **वसूनामष्टसं**ख्याकानां **दुहिता** पुत्रीस्थानीया । **आदित्या**नां द्वादशसंख्याकानां **स्वसा** भगिनीस्थानीया । **अमृतस्य नाभि**रैहिकस्याऽऽमुष्मिकस्य च सुखस्य नाभिस्थानीया । अतः कारणाच्चि**कितुषे** ज्ञानयुक्ताय **जनाय**र्त्विक्समूहाय **नु** क्षिप्रं **प्रवोचं** प्रकर्षेण कथयामि । किं कथ्यत इति तदुच्यते—**अनागाम**पराधरहितामदितिमखण्डनीयां **गां** [१]राजगवीमनुस्तरणीरूपेणोपाकृतां **मा वधिष्ट** हे जना अस्या वधं मा कुरुत ।

अथ द्वितीयामाह—

पिबतूदकं तृणान्यत्तु । ओमुत्सृजत (१), इति ॥

वधिष्ट द्वे च ॥

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके षष्ठप्रपाठके
द्वादशोऽनुवाकः ॥ १२ ॥

इयं राजगवी यत्र क्वापि स्वेच्छयोदकं **पिबतु** । तृणानि च भक्षयतु । **ओम्**, वयमङ्गी कुर्मः । **उत्सृजत** हे जना बद्धामेनां राजगवीं परित्यजत ॥

इति श्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीय-
तैत्तिरीयारण्यकभाष्ये षष्ठप्रपाठके द्वादशोऽनुवाकः ॥ १२ ॥

---

१ ग. °रणरू° ।

परे युवा॒ꣳसं॑ प्रवि॒द्वान्प्रु॒वनस्याभ्यावृ॑त्स्वाजोऽभागोऽयं वै चतु॒श्चत्वा॑रि॒ꣳशꣳ॑ एतस्य त्वत्प॒श्चप्रकेतुनेदं ते नाके सुप॒र्णो यौ ते ये युध्य॑न्ते तप॒साऽ इ॒मन्व॑ती रे॒वतीः स॒ꣳरभ॑ध्वमष्टावि॒ꣳशति॒र्यं ते यत्त॑ उत्ति॒ष्ठात॑ इ॒दं त॑ उत्ति॒ष्ठ प्रेह्य॒मन्यद्वा उद्यमयं पञ्चवि॒ꣳशति॒रायातु त्रि॒ꣳशद्वै॑श्वान॒रे तस्मि॑न्द्र॒प्स इम॑मपेताहोभि॒र्युज्य॑न्तामग्नि॒या अदि॑ते पा॒रं व॒ आप्या॑यस्व सप्तवि॒ꣳशति॑रुत्ते॒ तभ्यो॒ म्यक्षि॑तिस्ते॒भ्यः पृथि॑वि षद्धो॒ता पर॑ मे श॒ग्माः पृ॑थि॒व्या अ॒न्तरि॑क्षस्य द्वात्रि॒ꣳशदपू॑पवा॒नसौ दश॑ श॒त दे॒शैतास्ते॑ ते दिशः॒ सर्वा॑ अश्मन्वि॒ꣳशति॒राऽरो॑हत॒ तनुवै॑ क्रू॒रं च॑कार पुनर्मृ॒त्यवे॒ मा नोऽनु॑ गाद्व॒ह इ॒मा नारीः॑ परि॒ त्रयो॑वि॒ꣳश॑तिरप॑ नः सुक्षे॒त्रिया॒ म य॒ज्ञन्दि॒ष्टः॒ प्रय॑दग्नेः॒ प्र यत्ते॑ अग्ने॒ त्वꣳ हि द्विषः॒ स नः॑ सिन्धु॒मापः॑ प्रव॒णादु॒दनदा॑नन्दाय॒ न वै तत्र॑ चतुर्वि॒ꣳशति॑रप॒श्यामाऽऽद॒ण्णीहि॒ द्वाद॑श द्वादश॒ परे॒ युवा॒ꣳसमा॑या॒त्वेतास्ते॑ सप्तवि॒ꣳशतिः॑ ॥

ॐ तत्सत् । सं त्वा सिञ्चामि यजुषा प्रजामायुर्धनं च ॥

ॐ शान्तिः शान्तिः शान्तिः ।

हरिः ॐ ।

इति कृष्णयजुर्वेदीयतैत्तिरीयारण्यके षष्ठः प्रपाठकः समाप्तः ॥ ६ ॥

यो दर्शपूर्णमासादिः पितृमेधान्त ईरितः ।
कर्मकाण्डः समग्रोऽयं व्याख्यातो बालबुद्धये ॥ १ ॥
वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ २ ॥

इति श्रीमद्वीरबुक्कणसाम्राज्यधुरंधरश्रीमत्सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे कृष्णयजुर्वेदीयतैत्तिरीयारण्यकभाष्ये षष्ठः प्रपाठकः समाप्तः ॥ ६ ॥

---

१ म °र्णं ये ।